# चिकित्साकलिका

संपादकः—

कविराज नरेन्द्रनाथ मित्रः ।

# चिकित्साकलिका

श्रीमता तीसटाचार्य्येण प्रणीता

तत्पुत्रेण श्रीचन्द्रटाचार्य्येण प्रणीतया

संस्कृतव्याख्यया च समुद्भासिता

सा चेयं

## कविराज नरेन्द्रनाथ मित्रमहोदयैः

सम्पादिता परिशोधिता च

*आयुर्वेदाचार्य्येण श्रीजयदेव विद्यालंकारेण*

प्रणीतया परिमलाख्यया हिन्दीव्याख्यया समन्विता च

सा चेयं

## लवपुरीय–मित्रौषधालयाध्यक्षवर्यैः

प्रकाशिता

१९८३ विक्रमाब्दाः

अस्य ग्रन्थस्य सर्वेऽधिकाराः प्रकाशकैः स्वायत्तीकृताः.

प्रथमावृत्तिः १०००    मूल्यम्—४) रूप्यकाणि

# CHIKITSA-KALIKA

OR

# ESSENTIALS OF TREATMENT

BY

## TISATACHARYA

With the commentary of Chandrata

EDITED AND REVISED BY

## KAVIRAJ NARENDRA NATH MITRA

**AND**

TRANSLATED INTO HINDI BY

JAYADEVA Vidyalankara Ayurveda-charya.


**PUBLISHED BY**

MITRA AYURVEDIC PHARMACY

NEAR TAHSIL POST OFFICE

LAHORE.



ALL RIGHTS RESERVED.



*1st Edition.* *11,000 Copies.*

Price Rs. 4/- Foreign 6s. 6d.

PRINTED AT
THE HINDI PRESS, LAHORE.

# भूमिका।

अयि आयुर्वेदग्रन्थनिकरपारावारपारीणाः! चिकित्सामृतपानधुरीणाः!! प्राणाचार्यचूडामणयः!!!

नैतदविदितमस्ति तत्र भवतां भवतां यत्सकल-लोकाभिलषणीयारोग्यविज्ञान-रत्नोद्भास्वरं आयुर्वेदविधानवद्यग्रन्थरत्नाकरमवगाहमानानामारोग्यामृताभिषेकस्तावद-निवार्य इति। नास्ति चात्र विसंवादः केषामप्यक्षरजुषां भिषजाम्। एतान्येव हि ग्रन्थरत्नानि आर्षचिकित्साकौशलस्य परिचयमुपजनयन्ति, व्युत्पादयन्ति व्युत्पित्सून् वैद्यान् आयुर्वेदीयविद्यार्थिनश्च। एतान्येव हि परिशीलितानि समुन्मीलयन्ति लोचने चिकित्सा-पदवी-परिसरण-विश्रान्त-चेतसां भिषजाम्। एतैरेव पूर्वजानां ऋषीणां महर्षीणामाचार्याणाञ्च लोकातिशायीनि चिकित्साकौशलानि वयमवबोध्यामहे। एतेभ्य एव ग्रन्थरत्नेभ्य भारतीयानां भिषग्भूषणानां लोकोत्तरातिविलक्षणा चिकित्साचातुरी समुन्मिषन्ती विस्मापयते वैदेशिकानामपि विदुषां मनांसि। तादृशान्येवातिदुर्लभानि प्राचीनानि ग्रन्थरत्नानि विलोकयितुं नोत्कण्ठन्ते केषां चेतांसि? तादृशेष्वेवहि चिकित्साकलिकाख्यं ग्रन्थरत्नमिदम्।

ग्रन्थोऽयमद्यावधि अमुद्रित एवासीत्। केवलमस्य उपलब्धः कियानंशो जर्मन-देशीयेन बुर्ज-वर्गविश्वविद्यालयसंकृताध्यापकेन श्रीमता Dr. J. JOLLY Ph. D. महोदयेन आंग्लभाषाक्षरैर्मुद्रापितः। ग्रन्थमिममविकलं समधिगन्तुं महोदयेनानेन महान् प्रयत्नोऽकारि परं साफल्यं नालम्भि। मया तु मुम्बापुरीस्थानां प्राचीनायुर्वेद-ग्रन्थरत्न-प्रकाशन-व्रतदीक्षितानां सुहृद्वर्याणां श्रीमतां यादवशर्म्मणां तथान्येषाञ्च भिषग्वराणां साहाय्यात्पुस्तकत्रयमुपलब्धम्। तत एवास्य ग्रन्थस्य सम्पादने मुद्रणे च प्रयत्नः प्रावर्तिषि मया।

किमस्य ग्रन्थस्याभिधानम्? को वा सुगृहीतनामधेयोऽस्य प्रणेता? कीदृशोऽयं ग्रन्थः? इत्यादिकं प्रश्नजातं च ग्रन्थकारनिर्दिष्टैनैव-( "सूर्याश्विधन्वन्तरि–" "हारीत सुश्रुत–" इत्यादि ) आद्यपद्यद्वयेन सम्यक् प्रतीयते। चिकित्साकलिकायाञ्चास्या मन्यायुर्वेदीयग्रन्थदुर्लभमेतद्वैशिष्ट्यं वर्तते यदियं ग्रन्थप्रणेतृपुत्रेणैव श्रीचन्द्रटाचार्य्येण प्रणीतया सुविस्तृतया सरलया च संस्कृतव्याख्यया तथा मदन्तेवासिना आयुर्वेदा-चार्य्येण श्रीजयदेव विद्यालंकारेण प्रणीतया परिमलाख्यया हिन्दीव्याख्ययापि समन्विता सती मुद्रितेति। चिकित्साकलिकेयमेतादृशैः सरलसरलैर्मनोहारिभिः सुवर्णै-

ललितमृदुलदलैः पद्यप्रसूनैस्तथा निबद्धा यथा सुकुमारमतयोऽपि भिषज अष्टांग-प्रविभक्तस्य आयुर्वेदस्य रहस्यमनायासेनैवाधिगन्तुं पारयेयुः । अष्टांगमायुर्वेदं सङ्क्षिप्य चिकित्साकलिकायां सन्निवेशयन्नयं ग्रन्थकारः—

" कलशेः जलधिः समर्पितः " इतीमां लोकोक्तिं स्मारयति सादरम् ।

अपि च ग्रन्थेऽस्मिन् विबुधवृन्दैरप्यतिदुर्बोध्यस्य त्रिधातुतत्वस्य व्याख्यानावसरे श्रीमता ग्रन्थकृता एतादृक् पाण्डित्यं प्रकटितम्—यदेकस्मिन्नेवातिसरले ( ३४ पृष्ठस्थे " चेष्टाचेतनयोः " इत्यस्मिन् ) पद्ये त्रयाणामेव धातूनां लक्षणं वर्णितम् ।

श्रीमता ग्रन्थकारतनूभुवा चन्द्रटाचार्य्येण प्रणीता एतद्ग्रन्थस्य व्याख्यापि अनुपमैवेति नात्यतिशयोक्तिः । अपिचास्यां व्याख्यायां मूलार्थप्रस्फोटनाय अनेन कियान्परिश्रमः कृत इति "दोष-प्रदेश-बलकाल-विकार-सत्व-" इत्यस्य पद्यस्य ( अष्टादशपृष्ठात्मकेनैव ) व्याख्यानेन स्पष्टीक्रियते ।

अस्य सव्याख्यस्य ग्रन्थस्य सम्पादने संशोधने च मत्प्रधानान्तेवासिना श्रीसदानन्दशास्त्रिणा प्राणाचार्येण यद् दक्षिणहस्तायितम्, यच्च मच्छिष्यान्यतमेन श्रीजयदेव विद्यालंकारेण परिमलाव्याख्यानिर्माणे तथा श्रीमता सोमकीर्तिना विद्यालंकारेण हस्तलिखितपुस्तक-प्रतिलिपिकरणे महान् प्रयत्नःकृत इति इमे त्रयोऽपि शिष्या आशीर्भिरभिनन्द्यन्ते मया । एवंभूतग्रन्थरत्नस्य मुद्रणेन चेद्भारतीयभिषजां परितोषः स्यात्तर्हि आत्मनः परिश्रमं सफलमाकलयिष्यामि ।

इति निवेदयति—

भिषजां वशंवदः

**कविराज नरेन्द्रनाथ मित्रः**

# चिकित्साकलिकाया विषयानुक्रमणिका ।


| विषयाः | पृष्ठांकाः |
| --- | --- |
| मंगलाचरणम् ... | १ |
| चिकित्साकलिकाया परिचयः | ३ |
| अस्या उपयोगिता ... | ४ |
| व्याध्याधारस्य शरीरस्य व्याख्यानम् | ५ |
| दोषाणां त्रैविध्यादिकत्वम् ... | ७ |
| साध्यामयानां स्वरूपम् ... | ८ |
| याप्यासाध्ययोः स्वरूपम् ... | ९ |
| कर्मजामयगणना ... | ११ |
| कर्मजामयेषु दैवव्यपाश्रयचिकित्सा | १२ |
| दोषजविकाराणां भेषजसाध्यत्वम् | १४ |
| कर्मदोषजामयानां कृच्छ्रसाध्यत्वम् | १४ |
| दोषादिपरीक्षणम् ... | १५ |
| वातादीनां लक्षणानि ... | ३४ |
| धातूनां मलानां च गणना ... | ३५ |
| स्वस्थस्वरूपम् ... | ३६ |
| सिराणां सकलशरीरव्यापित्वम् | ४० |
| हृद्गुदनाभिमर्मणां प्राधान्यम् | ४२ |
| रोगकारण-स्वरूप-चिकित्सितानां क्रमशो ज्ञानावश्यकता ... | ४४ |
| वातप्रकोपणानि ... | ४४ |
| पित्तप्रकोपणानि ... | ४५ |
| कफप्रकोपणानि ... | ४५ |
| वातप्रकोपलक्षणम् ... | ४७ |
| पित्तप्रकोपलक्षणम् ... | ४९ |
| कफ-प्रकोपलक्षणम् ... | ५० |
| वातप्रकोपचिकित्सा ... | ५३ |
| पित्तप्रकोपचिकित्सा ... | ५३ |
| कफप्रकोपचिकित्सा ... | ५४ |
| औषधगणचिकित्सा ... | ५४ |
| वातामयघ्नो रास्नादिगणः ... | ५५ |
| पित्तामयघ्नः काकोल्यादिगणः | ५५ |
| कफामयघ्नः पिप्पल्यादिगणः | ५६ |
| वातपित्तघ्नः शालिपर्ण्यादिगणः | ५७ |
| वातकफघ्नः कट्फलादिगणः ... | ५७ |
| पित्तकफघ्नस्त्रायन्तिकादिगणः | ५७ |
| त्रिफलागणः ... | ५८ |
| त्रिकटुकम् ... | ५९ |
| पञ्चकोलम् ... | ५९ |
| पञ्चवल्कलम् ... | ६० |
| एलादिगणः ... | ६० |
| अष्टवर्गः ... | ६१ |
| त्रिसुगन्धिचतुर्जातके ... | ६१ |
| वरुणादिगणः ... | ६२ |
| महल्लघुपञ्चमूले ... | ६३ |
| दशमूलम् ... | ६४ |
| गणोक्तभेषजैस्तैलादिसाधनम् | ६४ |
| शरीरशोधनकालः ... ... | ६५ |
| शोधनक्रमः ... | ६६ |
| पाचनानि ... | ६७ |
| रास्नातैलम् ... | ६८ |
| बलातैलद्वितयम् ... | ६९ |
| सहचर-गुडूची-प्रसारणी-तैलानि | ७० |
| वासाघृतम् ... | ७१ |
| षट्पलघृतम् ... | ७२ |
| पृथुषट्पलघृतम् ... | ७२ |
| स्वेदप्रयोगः ... | ७३ |
| वमनप्रयोगः ... | ७३ |
| दोषभेदेन विरेचनप्रयोगः ... | ७४ |
| निरूहणम् ... | ७५ |
| अनुवासनम् ... | ७८ |
| लंघनार्हा रोगाः ... | ८२ |
| सुलंघितस्य लक्षणम् ... | ८३ |

| विषयाः | | पृष्ठांकाः |
|---|---|---|
| पथ्यपरिगणना | ··· | ८४ |
| कायचिकित्सायां रोगाधिकार— | | |
| चिकित्सा क्रमः | ··· | ८६ |
| शालाक्यादितन्त्रक्रमः | ··· | ८७ |
| *** ज्वरचिकित्सा *** | | |
| उष्णजलार्हा रोगाः | ··· | ८८ |
| शीतजलार्हा रोगाः | ··· | ८८ |
| यवागू-प्रयोगः | ··· | ९० |
| कफज्वरे मुद्गयूषः | ··· | ९१ |
| निरामवातज्वरे मांसरसः | ··· | ९१ |
| वातादिदोषघ्नास्त्रयः क्वाथाः | ··· | ९२ |
| विश्वादिकषायः | ··· | ९३ |
| आयोग्यपञ्चककषायः | ··· | ९४ |
| कृष्णादिकषायः | ··· | ९४ |
| दुरालभादिकषायः | ··· | ९५ |
| गुडूच्यादिकषायः | ··· | ९५ |
| निम्बादिकषायः दशमूलक्वाथश्च | | ९६ |
| पटोलादिकषायः | ··· | ९७ |
| तृतीयकघ्नो नागरादिकषायः | ··· | ९७ |
| चातुर्थकघ्नः पथ्यादिक्वाथः | ··· | ९८ |
| पिप्पलीवर्द्धमानम् | ··· | ९८ |
| षट्पलघृतम् | ··· | १०० |
| पृथुषट्पलघृतम् | ··· | १०१ |
| पिप्पल्यादिघृतम् | ··· | १०१ |
| लाक्षादितैलम् | ··· | १०२ |
| षट्कन्धरतैलम् | ··· | १०३ |
| *** अतीसारचिकित्सा *** | | |
| अतिसारे चिकित्साक्रमः | ··· | १०३ |
| अतिसारे पथ्यक्रमः | ··· | १०४ |
| आमातिसारघ्नास्त्रयः क्वाथाः | ··· | १०५ |
| कलिंगादिकषायः | ··· | १०५ |
| कलिंगषट्कः कषायः | ··· | १०६ |

| विषयाः | | पृष्ठांकाः |
|---|---|---|
| हरीतकीप्रयोगः | ··· | १०६ |
| नागरादिकषायः | ··· | १०७ |
| गंगाधरचूर्णम् | ··· | १०७ |
| पक्वातिसारघ्नं योगद्वयम् | ··· | १०८ |
| श्रीपर्णिकादिपुटपाकः | ··· | १०९ |
| तित्तिरपुटपाकः | ··· | १०९ |
| *** ग्रहणीचिकित्सा *** | | |
| ग्रहणीचिकित्साक्रमः | ··· | ११० |
| भूनिम्बादिचूर्णम् | ··· | १११ |
| ग्रन्थिकाद्यं चूर्णम् | ··· | १११ |
| चांगेरीघृतम् | ··· | ११२ |
| कल्याणकगुडः | ··· | ११३ |
| भल्लातकगुडः | ··· | ११४ |
| *** अर्शश्चिकित्सा *** | | |
| अर्शसां सामान्यलक्षणम् | ··· | ११६ |
| अर्शसां चिकित्साभेदास्तत्क्रमश्च | | ११७ |
| कांकायनवटकः | ··· | ११९ |
| सूरणमोदकः | ··· | १२० |
| प्राणदमोदकः | ··· | १२१ |
| *** भगन्दरचिकित्सा *** | | |
| भगन्दरचिकित्साक्रमः | ··· | १२२ |
| *** श्वयथुचिकित्सा *** | | |
| शोफहरं योगत्रयम् | ··· | १२५ |
| कृष्णाद्यं चूर्णम् | ··· | १२५ |
| कंसहरीतकी | ··· | १२६ |
| *** उदररोगचिकित्सा *** | | |
| रोहीतकादिकषायः | ··· | १२७ |
| नारायणचूर्णम् | ··· | १२८ |
| पटोलाद्यं चूर्णम् | ··· | १३० |
| विस्ताद्यंचूर्णम् | ··· | १३१ |
| रोहीतकघृतम् | ··· | १३२ |
| दशमूलघृतम् | ··· | १३२ |

| विषयाः | पृष्ठांकाः |
| --- | --- |
| *** गुल्मचिकित्सा *** | |
| हिंग्वाद्यं चूर्णम् ... | १३३ |
| हिंग्वाद्यंघृतम् ... | २३४ |
| बिन्दुघृतम् ... | १३५ |
| महाबिन्दुघृतम् ... | १३६ |
| *** विद्रधिचिकित्सा *** | |
| वरुणकषायः ... | १३७ |
| त्रिफलागुग्गुलुघृते ... | १३८ |
| *** गण्डमालाचिकित्सा *** | |
| काञ्चनारकषायः ... | १३९ |
| तुम्बीतैलम् ... | १३९ |
| *** विस्फोटचिकित्सा *** | |
| विस्फोटचिकित्साक्रमः ... | १४० |
| *** श्लीपदचिकित्सा *** | |
| श्लीपदक्रमः ... | १४१ |
| *** वातरक्तचिकित्सा *** | |
| वातरक्तक्रमः ... | १४२ |
| *** विसर्पचिकित्सा *** | |
| विसर्पक्रमः ... | १४२ |
| *** कुष्ठचिकित्सा *** | |
| त्रिफलादिनवककषायः ... | १४३ |
| तिक्तक-महातिक्तकघृते ... | १४४ |
| वज्रक-महाखादिरघृते ... | १४६ |
| खदिरघृतम् ... | १४८ |
| मरिचाद्यं तैलम् ... | १४९ |
| अयस्कृतिः ... | १४९ |
| *** श्वित्रचिकित्सा *** | |
| अवल्गुजबीजचूर्णम् ... | १५२ |
| नीलघृतम् ... | १५३ |
| महानीलघृतम् ... | १५४ |
| *** प्रमेहचिकित्सा *** | |
| मुस्तादिकषायः ... | १५५ |
| धान्वन्तरं घृतम् ... | १५६ |
| *** पाण्डुरोगचिकित्सा *** | |
| मण्डूरवटकः ... | १५८ |
| विभीतकलवणम् ... | १५९ |
| नवायसचूर्णम् ... | १६० |
| *** श्वासकासचिकित्सा *** | |
| भार्गीहरीतकी ... | १६१ |
| व्याघ्रीहरीतकी ... | १६२ |
| चित्रकहरीतकी ... | १६३ |
| व्याघ्रीघृतम् ... | १६४ |
| *** रक्तपित्तचिकित्सा *** | |
| रक्तपित्तघ्ना घृतयोगाः ... | १६६ |
| वासाकषायः ... | १६६ |
| खण्डकूष्माण्डकः ... | १६७ |
| एलादिगुटिका ... | १६८ |
| *** तृष्णाचिकित्सा *** | |
| लाजादिवटकः ... | १६९ |
| लाजादिकषायाः ... | १७० |
| *** छर्दिचिकित्सा *** | |
| पथ्यादिचूर्णम् ... | १७१ |
| *** हिक्काचिकित्सा *** | |
| हिक्काहरं योगद्वयम् ... | १७१ |
| *** शूलचिकित्सा *** | |
| हिंगुपञ्चक चूर्णम् ... | १७२ |
| हिंग्वष्टकचूर्णम् ... | १७२ |
| विश्वाद्यंचूर्णम् ... | १७३ |
| तुम्बर्वाद्यचूर्णम् ... | १७३ |
| दाधिकघृतम् ... | १७४ |
| सप्तविंशकगुग्गुलुः ... | १७४ |
| *** उदावर्तचिकित्सा *** | |
| गोमूत्रादिवर्तिः ... | १७६ |

| विषयाः | पृष्ठांकाः |
|---|---|
| *** मूत्रकृच्छ्रचिकित्सा *** | |
| त्रुट्यादिक्काथः ... | १७७ |
| *** शोषचिकित्सा *** | |
| शोषे चिकित्साक्रमः ... | १७८ |
| च्यवनप्राशः ... | १७९ |
| अमृतप्राशः ... | १८२ |
| शिवगुटिका ... | १८३ |
| शिलाजतुयोगः ... | १९१ |
| *** कृमिचिकित्सा *** | |
| फञ्ज्यादिकषायः ... | १९२ |
| *** कायचिकित्सा *** | |
| एरण्डतैलप्रयोगः ... | १९३ |
| गुग्गुलुयोगः ... | १९३ |
| व्रणेषु गुग्गुलुयोगः ... | १९४ |
| वातामये वातरक्ते च गुग्गुलुयोगः | १९४ |
| हरीतकीयोगाः ... | १९५ |
| त्वग्दोषे श्वित्रे च योगाः ... | १९६ |
| गुल्मशूलादिषु योगत्रयम् ... | १९६ |
| उन्मादादौ ब्राह्मीरसयोगः ... | १९६ |
| गुडूचीफलत्रिकयोर्योगद्वयम् ... | १९७ |
| विविधरोगहरा योगाः ... | १९७ |
| दशमूलकषायः ... | १९८ |
| विश्वौषधस्य योगत्रयम् ... | १९९ |
| हिङ्ग्वादिचूर्णम् ... ... | २०० |
| *** शालाक्यतन्त्रम् *** | |
| नेत्ररोगचिकित्सा ... | २०१ |
| आश्च्योतनालेपने ... | २०२ |
| त्रिफलादिकषायाः ... | २०३ |
| पटोलाद्यं घृतम् ... | २०३ |
| महात्रैफलघृतम् ... | २०४ |
| त्रिफलाघृतम् ... | २०५ |
| त्रिफलाप्रयोगः ... | २०५ |
| सुदर्शनावर्तिः ... | २०६ |
| सौवीराञ्जनम् ... | २०६ |
| दिनान्ध्यनक्तान्ध्यहरीवर्तिका | २०७ |
| रात्र्यन्धहरीवर्तिका ... | २०७ |
| पिल्लशुक्रघ्नमञ्जनम् ... | २०८ |
| लेखनाञ्जनम् ... | २०८ |
| *** नासारोगचिकित्सा *** | |
| हिङ्ग्वादितैलम् ... | २०९ |
| *** कर्णरोगचिकित्सा *** | |
| कर्णशूलादिहरा विविधतैलयोगाः | २१० |
| क्षारतैलम् ... ... | २११ |
| *** मुखरोगचिकित्सा *** | |
| गुञ्जाप्रभतैलम् ... | २१२ |
| क्वाथद्वयम् ... ... | २१४ |
| *** शिरोरोगचिकित्सा *** | |
| मायूरघृतम् ... | २१४ |
| षड्बिन्दुतैलम् ... | २१५ |
| पलितघ्नं तैलद्वयम् ... | २१६ |
| *** शल्यतन्त्रम् *** | |
| क्षाराग्निशस्त्रप्रयोगार्हा रोगाः ... | ११७ |
| शोणितमोक्षप्रयोगः ... | २१९ |
| गुग्गुलुतिक्तकं घृतम् ... | २२१ |
| *** वातरोगचिकित्सा *** | |
| रास्नादिकषायः ... | २२२ |
| पक्वाशयगतवातचिकित्सा ... | २२२ |
| बलातैलम् ... ... | २२३ |
| रास्नादिबस्तिः ... ... | २२४ |
| शतावरीतैलम् ... | २२५ |
| पृथुशतावरीतैलम् ... | २२६ |
| मध्यशतावरीतैलम् ... | २२७ |
| गुडूची-प्रसारणी रास्नासहचर बलातैलानि ... | २२७ |

| विषयाः | पृष्ठांकाः |
|---|---|
| दशांगतैलम् | २३० |
| मध्यमप्रसारिणीतैलम् | २३१ |
| महाप्रसारिणीतैलम् | २३३ |
| लघुप्रसारिणीतैलम् | २३४ |
| गुडूचीतैलम् | २३४ |
| बलातैलम् | २३५ |
| क्षारनिर्माणप्रकारः | २३६ |
| *** भूतविद्या *** | |
| सिद्धार्थकघृतम् | २३८ |
| कल्याणकघृतम् | २३९ |
| महाघृतम् | २४० |
| फलघृतम् | २४१ |
| महत्पञ्चगव्यघृतम् | २४२ |
| मण्डूकपर्णीघृतम् | २४३ |
| दशांगधूपः | २४४ |
| विजयधूपः | २४४ |
| *** कौमारतन्त्रम् *** | |
| अतिसारचिकित्सा | २४५ |
| मुखपाकगुदपाकयोःक्रमः | २४६ |
| छर्दिकासचिकित्सा | २४६ |

| विषयाः | पृष्ठांकाः |
|---|---|
| *** विषतन्त्रम् *** | |
| स्थावरजंगमविषहरो योगः | २४७ |
| सर्पदष्टचिकित्सा | २४७ |
| प्राचेतसं चूर्णम् | २४७ |
| सर्पमूषिकयोरुच्चाटनम् | २४८ |
| आस्तीकोऽगदः | २४९ |
| मूषिकविषचिकित्सा | २४९ |
| अलर्कविषक्रमः | २५० |
| *** रसायनतन्त्रम् *** | |
| कनकशिलाजत्वादिरसायनानि | २५० |
| हस्तिकर्णप्रयोगः | २५१ |
| एरण्डतैलरसायनम् | २५१ |
| आमलकरसायनम् | २५२ |
| सुवर्णरसायनम् | २५२ |
| *** वाजीकरणतन्त्रम् *** | |
| शतावर्यादिचूर्णानि | २५३ |
| वाजीकराश्चत्वारो योगाः | २५४ |
| वाजीकरं चूर्णम् | २५४ |
| ग्रन्थोपसंहारः | २५५ |


॥ इति ॥

—:०:—

# चिकित्साकलिका-टीका-धृतानां प्राचीनानामाचार्याणां तन्त्राणां च नामानि ।


| नामानि | पृष्ठांकाः | नामानि | पृष्ठांकाः |
|---|---|---|---|
| चरकाचार्यः | (१), (५), (७), (८), (१०), (१४), (१५), | सिद्धसारः | (७४) |
| हरिचन्द्र | (१), | हारीतः | (७६) (९९) (१००) (११५) (१३४), (१५५), |
| भट्टः | १ | विदेहः | (९०), (९२), (२०२), (२११), (२३३), (२४४), |
| सुश्रुताचार्यः | (५), (६), (७), (११), (१४), (१५), | ग्रन्थान्तरम् | (९७) (१४०) (१७५) (१८४) (१८५), (१८६) |
| आत्रेयः | (७), | भोजः | (९९) |
| तन्त्रान्तरम् | (१२), (३८), (३९), (८०), (८९), (९३), (१९५), (२११), (२२३), (२२४) | औपधेनवौरभ्रपुष्कलावतादयः | (११७), |
| | | कांकायनः | (११८), |
| | | चरकमुनिः | (१३०) |
| चक्षुष्येणः | (१६), (२२), (३२), (७४), (७५), (८०), (२१८), (२२३), | जेज्जटः | (१), (१४५), (१६०) |
| क्षारपाणिः | (१९) (१४४) (१५३), (१८४) | सुश्रुतमुनिः | (१५२), |
| खरनादः | (२०), (२३), (२६), (२७) (७६) (२२३), | अश्विनौ | (१६२) |
| | | वृद्ध भोजः | (२००), |
| रसवैशेषिकः | (२२) (२४) | कपिल बलः | (२२३) |
| अन्ये | (२८) (२९) | विश्वामित्रः | (२३७) |
| भेलः | (७३) (७४) | वृद्धविदेहः | (८०) |
| पराशरः | (७६), | | |


——:o:——

॥ ओ३म् ॥

श्री धन्वन्तरये नमः

# चिकित्साकलिका ।

अथ मङ्गलाचरणम्—

यं वेदान्तविदो वदन्ति पुरुषं वेदात्मकं योगिनः
सांख्यास्तत्वविदो जपन्ति सततं यं पञ्चविंशात्मकम् ।
बौद्धा बोधमयं यदक्षरमिदं ध्यायन्ति तेजः परं
स ब्रह्मः सततं करोतु विभवं वाचः परं मे शुभम् ॥
तीसटसूनुर्भक्त्या चन्द्रटनामा भिषङ्मतश्चरणौ ।
नत्वा पितुश्चिकित्साकलिकाविवृतिं समाचष्टे ॥
व्याख्यातरि हरिचन्द्रे श्रीजेज्जटनाम्नि सति सुधीरे च ।
अन्यस्यायुर्वेदे व्याख्या धाष्टर्यं समावहति ॥

धर्म्मार्थकाममोक्षपरैः सर्वैरेव सत्पुरुषैः शरीरारोग्याय महान् प्रयत्नः कर्त्तव्य इत्युक्तं हि चरकाचार्येण—"धर्म्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम् । रोगास्तस्यापहर्तारः श्रेयसो जीवितस्य च ॥" इति । तत्रायुर्वेदशास्त्रं सम्यगपरिज्ञातमनर्थाय, सम्यक्विदितं च महद् गुणाय संपद्यते । तथा चोक्तं चरकाचार्येण—"यथा विषं यथा शस्त्रं यथाग्निरशनिर्यथा । तथौषधमविज्ञातं विज्ञातममृतोपमम् ॥" तस्माद् यथावदर्थपरिज्ञानाय व्याख्यानश्रवणे महान् प्रयत्नः कार्य्यः । इत्यतः आयुर्वेदाङ्गताया अमृतयोगमालायाश्चिकित्साकलिकाया व्याख्या प्रस्तूयते । सा च षड्विधा । तथा चोक्तम्—"उपोद्घातः पदं चैव पदार्थः पदविग्रहः । चालना प्रत्यवस्थानं व्याख्या तन्त्रस्य षड्विधा ॥" तत्र उपोद्घातः शास्त्रसमुत्थानसम्बन्धाभिधेयप्रयोजनानि । भट्टेनाप्युक्तम्--"चिन्तां प्रकृतसिद्धार्थामुपोद्घातं प्रचक्षते" इति । तन्त्रस्यायुर्वेदस्य सम्बन्धो गुरुपूर्वक्रमलक्षणः स्वयमेव सुश्रुताचार्य्यप्रभृतिभि-

रुपदर्शितः । तथा चोक्तं सुश्रुते–"ब्रह्मा प्रोवाच, ततः प्रजापतिरधिजगे, तस्मादश्विनावश्विभ्यामिन्द्रः, इन्द्रादहं, मया त्विह प्रदेयमर्थिभ्यः प्रजाहितहेतोरित्यादौ। अभिधेयं पुनः शल्यादीन्यष्टावङ्गानि पुरुषार्थादिचतुष्टयं वा । प्रयोजनं तु व्याधिपरिमोक्षः स्वास्थ्यरक्षणं चेदमासन्नम्। विप्रकृष्टं धर्मार्थकाममोक्ष इत्येव ॥

चिकित्साकलिकायाः परिविघ्नविनाशनार्थं कोपशमनार्थं नमस्कारमाह ग्रन्थकारः—

सूर्याश्विधन्वन्तरिसुश्रुतादीन्
भक्त्या नमस्कृत्य पितुश्च पादान्।
कृता चिकित्साकलिकेति योगै-
र्माला सरोजैरिव तीसटेन ॥ १ ॥

तीसटेन योगैर्माला कृतेति क्रियापदम्। किं कृत्वा? नमस्कृत्य। कया? भक्त्या। कान्? सूर्याश्विधन्वन्तरिसुश्रुतादीन्। सूर्यश्च अश्विनौ च धन्वन्तरिश्च सुश्रुतश्च सूर्याश्विधन्वन्तरिसुश्रुतास्ते आदौ येषां ते तथा । आदिग्रहणेनौपधेनवैतरणौरभ्रपौष्कलावतात्रेयाग्निवेशचरकप्रभृतीनां ग्रहणम्। अस्मिंश्च श्लोके ब्रह्मशर्वोपेन्द्रादिदेवैर्विद्यमानैरपि यत् सूर्य्यादीनां नमस्करणं तत् प्रज्ञापूर्वकारित्वं ग्रन्थकर्तुः ख्यापयति। तथा च—आदौ सूर्य्यनमस्कारः शरीरारोग्याय। उक्तञ्च—'आरोग्यं भास्करादिच्छेन्मुक्तिमिच्छेज्जनार्दनात्। ईश्वरात् ज्ञानमिच्छेच्च धनमिच्छेद्धुताशनात् ॥' तथा कुलदेवतास्माकमिति। कुलदेवतात्वं तु तत्तेजःसमुत्पन्नत्वात्। सूर्य्यानन्तरमश्विनोर्नमस्करणमायुर्वेदाधिकज्ञानावबोधकम्। तथा चोक्तं–"अश्विनौ देवभिषजाविति"। तदनन्तरं धन्वन्तरेर्नमस्करणं अधिकृतमेतस्यादावारोग्यशास्त्रे। धन्वन्तरेरनन्तरं तु सुश्रुतादीनां तच्छिष्याणामायुर्वेदकर्तृणां नमस्कारः । तदनु आयुर्वेदाब्धिप्रतरणपोतपात्राणां पितुःपादानां नमस्कृतिरित्यनेन क्रमेण नमस्कारं कृत्वा तदनु योगमालानामकथनं चिकित्साकलिकेति। चिकित्सायाः कलिका चिकित्साकलिका, कलिकेव कलिका यथा पुष्पकलिका विवृतपत्रकेसरा सती प्रभूतगंधामोदख्यापका एवं चिकित्साकलिका-

प्यतिचिकित्सामोदावेदिका। कैरिव योगैर्मालाकृता ? सरोजैः पद्मैरिव मालाकार इति ॥ १ ॥

व्याख्याकर्तुः मङ्गलाचरणम्—

यद्भासा सुविभासते ह्यविरतं सर्वं जगन्मण्डलं
सम्भूतिः स्थितिरस्य चापि नियता यत्सत्तया निर्भरम्।
यच्चाप्यस्ति परात्परं यदपि वै संलभ्यते सर्वतः
तद्ब्रह्म प्रणयावधानमनसा सत्यं सदा धीमहि ॥ १ ॥
आत्रेयं भिषगग्रगण्यमतुलं त्वाचार्यचूडामणिं
राजर्षिन्त्वथ शल्यतन्त्रपरमाचार्यं च धन्वन्तरिम्।
अन्यांश्चापि महामुनीन् सुभिषजः सत्तन्त्रकारानहं
श्रीमन्तं च नरेन्द्रनाथमनिशं नौमि स्वविद्यागुरुम् ॥ २॥
आयुर्वेदाचार्यवर्य-जयदेवेन धीमता।
प्रणीयते परिमलाभिधा व्याख्या मनोहरा ॥ ३ ॥

सूर्य, आश्विनीकुमार, धन्वन्तरि, सुश्रुत आदि मुनियों को तथा अपने पिता के चरणों की भक्तिपूर्वक अभिवन्दना करके जैसे मालाकार कमल के फूलों से माला बनाता है उसी प्रकार तीसट ने अत्युत्कृष्ट योगों द्वारा माला बनाई है, जिसका नाम चिकित्साकलिका है ॥ १ ॥

पूर्वं योगैर्माला कृतेत्युक्तमथ किंविशिष्टैरित्यत आह—

**हारीतसुश्रुतपराशरभोजभेल-**
**भृग्वग्निवेशचरकादिचिकित्सकोक्तैः।**
**एभिर्गणैश्च गुणवद्भिरतिप्रसिद्धै-**
**र्धान्वन्तरीयरचनारुचिरप्रपञ्चैः ॥ २ ॥**

हारीतश्च सुश्रुतश्च पराशरश्च भोजश्च भेलश्च भृगुश्च अग्निवेशश्च चरकश्च हारीतसुश्रुतपराशरभोजभेलभृग्वग्निवेशचरकास्ते आदौ येषां ते तथा। आदिग्रहणात् वैतरणौरभ्रपुष्कलावतक्षारपाणि-जतूकर्णचक्षुष्येणविदेहनिमिप्रभृतयो गृह्यन्ते। तेषां चिकित्सितं तदुक्तैः। एभिरिति वक्ष्यमाणैर्योगैर्गणैश्च। किं विशिष्टैः? गुणवद्भिरतिप्रसिद्धैश्च। गुणाः विद्यन्ते येषां ते गुणवन्तस्तैर्गुणवद्भिः। गुणवत्त्वं चैषां प्रागेवारोग्यसंपादनात्। अतिप्रसिद्धैरिति। अतिशयेन

प्रसिद्धा अतिप्रसिद्धास्तैरतिप्रसिद्धैः। अतिप्रसिद्धत्वं तु पारम्पर्याविच्छेदस्मरणात्। अतिप्रसिद्धैः प्रख्यातैरित्यर्थः। पुनरपि त एव विशेष्यन्ते। धान्वन्तरीयरचनारुचिरप्रपञ्चैर्योगैर्गणैश्च। धन्वन्तरेरिमे धान्वन्तरीयाः शिष्यास्तेषां रचना सम्यक्करणं तया रुचिरः शोभनः प्रपञ्चो येषां ते तथा। प्रकर्षेण विवेचनमिति ॥ २ ॥

हारीत, सुश्रुत, पराशर, भोज, भेल, भृगु, अग्निवेश, चरक आदि चिकित्सकों द्वारा कहे गये तथा धन्वन्तरि के शिष्यों द्वारा बनाये हुए ग्रन्थों से अतिप्रसिद्ध एवं गुणयुक्त योगों तथा गणों का संग्रह कर इस ग्रन्थ का निर्माण किया है ॥ २ ॥

इदानीं पूर्वोक्तेन प्रकारेण विशिष्टैर्योगैर्या योगमाला कृता तस्याः सदसद्वैद्यादरकथनार्थमाह—

स्वल्पश्रुतस्य भिषजः किल सुश्रुतादि-
शास्त्रोदधौ मतिरबोधदृढप्रमूढा।
अस्मद्विधग्रथितयोगसमुच्चये तु
बध्नाति बुद्धिमबुधः सुभिषग्वरो वा ॥३॥

बुद्धिं बध्नातीति क्रिया। क्व? अस्मद्विधग्रथितयोगसमुच्चये। अस्मद्विधैरित्येतन्निन्दास्तुतिपरं वचनम्। ग्रथितः सुश्लिष्टः रचितो योगसमुच्चयः तस्मिन्। अबुधोऽपण्डितो बध्नाति बुद्धिम्। तुशब्दोऽत्र निपातो हेत्वर्थे द्रष्टव्यः। नानाप्रकारेष्वर्थेषु निपतन्तीति निपाताः। यस्मादबुधः स्वल्पश्रुतो भवति। स्वल्पं स्तोकं श्रुतं येन स तथा। तस्य इत्थम्भूतस्य भिषजो वैद्यस्य किल या मतिः। किलेति बाहुल्यं द्योतयति। सा च अबोधेन अनवगमेन दृढं अतिशयेन प्रमूढा चिन्ताविचारणाशून्येति यावत्। कस्मिन्? सुश्रुतादिशास्त्रोदधौ, सुश्रुतादीनां शास्त्रं सुश्रुतादिशास्त्रं तदुदधिरिव अर्थगाम्भीर्यात्, तस्मिन् सा विचारणाशून्येतिकृत्वास्मद्विधविरचिते स्तोकयोगसमुच्चये तु बध्नाति बुद्धिं अबुध इति निन्दा। सुभिषग्वरो वा बुद्धिमाबध्नाति। शोभना भिषजः सुभिषजस्तेषां वरः श्रेष्ठः। स यस्मात् सारग्राही। अस्मद्विधैः संग्रहपरैरायुर्वेदोदधिनिमग्नयोगरत्नोद्धरणलम्पटैर्विरचिते योगसमुच्चये बध्नाति बुद्धिं मतिमिति स्तुतिः ॥३॥

जिसने स्वल्प शास्त्रों का अध्ययन किया है-ऐसे वैद्य की सुश्रुत आदि शास्त्र रूपी समुद्र में बुद्धि अज्ञानवश प्रसरित नहीं हो सकती परन्तु हमारे द्वारा बनाये हुए योगसमुच्चय में तो मूर्ख तथा अभिज्ञ चिकित्सक दोनों की बुद्धि अच्छी प्रकार प्रसृत होती है ॥ ३ ॥

इदानीं सकलायुर्वेदाधिष्ठानभूतस्य सदसत्कर्म्मनिबद्धस्य कर्म-पुरुषस्य शरीरं व्याचिख्यासुराह—

यद्भूपयः शिखिसमीरवियद्भिरेभि-
र्भूतैर्गुणैरपि च सत्वरजस्तमोभिः।
त्वग्दोषधातुमलमर्मशिरादिभिश्च
व्याप्तं वपुस्तनुभृतामिदमत्र रोगाः ॥ ४ ॥

यद्वपुस्तनुभृतां व्याप्तमत्र रोगाः सभवन्तीति क्रिया। कैर्व्याप्तं? एभिर्भूतैः। कतमैः? भूपयःशिखिसमीरवियद्भिः। भूश्च पयश्च शिखी च समीरश्च वियच्च तानि तथा तैर्व्याप्तम्। व्याप्तत्वं तु तन्मयं पञ्चभूत-विकाररूपम्। तथा चोक्तं चरकाचार्येण—'गर्भस्तु खल्वन्तरिक्षवाय्व-ग्नितोयभूमिविकारश्चेतनाधिष्ठानभूत' इत्यादि। तद्गुणत्वं पञ्चमहाभूत-गुणोपलब्धितः। तथा च चरकाचार्य्यः—'खरद्रवचलोष्णत्वं भूजला-निलतेजसाम्। आकाशस्याप्रतीघातो लिङ्गमुक्तं यथाक्रमम्"॥ न केवलं भूतैर्गुणैरपि यद्वपुर्व्याप्तम्। गुणबाहुल्याद्विशिनष्टि सत्त्वरजस्तमोभिः। सत्वं च रजश्च तमश्च सत्वरजस्तमांसि तैः सत्वरजस्तमोभिस्तैर्व्याप्तं तन्मयत्वतद्गुणाभ्याम्। तथा च शारीरे सुश्रुताचार्य्यः—'तन्मयान्येव भूतानि तद्गुणान्येव चादिशेत्। तैश्च तल्लक्षणः कृत्स्नो भूतग्रामो व्यजन्यत'॥ तन्मयत्वं गुणैः कारणकार्य्यत्वेन सर्वेषामेव भूतानाम्। तथा चोक्तं शारीरे सुश्रुताचार्येण-'सत्वबहुलमाकाशम्। रजोबहुलो वायुः। सत्वरजोबहुलोऽग्निः। सत्वरजस्तमो बहुला आपः। तमो-बहुला पृथिवी। इयं कारणभूता व्याप्तिः। कार्य्यभूतव्याप्तिरपि सुश्रुते-नैवोक्ता-'आन्तरिक्षास्तु शब्दः शब्देन्द्रियं सर्वच्छिद्रसमूहो विविक्तता च। वायव्यास्तु स्पर्शः स्पर्शेन्द्रियं सर्वचेष्टासमूहः सर्वशरीरस्पंदनं लघुता च। तैजस्यं रूपं रूपेन्द्रियं वर्णः संतापो भ्राजिष्णुता पक्तिरमर्ष-

स्तैक्ष्ण्यं शौर्य्यं च । आप्या रसो रसेन्द्रियं सर्वद्रवसमूहो गुरुता शैत्यं स्नेहो रेतश्च । पार्थिवास्तु गन्धो गन्धेन्द्रियं सर्वमूर्त्तसमूहो गुरुता चेति । तद्गुणत्वं च भूतानाम् । सात्विका आनृशंस्यं संविभागरुचिता तितिक्षा सत्यं धर्मास्तिक्यं ज्ञातिर्बुद्धिर्मेधाधृतिः स्मृतिरनभिषङ्गश्च । राजसाः दुःखशीलत्वमटनशीलताधृतिरहंकारोऽनृतत्वमकारुण्यं दम्भो मानो हर्षः कामः क्रोधश्च । तामसा विषादित्वं नास्तिक्यमधर्मशीलता बुद्धिनिरोधोऽज्ञानं दुर्मेधस्त्वं अकर्मशीलत्वं निद्रालुत्वं चेति'। न केवलं गुणैर्व्याप्तं त्वग्दोषधातुमलमर्मशिरादिभिश्च व्याप्तम् । त्वगादिव्याप्तिश्च, तैर्व्यवस्थितिः । त्वचश्च दोषाश्च धातवश्च मलाश्च मर्माणि च शिराश्च, त्वग्दोषधातुमलमर्मशिरास्त आदौ येषां ते तथा । आदिग्रहणात् कलाशयपेशीस्नाय्वस्थिसंधिधमनीप्रभृतीनां ग्रहणम् । तथा चोक्तं सुश्रुतेन—त्वचः सप्त, कलाः सप्त, धातवः सप्त, आशयाः सप्त, सप्त शिराशतानि, पञ्च पेशीशतानि, नव स्नायुशतानि, त्रीण्यस्थिशतानि, द्वे दशोत्तरे सन्धिशते, सप्तोत्तरं मर्मशतं, चतुर्विंशति धमन्यः, त्रयोदोषास्त्रयो मलाः, नव स्रोतांसीति समासः'। तैर्व्याप्तं वपुः शरीरं पञ्चमहाभूतशरीरिसमवायः । केषां ? तनुभृतां । तनुः शरीरं बिभ्रति ये ते तनुभृतः कर्मपुरुषास्तेषामिदम् । एतत्पूर्वोक्तप्रकारेण पञ्चमहाभूतगुणत्वग्धात्वादिव्याप्तम् । अत्र रोगा भवन्ति रोगाः प्रजायन्ते । अत्र इत्यधिकरणत्वेन विनिर्द्दिशति । तथा चोक्तं सुश्रुतेन–'तस्मिन् क्रिया सोऽधिष्ठानमित्यादि'। रोगा इति सामान्येन जातिनिर्देशः । तेन शारीरागन्तुमानसस्वाभाविकभेदभिन्नाश्चतुर्विधा अपि गृहीताः । तथा चोक्तं सुश्रुताचार्येण—'ते चतुर्विधाः । आगन्तवः शारीरा मानसाः स्वाभाविकाश्चेति । शारीरा ज्वरकुष्ठाद्याः क्रोधाद्या मानसाः स्मृताः । आगन्तवोऽभिघातोत्थाः सहजाः क्षुत्तृडादयः'। तथा आदिजन्मदोषकालसंघातदैवस्वभावबलप्रवृत्ताः सप्तविधास्तेनैव सुश्रुतेनोक्ताः । वक्ष्यामाणाश्च वातादिभेदेन । ते सर्वत्र वपुषि रोगा भवन्तीति । अथ कोऽयं रोगो नाम ? कर्मपुरुषस्य दुःखसम्बन्धः । तथा चोक्तं सुश्रुतेन–"तद्दुःखसंयोगा व्याधय इत्युच्यन्ते"। तथान्यैरप्युक्तम् "विकृतदोषदूष्यसमवायो विकारः।" तथा च चरकः–"विकारो धातुवैषम्यं

साम्यं प्रकृतिरुच्यते । सुखसंज्ञकमारोग्यं विकारो दुःखमेव च ।"
रोगा व्याधयः । तथा च चरकः-"तत्र व्याधिरामयो गद आतंको यक्ष्मा ज्वरो विकारो रोग इत्यनर्थान्तरमिति" ॥ ४ ॥

शरीरधारियों का जो शरीर पृथिवी, जल, तेज, वायु, आकाश इन पञ्च-महाभूतों से तथा सत्व, रज, तम इन तीन गुणों से एवं त्वचा, दोष ( वात, पित्त, कफ ), धातु, मल, मर्म, शिरा आदियों से व्याप्त है, वह ही रोगाधिष्ठान है, उसी की चिकित्सा होती है । चेतनस्वरूप पुरुष चिकित्सा में अभीष्ट नहीं ॥४॥

साम्प्रतं ये चतुर्भेदभिन्नाः सप्तभेदभिन्नाश्च पूर्वं व्याख्याता विकारास्तेषां वातादिवैषम्येन त्रैविध्यादिभेदख्यापनायाह—

ते वातपित्तकफजास्त्रिविधा द्विधा च
काये मनस्यपि च सन्त्यपरे नराणाम् ।
साध्याः क्वचिद् क्वचिदपि प्रभवन्ति याप्याः
केचित्क्वचित्पुनरसाध्यतमाः प्रदिष्टाः ॥ ५ ॥

ते इति तद्ग्रहणात् यत्तदोर्नित्यमभिसम्बन्ध इति । ये तत्पूर्वमनेकभेदभिन्ना व्याख्याता विकारास्ते सर्वे वातपित्तकफजाः सन्ति भवन्ति । वातश्च पित्तं च कफश्च वातपित्तकफास्तेभ्यो जाता वातपित्तकफजाः । ते चानुबन्ध्यानुबन्धकभेदेन बहुविधाः । उक्तञ्च-'स्वतन्त्रो व्यक्तलिङ्गो यथोक्तसमुत्थानप्रशमो भवत्यनुबन्ध्यः । तद्विपरीतलक्षणश्चेत्यनुबन्धकः । त्रिविधास्त्रिप्रकाराः । तथा च चरकः-'त्रिविधा-व्याधयो भवन्त्याग्नेयसौम्यवायव्याः । न केवलं त्रिविधाः द्विधा च संभवन्ति राजसतामसभेदेन' । तथा चात्रेयः—" द्विविधाश्चापरे राजसास्तामसाश्च " । पुनरधिष्ठानभेदेन द्वैविध्यप्रतिपादनायाह 'काये मनस्यपि च सन्त्यपरे नराणाम् ।' काये शरीरे मनसि च सत्वसंज्ञके अपरे भवन्ति नराणां प्राणिनाम् । तथा च सुश्रुताचार्य्यः-'त एते मनःशरीराधिष्ठानाः' । पुनरप्यन्यत्साध्ययाप्यप्रत्याख्येयभेदेन त्रैविध्यं प्रतिपादयति । साध्यः क्वचिन्मर्मादिविमुक्ते काये सिद्ध्यति । द्विविधं साध्यमाह-सुखसाध्यं दुःखसाध्यं च । क्वचिदपि शरीरे याप्याः प्रभवन्ति । केचिद् रोगाः क्वचित् शरीरे पुनरसाध्यतमाः प्राणघ्नाः प्रदिष्टाः

उपदिष्टाः। असाध्यं द्विविधं, याप्यमनुपक्रम्यं चेति। याप्यमपि द्विविधं सुखदुःखभेदेन। ननु कथं व्याधीनामनेकभेदकथनमुच्यते? शिष्यमतिविकासार्थम्। आचार्यास्तु तथा शास्त्रं विदधति यथा शिष्याः सुखेन शास्त्रं संबिभ्रति। तथा च चरकः-'भेत्ता हि भेद्यमन्यथा भिनत्ति पुरस्ताद् भिन्नं भेदप्रकृत्यन्तरेण भिन्दन् शिष्यायाविशेषमापादयत्यनेकधा। न च पूर्वभेदाय मुह्यति। इति॥ ५॥

वात, पित्त तथा कफ की विषमता से पैदा होने वाले रोग शरीर तथा मन के अधिष्ठान भेद से दो प्रकार के; तथा साध्य, याप्य एवं असाध्य भेद से तीन प्रकार के होते हैं। इसी प्रकार यही रोग दृष्टिभेद से एक, दो, तीन, चार तथा बहुत प्रकार के भी हो सकते हैं। जैसे सम्पूर्ण रोग पीडाकर होने से एक प्रकार का; राजस,तामस भेद से दो प्रकार के; आग्नेय, सौम्य, वायव्य भेद से तीन प्रकार के; शारीर, मानस, आगन्तु एवं स्वाभाविक भेद से चार प्रकार के; तथा दोषों के परस्पर अनुबन्ध्य तथा अनुबन्धक भेद से बहुत प्रकार के होते हैं॥५॥

प्राक् साध्याः क्वचिदित्युक्तमतस्तत्साध्यत्वप्रतिपादनायाह-

एकैकदोषजनिता निरुपद्रवाश्च<br>
दीप्तानलस्य च सदात्मवतश्च जन्तोः<br>
वित्तान्वितस्य च रुजः सदुपक्रमेण<br>
साध्या भवन्ति भिषजामचिरोद्भवाश्च॥ ६॥

भिषजां सदुपक्रमेण रुजः साध्या भवन्तीति क्रिया। किं विशिष्टा रुजः? एकैकदोषजनिताः, एकैकेन दोषेण जनिता एकैकदोषजनिताः प्रादुर्भूता इत्यर्थः। निरुपद्रवाश्च-निर्गता उपद्रवा ज्वरातिसारश्वासकासतृष्णाहिक्काप्रभृतयो यासां ता निरुपद्रवाः। ताश्च अचिरोद्भवाः स्तोककालोद्भवाः प्रादुर्भूता रुजः। किंच दीप्तानलस्य च। दीप्तस्तीक्ष्णोऽनलो जाठरोऽग्निर्यस्य स दीप्तानलो जन्तुस्तस्य। सदा सर्वकालं आत्मवतश्च आत्मनिग्रहकारिणः। वित्तान्वितस्य वित्तेन द्रव्येण अन्वितस्य युक्तस्य। जन्तोः प्राणिनो रुजो विकारा यदि भवन्ति तदा सदुपक्रमेण सम्यक् प्रयोगेण साध्या भवन्ति। केषां? भिषजां सुवैद्यानाम्। तथा च चरकाचार्य्यैः—'प्रयोगज्ञानविज्ञानसिद्धिसिद्धाः सुखप्रदाः। जीविताभिसरा ये स्युर्वैद्यत्वं तेष्ववस्थितम्'॥ ६॥

जिस पुरुष की अग्नि प्रदीप्त है, जो अहित आहार एवं विहार से अपने आपको रोक सकता है तथा धनाढ्य पुरुष के एक ही दोष से उत्पन्न, उपद्रवों से रहित तथा नवीन उत्पन्न हुए २ रोग उत्तम वैद्यों की सच्चिकित्सा द्वारा साध्य होते हैं। धनाढ्य कहने का कारण यही है कि चिकित्सा में जिन२ उपकरणों की आवश्यकता होती है उन्हें वही पुरुष जो धनी हो एकत्रित कर सकता है ॥६॥

कश्चिदपि याप्या भवन्तीत्येतदुक्तं प्राक् तद्याप्यत्वप्रतिपादनायाह-

ये यावदेव भिषजामगदप्रयोगा-
स्तावत्प्रशान्तिमुपयान्त्यगदैर्विना ये ।
प्रादुर्भवन्ति च पुनः सहसा द्विदोषा-
स्तादृग्विधाः स्युरिति याप्यतमा गदास्ते ॥ ७ ॥

ते गदाः याप्यतमाः स्युर्भवेयुः ये यावत्कालमेव भिषजामगदप्रयोगा औषधकरणं तावत्प्रशान्तिमुपयान्ति उपशमं गच्छन्ति । अगदैरौषधैर्विना ये पुनः पश्चात्प्रादुर्भवन्ति सहसा शीघ्रं द्विदोषाः, द्वाभ्यां दोषाभ्यां संभवन्तीति द्विदोषाः । तादृग्विधा इत्यनेन प्रकारेण याप्यतमाः अतिशयेन याप्या गदा रोगा इति ॥ ७ ॥

जो रोग, जबतक सद्वैद्यों की चिकित्सा हो, तबतक शान्त रहें और चिकित्सा के हटते ही पुनः सहसा उत्पन्न हो जांय तथा जो रोग दो दोषों के संसर्ग से पैदा हों वे याप्य कहलाते हैं ॥ ७ ॥

पूर्वं केचिदसाध्यतमाः प्रदिष्टा रोगा इत्युक्तमतस्तान् प्रतिपादयन्निदमाह—

ये कर्मजाः सह भवन्ति शरीरिणां ये
ये च त्रिदोषचयजाश्चिरकालजाश्च ।
सोपद्रवाश्च्युतधनस्य च ते गताग्ने-
रुग्रा गदा गदवतामगदैरगम्याः ॥ ८ ॥

ते गदा अगदैरौषधैरगम्याः ये कर्मजाः प्राक्तनकर्मणो जाताः । सह भवन्ति शरीरिणां ये। शरीरं विद्यते यस्य स भवति शरीरीति। तद्गुणसंविज्ञानबहुव्रीह्याश्रयणात् । शरीरशरीरिभ्यां सहैककालं निष्पद्यन्ते। ते चादिबलप्रवृत्ताः जन्मबलप्रवृत्ताश्चेति। ये च त्रिदोषचयजाः त्रयाणां दोषाणां चयस्तस्माज्जाताः त्रिदोषचयजाः । चयः संहतिरूपा वृद्धिर्दोषा

णाम्। चिरकालजाश्च चिरं दीर्घकालं जाताः दीर्घकालजाः। सोपद्रवाः ये सहोपद्रवैर्ज्वरादिभिर्वर्त्तन्ते इति सोपद्रवाः। च्युतधनस्य ये धनरहितस्य गताग्नेर्विनष्टाग्नेर्ये ते सर्वे गदा गदवतां रोगवतां उग्रास्तीक्ष्णा मारणात्मकत्वात्। अगदैरौषधैरगम्या न साधनीया भवन्तीति ॥ ८ ॥

जो रोग अदृष्टवश उत्पन्न हुए हों, सहज हों, त्रिदोषज हों, पुरातन हों अथवा उपद्रवों से युक्त हों तो निर्धन तथा मन्दाग्नियुक्त पुरुष के लिये वे रोग असाध्य होते हैं, अर्थात् उन रोगों की चिकित्सा नहीं हो सकती ॥ ८ ॥

एवं साध्ययाप्यप्रत्याख्येयद्वारेण त्रैविध्यं प्रतिपाद्येदानीं दैवपुरुषकारौ पृथक्संयुक्तौ जनकौ सर्वव्याधीनामित्यनेन प्रपञ्चेनापरत्रैविध्यप्रतिपादनायेदमवोचत—

कर्मप्रकोपेण कदाचिदेके
दोषप्रकोपेण भवन्ति चान्ये।
तथापरे प्राणिषु कर्मदोष-
प्रकोपजाः कायमनोविकाराः ॥ ९ ॥

एके कायमनोविकाराः कर्मप्रकोपेण भवन्ति। अथ किमिदं कर्म तस्य च प्रकोपः कीदृक्? तदुच्यते-अन्यजन्मकृता क्रिया दैवाख्या कर्मेत्युच्यते। तस्य कर्मणः प्रकोपः कर्मप्रकोपः स्वपाकफलोदर्कता। इत्थम्भूतेन कर्मप्रकोपेण कदाचित् कस्मिंश्चित्काले भवन्ति। न केवलं कर्मप्रकोपेण दोषप्रकोपेण भवन्त्यन्ये। दोषाणां वातादीनां पुरुषकारजनितमिथ्याहारविहाराभ्यां प्रकोपः। प्रकोपशब्देन विलयनरूपा वृद्धिर्दोषाणामुच्यते। अन्ये पूर्वस्माद्विलक्षणा रोगा दोषप्रकोपेण भवन्ति। तथापरे प्राणिषु कर्मदोषप्रकोपजा विकारा भवन्ति। अपरे अन्ये प्राणिषु कर्मपुरुषेषु कर्मदोषप्रकोपजाः, यदा कर्मदोषौ समौ प्रकुप्यतः तदा काये मनसि च विकाराः पूर्वोक्ताः सर्वे भवन्ति। तथा च चरकः—"दैवमात्मकृतं विद्यात्कर्म यत्पौर्वदैहिकम्। स्मृतः पुरुषकारस्तु क्रियते यदिहापरम् ॥ बलाबलविशेषोऽस्ति तयोरपि च कर्मणोः ॥ दृष्टं हि त्रिविधं कर्म हीनं मध्यममुत्तमम् ॥ दैवं पुरुषकारेण दुर्बलं ह्युपहन्यते। दैवेन चेतरत्कर्म विशिष्टेनोपहन्यते॥ निर्दिष्टं दैवशब्देन कर्म यत्पौर्वदैहिकम्। हेतुस्तदपि कालेन रोगाणामुपलभ्यते ॥ नहि कर्म महत्

किंचित् फलं यस्य न भुज्यते । भूयस्ते कर्मजा रोगाः प्रशमं यान्ति तत्क्षणात्" ॥ तथा च सुश्रुतेप्युक्तम्–"कर्मजा व्याधयः केचित् दोषजाः सन्ति चापरे । कर्मदोषोद्भवाश्चान्ये कर्मजास्तेष्वहेतुकाः" । इत्यादि ॥

शारीर तथा मानस रोगों में से कदाचित् कोई रोग कर्मविपाक के कारण, कोई दोषप्रकोप से, तथा कोई कर्म तथा दोष दोनों के प्रकोप से पुरुषों में उत्पन्न हुआ करता है ॥ ९ ॥

कर्मप्रकोपेण भवन्तीत्युक्तं प्राक् । केवलं कर्मप्रकोपेण भवन्ति-ये तान् विकारानाह—

जठरगुदजोन्मादापस्मृत्यसृक्स्रुतिपङ्गुता
श्रुतिविकलता वाग्वैकल्यप्रमेहभगन्दराः ।
प्रदरपवनव्याधिश्वित्रक्षयक्षणदान्धता
तिमिरवदनघ्राणार्शांसि श्वयथ्वपचीव्रणाः ॥१०॥
वल्मीककाकणकशंखकपुण्डरीक-
रक्तार्बुदव्रणविसर्पवपुःप्रकम्पाः ।
पक्षाभिघातगलगण्डगलग्रहाश्च
दण्डापतानकसमीरणशोणिताद्याः ॥ ११ ॥
इत्यामयाः स्युरपरे द्रविणापहार-
गुर्वङ्गनागमनविप्रवधादिभिर्ये ।
दुःकर्मभिस्तनुभृतामिह कर्मजास्ते
नोपक्रमेण भिषजामुपयान्ति सिद्धिम् ॥ १२ ॥

इह ते कर्मजा रोगाः ये दुःकर्मभिस्तनुभृतां जठरादयो भवन्ति । जठरादीनामितरेतरद्वन्द्वसमासः । जठरमुदरम् । गुदजान्यर्शांसि । उन्मादो मनोविप्लुतिः । अपस्मृतिरपस्मारः । असृक्स्रुतिः रक्तपित्तम् । पङ्गुता सक्थ्नोर्बन्धः । श्रुतिविकलता बाधिर्यम् । वाग्वैकल्यं मूकत्वम् । प्रमेहः प्रकर्षेण मूत्रक्षरणं तदाविलता च । भगन्दरो गुदाभ्यासे व्रणः । प्रदरः स्त्रिया अनृतावपि आर्त्तवप्रवृत्तिः । पवनव्याधयो महावातरोगाः

आक्षेपकापतानकार्दितप्रभृतयः। श्वित्रं किलासम्। क्षयः शोषः। क्षणदान्धता राज्यन्धत्वम्। तिमिरं दृष्टिविनाशः। वदनघ्राणाशांसि मुखनासादुर्नामानि। श्वयथुः सर्वसरः शोफः। अपचीव्रणो गण्डमालाव्रणः। वल्मीको वल्मीकाकारो ग्रन्थिर्बहुव्रणः। काकणकं काकणन्तिकाकारं महाकुष्ठम्। शंखकः शिरोरोगः। पुण्डरीकं पद्मवर्णं महाकुष्ठम्। रक्तार्बुदं रक्तस्रावि मांसपिण्डम्। व्रणविसर्पः क्षतविसर्पः। वपुःप्रकम्पः सर्वशरीरचलनम्। पक्षाभिघातः पक्षवधः। गलगण्डो गले मुष्काकारः श्वयथुः। गलग्रहो गले अन्नपाननिरोधः। दण्डापतानको दण्डवत् स्तम्भः। समीरणशोणितं वातरक्तम्। आदिग्रहणेन सन्निपातविलम्बिकाहिक्काश्वासकासातिसाराश्मरीमूढगर्भादीनां ग्रहणम्। इत्यामयाः स्युरिति। इति शब्दः पूर्वोक्तादीनां परामर्शकः। आमया रोगाः स्युर्भवेयुः। दुःकर्मभिः पापकर्मभिः। कैः? अपरद्रविणापहारगुर्वङ्गनागमनविप्रवधादिभिः। अपरद्रविणापहारः परस्वहरणम्। गुर्वङ्गनागमनं गुरुपत्नीविध्वंसः। विप्रवधो ब्राह्मणवधः। आदिग्रहणेन पञ्चमहापातकोपपातकानि गृह्यन्ते। एभिर्दुःकर्मभिस्तनुभृतां शरीरभृतां ये रोगाः संभवन्तीह लोके ते कर्मजाः। नोपक्रमेण भिषजामुपयान्ति सिद्धिम्। भिषजां वैद्यानां संशोधनसंशमनादिना क्रिययोपक्रमेण युक्तिव्यपाश्रयेण नो सिद्धिं न साध्यत्वमुपयान्ति प्राप्नुवन्तीति। कर्मजत्वं चैषां दृष्ट्वा शास्त्रान्तरेषु तीसटाचार्येण चोक्तम्। तथा च तन्त्रान्तरम्—"अकृत्वा पावनं ये तु प्रासवन्तोऽन्तकक्षयम्। तेषां कर्मानुसारेण व्याधिः समुपजायते॥ कृत्वार्द्धमथ पादं वा किञ्चिन्न्यूनमथापि वा। साध्यासाध्यास्तथा याप्या आमयाः संभवन्ति हि॥ महान्ति यानि कर्माणि विशालं तेषु कीर्त्तितम्। लघुन्येनसि चोद्दिष्टं प्रायश्चित्तमविस्तरम्॥ ब्रह्मसज्जननारीणां वधाच्चौर्य्याद्भक्ष्यतः। अगम्यागमनात्पुंसां संयोगात्तैः पृथक् पृथक्॥ महान्ति पातकान्याहुर्दृष्टादृष्टविशारदाः। पुनर्जन्मान्तरग्राहि फलं तेषां प्रकीर्त्तितम्॥ उपभोगात् क्षयस्तस्य नान्यथा संप्रकीर्त्तितः। चिकित्सका वदन्त्येके धर्मशास्त्रविदो जनाः। तस्माच्चिकित्सितं कार्यं जन्मान्तरविशुद्धये॥ कुष्ठादिषु वदन्त्येके भूयो जातेऽपि संभवः। कुष्ठमेहोदरश्वित्रक्षयोन्मादभगन्दराः॥ अन्येऽपि दुर्निवाराः स्युर्व्याधयो

ये प्रकीर्त्तिताः। अतिशुद्धशरीराणां देहिनां तु भवान्तरे॥ भवान्तरेऽपसर्पन्ति तस्माच्छोधनमाचरेत्॥" एवमनया दिशा अन्येषामपि व्याधीनां कर्मजत्वमूह्यत इति ॥ १० । ११ । १२ ॥

उदररोग, अर्श, उन्माद, अपस्मार, रक्तपित्त, पङ्गुता, बधिरता, मूकता प्रमेह, भगन्दर, प्रदर, आक्षेपक आदि वातव्याधि, श्वित्र, क्षय, रात्र्यान्ध्य, तिमिर, मुखार्श, नासार्श, सर्वाङ्गशोथ, गण्डमाला, वल्मीक, काकणककुष्ठ, शङ्खक, पुण्डरीककुष्ठ, रक्तार्बुद, क्षतविसर्प, सर्वाङ्गकम्प, पक्षाघात, गलगण्ड, गलग्रह, दण्डापतानक, वातरक्त, सन्निपात, विलम्बिका, हिक्का, श्वास, कास, अतीसार, अश्मरी तथा मूढगर्भ आदि रोग जब चोरी, गुरुस्त्रीगमन, ब्राह्मणवध आदि महापातकों के फलस्वरूप उत्पन्न होते हैं तब ये कर्मज रोग वैद्यों की युक्तिव्यपाश्रयचिकित्सा अर्थात् औषधोपचार द्वारा शान्त नहीं होते। १०। ११। १२॥

भिषजामुपक्रमेण युक्तिव्यपाश्रयेण न सिद्धिं यान्ति कर्मजा रोगाः। किं तर्हि दैवव्यपाश्रयेण सिद्ध्यन्तीत्याह—

दानैर्दयाभिरपि च द्विजदेवतागो-
गुर्वर्चनाप्रणतिभिश्च जपैस्तपोभिः।
इत्युक्तपुण्यनिचयैरुपचीयमानाः
प्राक् पापजा यदि रुजः प्रशमं प्रयान्ति ॥१३॥

प्राक् पापजा यदि रुजः प्रशमं प्रयान्ति। कैः? इत्युक्तपुण्यनिचयैः, इति शब्देन दानादयो गृह्यन्ते। दानैर्गोसुवर्णभूदानादिभिः। दयाभिः सर्वसत्त्वानुकम्पाभिः। द्विजदेवतागोगुर्वर्चनाप्रणतिभिश्च। द्विजा ब्राह्मणाः, देवता ब्रह्मादयः, गो गावः, गुरवः उपाध्यायपितृज्येष्ठभ्रातृप्रभृतयः, तेषां अर्चना पूजा। प्रणतिः प्रणामः। जपैर्गायत्र्यादीनाम्। तपोभिः कृच्छ्रचान्द्रायणोपवासादिभिः। इत्युक्तपुण्यनिचयैरिति। इति पूर्वोक्तेन प्रकारेण ये उक्ताः कथिताः पुण्यनिचयाः धर्मसंघाताः तैरपचीयमानाः क्षीयमाणाः प्राक् पापजाः पूर्वाशुभकर्मजाः यदि कदाचित् रुजो व्याधयः प्रशममुपशमं प्रयान्ति प्राप्नुवन्ति ॥ १३ ॥

दान से, सम्पूर्ण प्राणियों पर दया से, ब्राह्मण, देवता, गौ तथा गुरुओं की पूजा तथा उनके प्रति विनम्र रहने से, प्रणव तथा गायत्री मन्त्र के जप से तथा तप आदि अन्य शुभ कर्मों के करने से अर्थात् दैवव्यपाश्रय चिकित्सा से कदाचित् प्राक्तनकर्मज रोग शान्त होसकते हैं॥ १३॥

प्रागुक्तं दोषैर्विकारा भवन्तीति । किं भूतैर्दोषैरित्यत आह—

स्वहेतुदुष्टैरनिलादिदोषै-
रुपप्लुतैः खेषु परिस्खलद्भिः ।
भवन्ति ये प्राणभृतां विकारा-
स्ते दोषजा भेषजशुद्धिसाध्याः ॥ १४ ॥

दोषजा विकारा येऽनिलादिदोषैर्भवन्ति । तैः कीदृशैः ? स्वहेतुदुष्टैः स्वकीयाश्च ते हेतवश्च स्वहेतवः तैर्दुष्टाः स्वहेतुदुष्टाः अनिलादयस्तैः । स्वहेतवः स्वकारणानि वक्ष्यमाणानि । तत्र वातस्य रूक्षतिक्तकषायादीनि । पित्तस्य कट्वम्लोष्णविदाह्यादीनि । श्लेष्मणो गुरुमधुरशीतादीनि । दुष्टग्रहणेन संचयप्रकोपावुक्तौ । अनिलादिदोषैर्वातपित्तकफैः शारीरैः, रजस्तमोभ्यां च मानसाभ्यां दोषाभ्याम् । तथा च चरकः— "वातः पित्तं कफश्चोक्तः शारीरो दोषसंग्रहः । मानसः पुनरुद्दिष्टो रजश्च तम एव च' ॥ उपप्लुतैर्विमार्गगैः प्रसृतैरित्यर्थः । खेषु छिद्रेषु परिस्खलद्भिः स्थानसङ्गं कुर्वद्भिः । इत्यनेन स्थानसंश्रय उक्तः । प्राणभृतां प्राणिनां विकारा इत्यनेन व्यक्तिभेदौ दोषाणां दर्शितौ । इत्येवं संचयप्रकोपप्रसरस्थानसंश्रयव्यक्तिभेदैर्दोषाणां ये भवन्ति ते दोषजा विकारा इति । तथा चोक्तं सुश्रुतेन—"संचयं च प्रकोपं च प्रसरं स्थानसंश्रयम् । व्यक्तिभेदं च दोषाणां यो वेत्ति स भवेद्भिषक् ॥ कुपितानां हि दोषाणां शरीरे परिधावताम् । यत्र संगः खवैगुण्याद् व्याधिस्तत्रोपजायते" ॥ ते च दोषजा भेषजशुद्धिसाध्याः । भेषजैरौषधैः संशमनादिभिः शुद्ध्या च वमनविरेचनानुवासननिरूहनस्यैर्निर्हरणं दोषाणां शुद्धिः, तया साध्या साधनीया इति ॥ १४ ॥

अपने २ दूषक कारणों से दुष्ट तथा स्वमार्ग से हटे हुए वात आदि दोष जब किसी स्रोत में आश्रय पाते हैं तब पुरुषों में जो नानाविध विकार पैदा होते हैं वे दोषज कहलाते हैं । उनकी संशमन औषधों तथा वमन विरेचन आदि संशोधनों द्वारा चिकित्सा की जाती है ॥ १४ ॥

पूर्वमुक्तमपरे कर्मदोषजा विकारास्तान् प्रतिपादयन्नाह—

दानादिभिः कर्मभिरौषधीभिः
कर्मक्षये दोषपरिक्षये च ।

सिद्ध्यन्ति ये यत्नवतां कथञ्चित्
ते कर्मदोषप्रभवा विकाराः ॥ १५ ॥

ते विकाराः कर्मदोषप्रभवाः ये यत्नवतां प्रयत्नवतां कथञ्चित् कष्टकल्पनया सिद्ध्यन्ति। कथं? कर्मक्षये प्राक्तनाशुभहानौ। कैः? दानादिभिः कर्मभिरिति, दानदयाब्राह्मणदेवगुरुगोपूजाप्रणामजपतपक्रियादिभिः। दोषपरिक्षये च। दोषपरिक्षयो वृद्धेर्ह्रासं कृत्वा साम्योत्पादनम्। काभिः? औषधीभिः स्थावरजङ्गमाभिः। त इत्थम्भूताः कर्मदोषप्रभवा विकाराः। कर्माणि च दोषाश्च कर्मदोषाः, कर्मदोषाभ्यां प्रभव उद्भवो येषां ते कर्मदोषप्रभवा विकारा इति ॥ १५ ॥

दान जप आदि श्रेष्ठ कर्मों के द्वारा पूर्वजन्म कृत अशुभ कर्मों के क्षीण होजाने पर तथा औषध प्रयोगों से दुष्ट वात आदि दोषों के शान्त होजाने पर जो व्याधियां बड़े प्रयत्न से कथञ्चित् सिद्ध होती हैं वे कर्मदोषज जाननी चाहियें ॥

प्रागुक्तं ते दोषजा भेषजशुद्धिसाध्याः। भेषजशुद्धिसाध्यत्वं विकाराणां परीक्षितैर्दोषादिभिर्भवतीति दोषादिपरीक्षणार्थमाह—

दोषप्रदेशबलकालविकारसत्त्व-
सात्म्यौषधानलवयः प्रकृतीः परीक्ष्य।
नानाप्रकारपवनादिगदातुराणा-
मुक्तं चिकित्सितमिदं न तु कर्मजानाम् ॥ १६ ॥

इदं चिकित्सितं पवनादिभिर्वातपित्तकफसत्वरजस्तमोभिः शरीरमनोऽधिष्ठितैराश्रयभेदेन, अन्योन्यसंसर्गेण च सन्निपातादिना वा नानाप्रकारैरसंख्येयत्वात्। ये ये गदा रोगास्तैः आतुराणामार्त्तानामुपकाराय कथितम्। नानाप्रकारपवनादिगदातुराणां वक्ष्यमाणन्यायेन उक्तं इति क्रिया। किं कृत्वा? परीक्ष्य। कान्? दोषान्। अतो दोषा एवादौ परीक्ष्यन्ते तत्कारणत्वात् सर्वरोगाणाम्। तथा चोक्तं सुश्रुताचार्येण— "नास्ति रोगो विना दोषैर्यस्मात्तस्माद्विचक्षणः। अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत्" ॥ तत्र वा गतिगन्धनयोरिति धातुः। तप् धूपसन्ताने। श्लिष् आलिङ्गने। एतेषां कृद्विहितैः प्रत्ययैः परे वातः पित्तं श्लेष्मेति रूपाणि भवन्ति। एषाञ्च स्वरूपं चरकाचार्येणोक्तम्—"रूक्षः

शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः। विपरीतगुणैर्द्रव्यैर्मारुतः संप्रशाम्यति ॥" सस्नेहमुष्णं तीक्ष्णं च द्रवमम्लं सरं कटु। विपरीतगुणैः पित्तं द्रव्यैराशु प्रशाम्यति ॥ गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः। श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः" ॥ तत्र वातपित्तश्लेष्माणः शारीरा दोषाः। मानसौ च रजस्तमसी। तेषां च गतिरनेकप्रकारा। चरकेणोक्तं—'क्षयः स्थानं च वृद्धिश्च दोषाणां त्रिविधा गतिः। ऊर्ध्वं चाधश्च तिर्यक् च विज्ञेया त्रिविधापरा ॥ त्रिविधा चापरा कोष्ठशाखामर्मास्थिसन्धिषु। इत्युक्ता विधिभेदेन दोषाणां त्रिविधा गतिः ॥ दोषाः प्रवृद्धाः स्वं लिङ्गं दर्शयन्ति यथाबलम्। क्षीणा जहति लिङ्गं स्वं समाः स्वं कर्म कुर्वते ॥" ते च किं प्रकृतिस्थाः? किं वा प्रकुपिताश्च? किं वा स्वतन्त्राः परतन्त्रा वा? यथा—'एकः प्रकुपितो दोषः सर्वानेव प्रकोपयेदिति ॥' किमेकशो द्विशस्त्रिशो वा? किं रसादिधातुसहिता असहिता वा? किं वातविण्मूत्रादिमलैः संमिश्रा असंमिश्रा वा? किमेकद्वित्र्यंशबलविकल्पादिना प्रकारेण? एवं बहुविधा वीक्ष्यमाणा असंख्येयतां प्रतिपद्यन्त इत्युपगम्यते। इति संक्षेपेणोक्ता दोषपरीक्षा ॥ दोषपरीक्षानन्तरं प्रदेशपरीक्षाऽऽरभ्यते—प्रदेशशब्देन भूम्यातुरावुच्येते। तथा चोक्तं चक्षुष्येणेन—"भूम्यातुरौ प्रदेश" इति। भूमिं देशं विद्यात्। स त्रिविधः—आनूपो जांगलो मिश्रः। अहितो हितः समश्च। प्रचक्ष्यते लक्षणं तस्य—'नदीपल्वलशैलाद्यैः पत्रोत्पलझषैर्युतः। हंससारसकादम्बबलाकाद्विजसेवितः ॥ वराहखड्गमहिषरुरुरोहितसंकुलः। प्रभूतद्रुमपुष्पाढ्यो नानासस्यफलैश्चितः ॥ अनेकशालिकेदारकदलीक्षुविभूषितः। आनूपदेशो भूयिष्ठं वातश्लेष्मामयार्त्तिमान् ॥ अल्पाग्न्यायुर्बलाः स्थूलाश्चलन्मेदःस्तनोदराः। नराः प्रायेण तस्मात्तैरन्नपानं सुखार्थिभिः ॥ अनभिष्यन्दि रूक्षाल्पं सेव्यं लघ्वग्निदीपनम्। आकाशशुभ्रः सिकतास्थलो विषमभूतलः ॥ शमीकरीरबिल्वार्कपीलुकर्कंधुसंकुलः ॥ मृगपृषतगोकर्णखरबभ्रुसमन्वितः। वर्षतोयाल्पसलिलो देशो जाङ्गलमुच्यते ॥ तत्राल्पमेदःप्राचुर्याः स्थिरा जितपरिश्रमाः ॥ सुसंहतसमांगाश्च बलिनोऽल्परुजो नराः ॥ आयुष्मन्तोऽनिलप्राया रोगास्तेषामिदं हितम्। बृंहणं गुरु यत् स्निग्धमन्नपानद्रवं नवम् ॥ आनूपजांगलाभ्यां च देशो व्यामिश्र-

लक्षणः। साधारणः स्मृतो देशस्तथा व्याधिचिकित्सितम्॥" सुश्रुतेनाप्युक्तम्—"समाः साधारणे यस्माच्छीतवर्षोष्ममारुताः। समत्वं चैव दोषाणां तस्मात्साधारणो मतः।" इति संक्षेपेणोक्ता देशपरीक्षा॥ भूम्यातुरौ प्रदेश इत्युक्तं पूर्वमतः भूमिपरीक्षानन्तरं आतुरपरीक्षा आरभ्यते। "आतुरमुपक्रममाणेन भिषजा आयुरेवादौ परीक्ष्यमिति" सुश्रुतः। रसवैशेषिके चोक्तम्—'आयुः पुनरादौ परीक्ष्यम्। सति तस्मिन् क्रियायाः साफल्यम्। तच्चायुः जीवितं प्राणादिसंयोगपूर्वकमिति वदन्त्याम्नायविदः'। तथा च चरकः—"शरीरेन्द्रियसत्वात्मसंयोगो धारि जीवितम्। नित्यगश्चानुबन्धश्च पर्यायैरायुरुच्यते। सत्वमात्मा शरीरं च त्रयमेतत्त्रिदण्डवत्। लोकस्तिष्ठति संयोगात् तत्र सर्वं प्रतिष्ठितम्॥" सुश्रुतेनाप्युक्तम्—"अग्निः सोमो वायुः सत्वं रजस्तमः पञ्चेन्द्रियाणि भूतात्मेति प्राणाः"। तच्छकुननिमित्तलक्षणादेव रिष्टानि विद्यात् तानि स्वशास्त्रेभ्यो ज्ञातव्यानि। चक्षुष्येणेनाप्युक्तम्—'रोगिणः कायदेशस्य संपरीक्ष्य बलायुषी। पूर्वं बलानुरूपं स्यादुपचारोऽनुबन्धनमिति। ज्ञेयमरिष्टैरायुरित्यादि। त्रिविधं शरीरमल्पं मध्यं सुमहच्च संपरीक्ष्यादौ। कुर्याद् विवृद्धिह्रासौ भैषज्याहारयोर्विधिं मध्यम्। सुश्रुतेऽप्युक्तम्—'देहः स्थूलः कृशो मध्य इति प्रागुपदिष्टम्। कर्षयेद्बृंहयेच्चापि सदा स्थूलकृशौ नरौ। रक्षणं चैव मध्यस्य कुर्वीत सततं भिषक्॥' इति संक्षेपेणोक्ता आतुरपरीक्षा॥ आतुरपरीक्षानन्तरं बलपरीक्षाधिक्रियते—तथा चोक्तं सुश्रुतेन—"यस्माद्बलवतः सर्वक्रियाप्रवृत्तिः तस्माद्बलमेवप्रधानमधिकरणानाम्। केचित्कृशाः प्राणवन्तः स्थूलाश्चाल्पबला नराः। तस्मात् स्थिरत्वव्यायामैर्बलं वैद्यः प्रतर्कयेत्॥" तच्च बलं किमुच्यते? बलमोजस्तेज इति त्रिविधम्। तत्र रसादीनां शुक्रान्तानां धातूनां यत्परं तेजस्तत्खल्वोजस्तदेव बलमित्युच्यते स्वशास्त्रसिद्धान्तात्। तत्र बलेन स्थिरोपचितमांसता, सर्वचेष्टास्वप्रतिघातः, स्वरवर्णप्रसादो बाह्यानामाभ्यन्तराणां च करणानामात्मकार्य्यप्रतिपत्तिर्भवति। अथ किमिदं तेजः—तेजोऽप्याग्नेयं क्रमशः पच्यमानानां धातूनामभिनिवृत्तमुदरस्थं स्नेहजातं वसाख्यं स्त्रीणां विशेषतो भवति। तेन मार्द्दवसौकुमार्यमृद्वल्परोमतोत्साहदृष्टिस्थितिपक्तिकान्तिदीप्तयो भवन्ति॥ अथौजः किमुच्यते—

"ओजः सोमात्मकं स्निग्धं शुक्लं शीतं सरं स्थिरम्। विविक्तं मृदु मृत्स्नं च प्राणायतनमुत्तमम्। देहः सावयवस्तेन व्याप्तो भवति देहिनाम्।" इति सुश्रुतः॥ चरकेऽप्युक्तं—"हृदि तिष्ठति यच्छुद्धं रक्तमीषत्सपीतकम्। ओजः शरीरे व्याख्यातं तन्नाशान्म्रियते नरः॥ गुरु शीतं मृदु स्निग्धं बहुलं मधुरं स्थिरम्। प्रसन्नं पिच्छिलं शुक्रमोजो दशगुणं स्मृतम्"॥ एवं चरकाचार्येण—ईषद्रक्तपीतं शुक्लं च द्विरूपमोजो व्यावर्णितम्। तत्र केचिद् बलमेव ओजस्तेजसी विशेषेण व्यावर्णयन्ति। अपरे तु अविशेषमेवैषां व्यावर्णयन्ति। रसवैशेषिके—"बलं त्रिविधं उत्तमं मध्यमं अधमञ्चेति। तत्र उत्तमे बले उत्तमः पुरुषः, मध्ये मध्यमः पुरुषः, अल्पे च अल्पः पुरुषः। तत्र यथाबलं दारुणा मध्यमा मृद्वी च क्रिया कार्य्या। यदि पुनर्दुर्बलस्य दारुणो व्याधिर्भवति तीक्ष्णेन कर्मणा साध्यः,तदा बलमस्य बृंहयित्वा मृद्वेव कर्म पुनः पुनः प्रयोक्तव्यं आकृत्स्नाद्दोषहरणात्"। तथा चोक्तम्—'मलोच्छ्रायं बलं विद्यात् मलं प्राणहितं च तत्। तस्माद् यत्नेन हर्तव्यो मलो बलमहिंसता॥ महाव्याधिपरीतस्य बहुदोषस्य देहिनः। बलमाप्याय्य तद्वैद्यः शनैर्दोषमपि क्षिपेत्"। एवं यथाबलः प्रयोग अरोगिताहेतुर्विपर्ययो मिथ्या। चरकाचार्येणापि त्रिविधं बलमुक्तं सहजं कालकृतं युक्तिकृतं च। तत्र सहजं यच्छरीरसत्वयोः प्राकृतं स्वाभाविकम्। कालकृतं ऋतुविभागजं वयः कृतं च। युक्तिकृतं पुनस्तद्यदाहारचेष्टायोगजम्। इत्येवं बलपरीक्षा संक्षेपेणोक्ता॥ बलपरीक्षानन्तरं कालपरीक्षा आरभ्यते। अथ कोऽयं कालो नाम? कालः ऋत्वयनवत्सराख्यः। तत्र वैशेषिका द्रव्यं मन्यन्ते। कालः परापरव्यक्तिकरयौगपद्यस्थिराक्षिप्रप्रत्ययलिंग इति। तथा अन्ये न्यायविदः शीतोष्णवर्षसाधारणलक्षणः कालः। उक्तञ्च—"महाभूतविशेषाः स्युः शीतोष्णद्वयभेदतः। कालमित्यध्यवस्यन्ति न्यायमार्गानुसारिणः"। वैयाकरणास्तु क्रियालक्षणं कालं मन्यन्ते। "आदित्यग्रहनक्षत्रप्रस्पन्दिनमतः परे। भिन्नमावृत्तिभेदेन कालं कालविदो विदुः"। इति। तत्र केचिदेवं कालशब्दं व्युत्पादयन्ति। कलानां समूहः कालः। कालशब्दस्य समूहेऽण् इत्यनेन सूत्रेण समूहार्थे अणि रूपम्। अन्ये त्वन्यथा—'काले संख्यापरिमाणयोरित्यस्य धातोर्घञ् प्रत्यये अण् प्रत्यये वा रूपं तस्मात् यन्नि-

मित्तं संख्यापरिमाणं वा निमेषकाष्ठाकलामुहूर्त्ताहोरात्रपक्षमासर्त्वे-यनसंवत्सरयुगादिभिः स कालः। वैद्यके तु संवत्सरशरीरस्य ऋत्व-ङ्गिनः कालस्य ग्रहणम्। तस्यौपयोगिकत्वाच्चिकित्सायाम्। तथा च क्षारपाणिः—'शिशिरश्च वसन्तश्च ग्रीष्मप्रावृट्शरद्धिमाः। ऋतवः षट् क्रमादेते कालः सम्वत्सरात्मकः॥ द्विधा त्वयनभेदेन स्मृतः सम्वत्स-रस्त्वसौ। तच्चादानं विसर्गाख्यं रविचाराद् द्विधायनम्॥ उत्तरायणमा-दानं शिशिराद्यं ऋतुत्रयम्। वर्षादि तु विसर्गाख्यं सवितुर्दक्षिणायनम्॥ स्नेहादानविसर्गाच्च तत्संज्ञमयनद्वयम्। आग्नेयं विद्धि चादानं विसर्गं सौम्यमत्र तु॥ आदाने तु जगत्स्नेहमाददानो दिवाकरः। रूक्षत्वात् शोषयेद्वायुः शिशिराद्यर्तुषु क्रमात्॥ रूक्षो निर्वर्तयन्तिक्तकषायकटु-कान् रसान्। नृणां क्रमेणावहति दौर्बल्यमृतुषु त्रिषु॥ विसर्गे विसृ-जन् स्नेहं सदा स्निग्धश्च मारुतः। सोमश्चाव्याहतबलः स्निग्धो निर्वर्तये-द्रसान्॥ क्रमेणैवाम्ललवणमधुरान् ऋतुषु त्रिषु। बलं च वर्द्धयत्येषां क्रमेणाभ्रागमादिषु॥ हेमन्ते शिशिरे चाग्र्यं ग्रीष्मे वर्षासु चावरम्। शरद् वसन्तयोर्मध्यं बलं स्यात्प्राणिनां मतम्॥ तथा स्वरसनिर्वृत्या शैत्यौष्ण्या-द्यान्ति च क्रमात्। पित्तादयश्चयं कोपं शान्तिश्चाभ्रागमादिषु॥ पित्तं वर्षासु शरदि प्रकोपं याति हैमने। शमं यात्येष पित्तस्य चयकोपशम-क्रमः॥ शिशिरे च वसन्ते च ग्रीष्मे चैव कफस्य च। ग्रीष्मवर्षा-शरत्स्वेवं मारुतस्य त्रिकक्रमः। निर्वर्त्तते रसोऽत्राम्लः शेषा मन्दीभ-वन्ति च। वर्षास्वम्लविपाकाश्च भवन्त्यापो यतस्ततः॥ वर्षासु चीयते पित्तमृतुशैत्यान्न कुप्यति। सहसार्कांशुसम्पर्कात् तद्धि शरदि कुप्यति॥ शरत्प्रकुपितं पित्तं प्रशमं याति हैमने। वायुश्चोपचयं याति कारणं चात्र वक्ष्यते॥ निर्वर्त्तते हि मधुरो हेमन्ते रस उत्तमः। शेषा मन्दीभवन्त्यापः स्वादुपाका भवन्ति च॥ पित्तं शाम्यति तच्छैत्यात् वायुः श्लेष्मा च चीयते। स वायुः शिशिरे कोपं याति चोपचयं कफः॥ हेमन्ते संचितः श्लेष्मा शिशिरेऽपि न कुप्यति। आहारैश्च गुरुस्निग्धैर्विशेषाच्चोपचीयते॥ वसन्ते रविसन्तापात् प्रशमं याति मारुतः। तत्संतापाद्विलीनश्च तदा श्लेष्मा प्रकुप्यति॥ स वसन्ते प्रकुपितः श्लेष्मा ग्रीष्मे प्रशाम्यति। चीयते चानिलस्तस्मिंस्तत्र हेतुं निबोध मे॥ निर्वर्त्तते रसो ग्रीष्मे कटुको न

तथेतरे। आपश्च कटु पच्यन्ते रूक्षस्तीक्ष्णस्तथा रविः॥ तस्माच्छ्लेष्मा शमं याति मारुतश्चोपचीयते। समेघवाताभिहतो वायुर्वर्षासु कुप्यति। शरत्कालेऽर्कसन्तापात्स च वायुः प्रशाम्यति। चय प्रकोपोपशमान् गच्छन्त्येवं त्रयो मलाः॥ ऋतुसन्धौ विधिः पूर्वस्त्यक्तव्योऽल्पाल्पशः क्रमात्। सेव्यश्चानागतो युक्त्या स्वल्पाल्पोपचयः क्रमात्॥ असात्म्यजा हि रोगाः स्युः सहसा त्यागशीलनात्॥ ऋत्वोरन्त्यादिसप्ताहं सन्धिरित्यभिधीयते॥" इति कालपरीक्षा समाप्ता॥ कालपरीक्षानन्तरं विकारपरीक्षा प्रस्तूयते—विकारपरीक्षा सम्यक्विकारपरिज्ञानम्। विकारो रोगः। विकारपरिज्ञानपूर्वकं हि चिकित्सितं भिषक्शास्त्रे। तथा चोक्तं चरकाचार्येण—'रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्। ततः कर्म भिषक् पश्चात् ज्ञानपूर्वं समाचरेत्' इति॥ तच्च निदानसंप्राप्तिपूर्वरूपरूपोपशयैः पञ्चभिरुपायैर्भवति। निदानं च द्विविधं—सामान्यं वैशेषिकञ्च। तत्र सामान्यं वातस्य रूक्षतिक्तकषायादि। पित्तस्य कट्वम्लोष्णादि। श्लेष्मणः गुरुमधुरातिशीतादिभिर्वक्ष्यमाणकम्॥ वैशेषिकं प्रतिरोगमुक्तम्। पुनश्च त्रिभेदाभिन्नम्। तथोक्तं चरकेण—"कालबुद्धीन्द्रियार्थानां योगो मिथ्याति वा न च। द्वैधाश्रयाणां व्याधीनां त्रिविधो हेतुसंग्रहः"॥ निदानादीनां पञ्चानामपि स्पष्टलक्षणं खरनादेनोक्तम्—"निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा। संप्राप्तिश्चेति मन्तव्यो व्याधेः पञ्चविधो ग्रहः॥ निदानं प्रत्ययो हेतुः कर्त्तायतनकारणम्। निमित्तं सम्भवो ज्ञानं शब्दाः पर्यायवाचकाः॥ निदानं सर्वरोगाणां त्रिविधं च समासतः। दुष्टाहारो विहारश्च कर्म प्राग्दैहिकं च यत्॥ भविष्यद्व्याधिलिङ्गानि पूर्वरूपमिति स्मृतम्। तद्रूपशब्दैः प्राक्शब्दसंयुक्तैर्बहुधोच्यते॥ अव्यक्तलिङ्गं स्वं स्वं स्यात् व्याधीनां पूर्वलक्षणम्। तदेव व्यक्ततां यातं रूपमित्यभिधीयते॥ रूपं निदर्शनं चिह्नं व्यंजनं लिङ्गमाकृतिः। संस्थानं लक्षणं चैव पर्याये रूपमुच्यते॥ हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम्। औषधान्नविहाराणामुपयोगं सुखावहम्॥ विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः। अतोऽन्यथानुपशयो व्याध्यसात्म्याख्य उच्यते॥ सम्प्राप्तिरागतिर्जातिर्व्याधीनामभिधीयते। सा संख्या विधिवैशेष्यबलकालैर्विभाव्यते। अष्टौ ज्वराः पञ्च गुल्माः

प्रमेहा विंशतिर्मताः। इत्येवमाद्या रोगाणां संख्या चोक्ता पृथक् पृथक् ॥ विधिर्नाम द्विधा रोगास्त्रिविधाः सप्तधापि च। दशधाः परिसंख्याता रोगानीके यथा मताः ॥ विशेषं विद्धि रोगाणां योगात्तरतमात्मकात्। तरो द्वंद्वप्रकर्षे तु तमो बहुषु चोच्यते दोषाणां समवेतानामशांशबलकल्पनैः। ज्ञेयं बलविशेषं तद्विशेषं कालजं शृणु ॥ व्याधीनामृत्वहोरात्रनियमाद्भोजनस्य वा। विशेषो विद्यते यस्तु कालापेक्षः स उच्यते ॥ वसन्ते श्लेष्मजा रोगाः शरत्काले तु पित्तजाः। वर्षासु वातजाश्चैव प्रायः प्रादुर्भवन्ति हि ॥ निशान्ते दिवसान्ते च बलिनो वातजा गदाः। अहःक्षपादौ कफजास्तयोर्मध्ये तु पित्तजाः ॥ जीर्णेऽन्ने वातजा रोगा जीर्यमाणे च पित्तजाः। श्लेष्मजा भुक्तमात्रेऽन्ने लक्ष्यन्ते बलिनो मलाः" इति ॥ षड्विधं च रोगपरीक्षणमुक्तं सुश्रुताचार्येण। "षड्विधो हि रोगाणां विज्ञानोपायः। पञ्चभिः श्रोत्रादिभिः प्रश्नेन चेति। तद्यथा तत्र श्रोत्रेन्द्रियविज्ञेयाः सन्ति विशेषा रोगेषु ये व्रणास्रावविज्ञानीयादिषु वक्ष्यन्ते सफेनं रक्तमीरयन्ननिलः सशब्दो निर्गच्छतीत्येवमादयः। त्वगिन्द्रियविज्ञेयाः शीतोष्णश्लक्ष्णकर्कशमृदुकाठिनत्वादयो ज्वरशोफादिषु। रूपेन्द्रियविज्ञेयाः शरीरोपचयापचयायुर्लक्षणबलवर्णविकारादयः। रसनेन्द्रियविज्ञेयाः प्रमेहादिषु रसविशेषाः। गन्धेन्द्रियविज्ञेया अरिष्टलिङ्गादिषु व्रणानामव्रणानाञ्च गन्धविशेषाः। प्रश्नेन च विजानीयाद् देशं कालं जातिं सात्म्यमातङ्कसमुत्पत्तिं वेदनासमुच्छ्रायं बलं दीप्ताग्नितां वातमूत्रपुरीषाणां प्रवृत्तिमप्रवृत्तिञ्च कालप्रकर्षादींश्च विशेषान्"। पुनस्तेनैव सुश्रुतेनान्यथात्वमुक्तं व्याधीनां परीक्षणार्थम्। "व्याधिविशेषास्तु प्रागभिहिताः सर्व एवैते त्रिविधाः साध्याः याप्याः प्रत्याख्येयाश्च। तत्रैतान् भूयस्त्रिधा परीक्षेत। किमसावौपसर्गिकः प्राक्केवलोऽन्यलक्षणो वेति ? तत्रौपसर्गिको नाम यः पूर्वोत्पन्नं व्याधिं जघन्यकालजातो व्याधिरुपसृजति स तन्मूल एवोपद्रवसंज्ञः। प्राक्केवलो यः प्रागेवोत्पन्नो व्याधिरपूर्वरूपो निरुपद्रवश्च। अन्यलक्षणो यो भविष्यद्व्याधीनां ख्यापकः स पूर्वरूपसंज्ञः। तत्र सोपद्रवमन्योन्याविरोधेनोपक्रमेत बलवन्तमुपद्रवं वा। प्राक्केवलं

यथास्वम्। अन्यलक्षणे भाविनि व्याधौ प्रयतेत। पुनश्च अन्यथा परीक्षोक्ता चरकेण–"आचार्य्यस्योपदेशेन प्रत्यक्षकरणेन च। अनुमानेन च व्याधीन् सम्यक् विद्याच्चिकित्सकः॥ आगन्तुरन्वेति निजं विकारं निजस्तथागन्तुमतिप्रवृद्धः। तत्रानुबन्धं प्रकृतिं च सम्यक् ज्ञात्वा ततः कर्म समारभेत"॥ इति संक्षेपेणोक्ता विकारपरीक्षा॥ विकारपरीक्षानन्तरं सत्वपरीक्षाधिक्रियते। सत्वं तु व्यसनाभ्युदयक्रियादिस्थानेष्वधिकं प्राणकरम्। 'सत्ववान् सहते सर्वं संस्तभ्यात्मानमात्मना। राजसः स्तभ्यमानोऽन्यैः सहते नैव तामसः॥' इति सुश्रुतः॥ सत्वमपि द्विविधम्–'भीरुत्वं सहिष्णुत्वञ्च। तत्र सहिष्णौ तीक्ष्णां मृद्वीं वा यथोक्तामेव क्रियामारभेत। इतरस्मिंस्तु मृद्वीं न तु तीक्ष्णाम्। तीक्ष्णसाध्ये तु व्याधौ क्रमेण तीक्ष्णां क्रियामाश्वास्यातुरं कुर्वीत। एवं आरोग्यहेतुर्भवति। विपर्यये मिथ्येति'। अथ रसवैशेषिकः–"प्रवरावरमध्यबलं सत्वं त्रिविधम्। प्रवरकास्तत्र त्यक्तविषादा धीराः शूरा बलिनो महोत्साहाः। स्वल्पशरीरा ह्यपि ते विविधामपि आगन्तुदेहजां पीडां संप्राप्य न व्यथन्ते नापत्सु च विभ्रमं यान्ति। मध्यमसत्वास्तु नराः गुणवन्तस्त्वपरानात्मन्युप निधाय संस्तम्भयन्ति चात्मानम्। संस्तम्भिताश्च परैरास्थास्थैर्य्यत्वमुपयान्ति। पुरुषास्तु हीनसत्वाः शरीरवन्तोऽपि वेदनां प्राप्य स्वल्पामपि व्यथन्ते स्वल्पेऽपि भयेऽवसीदन्ति। बीभत्सरौद्रभैरवकथासु पशुपुरुषशोणितान्यथवा दृष्ट्वा विषादमूर्च्छाप्रलपनमरणानि यान्त्याशु"। चक्षुष्येणादपि संक्षेपेणोक्ता सत्वपरीक्षा॥ सत्वपरीक्षानन्तरं सात्म्यपरीक्षा आरभ्यते—किमिदं सात्म्यं नाम? आत्मशब्दो हि मनःपरमात्मदेहादिवृत्तिरपि शरीरे वर्त्तते। सह आत्मना वर्तत इति सात्म तद्भावः सात्म्यम्। तथा चोक्तम्—'सात्म्यं नाम तद्यदात्मनि काय उपशेत इति'। सात्म्यार्थो ह्युपशयार्थः। तत्तु चतुर्विधमुक्तं नरस्य देहर्त्तुरोगदेशभेदेन। अनुशेते यद्देहं सौहित्याद्देहसात्म्यं तत्। ऋतुसात्म्यं यथा–स्निग्धोष्णं हेमन्ते शिशिरे च। कटुतिक्तरूक्षाणि शिशिरान्ते शस्यन्ते। ग्रीष्मे सुखशीतमधुराणि। व्याधेः सात्म्यं विद्यात् ज्वरस्य पेया विरेचनं छर्दिः स्वेदो नस्यं तु धूमस्तथा व्याधौ सात्म्यं प्रतिश्याये प्रसेक इति। देशसात्म्यं यथा—मधुरमांसशालिगोधूमभोजनं पश्चिमोत्तरापथगानाम्। मत्स्यलवणं तु सैन्धवसौराष्ट्रिकसौवीरकादीनाम्॥

दाक्षिणत्यानां यवागूः । प्राचां गुडपत्रशाकमत्स्यादि। फलमूलकन्दशाकान्याहुः सात्म्यानि शैलदेशानाम्। इत्येवं चतुर्विधं सात्म्यमुक्तं चक्षुष्येणेन। षड्विधं च खरनादः–'दोषप्रकृतिदेशर्तुव्याधिसात्म्यमथौकजम्। सात्म्यं षड्विधमुद्दिष्टमसात्म्यं तद्विपर्ययात्॥ दोषप्रकृतिदेशर्तुव्याधीनां स्वगुणैः पृथक्। विपरीतगुणोऽसात्म्यं तुल्यत्वात्सात्म्यमुच्यते॥ सामान्येनोपशेते यत् दोषसात्म्यं तदुच्यते। उपशेते यदौचित्यादोकसात्म्यं तदुच्यते। औचित्यात् सात्मीभावात्। सातत्यप्रयोगादोकसात्म्यं तदुच्यते। असात्म्यं चानुपशयं सात्म्यं चोपशयं विदुः। इत्येवं षड्विधं सात्म्यमसात्म्यं चोक्तं खरनादेन। सात्म्यं पुनरष्टविधम्। जातिरोगातुरधान्यरसदेशर्तूदकसात्म्यसंज्ञम्। सात्म्यलक्षणं तु औचित्यम्। एवं ह्याह सात्म्यं औचित्यमिति। तत्र जातिसात्म्यं नाम यदस्य जन्मप्रभृत्युचितं तत्पुनः क्षीरं घृतं च। रोगसात्म्यं नाम यदस्य रोगस्योपयुक्तं सुखं परिणमति बलवर्णदं च भवति। आतुरसात्म्यं नाम येन यस्मिन् व्याधौ शान्तिर्भवति तत् तस्मिन् व्याधौ आतुरसात्म्यम्। तथा हि–यवक्षारतक्रेणामातीसारः शममेति। अथवा यस्य रोगस्य यत्सामान्येन प्रशस्तं तस्मिन् रोगे तदातुरसात्म्यम्। यथा गुल्मिनां क्षीरम। उदावर्त्तिनां घृतं प्रमेहिणां मधु। तथा चोक्तं—"वर्णवान् बलवान् गुल्मी नित्यं क्षीराशनो भवेत्। तस्मात् क्षीरं निषेवेत तत्तस्य परमौषधम्॥ न कथंचिदुदावर्त्ती रूक्षं भुञ्जीत भोजनम्। पीत्वा प्राग्भोजनात्सर्पिः स्निग्धं भुञ्जीत भोजनम्। मधु श्लेष्मघ्नमुद्दिष्टं नित्यं पथ्यं प्रमेहिणाम्॥" धान्यसात्म्यं नाम शालिषष्टिकव्रीहियवगोधूमप्रभृतीनां धान्यानां यस्य यत्सुखं परिणमति आरोग्यं चोत्पादयति तत्तस्य धान्यसात्म्यम्। रससात्म्यं नाम मधुराम्ललवणकटुतिक्तकषायाणां षण्णां रसानां यस्य यः सुखं परिणमति आरोग्यं चोत्पादयति। देशसात्म्यं नाम आनूपजांगलसाधारणेषु यद् यत्र पथ्यं तत्तत्र सात्म्यम्। ऋतुसात्म्यं नाम यस्मिन् यस्मिन् ऋतौ यद् यत् पथ्यं तत्तस्मिन् तस्मिन् सात्म्यम्। उदकसात्म्यं नाम 'नादेयपार्वतीयोदपानकरकान्तरिक्षप्रभृतीनां उदकानां यद् यत् पथ्यं तत्तत्सात्म्यम्। एवं ह्याह—' नदीनामुदके दुष्टे उदपानोदकं पिबेत्। उदपानोदके दुष्टे

आन्तरिक्षोदकं पिबेत्' ॥ यस्य वा यदुदकं सुखं परिणमति आरोग्यं चोत्पादयति तत्तस्य सात्म्यम्। एवमष्टविधं सात्म्यमुक्तम्। रसवैशेषिके तथान्यदपि सार्वकालिकं सर्वपुरुषाणां सात्म्यमुक्तम्। "षष्टिकान् शालिमुद्गाँश्च सैन्धवामलके यवान्। आन्तरिक्षं पयः सर्पिर्जाङ्गलं मधु वा चरेत्"। तच्च नित्यं प्रयुञ्जीत स्वास्थ्यं येनानुवर्तते। अजातानां विकाराणामनुत्पत्तिकरं च यदितिवचनात्। एवमेतानि बहूनि सात्म्यान्युक्तानि। तदेतेषां युगपत्सन्निपतितानां चिकित्साकाले किं प्रयोक्तव्यमिति सन्देहः। तद् यथा—यदेतद् ऋतुसात्म्यम् तत् केषांचित् अनुचितं आतुरौकःसात्म्येन भवति। तद्यथान्तर्वेद्यां गंगायमुनयोरन्तराले हेमन्ते क्षुद्राणां जनपदानां सक्तुभिरेव औचित्यादोकःसात्म्यं भवति। तथा कस्यचिदत्यन्तश्लेष्मलस्य हेमन्तेऽपि अपथ्यकृत् ऋतुसात्म्यं हेमन्तोक्तं तिक्तकषायकटुका एव रसाः औचित्यादोकसात्म्यं भवति। तत्र किं तावदोकः सात्म्यं क्रियतां आहोस्वित् ऋतुसात्म्यमिति। एवमेष सन्देहप्रकारोऽन्येष्वपि सात्म्येषु योजयितव्य इति। तत्रोच्यते–अविरोधो व्यामिश्राणां उपयोगवचनात्। यस्मादाचार्य्यैः स्वयमेव सर्वाण्येतानि परस्परविरुद्धानि असात्म्यानि निर्दिशति न च परस्परव्याघातादेषां प्रयोगः संभवति। तस्माद्विज्ञायते क्वचिद् व्यामिश्राणां सात्म्यानां प्रयोगः। क्वचित् सर्वेभ्यो यस्य बलवत्त्वं तस्य प्रयोग इति। अन्यथा परस्परविरुद्धसात्म्योपदेशोऽनर्थक एव स्यात्। यस्माच्च व्यामिश्राणां क्वचित्प्रयोजनमाह तस्माद्विज्ञायते व्यामिश्रेणोक्तान्यपि प्रयोज्यानीति। तथा चोक्तम्—"तेषां तत्सात्म्यसिद्धानि भेषजान्यवचारयेत्"। व्याधिसात्म्यैर्देशसात्म्यैश्च भेषजैर्मिश्रस्य आहारस्य सात्म्यस्य मध्येऽनुप्रयोग उक्त इति। अथवान्यथा व्याख्यायते। अन्यान्यपि परस्परविरुद्धान्येकसात्म्योपदेशैरिति। शरीरसात्म्यप्रकृतिसात्म्यव्याधिसात्म्यानां किञ्चिदेकं कस्याञ्चिदवस्थायां बलवत्त्वात् प्रधानं यत्तस्यैव प्रयोगो भवति नेतरस्येति। सर्वेषां सात्म्यानां व्याधिसात्म्यं बलवदिति विज्ञेयम्। व्याधिसात्म्येन हि सर्वाणि सात्म्यानि विरुद्ध्यमानानि बाध्यन्ते। तत्र ऋतुसात्म्यात् देशसात्म्यं बलवत्। देशसात्म्यात् शरीरसात्म्यं बलवत्। ओकःसात्म्यमेव हि शरीरसात्म्यमुच्यते नान्यदिति। शरीरसात्म्यात्प्रकृतिसात्म्यं बलवत्।

प्रकृतिसात्म्यादपि व्याधिसात्म्यं बलवत् । अतः सर्वेषां सात्म्यानां व्याधिसात्म्यस्य प्राधान्यमिति। कथमिदं गम्यत इति चेत्? युक्तिवचनाभ्याम् । युक्तिस्तावत् सामान्यविशेषभावादुत्सर्गस्यापवादेन बाधो भवतीति ॥ तत्र ऋतुसात्म्यं सर्वदेशसामान्यं देशसात्म्यमेकदेशत्वात् विशेषः । देशसात्म्यमपि तत्र देशे सर्वपुरुषसामान्यम् । ओकःसात्म्यं तु प्रत्यात्मिकत्वाद्विशेषः । ओकःसात्म्यादपि व्याधिसात्म्यं बलवत् । ओकःसात्म्यं हि स्वस्थकाले सावकाशम्। व्याधिसात्म्यं तु कादाचित्कम् । तस्य कादाचित्कत्वात् शरीरपीडाहरत्वाच्च प्राधान्यं चिकित्सामूलप्रयोगत्वाच्च । व्याधिसात्म्यं सर्वेभ्यः सात्म्येभ्यो बलवदिति युक्त्या बलवत्त्वं सात्म्ये प्रतिपादितम् । वचनेनापि इदानीं प्रतिपाद्यते ऋतुसात्म्यात् व्याधिसात्म्यं बलवदिति । तथा चोक्तम्—'ग्रीष्मवर्ज्येषु कालेषु दिवास्वप्नात् प्रकुप्यतः। श्लेष्मपित्ते दिवास्वप्नस्तस्मादेतेषु नेष्यते ॥' एवमुक्त्वा ऋतुसात्म्यं पुनराह—गीताध्ययनमद्यस्त्रीकर्मभाराध्वकर्शिताः। सर्व एव दिवास्वप्नं सेवेरन् सार्वकालिकमिति ॥ अतो वचनाद्विज्ञायते—ऋतुसात्म्याद् व्याधिसात्म्यं बलवदिति। येन ऋतुसात्म्यस्य व्याधिसात्म्यस्यैवाबाधामाह । ग्रीष्मे दिवास्वप्नं ऋतुसात्म्यमुक्त्वा पुनराह। "मेदस्विनः स्नेहनित्याः श्लेष्मलाः श्लेष्मरोगिणः। दूषीविषार्त्ताश्च दिवा न शयीरन् कदाचन।" एवं वचनेन ग्रीष्मकालेप्येषां प्रतिषेधात् ऋतुसात्म्यात् व्याधिसात्म्यं बलवदित्युक्तं भवति। नवज्वरे दिवास्वप्नस्नानपानप्रतिषेधात्, ग्रीष्मे काले च एवं विधानात् व्याधिसात्म्यं बलवदित्युक्तम्। तथा देशसात्म्यादोकःसात्म्याच्चोभयस्मादपि व्याधिसात्म्यं बलवत् इति इच्छन्ति। यथोक्तम्—"येऽप्यतिलवणसात्म्याः पुरुषाः तेषामपि खलतीन्द्रलुप्तवलीपलितादिर्बलवान् प्रकोपो भवति। तेषां तत्सात्म्यतः क्रमेणापगमनं श्रेय इति । अनागतखलतीन्द्रलुप्तव्याध्युत्पत्तिपरिहारार्थं देशशरीरसात्म्ययोरनागतव्याधिभयाद्वर्जनमाह। तदेवं सिद्धे व्याधिसात्म्यस्य सर्वसात्म्येभ्यो बलवत्वात् प्रयोगः। इति सात्म्यपरीक्षा संक्षेपेणोक्ता ॥ सात्म्यपरीक्षानन्तरं औषधपरीक्षामाह—तच्चौषधं संक्षेपेण त्रिविधम् । हेतुविपरीतं व्याधिविपरीतं तदर्थकारि च । तत्र हेतुविपरीतं यथा—'रौक्ष्यात् प्रवृत्तेऽतीसारे

क्रिया स्निग्धा विधीयते। रूक्षा स्नेहनिमित्ते तु शोकजे शोकनाशिनी॥' व्याधिविपरीतं तु—दोषप्रत्यनीकं व्याधिप्रत्यनीकं च। तत्र दोषप्रत्यनीकं यथा–वातजे गदे मधुराम्ललवणस्निग्धोष्णं कर्त्तव्यम्। व्याधिप्रत्यनीकं यथा—'कुष्ठे खादिरं सारं, प्रमेहे हरिद्रा, ज्वरे पर्पटकं, बस्तिरोगे शिलाजतु। तदर्थकारि—हेत्वर्थं व्याध्यर्थं च यत्करोति तत्तदर्थकारि द्विधा। हेत्वर्थकारि व्याध्यर्थकारि च। तत्र हेत्वर्थकारि यथा—मदात्यये मद्यपानम्। व्याध्यर्थकारि यथा—वमीषु वमनं, अतीसारे विरेचनमिति। औषधशब्देन द्रव्याण्युच्यन्ते। तानि च अनेकभेदभिन्नानि। तथा च खरनादः—' पञ्चभूतात्मिकायोनिर्भूतानां सा चतुर्विधा। तासु योनिषु भूतानि द्विविधानि समासतः॥ खानिलाग्निजलोर्वीभ्यो भूतवर्गश्चतुर्विधः। जरायुजान्यण्डजानि स्वेदजान्यौद्भिदानि च॥ तानि हि द्विविधान्याहुः स्थावराणि चराणि च। अतश्च द्विविधं द्रव्यं मतं स्थावरजंगमम्॥ आग्नेयं चैव सौम्यं च पुनर्द्विविधमुच्यते। शोधनं शमनं चैव तत्पुनर्द्विविधं मतम्॥ आग्नेयं शोषणं प्रोक्तं सौम्यं प्रक्लेदनं च यत्। तयोस्तु शोधनं द्रव्यं विरेकवमनादिषु॥ क्षयस्थानविवृद्ध्यर्थं दोषाणां यत्प्रयुज्यते। विना संशोधनैर्द्रव्यं तत् संशमनमुच्यते॥ गुरुसान्द्रखरस्थूलं स्थिरं गन्धगुणाधिकम्। भौमं द्रव्यं हि तत् स्नेहगौरवोपचयावहम्॥ गुरु शीतं स्वादुरसं स्निग्धं मन्दं रसाधिकम्। आप्यं तत् स्नेहविष्यन्दमार्द्दवक्लेदकारकम्॥ रूक्षोष्णं तीक्ष्णविशदं लघुरूपगुणाधिकम्। द्रव्यं तत्तैजसं विद्याद्दाहपाकप्रभाकरम्॥ रौक्ष्यपारुष्यवैशद्यशैत्यस्पर्शगुणाधिकम्। वायव्यं तद्धि वैशद्यरौक्ष्यलाघवशोषकृत्। द्रव्यं लघु मृदु श्लक्ष्णं सूक्ष्मं शब्दगुणाधिकम्। खात्मकं तद्धि शौषिर्याल्लघुकृन्मार्द्दवावहम्॥ पञ्चात्मकत्वात् द्रव्याणां द्रव्यं नानौषधं भवेत्॥" एवं भूतोद्रेकात्सर्वमेव द्रव्यं पञ्चभूतात्मकं व्याख्यातम्॥ तच्च रसगुणवीर्यविपाकप्रभावद्वारेण विचार्यमाणं पुनरप्यनेकप्रकारं भवति। तत्र मधुराम्ललवणकटुतिक्तकषायाः षड्रसाः। तेषां कटुतिक्तकषाया वातं प्रकोपयन्ति। कट्वम्ललवणाः पित्तम्। मधुराम्ललवणाः श्लेष्माणमिति। तथा मधुराम्ललवणा वातघ्नाः। मधुरतिक्तकषायाः पित्तघ्नाः। कटुतिक्तकषायाः श्लेष्मघ्ना इति। तथा च चरकः—"कफं स्वाद्वम्ललवणाः कषाय-

कट्वतिक्तकाः। जनयन्त्यनिलं पित्तं कट्वम्ललवणा रसाः॥ स्वाद्व-म्ललवणा वायुं कषायस्वादुतिक्तकाः। जयन्ति पित्तं श्लेष्माणं कषाय-कट्वतिक्तकाः॥" इति। तथा च—"कट्वम्ललवणाः पित्तं स्वाद्वम्ल-लवणाः कफम्। कट्वतिक्तकषायाश्च कोपयन्ति समीरणम्॥" ते च परस्परसंसर्गात् त्रिषष्टिधा भवन्ति। सा च त्रिषष्टी रसभेदानां द्विष-ष्टिर्दोषभेदानां स्वांशांशबलविकल्पद्वारेणोपयोगतां याति। तथा चोक्तं चरकाचार्येण—"क्वचिदेको रसः कल्प्यः संयुक्ताश्च रसाः क्वचित्। दोषौषधादीन्सञ्चिन्त्य भिषजा सिद्धिमिच्छता॥ द्रव्याणि द्विरसादीनि संयुक्तांश्च रसान् बुधाः। रसानेकैकशश्चापि कल्पयन्ति गदान् प्रति॥ यस्मात् द्रव्यादिकल्पज्ञः सर्वदोषविकल्पवित्। न स मुह्येद्विकाराणां हेतुलिंगोपशान्तिषु'॥ एवं रसा व्याख्याताः॥ इत्यतो गुणा विचा-र्य्यन्ते—"शीतोष्णस्निग्धरूक्षाश्च मन्दस्तीक्ष्णो गुरुर्लघुः। पिच्छिलो विशदः श्लक्ष्णः परुषः कठिनो मृदुः॥ द्रवसान्द्रस्थिरसराः स्थूलसू-क्ष्माश्च विंशतिः। परस्परप्रत्यनीका द्वन्द्वशोऽवस्थिता गुणाः॥ द्रव्ये-ष्वेते गुणाः सन्ति त्रिषु चाप्यनिलादिषु। तुल्यैर्गुणैर्दोषवृद्धिर्विपरीतैः परिक्षयः"॥ एवं गुणाः खरनादेनोक्ताः॥ इदानीं वीर्यमुच्यते—वीर्य्य-शब्दस्तु शक्त्यध्यवसायौष्ण्यादिगुणशुक्रेषु वर्तते। तत्र शक्तौ तावद्र-सायनं ब्राह्मयमुदारवीर्यमिति उदारशक्तिरित्यर्थः॥ अध्यवसाये—"वीर्यं बलवर्द्धनानाम्।" अध्यवसायो बलवर्द्धनानामिति। औष्ण्यादिषु गुणेषु वीर्य्यसंज्ञात्वं तद्यथा—"तानि शीतानि कर्माणि विद्यादामलके-ष्वपि। यान्युक्तानि हरीतक्यां वीर्य्यस्य तु विपर्ययः।" उष्णगुणा हि हरीतकी, धात्रीफलेषु शैत्यम्, एवं विपर्ययः। यथा शीतोष्णत्वात् विरुद्धवीर्यं विरुद्धगुणमिति। शुक्रे वीर्यसंपत्त्या विवर्द्धमानान् शुक्र-विवर्द्धनानित्यर्थः। तदेवमनेकभेदाभिधाय्यपि वीर्यशब्द इह गुणा-भिधायी। तथा च चरकः—'मृदु तीक्ष्णं गुरु लघु रूक्षस्निग्धोष्ण-शीतलम्। वीर्य्यमष्टविधं केचित् केचिद् द्विविधमास्थिताः॥ शीतो-ष्णमिति वीर्य्यं तु क्रियते येन या क्रिया। नावीर्यं कुरुते किञ्चित् सर्वा वीर्य्यवती क्रिया।' एवं वीर्य्यमुक्तम्॥ विपाको विचार्य्यते—तत्र विपाको नाम पाच्यार्थाहारार्थादेव जाठ-राग्निसंयोगादौष्ण्यापेक्षं यदुदेति निष्ठाकाले गुणान्तरं तण्डुलेष्विव

विक्लित्तिः स विपाकः। तथाऽन्यैरप्युक्तम्–'जाठरानलसम्पर्काद् यदुदेति रसान्तरम्। रसानां परिणामान्ते स विपाक इति स्मृतः॥ पक्के त्वाम्रादिफले पूर्वो हि यथा रसः स्थिरो भवति। प्रादुर्भवेद्रसोऽन्यः परिणामाख्यस्तथाहारे। स च त्रिविधश्चरकाचार्येणोक्तः—"कटुतिक्तकषायाणां विपाकः प्रायशः कटुः। अम्लोऽम्लं पच्यते स्वादुर्मधुरो लवणस्तथा॥ मधुरो लवणाम्लौ तु स्निग्धभावात् त्रयो रसाः। वातमूत्रपुरीषाणां प्रायो मोक्षे सुखा मताः। कटुतिक्तकषायास्तु रूक्षभावात् त्रयो रसाः। दुःखा विमोक्षे दृश्यन्ते वातविण्मूत्ररेतसाम्। शुक्रघ्नो बद्धविण्मूत्रो विपाको वातलः कटुः॥ मधुरः सृष्टविण्मूत्रो विपाकः कफशुक्रलः। पित्तकृत् सृष्टविण्मूत्रः पाकोऽम्लः शुक्रनाशनः॥ तेषां गुरुः स्यात् मधुरः कटुकाम्लावतोऽन्यथा"। सुश्रुताचार्येणापि द्विविधः पाकः प्रोक्तः—मधुरः कटुश्च। "द्रव्येषु पच्यमानेषु येष्वम्बुपृथिवीगुणाः। निर्वर्त्तन्तेऽधिकास्तत्र पाको मधुर उच्यते॥ तेजोनिलाकाशगुणाः पच्यमानेषु येषु च। निर्वर्तन्तेऽधिकास्तत्र पाकः कटुक उच्यते"। तयोर्मधुराख्यो गुरुः, कटुकाख्यो लघुरिति। गुरुः पाको वातपित्तघ्नः। लघुः श्लेष्मघ्नः। गुरुः पाकः सृष्टविण्मूत्रतया कफोत्क्लेशेन च। लघुर्बद्धविण्मूत्रतया मारुतकोपेन च। चरकादीनामपि पाकद्वयमभिप्रेतम्मधुर कटुकाख्यम्। यतस्ते उक्तवन्तः। "तेषां गुरुः स्यान्मधुरः कटुकाम्लवतोऽन्यथा"। इति लघुरित्यर्थः। यद्येवं कथमुच्यते "मधुरश्चाम्लपाकश्च व्रीहिः पित्तकरो गुरुः। उष्णाः कषायाः पाकेऽम्लाः कफशुक्रानिलापहाः। कुलत्था इति"? उच्यते—अम्लकारित्वसामर्थ्यात् अम्लपाका उक्ताः। वीर्येणोष्णेन कुलत्थस्य पित्तकरत्वं सिद्धम्। नार्थोऽम्लपाकत्वेन। व्रीहिश्च प्रभावात् वीर्योष्णः पित्तकृद्भविष्यति नार्थोऽम्लपाकतयेति। एवं विपाकः उक्त इति। एषां च रसगुणवीर्य्यविपाकानामुपलब्धिश्चरकाचार्येणोक्ता—'रसो निपाते द्रव्याणां विपाकः कर्मनिष्ठया। वीर्यं यावदधीवासान्निपाताच्चोपलभ्यते" इति॥ अथ प्रभाव उच्यते—अथ कोऽयं प्रभावो नाम? भवनं भावः प्रकृष्टो भावः प्रभावः। द्रव्यस्य विशिष्टशक्त्याधिष्ठितत्वेन विशिष्टजन्मना यासौ द्रव्यविशिष्टा निजशक्तिः सा प्रभावशब्देनोच्यते। तथा चोक्तं सुश्रुताचार्येणापि–"तद् द्रव्य-

मात्मना किञ्चित्किञ्चिद्वीर्य्येण सेवितम्। किञ्चिद्रसविपाकाभ्यां दोषं हन्ति करोति वा"। तद् द्रव्यमात्मना किञ्चिदिति यदुक्तं तदात्मशक्तया किञ्चित् किञ्चिद्रसादिकरणशक्तया दोषं हन्ति करोति चेति संक्षेपार्थः। तथान्यैरप्युक्तं—"सामान्यविशेषात्मकमिह कुरुते द्रव्यमेव कर्माणि। तच्चापि करणशक्तया निजशक्त्या वा न गतिरन्या"। या चैषा निज-शक्तिर्द्रव्यरसादिकरणनिरपेक्षा सैव प्रभावशब्देन चोदिता चरकमुनि-नापि। तथा च चरकः–'रसवीर्य्यविपाकानां सामान्यं यस्य लक्ष्यते। विशेषः कर्मणां चैव प्रभावस्तस्य स स्मृतः॥ त्रिकटुः कटुकः पाके वीर्योष्णश्चित्रको लघुः। तद्वद् दन्ती प्रभावाद्धि विरेचयति सा नरम्। विषं विषघ्नमुक्तं यत्प्रभावस्तत्र कारणम्। ऊर्ध्वानुलोमिकं यच्च तत्प्रभावेण भावितम्। मणीनां धारणीयानां कर्म यद्विविधात्मकम्। तत्प्रभावकृतं तेषां प्रभावोऽचिन्त्य उच्यते।" एवं प्रभावस्वरूपमुक्तम्। पुनरपि त्रैविध्यं द्रव्यस्य दोषप्रशमनधातुदूषणस्वस्थवृत्तोपयोगिद्वारेण चरकाचार्ये-णोक्तं—"किञ्चिद्दोषप्रशमनं किञ्चिद्धातुप्रदूषणम्। स्वस्थवृत्तौ मतं किञ्चित् द्रव्यं त्रिविधमुच्यते"। पुनरप्यन्येन प्रकारेण त्रैविध्यमुक्तं औष-धस्य चरकेण। "त्रिविधमौषधमिति दैवव्यपाश्रयं, युक्तिव्यपाश्रयं, सत्वा-वजयश्चेति। तत्र दैवव्यपायश्रं–मन्त्रौषधिमणिमंगलबल्युपहारहोमनियम प्रायश्चित्तोपवासस्वस्त्ययनप्रणिपाततीर्थगमनादि। युक्तिव्यपाश्रयं— पुनराहारविहारौषधानां द्रव्याणां योजना। सत्वावजयस्तु अहितेभ्यो-ऽर्थेभ्यो मनोनिग्रहः"। "शारीरदोषप्रकोपे तु खलु शरीरमेवाश्रित्य पुन-रपि त्रिविधं औषधमिच्छन्ति। अन्तःपरिमार्जनं बहिः परिमार्जनं शस्त्रप्रणिधानञ्चेति। तत्रान्तःपरिमार्जनम् यदन्तःशरीरमनुप्रविश्य औषधं आहारजातं च व्याधिं परिमार्ष्टि तदन्तःपरिमार्जनम्। यत्पु-नर्बहिःस्पर्शनमाश्रित्याभ्यंगस्वेदप्रदेहपरिषेकोन्मर्दनाद्यैरामयान् परि-मार्ष्टि तद्बहिःपरिमार्जनम्। शस्त्रप्रणिधानं पुनः छेदनभेदनव्यधन दारणलेखनोत्पाटनसीवनप्रच्छादनजलौकसश्चेति"। एवमौषधपरीक्षा संक्षेपेणोक्ता॥ औषधपरीक्षानन्तरं अनलपरीक्षामाह—अनिलोऽग्नि-स्तस्य च नाभिः स्थानम्। तथा चोक्तं तन्त्रान्तरेषु–"नाभिमध्ये शरीरस्य विज्ञेयं सोममण्डलम्। सोममण्डलमध्यस्थं विद्यात् सूर्य्यस्य मण्डलम्॥ प्रदीपवत्तत्र नृणां स्थितो मध्ये हुताशनः। सूर्यो दिवि यथा तिष्ठन् तेजो-

युक्तैर्गभस्तिभिः॥ विशोषयति सर्वाणि पल्वलानि सरांसि च। तद्वच्छरीरिणां भुक्तं जाठरो नाभिमास्थितः॥ मयूखैः क्षिप्रमादत्ते नानाव्यञ्जनसंस्कृतम्। स्थूलकायेषु सत्वेषु यवमात्रं प्रमाणतः। ह्रस्वकायेषु सत्त्वेषु तिलमात्रप्रमाणतः॥ कृमिकीटपतङ्गेषु त्वणुमात्रोऽवतिष्ठते"। इत्यादि। तदायत्तं च शरीरप्रमाणच्छायौजोबलवर्णादि। स च त्रयोदशविधः। प्रधानो जाठरोऽन्नस्य पक्ता अशितपीतलीढखादितं षड्रसं आहारं पचति। तस्य पच्यमानस्य त्रयो मलाः सम्भवन्ति विण्मूत्रक्लेदाः। तैर्विरहितोऽपरः सारभूतो रसो भवति। तस्य रसस्य मलानां च विवेचयिता वायुः जाठरस्याग्नेर्धर्त्ता। तेषु चाग्निषु पञ्चभूताग्नयः। ते च पांचभौतिकस्याहारस्य स्वान् पार्थिवादीन् विशेषगुणान् पचन्ति। तथापरे सप्तधात्वग्नयः। ते च रसादीनां सप्तधातूनां पक्तारः। आहाररसेन निषिच्यमानस्य स्वेनाग्निना पच्यमानस्य रसस्य श्लेष्मा मलं संभवति। ततो रक्तस्य स्वेनाग्निना पच्यमानस्य पित्तम्। ततो मांसस्य स्वेनाग्निना पच्यमानस्य छिद्रेषु मलम्। ततो मेदसः स्वेनाग्निना पच्यमानस्य स्वेदो मलः। ततोऽस्थ्नः स्वेनाग्निना पच्यमानस्य नखरोमादि मलम्। ततो मज्ज्ञः स्वेनाग्निना पच्यमानस्य अक्षिविट्त्वक्स्नेहो मलः। ततः शुक्रस्य स्वेनाग्निना पच्यमानस्य मलाभावोऽत्यन्तनिर्मलत्वात्। एवं त्रयोदशभिरग्निभिरिदं शरीरं पाल्यते सारमलविवेचनात्। तथा च चरकः—"आयुर्वर्णो बलं स्वास्थ्यमुत्साहोपचयौ प्रभा। ओजस्तेजोऽग्नयः प्राणाश्चोक्ता देहेऽग्निहेतुकाः। शान्तेऽग्नौ म्रियते युक्ते चिरंजीवत्यनातुरः॥ रोगी स्याद्विकृते मूलमग्निस्तस्मान्निरुच्यते। यदन्नं देहधात्वोजोबलवर्णादिपोषकम्। तत्राग्निर्हेतुराहारान्न ह्यपक्वाद्रसादयः। अन्नमिष्टं ह्युपहितमिष्टैर्गन्धादिभिः पृथक्। देहे प्रीणाति गन्धादीन् प्राणादीनिन्द्रियाणि च। भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः। पञ्चाहारगुणान् स्वान् स्वान्पार्थिवादीन् पचन्त्यनु। यथास्वं स्वं च पुष्णन्ति देहे द्रव्यगुणान् पृथक्। पार्थिवाः पार्थिवानेव शेषाः शेषाँश्च कृत्स्नशः। सप्तभिर्देहधातारो धातवो द्विविधं पुनः। यथास्वमग्निभिः पाकं यान्ति किट्टप्रसादवत्॥ रसाद्रक्तं ततो मांसं मांसान्मेदोऽस्थि मेदसः। अस्थ्नो मज्जा ततः शुक्रं शुक्राद् गर्भः प्रजायते॥ रसात् स्तन्यं

तथा रक्तमसृजः कण्डराः सिराः। मांसाद्वसा त्वचः षट् च मेदसः स्नायुसन्धयः। किट्टमन्नस्य विण्मूत्रं रसस्य तु कफोऽसृजः॥ पित्तं मांसस्य खमलो मलः स्वेदस्तु मेदसः। स्यात् किट्टं केशलोमास्थ्नोर्मज्ज्ञः स्नेहोऽक्षिविट् त्वचः॥ प्रसादकिट्टौ धातूनां पाकादेवंविधादिति"। "इति भौतिकधात्वग्निपक्तृणां कर्म भाषितम्॥ अन्नस्य पक्ता सर्वेषां पक्तृणामधिको मतः। तन्मूलास्ते हि सर्वेऽपि स्थानवृद्धिक्षयात्मकाः। तस्मात् तं विधिवत् युक्तैरन्नपानेन्धनैर्हितैः॥ पालयेत् प्रयतस्तस्य स्थितौ ह्यायुर्बलस्थितिः"। इति। स चाग्निर्वातादिभिर्दोषैर्दुष्टः संक्षेपात् त्रिविधो भवति। अविकृतश्च स दोषैः समश्चतुर्थः। तथा च सुश्रुतः—'विषमो वातेन, तीक्ष्णः पित्तेन, मन्दः श्लेष्मणा, समः सर्वसाम्यादिति। तत्र यो यथाकालमन्नमुपयुक्तं सम्यक् पचति स समः समैर्दोषैः। यः कदाचित् सम्यक् पचति कदाचिदाध्मानशूलोदावर्त्तातीसारजठरगौरवान्त्रकूजनप्रवाहणानि कृत्वा पचति स विषमः। यः प्रभूतमपि उपयुक्तमन्नमाशुतरं पचति स तीक्ष्णः। स एवाभिवर्द्धमानोऽत्यग्निरित्याभाष्यते। स मुहुर्मुहुः प्रभूतमप्युपयुक्तमन्नमाशुतरं पचति। पाकान्ते च गलताल्वोष्ठशोषदाहसंतापान् जनयति। यः स्वल्पमप्युपयुक्तमुदरशिरोगौरवश्वासकासच्छर्दिप्रसेकगात्रसदनप्रवाहणानि कृत्वा महता कालेन पचति स मन्दः"। "विषमो वातजान् रोगान् तीक्ष्णः पित्तनिमित्तजान्। करोत्यग्निस्तथा मन्दो विकारान् कफसंभवान्"॥ तत्र समे परिरक्षणं कुर्वीत। विषमे स्निग्धाम्ललवणैः क्रियाक्रियाविशेषैः प्रतिकुर्वीत। तीक्ष्णे मधुरस्निग्धशीतैर्विरेकैश्च। एवमेवात्यग्नौ विशेषेण माहिषैश्च क्षीरदधिसर्पिर्भिः। मन्दे कटुतिक्तकषायैर्वमनैश्च॥ "जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः। सौक्ष्म्यात् रसानाददानो विवेक्तुं नैव शक्यते॥ प्राणापानसमानैश्च सर्वतः पवनैस्त्रिभिः। ध्मायते पाल्यते वापि स्वां स्वां गतिमवस्थितैः।" एवमनलपरीक्षा संक्षेपेणोक्ता॥ अनलपरीक्षानन्तरं वयःपरीक्षामाह—तच्च वयः संक्षेपेण त्रिविधम्। तथा च सुश्रुतः—"वयस्त्रिविधं बालं मध्यं वृद्धमिति। तत्रोनषोडशवर्षा बालाः। तेऽपि त्रिविधाः क्षीरपाः,क्षीरान्नादाः,अन्नादा इति। तेषु संवत्सरपराः क्षीरपाः। द्विसंवत्सरपराः क्षीरान्नादाः,

परतोऽन्नादा इति। षोडशसप्तत्योरन्तरे मध्यं वयः। तस्य विकल्पाः वृद्धिर्यौवनं सर्वसंपूर्णता हानिरिति। तत्राविंशतेर्वृद्धिः, आत्रिंशतो यौवनं, आचत्वारिंशत् सर्वधात्विन्द्रियबलसंपूर्णता, अत ऊर्ध्वमीषत्परिहानिर्यावत् सप्ततिरिति। सप्ततेस्तूर्ध्वं क्षीयमाणधात्विन्द्रियबलवर्णोत्साहमहन्यहनि वलीपलितखालित्यजुष्टं कासश्वासप्रभृतिभिरभिभूयमानं सर्वक्रियास्वसमर्थं जीर्णागारमिव सर्वाभिवृष्टमवसीदन्तं वृद्धमाचक्षते। तत्रोत्तरोत्तरासु यौवनावस्थासूत्तरोत्तरा भेषजमात्राविशेषाः ऋते परिहानेस्तत्र सापेक्षया प्रतिकुर्वीत। बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु। भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत्॥ अग्निक्षारविरेकैस्तु बालवृद्धौ विवर्जयेत्। तत्साध्येषु विकारेषु मृद्वीं कुर्यात् क्रियां शनैरिति"॥ वयः परीक्षा संक्षेपेणोक्ता॥ अथ वयःपरीक्षानन्तरं प्रकृतिपरीक्षा आरभ्यते—अथ केयं प्रकृतिः? कति भेदाः? किं कारणम्? किं चास्याः स्वलक्षणमिति? उच्यते-केयं प्रकृतिरिति स्वभाव इत्यर्थः। सा चादिबलप्रवृत्ता। आनिषेकाद् वाताद्यारब्धा आप्रयाणादनुवर्त्तते। कति भेदा इति-सप्तप्रकृतयो भवन्ति, दोषैः पृथक् द्विशः समस्तैश्च। किं कारणमिति? तदाह—सुश्रुतः-"शुक्रशोणितसंयोगे यो भवेद् दोष उत्कटः। प्रकृतिर्जायते तेन तस्या मे लक्षणं शृणु"॥ इत्यादयः श्लोकाः सुश्रुते शारीरे सन्ति। केनाप्युक्तम्—'शुक्रासृग्गर्भिणीभोज्यचेष्टागर्भाशयर्तुषु। यः स्याद्दोषोऽधिकस्तेन प्रकृतिः सप्तधोदिता इति"॥ शुक्रादीनि कारणानि। यदुक्तं दोषौत्कट्येन प्रकृतिस्तदयुक्तं समत्वानुपपत्तेः। किं चान्यत् उच्छ्राये सति विकारभावः। विकारभावाच्च प्रकृतित्वं स्फुटितकरचरणादिविकारोपदेशात् प्रकृतिषु। प्रकृतित्वं त्रिदोषजप्रकृतेश्चाभावः सर्वौत्कट्याद्धि सर्वसाम्यम्। यस्मादेवं तस्माद्विकारा एव स्फुटितकरचरणादिकाः शीघ्रग्रन्थमतिमत्त्वादिगुणसमेताः प्रकृतिव्यपदेशभाजो भवन्ति। ते च विकाराः क्षुत्पिपासादिलक्षणवत् प्रकृतिलक्षणा एव न विकारसंज्ञाः फणिनां च स्वविषेण विकारानुत्पत्तिदर्शनात्। एवं प्राणिनामपि तद्भावेभ्यो विद्यते। कायस्य तु प्रकृत्या न विकारसंज्ञाः। तदेवं दोषौत्कट्यादेव प्रसिद्धा प्रकृतिः। किं चास्याः स्वलक्षणमिति यदुक्तं तदुच्यते चक्षुष्येणेन-"रूक्षापचितशरीरो रूक्षक्षाम

स्वरोऽल्पदेहबलः। शीघ्रायासविकारो द्रुतगतिवाक्चेष्टिताहारः॥ शीघ्रग्रन्थो मतिमान् शीतालुर्जागरिष्णुरुष्णसहः। स्फुटितत्वक्पाद-करश्चलचित्तश्चानिलप्रकृतिः। उष्णसहः सुकुमारः शिथिलामात्रप्रभूतविड् युक्तः। मृद्वल्पकपिलकेशश्मश्रुस्तीक्ष्णोऽतितीक्ष्णाग्निः॥ क्षिप्रवलीपलितश्च प्रसृष्टविट्स्वेदमूत्रवातश्च। विस्रश्च कटुगन्धो मध्यबलः पैत्तिकः पुरुषः॥ स्निग्धोपचितशरीरः प्रसन्नवर्णेन्द्रियस्वरो बलवान्। धृतिमान् विलम्बितगतिः सुकृतस्नगन्धो दृढग्राही॥ मन्दप्रलापचेष्टाक्षुत्तृष्णास्वेददोषसंतापः। देशे काले चोष्णे भवत्यरोगः कफप्रकृतिः॥ प्रकृतिद्वयसंसर्गात् संसृष्टः प्रकृतिलक्षणैः सर्वैः। संयुक्तः समधातुः स भवत्यल्पामयो बलवान्"॥ पञ्चभूतात्मका ह्यपराः सुश्रुतेनोक्ताः। "प्रकृतिमिह नराणां भौतिकीं केचिदाहुः पवनदहनतोयैः कीर्तितास्तास्तु तिस्रः। स्थिरविपुलशरीरः पार्थिवश्च क्षमावान् शुचिरथ चिरजीवी नाभसः खैर्महद्भिः। अन्यैश्च त्रिगुणात्मिका षोडशविधा प्रकृतिरुद्दिष्टा॥ तथा च चरकः—'शुद्धा सप्तविधा ब्रह्मर्षिशक्रयमवरुणकुबेरगन्धर्वसत्वानुकारेण। राजसस्य षड्विधा दैत्ययक्षराक्षसपिशाचप्रेतशकुनिसत्वानुकारेण। तामसस्य च त्रिविधा पशुमत्स्यवनस्पतिसत्वानुकारेण। तेषां यथासत्वमुपकारः स्यादिति। एवं प्रकृतिपरीक्षा संक्षेपेणोक्ता॥ एवं दोषादीन् परीक्ष्य नानाप्रकारपवनादिगदातुराणां इदमुक्तं चिकित्सितम्। पवन आदिर्येषां ते पवनादयः। तैर्गदाः पवनादिगदाः। नानाप्रकाराश्च ते पवनादिगदाश्च तैः आतुराः नानाप्रकारपवनादिगदातुराः। तेषां चिकित्सितं साधनं इदमग्रतो वक्ष्यमाणमुक्तम्। न तु कर्मजानामिति। कर्मजानां दोषादिपरीक्षणं निष्प्रयोजनमेव। तेषां हि दैवव्यपाश्रयं चिकित्सितं मन्त्रौषधिमंगलादिकमुक्तम्। अतो दोषजानामेवेदमुक्तम्। इत्युत्तीर्णाः स्म इत्यतो दोषप्रदेशादिश्लोकदुर्गात्॥ १६॥

दोष (वात, पित्त, कफ, रज, तम), प्रदेश (भूमी, रोगी), बल, काल, विकार, मन, सात्म्य, औषध, अग्नि, वय (आयु) तथा प्रकृति आदि की परीक्षा करके नानाविध दोषज व्याधियों से पीडित पुरुषों के उपकार के लिये इस ग्रन्थ में चिकित्सा कही गई है। कर्मज व्याधियों की चिकित्सा का इसमें वर्णन नहीं॥ १६॥

पूर्वं त्वग्दोषधातुमलमर्मशिरादिव्याप्तं वपुरित्युक्तमतो वातादीनां स्वरूपमाह—

चेष्टाचेतनयोस्तनौ तनुभृतां धाता तु वायुः स्मृतः
यत्तापं परितो दधात्यविरतं देहे हि पित्तं तु तत्।
यश्चाश्लिष्य वपुः सदा रसयति प्रीणाति सोऽयं कफ-
श्चेत्येतैः प्रकृतिस्थितैरविरतं देहं हि सन्धार्यते ॥ १७ ॥

तनुभृतां कर्मपुरुषाणां तनौ वपुषि चेष्टाचेतनयोः चेष्टा च चेतना च ते चेष्टाचेतने तयोः चेष्टाचेतनयोः कायिकव्यापारस्य ज्ञानस्य च धाता कर्ता तु वायुः वातः स्मृतः मतः। तथा च चरकः—"सर्वा हि चेष्टा वातेन स प्राणः प्राणिनां स्मृतः"॥ "उत्साहोच्छ्वासनिश्वासचेष्टाधातुगतिः समा। समो मोक्षो गतिमतां वायोः कर्माविकारजम्" ॥ "वायुस्तन्त्रयन्त्रधरः, प्राणोदानसमानव्यानापानात्मा, प्रवर्त्तकश्चेष्टानामुच्चावचानां, नियन्ता प्रणेता च मनसः, सर्वेन्द्रियाणामुद्योजकः, सर्वेन्द्रियार्थानामभिवोढा, सर्वशरीरधातुव्यूहकरः, सन्धानकरः शरीरस्य, प्रवर्त्तको वाचः, प्रकृतिः स्पर्शशब्दयोः, श्रोत्रस्पर्शनयोर्मूलं, हर्षोत्साहयोर्योनिः,समीरणोऽग्नेर्दोषसंशोषणः, क्षेप्ता बहिर्मलानां, स्थूलाणुस्रोतसां भेत्ता, कर्त्ता गर्भाकृतीनां, आयुषोऽनुवृत्तिप्रत्ययभूतो भवत्यकुपितः। सुश्रुतेऽप्युक्तं—प्रस्पन्दनोद्वहनपूरणविवेकधारणलक्षणो वायुः पञ्चधा प्रविभक्तः शरीरं धारयति। यत् देहे कायेऽविरतं निरन्तरं (आजननतो मरणपर्य्यन्तमिति यावत्) तापमूष्माणं परितः सर्वतः दधाति तत् तु पित्तं पित्तमिति संज्ञितम्। हि शब्दो निश्चयार्थावबोधकः। तथा चोक्तं सुश्रुताचार्येण रागपक्त्योजस्तेजोमेधोष्मकृत्पित्तं पञ्चधा प्रविभक्तमग्निकर्मणानुग्रहं करोति। चरकेऽप्युक्तं—"पित्तादेवोष्मणः पक्तिर्नराणामुपजायते ॥ दर्शनं पक्तिरूष्मा च क्षुत्तृष्णा देहमार्दवम्। प्रभा प्रसादो मेधा च पित्तकर्माविकारजम्" ॥ यश्च वपुः शरीरं आश्लिष्य रसयति स्नेहयति, प्रीणाति च सोऽयं कफः। इत्येनेनैतदुक्तं भवति यदि शरीरे श्लेष्मा न स्यात्तर्हि पित्तकृतेनोष्मणा शरीरं शोषमापद्यमानं नश्येत् ॥ तथा च सुश्रुतः—सन्धिश्लेषणस्नेहनरोपण-

पूरणबृंहणतर्पणबलस्थैर्यकृच्छ्लेष्मा पञ्चधा प्रविभक्त उदककर्मणानुग्रहं करोति। चरकेणाप्युक्तं-स्नेहो बन्धः स्थिरत्वं च गौरवं वृषता बलम्। क्षमा धृतिरलोभश्च कफकर्माविकारजम्॥ इत्येतैः पूर्वोक्तैः वातपित्त-कफैः प्रसादभूतैः प्रकृतिस्थितैः साम्यमाश्रितैः अविरतं निरन्तरं देहं शरीरं हि सन्धार्यत उपष्टभ्यते। तथा च चरकः—"सर्व एव खलु वातपित्तश्लेष्माणः प्रकृतिभूताः पुरुषमव्यापन्नेन्द्रियं बलवर्णसुखोपपन्न-मायुषा महतोपपादयन्ति" इत्यादि। अत्र शरीरधातवो पुनर्द्विधा सङ्ग्रहेण-मलभूताः प्रसादभूताश्च। तत्र मलभूतास्ते ये शरीरस्य बाधकराः स्युः। तद्यथा-शरीरच्छिद्रेषूपदेहाः पृथग्जन्मानो बहिर्मुखाः परिपक्काश्च धातवः प्रकुपिताश्च वातपित्तश्लेष्माणो ये चान्येऽपि केचित् शरीरे तिष्ठन्तो भावाः शरीरस्योपघातायोपपद्यन्ते सर्वांस्तान्मलान् सञ्चक्ष्महे। इतरांस्तु प्रसादान्" ॥ प्रसादभूताश्च वातपित्तश्लेष्माणः देह-धारणात् धातवः मलभूताश्च दूषणात् दोषा इत्युच्यन्ते। अन्ये तु दोषा इति मलभूतानां मुख्या संज्ञा यतस्ते दुष्टाः स्वभावादेव दूषयितारो भवन्ति, गौणी च प्रसादभूतानाम्॥ १७॥

शरीरधारियों के शरीर में जो चेष्टा (कायिक व्यापार) का कर्ता तथा चेतना (ज्ञानोपलब्धि) का साधन है वह वात है। जो सर्वत्र उष्णता को पैदा करता है उसका नाम पित्त है और जो शरीर को इस निरन्तर उत्पन्न होती हुई उष्णता से बचाकर स्नेहन तथा तर्पण करता है उसका नाम कफ है॥ इन दोषों अर्थात् वात पित्त तथा कफ की समता द्वारा ही यह शरीर स्थित रहता है॥ यहां पर प्रसादसंज्ञक वात, पित्त, तथा कफ का ही ग्रहण करना चाहिये॥ १७॥

प्राक् धातुभिर्मलैश्च व्याप्तं वपुरित्युक्तं तत्र के धातवः के च मला इत्यत आह—

रसश्च रक्तं पिशितं च मेद-
स्त्वस्थीनि मज्जा त्वथ शुक्रमेते।
स्युर्धातवः सप्त तथा मलाश्च
विण्मूत्रमुख्या मुनिभिः प्रदिष्टाः॥ १८॥

रसादयो धातवः सप्त स्युर्भवेयुः तथा मला विण्मूत्रमुख्याः। विट् पुरीषम्। विट् च मूत्रं च विण्मूत्रं ते मुख्ये प्रधाने येषां ते विण्मूत्र-

मुख्याः मलाः। तत्प्रधाना मुनिभिः पूर्वाचार्यैः प्रदिष्टाः कथिताः। मुख्यग्रहणात् अन्येऽप्यप्रधानाः कफादयो धातुमलाः सन्ति। तथा च सुश्रुतः—"कफः पित्तं मलः खेषु प्रस्वेदो नखरोम च। स्नेहोक्षित्वग्विशामोजो धातूनां क्रमशो मलाः" इति ॥ १८ ॥

सुश्रुत आदि मुनियों ने रस, रक्त, मांस, मेद, अस्थि, ( हड्डी ), मज्जा तथा शुक्र ( वीर्य ); इन्हें सात धातु और पुरीष, मूत्र, स्वेद आदि को मल कहा है ॥ १८ ॥

पूर्वं स्वस्थरक्षणं प्रयोजनमुक्तमायुर्वेदस्य तस्य च स्वस्थस्य किं लक्षणमित्यत आह—

दोषेषु धातुषु मलेषु समेषु सत्सु
साम्यं भवेदिह नृणामसमेष्वसाम्यम्।
यस्मादतः समतया प्रयतेत तेषा-
मेतच्चिकित्सितरहस्यमुदाहरन्ति ॥ १९ ॥

दोषेषु वातपित्तकफेषु रसरक्तमांसमेदोऽस्थिमज्जाशुक्रेषु मलेषु च विण्मूत्रादिषु। एषु समेष्वनतिरिक्तेषु सत्सु साम्यं भवेदिह नृणां प्राणिनाम्। असमेषु च दोषेषु यस्मादसाम्यं भवेदतोऽस्मात् कारणात् समतया प्रयतेत यत्नं कुर्वीत। तेषां दोषादीनामिति। एतच्चिकित्सितरहस्यमायुर्वेदरहस्यमकथनीयमनाप्तायोदाहरन्त्याचार्याः। इत्येष संक्षेपार्थः। अत्र विचार्यते–कीदृशाः सन्तो दोषादयः समा इत्युच्यन्ते? स्वासंभिन्नगुणयुक्ताः स्वाभ्युदयकरकर्मानुष्ठानपराः समा वातादय उच्यन्ते। सैव हि तेषां समता अरोगितेत्युच्यते। स्वाभ्युदयकर्मकरत्वं च दोषादीनां सुश्रुतादिभिरुक्तम्। तथा च सुश्रुतः—तत्र प्रस्पन्दनोद्वहनपूरणविवेकधारणलक्षणो वायुः पञ्चधा प्रविभक्तः शरीरं वर्धयति। रागपक्त्योजस्तेजोमेधोष्मकृत्पित्तं पञ्चधा प्रविभक्तमग्निकर्मणानुग्रहं करोति। सन्धिसंश्लेषणस्नेहनरोपणपूरणबलस्थैर्यकृच्छ्लेष्मा पञ्चधा प्रविभक्त उदककर्मणानुग्रहं करोति॥ रसः प्रीणयति, रक्तं जीवयति, मांसं लेपयति, मेदः स्नेहयति, अस्थीनि धारयन्ति, मज्जा पूरयति, वीर्यप्रीतिबीजार्थप्रहर्षकृच्छुक्रम्। पुरीषमुपस्तम्भं वाय्वग्निधारणं

च। क्लेदविवेकजं बस्तिपूरणकृन्मूत्रम्। स्वेदः क्लेदयतीत्यादि। ननु कस्माद्दोषधातुमलानामेव समत्वलक्षणं साम्यं नाग्निक्रियादिलक्षणमपीत्युच्यते—नात्रावधारणमुक्तमाचार्याणां भिन्नमतत्वात्। तथा च कैश्चित् वातपित्तश्लेष्मणां समत्वमेवारोग्यमुक्तम्। समवाताद्यारोग्यं, रुचिपक्तिकान्तिबलानि लक्षणं तस्य, साधनमस्य हितमिदं, फलमस्य चतुष्टयावाप्तिः। सुश्रुताचार्येणाप्यष्टलक्षणमुक्तं स्वास्थ्यम्। "समदोषः समाग्निश्च समधातुमलक्रियः। प्रसन्नात्मेन्द्रियमना स्वस्थ इत्यभिधीयते।" कायचिकित्साकारैश्च पञ्चदशलक्षणं स्वास्थ्यमुक्तम्। अन्नं प्रार्थयते, लब्धमन्नमस्य स्वदते, भुक्तमस्य सम्यक् परिणमति, वर्णवान् बलवान् भवति, प्रसृष्टवातमूत्रपुरीषरेता, पञ्चेन्द्रियार्थोपपन्नः, सम्यक् स्वप्नमधिगच्छतीत्यरोगज्ञानं स्वस्थज्ञानमित्यर्थः। दोषधातुमलमूलं शरीरमुक्तं सुश्रुताचार्येण इति कृत्वा तेषामेव दोषधातुमलानां समत्वे स्वास्थ्यमुक्तं तीसटाचार्येणेति। ननु च दोषधातुमलानां समत्वं नोपपद्यते केनापि प्रकारेण। न तावत् कालकृतं समत्वमुपपद्यते दोषाणाम्। तत्र वर्षाशरद्धेमन्तशिशिरवसन्तग्रीष्मेषु चयप्रकोपप्रशमाः पित्तश्लेष्मवातानां यथाक्रमेणोक्ताः। तथा च चरकाचार्य्यैः—"चयप्रकोपोपशमाः पित्तादीनां यथाक्रमम्। भवन्त्येकैकशः षट्सु कालेष्व भ्रागमादिषु॥ अहोरात्रकृतमपि दोषाणां समत्वं नोपपद्यते। तत्र पूर्वाह्णे वसन्तस्य लिङ्गम्, मध्याह्ने ग्रीष्मस्य, अपराह्णे प्रावृषः। प्रदोषे वार्षिकम्, शारदं मध्यरात्रे, प्रत्यूषे हैमन्तिकमुपलक्षयेत्। एवमहोरात्रमपि वर्षमिव शीतोष्णवर्षदोषोपचयप्रकोपोपशमैर्जानीयदिति। तथा वयोऽवस्थास्वपि समत्वं दोषाणां नोपपद्यते। तथा चोक्तं सुश्रुते—"बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव च। भूयिष्ठं वर्द्धते वायुर्वृद्धे तद् वीक्ष्य योजयेत्"। इति। तथाहारस्यापि भुक्तविदग्धपरिणामावस्थासु तिसृष्वपि समत्वं नोपपद्यते दोषाणाम्। यदुक्तम्—"जीर्णेऽन्ने वर्धते वायुर्विदग्धे पित्तमेव तु। भुक्तमात्रे कफश्चापि तस्माद्भुक्तेरितं कफमिति"। एवं तावद्दोषाणां साम्यं केनापि प्रकारेण नोपपद्यते इति। धातुमलसाम्यमपि न कर्त्तव्यं यतो दोषसाम्यायत्तमेव धातुमलसाम्यं, दोषा दुष्टा दूषितारो धातुमलानामिति। अतो दोषसमत्वेनैव धातुम-

लसाम्यमपि भविष्यतीति, तस्मान्न किञ्चित्प्रयोजनं समधातुमलग्रहणेनेति। अत्र प्रतिविधीयते—तत्र यथोदितं कालकृतं षट्स्वपि ऋतुषु दोषसाम्यं न विद्यते संचयप्रकोपोपशमेनोक्तेन। तत्र वर्षाहेमन्तग्रीष्मेषु संचितानां दोषाणां शरद्वसन्तप्रावृट्सु च कुपितानां निर्हरणं कर्त्तव्यम्। तत्र पैत्तिकानां व्याधीनामुपशमो हेमन्ते, श्लैष्मिकाणां निदाघे, वातिकानां घनात्यये, स्वभावत एवेत्यत्र समाधीयते—स्वस्थवृत्तोक्तविधिनानुष्ठानात् संचयप्रकोपाभावाद् दोषाणां साम्यं भविष्यति। अहोरात्रकृतमपि दोषाणां समत्वं नोपपद्यते इति यदुक्तं तत्रोच्यते–अनागताबाधविधानानुष्ठानेन न पूर्वाह्णादिकृतं श्लेष्मादिप्रकोपो भवत्येव च दोषसाम्यम्। तथा च वयोऽवस्थासु तिसृष्वपि दोषसाम्यं नोपपद्यते इति यथोदितमत्रापि प्रतिसमाधीयते—प्रतिपक्षद्रव्योपसेवनात् विद्यत एव दोषसाम्यम्। तथा हि—बालावस्थायां श्लेष्मवृद्धिः स्यात्, तस्यां कटुतिक्तकषायोष्णरूक्षाणि द्रव्याणि प्रतिपक्षाणि तत्सेवनात् श्लेष्मक्षयो वमनेन चापहरणम्। तथा चोक्तं—"बाला हि वामनीयाः" इति। मध्यमावस्थायां पित्तवृद्धिः तस्यां मधुरतिक्तकषायद्रवशीतानि द्रव्याणि प्रतिपक्षाणि तत्सेवनात् पित्तक्षयो विरेचनेन निर्हरणम्। "मध्यो हि विरेचनीयः"इत्युक्तम्। वृद्धावस्थायां वायोर्वृद्धिः, तस्यां मधुराम्ललवणस्निग्धोष्णानि द्रव्याणि प्रतिपक्षाणि। तत्सेवनाद् वातक्षयो बस्तिदानं च वृद्धावस्थायां विधीयते। तथा आहारस्यापि भुक्तविदग्धपरिणामावस्थासु दोषवृद्धिरिति यच्चोदितं तत्परिहारार्थमाह—दोषादयस्तद्विरुद्धभोजनोपसेवनादविरुद्धा भवन्ति तद्यथा मधुरादिभोजनमेव प्रतिपन्नभूतं जीर्णेऽन्ने वायुवृद्धेः। भुक्तमात्रे कफवृद्धौ कटुतिक्तकषायस्य ताम्बूलादेश्च सेवनात् श्लेष्मक्षयो भवति। विदग्धाहारस्य पित्तवृद्धौ शीतोदकपानं युक्तम्। उक्तञ्च तन्त्रान्तरे—"तृषितस्तु विदग्धेऽन्ने यः पिबेद् वारि शीतलम्। विदाहः प्रशमं याति शेषमन्नं च जीर्यति"॥ श्लेष्मणोऽपि भुक्तेरितस्य निर्हरणमुक्तम्। "भुक्तमात्रे भवेच्छ्लेष्मा तस्माद् भुक्तेरितं कफम्। हरेद्धूमेन हृद्यैर्वा कषायकटुतिक्तकैरिति।" एवं विरोधिद्रव्यगुणक्रियासेवनात् विद्यते दोषसाम्यम्। तस्मात्साधूक्तं दोषेषु समेष्विति। यत्पुनरुक्तं धातुमलसाम्यं तद्ग्रहणमपि न कर्त्तव्यं

दोषसाम्यायत्तमेव धातुमलसाम्यमित्यत्रोच्यते—स्वयोनिवर्द्धनद्रव्य-योगाद् वृद्धिः। विपरीतद्रव्योपयोगात् क्षयः। इत्यतः पृथक् धातुमलग्रहणं कृतं यथा नायमेकान्तेन दोषायत्तमेव धातुमलानां साम्यमसाम्यं च। हेत्वन्तरजनितमपि भवति साम्यमसाम्यं च धातुमलानाम्। हेत्वन्तरश्चाहारविहारौ। तस्मात्साधूक्तम्–'दोषेषु धातुषु मलेषु समेष्विति'। एवं दोषधातुमलानां साम्यात् स्वस्थः संपद्यते। स च त्रिविधः—स्वाभाविकः क्रियाजः कृत्यश्च। तथा च तन्त्रान्तरम्—"स्वाभाविकः क्रियाजश्च कृत्यश्चेति नरास्त्रयः। स्वस्था भिषग्भिर्निर्दिष्टास्तेषां वक्ष्यामि लक्षणम्॥ शुक्रशोणितसंशुद्ध्या स्वभावाद्यः प्रजायते। स्वाभाविकः, क्रियाशुद्ध्या क्रियाजः परिकीर्तितः॥ अशुद्धे तु समुत्पन्ना ये नराः शुक्रशोणिते। कृत्या नित्यातुरास्ते स्युरितरौ रोगवर्जितौ" इति॥ १९॥

चूंकि दोष (वात, पित्त, कफ) धातु तथा मलों के सम होने पर ही साम्य (आरोग्य) और विषम होने पर असाम्य होता है अतः विषम हुए २ दोष आदि को समता में लाना यहाँ चिकित्सा का रहस्य है॥ १९॥

पूर्वं त्वग्दोषधातुमलमर्मसिरादिभिर्व्याप्तं वपुरित्युक्तम्। अत्र शिराभिः कथं व्याप्तमित्युच्यते—

नाभेरधः प्रसृतयो दश यान्त्यधस्ता-
दूर्ध्वं कृतानुसृतयो दश तद्वदेव।
द्वे द्वे शिरे प्रवितते प्रसृते च तिर्यक्
युक्ता चतुर्भिरिति विंशतिरत्र काये॥ २०॥

विंशतिश्चतुर्भिर्युक्ता शिराणामत्र काये। अत्र शरीरे चतुर्विंशतिर्मूलसिराः। ताभिश्च कथं शरीरं व्याप्तम्?। नाभिस्तासां मूलम्। तस्या नाभेरधः प्रसृतयः अधस्तात् प्रसृतिः प्रसरणं यासां ता अधःप्रसृतयो दश शिरा अधस्तान्निर्गच्छन्ति। तद्वत् नाभेरूर्ध्वं कृता अनुसृतिः अनुसरणं याभिः ताः कृतानुसृतयो दश शिरा ऊर्ध्वं यान्ति। द्वे द्वे शिरे तिर्य्यक् प्रसृते नाभेः। प्रवितते प्रकर्षेण प्रसृते। इत्यनेन प्रकारेण चतुर्भिर्युक्ता विंशतिरत्र काये अत्र शरीरे व्याप्य स्थिताः। ननु च सुश्रुतेन चतुर्विंशतिधमन्यो नाभिप्रभवाः प्रोक्ताः। तत्कथं चतुर्विंशति

शिरा नाभिप्रभवा इत्युच्यते। ता एव धमन्यः शिराशब्देनोच्यन्ते। तथा च चरकः—"आध्मापनात् धमन्यः, स्रवणात् स्रोतांसि, सरणात् सिराः"। तथा भेलेनापि धमनीशब्दे सिरा प्रोक्ता। "अर्द्धं इत्याहुर्हृदयं धमन्यो दश तत्र च। ऊर्द्ध्वं चतस्रो द्वे तिर्यक् चतस्रश्चाप्यधः स्मृताः। ताभ्यो मूलसिराभ्यस्तु भिद्यतेऽनेकधाः सिराः" इति ॥ २० ॥

शरीर में मुख्य २४ धमनी हैं। जिनमें से दस नाभि से नीचे दस नाभि से ऊपर, तथा दोनों पार्श्वों में पृथक् २ दो २ धमनियें फैली हुई हैं ॥ २० ॥

साम्प्रतमासां सिराणां सकलशरीरव्यापित्वमाह—

द्वादशभिर्द्विगुणाभिरमूभि-
र्व्याप्तमिदं नृशरीरमशेषम्।
आभिरमी कफपित्तसमीराः
खैर्वपुषि प्रसरन्ति सिराभिः ॥ २१ ॥

इदं नृशरीरं अशेषं अमूभिः सिराभिर्व्याप्तम्। कतिभिः? द्वादशभिः। किं विशिष्टाभिः? द्विगुणाभिः। अनेन चतुर्विंशतिसिराः सकलशरीरव्यापिन्यः कथिताः। आभिश्च सिराभिः कफपित्तवाता वपुषि शरीरे प्रसरन्ति। कैः? खैः छिद्रैरित्यर्थः। तथा च सुश्रुतः—"तासां तु वातपित्तकफशोणितरसान् द्वे द्वे वहतस्ता दश ऊर्ध्वगाः। एवमधोगाश्चोक्ताः ॥ २१ ॥

इन्हीं २४ धमनियों से मनुष्य का सम्पूर्ण देह व्याप्त है और इन्हीं धमनियों के छिद्रों द्वारा वात,पित्त तथा कफ शरीरमें अपना २ कार्य करते हैं॥२१॥

इदानीं तासामेव सिराणां सप्तशिराशतानि संजातानीत्येतत् कथनायाह—

आसां च सूक्ष्मशुषिराणि शतानि सप्त
सूतानि यैरसकृदन्नरसं वहद्भिः।
आप्याय्यते वपुरिदं हि नृणाममीषा-
मम्भः स्रवद्भिरिव सिन्धुशतैः समुद्रः ॥ २२ ॥

आसामेव मूलशिराणां सप्तसिराशतानि सूतानि संजातानि। कीदृग् गुणविशिष्टानि? सूक्ष्मशुषिराणि सूक्ष्मच्छिद्राणि। यैः सप्तभिः

शिराशतैरसकृदनवरतमन्नरसं वहद्भिरिदं वपुराप्याय्यते शरीरमापोष्यते ॥ अमीषां नृणां प्राणिनाम्। कथमाप्याय्यत इत्यत आह—अम्भः सलिलं स्रवद्भिः सिन्धुशतैर्नदीशतैर्यथा समुद्र आप्याय्यते एवमन्नरसं वहन्तीभिः सिराभिरिदं शरीरमाप्याय्यते। तथा च सुश्रुताचार्य्यः— "यथा स्वभावतः खानि मृणालेषु बिसेषु च। धमनीनां तथा खानि रसो यैरुपचीयते"। इति ॥ २२ ॥

इन २४ मूल धमनियों से ही क्रमशः विभक्त होती हुई सूक्ष्म छिद्र-वाली ७०० धमनियां होजाती हैं। जिनके द्वारा सम्पूर्ण शरीर में लेजाया जाता हुआ अन्न का परिपक्व रस इसप्रकार शरीर को परिपुष्ट करता है जिसप्रकार जल को लेजाती हुई नदियां समुद्र को परिपुष्ट करती रहती हैं ॥ २२ ॥

इदानीं येन सिराशतसप्तकेन गात्रमवनद्धं नृणामिति सिराशतसप्तकेन तेन प्रसृत्य वपुर्दोषान् जनयन्तीत्येतदावेदयन्नाह—

आपादतः प्रभृति गात्रमशेषमेषा-
मामस्तकादपि च नाभिभुवः सृतेन।
एतन्मृदंग इव चर्मचयेन नद्धं
काये नृणामिति शिराशतसप्तकेन ॥ २३ ॥
तेनानुगम्य वपुरेतदनेन दोषाः
कुर्वन्ति कायकुपिताः पवनादयोऽमी।
रोगानशेषवपुषि त्वथवार्द्धगात्रे
शाखासु वा क्वचिदथावयवान्तरे वा ॥ २४ ॥

अमी पवनादयो दोषा रोगान् कुर्वन्ति। किं भूताः? कायकुपिताः। कायः शरीरं तस्मिन् कुपिताः। एतद्वपुरनुगम्य अनेन पूर्वोक्तेन शिराशतसप्तकेन येन एषां नृणां गात्रमेतदशेषं नद्धम्। कथं? आपादतः प्रभृति आमस्तकादपि च। किं विशिष्टेन तेन? सृतेन। कुतः? नाभिमण्डलात्। केन कइव? चर्मचयेन मृदंग इव। आतानवितानरूपेण चर्मचयेन यथा मृदंगो नह्यते तद्वन्नद्धं येन तेनानुगम्यैतत्काये रोगान् कुर्वन्ति। अशेषवपुषि निरवशेषे शरीरे ज्वरादीन्। अथवा अर्द्धकाये अर्द्धशरीरे पक्षाघातादीन्। शाखासु च अवबाहुकविश्वाची-

गृध्रसीप्रभृतीन्। क्वचिद्थावयवान्तरे वा क्वचित्कस्मिंश्चिदविवक्षिते अवयवान्तरे अवयवैकदेशे गण्डपिडकादीन्। तथा च सुश्रुतः—

"कृत्स्नेऽर्द्धेऽवयवे चापि यत्रांगे कुपितो भृशम्। दोषो विकारं नभसि मेघवत्तत्र वर्षति"। इति ॥ २३। २४॥

शिर से लेकर पैर तक मनुष्यों का सम्पूर्ण शरीर नाभिमण्डल से चारों ओर फैली हुई ७०० धमनियों से इस प्रकार बंधा हुआ है जैसे मृदङ्ग चमड़े से बंधा होता है। इन्हीं के द्वारा प्रकुपित हुए २ वात आदि दोष देह में फैलकर सम्पूर्ण शरीर में अथवा आधे शरीर में अथवा शाखाओं में अर्थात् हाथ पांव में या किसी अन्य विशेष अङ्ग में विकारों को पैदा करते हैं॥ २३। २४॥

पूर्वमुक्तं पृथिव्यादिभिः शरीरं व्याप्तं तानि चोक्तानीत्येतदावेदयन् प्रधानमर्माणि चोपदिदिक्षुराह—

भूतानि कर्माणि च दोषधातु-
मलास्तथा सप्तशिराशतानि।
प्रोक्तानि मर्माणि च हृद्गुदं च नाभि-
स्त्विति त्रीण्यपरैः किमुक्तैः॥ २५॥

महाभूतानि प्रोक्तानि पूर्वम्। कथं? यद्भूपयःशिखिसमीरवियद्भिरिति पञ्चमहाभूतान्युक्तानि। तेषां च पंचमहाभूतानां कर्माण्युक्तानि। तन्मयत्वतद्गुणत्वव्याप्ता दोषाश्चोक्ताः। धातवो मलाश्चोक्ता रसश्च रक्तमित्यादिना श्लोकेन। सप्तशिराशतानि चोक्तानि आसां च सूक्ष्मसुषिराणि शतानि सप्त सूतानीत्यादिना। इत्येतानि सर्वाण्युक्तानि भूतादीनि। इदानीं मर्माण्युच्यन्ते-तानि च त्रीणि प्रधानानि, हृद्गुदं नाभिरिति। अपरैर्मर्मभिः किमुक्तैर्विस्तरभयादिति॥२५॥

महाभूत, कर्म, दोष, धातु, मल तथा ७०० धमनियों का वर्णन होचुका है। अब प्रधान मर्मों का निर्देश करते हैं। ये प्रधान मर्म तीन हैं। १—हृदय २—गुदा। ३—नाभि।

इदानीं त्रयाणां हृद्गुदनाभिमर्मणां प्राधान्यकथनायाह—

गुणत्रयं सत्वरजस्तमांसि
हृदि स्थितान्यत्र मनोविकाराः।

नाभिप्रदेशाच्च शिराः प्रवृत्ता
गुदे प्रधानान्त्रममुत्र नद्धम् ॥ २६ ॥
अतः प्रधानानि भवन्त्यमूनि
हृन्नाभिपायूनि नृणाममीषाम् ।
एतन्मयं प्रोक्तमिदं शरीर-
मिति प्रकाशीकृतमल्पमात्रम् ॥ २७ ॥

अमीषामेतेषां नृणां प्राणिनां, अमूनि हृन्नाभिपायूनि । पायुर्गुदम् । अतोऽस्मात् कारणादमूनि प्रधानानि । भवन्ति यतो गुणत्रयं सत्वरजस्तमांसि हृदि स्थितानि । अत्र च हृदि मनोविकाराः कामादयो भवन्त्यतो हृदयं प्रधानम् । सर्वाः शिराः नाभिप्रदेशात् प्रवृत्ताः अतो नाभिः प्रधाना । अमुत्रामुष्मिन् गुदे प्रधानान्त्रं स्थूलान्त्रं नद्धं बद्धं अतो गुदं प्रधानम् । अत एभ्यस्त्रिभ्यः कारणेभ्यस्त्रीण्येतानि अन्येभ्यः प्रधानानि भवन्ति । इदमेतत् शरीरं व्याधिचिकित्सायतनं एतन्मयं एतद्विकारम् । एतादित्यनन्तरोक्तस्य गुणत्रयस्य परामर्शः । प्रोक्तं प्रकर्षेणोक्तं भाषितम् । यद्यपि पञ्चमहाभूतविकारमुक्तं शरीरं तथापि गुणानां प्रकर्षः गुणोत्पन्नत्वात् पंचमहाभूतानाम् । तथा च सुश्रुतः—" तत्र सत्वबहुलमाकाशमित्यादि" । पुनश्चोक्तं—" पुरुषः षोडशकलः प्राणाश्चैकादशैव ये । रोगाणां तु सहस्रं यच्छतं विंशतिरेव च । व्यासतः कीर्तितं तद्धि भिन्नदोषास्त्रयो गुणाः । गुणविजृम्भितं सर्वमेतदित्यनेन प्रकारेण प्रकाशीकृतं प्रकटीकृतं अल्पमात्रं स्तोकमात्रं शरीरं विस्तरभयात् । विस्तरस्तु सुश्रुतचरकप्रभृतिभिरुक्तः—इति ॥

सत्व, रज तथा तम; ये तीनों गुण हृदय में स्थित हैं और मानसिक विकार भी यहीं पर पैदा होते हैं अतएव हृदय अन्य मर्मों से मुख्य है। यतः नाभिप्रदेश से ही सम्पूर्ण धमनियां चारों ओर फैलती हैं अतः नाभि भी प्रधान मर्मों में से एक है। गुदा के साथ यतः बृहदन्त्र का सम्बन्ध है अतः गुदा भी प्रधान मर्मों में परिगणित है। संक्षेपतः यह शरीर सत्व, रज तथा तम का विकार ही है॥ २६—२७ ॥

पूर्वमुक्तमत्र शरीरे रोगाः संभवन्तीति। तच्छरीरमभिधाय इदानीं रोगकारणानां प्रकोपेण कुपितलिंगचिकित्सितान्युपदिशन्नाह—

वातस्य पित्तस्य कफस्य वापि
विकारिणः कायवतां हि काये।
प्रकोपहेतुः कुपितस्य लिङ्गं
चिकित्सितं चेति निरूपणीयम् ॥२८॥

वातस्य विकारिणो विकृतस्य प्रकोपहेतुः, कुपितस्य लिंगं चिकित्सितं च निरूपणीयम्। केषां? कायवतां शरीरिणाम्। काये शरीरे। तथा पित्तकफयोरपि निरूपणीयमिति ॥२८॥

शरीरधारियों के शरीर स्थित विकृत वात, पित्त तथा कफ के प्रकोपक कारण, प्रकुपित दोषों के लक्षण तथा उनकी चिकित्सा को जानना आवश्यक है ॥२८॥

अधुना वातस्यैव प्राधान्यात् पूर्वं प्रकोपणान्याह—

रूक्षैस्तिक्तैः कषायैः कटुभिरनशनैर्वेगसन्धारणैश्च
व्यायामैश्च व्यवायैः प्रतरणबलवद्विग्रहैर्जागरैश्च।
श्यामानीवारकंगुप्रभृतिभिरशनैरुल्लसद्भिः पयोदै-
रन्ने जीर्णेऽपि जन्तोरिति भवति तनौ मारुतस्य प्रकोपः ॥२९॥

जन्तोः प्राणिनस्तनौ शरीरे मारुतस्य वातस्य प्रकोपो भवति। एभिः कारणैः। रूक्षैश्चणककलायमसूरादिभिः। तिक्तैर्निम्बवासकबाकुचिकापर्पटकादिभिः। कषायैः राजमाषजम्बूफलतिन्दुककुमुदोत्पलकन्दादिभिः। कटुभिः कालशाकतिलशाकवेतसप्रभृतिभिः। अनशनैरुपवासैः। वेगसंधारणैर्वातमूत्रपुरीषादीनां निग्रहैः। व्यायामैः शरीरायासैः। व्यवायैः स्त्रीसंपर्कैः। प्रतरणान्युदकप्लवनानि। बलवद्भिर्विग्रहा युद्धानि। प्रतरणानि च बलवद्विग्रहाश्च प्रतरणबलवद्विग्रहाः। तैः प्रतरणबलवद्विग्रहैः। जागरैः रात्रिजागरैः। श्यामाकः श्यामाकधान्यं। नीवारः प्रसातिका नीवारु इति लोके। प्रभृतिग्रहणेन कोद्रवादीनां कुधान्यानां ग्रहणम्। एतत्प्रभृतिभिः अशनैर्भोजनैः। पयोदैर्मेघैः उल्लसद्भिः उन्नमद्भिः अनेन प्रावृट्कालग्रहणम्। अन्ने भोजने जीर्णे परिणते। इत्येभिर्हेतुभिर्वातप्रकोपो भवतीति ॥२९॥

रूक्ष, तिक्त, कषाय तथा कटु रस के अत्यन्त सेवन से, उपवास से, वेगों के रोकने से, अति व्यायाम से, अत्यन्त सहवास से, नदियों में तैरने से, अपने से बलवान् मनुष्यों के साथ मल्लयुद्ध प्रभृति साहस से, रात्रिजागरण से तथा श्यामाक, नीवार और कंगु प्रभृति कुधान्यों के प्रतिदिन उपयोग से, प्रावृट् ऋतु में, तथा भोजन के पचजाने पर शरीर में वात का प्रकोप होता है ॥ २९ ॥

वातप्रकोपणानन्तरं पित्तप्रकोपणान्याह—

कट्वम्लोष्णविदाहितीक्ष्णलवणक्रोधोपवासातप-
स्त्रीसंपर्कतिलातसीदधिसुराशुक्तारनालादिभिः ।
भुक्ते जीर्यति भोजने च शरदि ग्रीष्मे सति प्राणिनां
मध्याह्ने च तथार्द्धरात्रसमये पित्तप्रकोपो भवेत् ॥३०॥

प्राणिनां कट्वम्लोष्णादिभिः पित्तप्रकोपो भवेत्। कट्वम्लादीनामितेरतरद्वन्द्वः। कटूनि शुण्ठीमरिचसर्षपकुठेरकादीनि। अम्लानि जम्बीरकरमर्द्दपरूषकप्रभृतीनि । उष्णानि स्वभाववीर्याभ्यामग्निमाषादीनि। विदाहीनि मत्स्यकुलत्थसर्षपशाकादीनि । तीक्ष्णानि हिंगुमरिचराजिकादीनि । लवणानि रोमकसामुद्रबिडसौवर्चलादीनि । क्रोधः कोपः। उपवासोऽनशनम्। आतपः घर्मः। स्त्रीसंपर्को मैथुनम्। तिलातसीदधीनि सुप्रसिद्धान्येव। सुरा मद्योपलक्षणम्। शुक्तं चुक्रम्। आरनालं कांजिकम्। आदिग्रहणात् तक्रमस्तुप्रभृतीनि गृह्यन्ते। भोजने अशने भुक्ते अभ्यवहृते जीर्यति परिणमति सति, शरदि ग्रीष्मे च सति मध्याह्ने तथार्द्धरात्रसमये पित्तप्रकोपो भवेत् ॥३०॥

कटु तथा अम्ल रस उष्णवीर्य, विदाहि, हींग आदि तीक्ष्ण द्रव्य एवं नमक प्रभृति के अत्यन्त उपयोग से, क्रोध, उपवास, आतप (धूप), अत्यन्त स्त्रीसहवास से, तिल, अलसी, दही, सुरा, शुक्त (सिरका), कांजी इत्यादि द्रव्यों के सेवन से, भोजन के पचते हुए, शरद् और ग्रीष्म ऋतु में, मध्याह्न (दोपहर) तथा आधी रात के समय पित्त का प्रकोप होता है ॥३०॥

गुरुमधुरातिशीतदधिदुग्धनवान्नपय-
स्तिलविकृतीक्षुभक्ष्यलवणातिदिवाशयनैः ।

समविषमाशनाध्यशनपायसपिष्टकृतै-
रपि च कफः प्रकुप्यति मधौ च दिनादिषु ॥३१॥

कफो गुर्वादिभिः प्रकुप्यति। गुरूणि माहिषाविकमांसदधिदुग्ध-कृशराप्रभृतीनि। मधुराणि द्राक्षाखर्जूरशर्कराखण्डप्रभृतीनि। अति-शीतानि स्वभाववीर्याभ्यां छायाज्योत्स्नामहिषीदुग्धघृतप्रभृतीनि। दधि दुग्धनवान्नपयांसि प्रसिद्धानि। तिलविकारः पललादि। इक्षुभक्षः इक्षु-विकारः। लवणानि सैंधवबिडसौवर्चलादीनि। अति दिवाशयनं दिवास्वप्नः। एभिर्हेतुभिः समविषमाशनाध्यशनादिभिः। समशनं "पथ्यापथ्यमिहैकत्र ज्ञेयं समशनं बुधैः"। विषमाशनं "बहु स्तोकमकाले च तज्ज्ञेयं विषमाशनम्"। अध्यशनं "साजीर्णे भुज्यते यच्च तदध्यशनमुच्यते"। पायसं क्षीरेयी। पिष्टमयानि तन्दुलपिष्टविकाराः। मधौ वसन्ते। दिनादिषु पूर्वाह्णप्रदोषापराह्णकालेषु कफः प्रकोपं यातीति ॥३१॥

गुरु,मधुर,अतिशीत द्रव्य तथा दही,दूध, नवीन अन्न,दूध से बने भक्ष्य, तिलविकृति ( तिल से बने पदार्थ ), गुड, खांड आदि गन्ने से बने द्रव्य, तथा नमक आदि के अत्यन्त सेवन से, दिन में अत्यन्त सोने से, समशन (पथ्य और अपथ्य का एकत्र सेवन ), विषमाशन ( मात्रा से अधिक अथवा न्यून अथवा अकाल में खाना ). अध्यशन ( पूर्व भुक्त पदार्थ के अजीर्णावस्था में रहते ही खाना ) से, खीर तथा उड़द, चावलों की पीठी से बने पदार्थों के खाने से, वसन्त ऋतु में अथवा दिन एवं रात्रि के पूर्व समय में कफ का प्रकोप होता है ॥ ३१ ॥

साम्प्रतमेभिः प्रकोपहेतुभिर्वातादयः शरीरे रोगान् कुर्वन्तीत्याह—

"इतिप्रकोपकारणैः प्रकोपमेत्य सर्वगाः।
समीरणादयस्तनौ रुजः सृजन्ति जन्तुषु ॥ ३२ ॥

समीरणादयो वातादयस्तनौ शरीरे प्रकोपं एत्य गत्वा। इति पूर्वोक्तैः प्रकोपकारणैः प्रकोपणैः सर्वगाः प्रसृतास्तनौ जंतुषु प्राणिषु रुजो रोगान् सृजन्ति विकारान् उत्पादयन्ति। तथा च सुश्रुतः—
"कुपितानां हि दोषाणां शरीरे परिधावताम्। यत्र संगः खवैगुण्याद् व्याधिस्तत्रोपजायते" इति ॥ ३२ ॥

पूर्वोक्त प्रकोपक कारणों से कुपित होकर शरीर में व्याप्त वात आदि दोष प्राणियों में रोगों को पैदा करते हैं ॥ ३२ ॥

साम्प्रतं वातादिकोपलक्षणं यत् सूत्रितं पूर्वं कुपितस्य लिङ्ग-मिति तदाह—

वातपित्तकफकोपलक्षणं सूत्रितं यदिह तंत्रसंग्रहे।
द्योत्यते तदिह साम्प्रतं मया रुक्परीक्षणमनेन कारयेत्॥३३॥

इह पूर्वं सूत्रसंग्रहे कुपितस्य लिङ्गं निरूपणीयमिति यत्सूत्रितं तद्वातपित्तकफकोपलक्षणं द्योत्यते प्रकटीक्रियते सांप्रतं मया। अनेन वक्ष्यमाणेन लक्षणेन रुक्परीक्षणं रुजां विकाराणां ज्वरादीनां वातादि-जानां परीक्षणं कारयेदिति ॥ ३३ ॥

इस ग्रन्थ में प्रथम कुपित हुए २ दोषों के लक्षण जानने चाहियें ऐसा कहा गया है। अतएव प्रकुपित वात, प्रकुपित पित्त तथा प्रकुपित कफ के लक्षण अब कहे जांयगे। इन्हीं लक्षणों से व्याधि के वातज, पित्तज अथवा कफज होने की परीक्षा करनी चाहिये ॥ ३३ ॥

साम्प्रतं येन लक्षणेन विकाराणां परीक्षणमुक्तं तत्तस्य कुपितस्य लिंगमाह—

दृशि शिरसि च शंखश्रोत्रनेत्रान्तरेषु
भ्रुवि हृदि हनुमन्यास्कन्धमूर्द्धार्द्धसन्धौ।
रुगति निशि दिवाल्पा स्यादकस्मात्प्रशान्ता
भवति हि भुजजंघास्तब्धसंकोचता च ॥ ३४ ॥
कटिविटपयकृत्सु क्लोम्नि च प्लीह्नि पृष्ठे
जठरवृषणवक्षःकुक्षिकक्षाक्षकेषु।
प्रसरति गुरु शूलं नाभिवस्तिस्तनेषु
त्रिकगुदवलिगुह्योपान्तपक्षद्वयेषु ॥ ३५ ॥
वदनविरसता स्याद्वर्चसः कर्कशत्वं
भवति वपुषि कार्श्यं रात्रिनिद्रानिवृत्तिः।
त्वचि च परुषता स्यात् स्याच्च वैषम्यमग्ने-
रिति पवनविकारे लक्षणं प्रोक्तमेतत् ॥ ३६ ॥

इति लक्षणं पवनविकारे प्रोक्तं एतत् पूर्वोक्तम्। किं तत्? रुक्-पीडा भवति तोदनभेदनछेदनावमन्थनायमनादिका वातजा। क्व? दशि दृष्टौ। शिरसि मस्तके। शंखश्रोत्रनेत्रान्तरेषु च। शंखौ भ्रुवोरन्तोपरि कर्णललाटयोर्मध्ये। श्रोत्रे कर्णौ। नेत्रे नयने। तेषामन्तरालेषु रुग्भवति। हनुमन्यास्कन्धमूर्द्धार्द्धसन्धौ च। हनू द्वौ मुखसन्धी। मन्ये कण्ठपार्श्वयोर्धमन्यौ। स्कन्धं कण्ठस्योपरि स्थितं। मूर्द्धार्द्धं मस्तकार्द्धं तेषां सन्धौ रुग् भवति। निशि रात्रौ अतिशयेन। दिने अल्पा स्तोका रुक् स्यात् भवेत्। अकस्माच्च प्रशान्ता रुग्भवति। भुजजंघास्तब्ध-संकोचता च भवति। भुजा बाहू। जंघे पादोपरिनलके। तयोः स्तब्धता संकोचता च भवति। कट्यादिषु च गुरु शूलं प्रसरति। कटिश्च विटपे च यकृच्च कटिविटिपयकृतः तेषु गुरु शूलं भवति। कटिः पृष्ठस्याधः, विटपे वंक्षणवृषणयोरन्तरे संधी। यकृत्क्लोम्नी दक्षिणपार्श्वे। यकृति क्लोम्नि च शूलं भवति। प्लीह्नि पृष्ठे च। जठरवृषणवक्षःकुक्षि-कक्षाक्षकेषु। जठरमुदरम्। वृषणौ अण्डौ। वक्षौ वक्षः स्थलम्, कुक्षी वामदक्षिणयो पार्श्वयोः। कक्षे बाहूमूलयोर्निम्ने। अक्षके वक्षः समीपे। एषु च गुरु शूलं प्रसरति। नाभिवस्तिस्तनेषु प्रसरति गुरु शूलम्। त्रिकगुदवलिगुह्योपांतपक्षद्वयेषु। त्रिकं त्रिकसंधिःकट्याम्। गुदे वलयो गुदवलयः। गुह्यस्योपान्तं समीपम्। पक्षद्वयं शरीरस्य। वामदक्षिणपक्ष-द्वयेषु च प्रसरति गुरुशूलमिति। वदने मुखे विरसता रसाज्ञानं स्यात् भवेत्। वर्चसः पुरीषस्य कर्कशत्वं काठिन्यम्। वपुषि शरीरे कार्श्यं कृशता। रात्रिनिद्रानिवृत्तिः रात्रौ निद्राया अभावः। त्वचि च परुषता कर्कशता स्यात् भवेत्। स्याच्च वैषम्यं विषमता चान्तरेग्नेरिति। पूर्वोक्तपवनविकारे वातजे रोगे चिह्नं प्रोक्तं कथितमेतदिति ॥३४-३६॥

वातप्रकोप से पश्चाल्लिखित लक्षण प्रकट होते हैं। आंख, शिर, शङ्ख-प्रदेश, कान, और आंख के मध्यस्थल, भ्रू ( भौहें ), हृदय, हनुसन्धि, मन्या, स्कंध ( कन्धे ) तथा आधे मस्तक में अत्यन्त तोद, भद आदि वातिक वेदनायें होती है। यह वेदना रात्रि में अत्यधिक और दिन में कुछ कम होती है। यह अचानक शान्त भी होजाया करती है। कटि ( कमर ), विटप, यकृत्, क्लोम, प्लीहा ( तिल्ली ), पीठ, उदर, वृषण ( अण्ड ), वक्ष ( छाती ), कुक्षि, कक्षा

( कांख ), अक्षक ( हंसली ), नाभि, वस्तिस्थल, स्तन, त्रिकसन्धि, गुदवलि, गुह्यदेश के समीप तथा शरीर के वाम एवं दक्षिण पार्श्वों में अत्यन्त शूल होता है। मुख का स्वाद खराब होजाता है। मल कठोर, देह पतला, तथा त्वचा रूक्ष होजाती है। रात्रि में नींद नहीं आती। जाठराग्नि विषम होजाती है ॥३४—३६॥

वातप्रकोपलक्षणानन्तरं पित्तप्रकोपलक्षणमाह—

भ्रममदमुखशोषस्वेदसन्तापमूर्च्छा
मुखनखनयनत्वङ्मूत्रविट्पीतता च।
प्रलपनमतिसारश्चारुचिश्च ज्वरश्च
तृडति शिशिरतेच्छा पित्तरोगस्य लिङ्गम् ॥३७॥

पित्तेन रोगो ज्वरादिकः पित्तरोगस्तस्य लिङ्गं चिह्नं भवति। भ्रममदमुखशोषस्वेदसन्तापमूर्च्छा भवन्ति। भ्रमादीनामितरेतरद्वन्द्व-समासः। भ्रमश्चक्रवद्भ्रमणम्। मदः पूगफलेनेव। मुखशोषो मुखस्य-शोषणम्। स्वेदः प्रस्वेदः। संतापः सन्तपनं शरीरस्य। मूर्च्छा मूर्च्छनं चैतन्याभावः। मुखनखनयनत्वङ्मूत्रविट्पीतता च। मुखश्च नखाश्च नयने च त्वक् च मूत्रश्च विट् च एषां पीतता पीतत्वं भवति। प्रल-पनमनिबद्धं बहुभाषणम्। अतिसारश्च अरुचिश्च ज्वरश्च तृट् च। अति-शिशिरतेच्छा। शिशिरस्य भावः शिशिरता शीतलत्वं तस्येच्छा शिशि-रतेच्छा अतिशयेन शिशिरतेच्छा अतिशिशिरतेच्छा प्रलपनादि सर्वं भवति पित्तरोगस्य लिङ्गमिति ॥३७॥

भ्रम ( चक्कर आना ), मद, मुखशोष, स्वेद (पसीना), सन्ताप (दाह), मूर्च्छा तथा मुख, नख, आंख, त्वचा, मूत्र और मल का पीला होना, प्रलाप, अतिसार, अरुचि, ज्वर, अति पिपासा, शीतलता की इच्छा; ये लक्षण पित्त-प्रकोपज रोगों में हुआ करते हैं ॥ ३७ ॥

पित्तप्रकोपलक्षणानन्तरं श्लेष्मप्रकोपलक्षणमाह—

अङ्गस्य गौरवमपाटवमन्तरग्ने-
रुत्क्लेशता च हृदयस्य मुखप्रसेकः
आलस्यमास्यमधुरत्वमकाण्डकण्डू-
रापाण्डुता नयनयोरतिरोमहर्षः ॥३८॥

प्रज्ञाप्लुतिर्वमथुपीनसकासनिद्रा-
तन्द्रादयश्चुलुचुलायनमुल्वणञ्च ।
स्यादोष्ठकण्ठरचनारदमूलतालु-
घ्राणेक्षणश्रवणशष्कुलिकान्तरेषु ॥३९॥
श्लेष्मोद्भवे भवति लिङ्गमिदं विकारे
संसर्गजेषु च गदेषु भवेद् द्विदोषम् ।
जन्तोरिदं पवनपित्तकफप्रकोप-
लिङ्गं त्रिदोषजरुजि प्रविभज्य योज्यम् ॥४०॥

इदं पूर्वोक्तं लिंगं श्लेष्मोद्भवे विकारे भवति। अङ्गस्येत्येकवचनं जातौ तेन अंगानां गौरवं भवति। अपाटवं अन्तरग्नेः जाठराग्नेरपाटवं अतीक्ष्णत्वं भवति। उत्क्लेशता च हृदयस्य मनसो वमनाभिमुखता भवति। मुखप्रसेको मुखे श्लेष्मक्षरणं भवति। आलस्यमनुत्साहः क्रियासु। आस्यमधुरत्वं मुखमधुरता। अकाण्डकण्डूरकस्मात् कण्डूयनम्। आपाण्डुता नयनयोरक्ष्णोः शुक्लत्वम्। अतिरोमहर्षः अतिशयेन रोमहर्षः अतिशयेन रोम्णां स्तब्धता। भवतीति प्रत्येकमभिसम्बन्धः। प्रज्ञाप्लुतिर्बुद्धिनाशः। वमथुपीनकासनिद्रातन्द्रादयो भवन्ति। वमथुर्वमनम्। पीनसः प्रतिश्यायः। कसनं कासः। निद्रा स्वप्नः। तन्द्रा निद्राभेदः। आदिग्रहणात् सुप्तत्वस्तम्भशीतादयो गृह्यन्ते। चुलुचुलायनमुल्वणं च स्यात्। ओष्ठादिषु ओष्ठकण्ठरसनारदमूलतालुघ्राणेक्षणश्रवणशुष्कुलिकान्तरेषु। ओष्ठौ दन्तच्छदौ। कण्ठः प्रसिद्धः। रसना जिह्वा। रदमूलं दन्तमूलम्। तालु तालुमर्म। घ्राणं नासापुटम्। ईक्षणे नयने। श्रवणशष्कुलिका कर्णपालिः। आसामन्तरालेषु चुलुचुलायनं कण्डूविशेषः स्यात् भवेत्। श्लेष्मोद्भवे भवति लिङ्गमिदं विकारे। श्लेष्मण उद्भवं यस्य स श्लेष्मोद्भवस्तस्मिन् श्लेष्मोद्भवे विकारे। इदं पूर्वोक्तं लिङ्गं चिह्नं भवति। संसर्गजेषु च गदेषु भवेद् द्विदोषं संश्लेषो वातपित्तजः वातश्लेष्मजः श्लेष्मपित्तजः। तेषु संसर्गजेषु गदेषु विकारेषु द्वाभ्यां दोषाभ्यां पूर्वोक्तलिङ्गं दृष्ट्वा द्विद्दोषजविकारो भवेज्जन्तोः प्राणिनः। इदं पवनपित्त कफप्रकोपलिङ्गं त्रिदोषजरुजि प्रविभज्य

योज्यम्। इदमेव पवनपित्तककफप्रकोपालिङ्गं पूर्वोक्तं त्रिदोषजरुजि सन्निपातजे विकारे प्रविभज्य प्रविभागं कृत्वा योज्यं योजनीयं जन्तोर्बुद्धिमता वैद्येनेति ॥ ४० ॥

श्लेष्मज विकारों में निम्नलिखित लक्षण दिखाई देते हैं। शरीर का भारीपन, अग्निमान्द्य, जी मचलाना, मुख से लार गिरना, आलस्य, मुंह का मीठा स्वाद, अकस्मात् कण्डू (खुजली), आंखों का श्वेत होना, अत्यन्त रोमांच, बुद्धिनाश, कै, प्रतिश्याय (जुकाम), खांसी, तन्द्रा, तथा ओष्ठ, कण्ठ, जिह्वा, दन्तवेष्ट (मसूडे), तालु, नाक, आंख एवं कर्णपालि में अचानक अत्यधिक कण्डू होना। द्विदोषज व्याधियों में दो २ दोषों के प्रकोप के लक्षण एवं त्रिदोषज में तीनों दोषों के लक्षण दिखाई देते हैं॥ ४० ॥

इदानीं संक्षेपेण प्रोक्तमप्येतत्प्रकुपितानां वातादीनां पूर्वोक्त-लक्षणं वातादिजनितविकारावबोधमबुधस्यापि भिषजः करोति बुद्धि-मतस्तु करोत्यवेदमावेदयन्नाह—

उद्देशमात्रमपि लक्षणमेतदुक्तं
व्यक्तिं व्यनक्ति पवनादिगदातुराणाम्।
नृणामदृष्टचरकादिजडात्मनोऽपि
प्रज्ञावतः किमुत कायचिकित्सिकस्य॥ ४१ ॥

एतत्पूर्वोक्तलक्षणमुद्देशमात्रमपि समासवचनमप्युक्तम्। पव-नादिगदातुराणां पवनो वात आदिर्येषां ते पवनादयो वातपित्तश्लेष्माणः तैर्गदाः पवनादिगदाः तैरातुराः पवनादिगदातुराः तेषां नृणां प्राणिनां व्यक्तिं स्पष्टतां व्यनक्ति व्यञ्जयति आविर्भावं नयति। कस्य? काय-चिकित्सकस्य वैद्यस्य। कीदृग्गुणविशिष्टस्य? अदृष्टचरकादिजडात्मनः। न दृष्टाः अदृष्टाः ग्रन्थतोऽर्थतश्च यैश्चरकादयः तैर्जडो मूर्ख आत्मा यस्य तथा तस्यापि। किमुत किं पुनः प्रज्ञावतो बुद्धिमतो वैद्यस्य स हि ऊ-हापोहवित् संक्षेपोक्तमपि जानाति। जडात्मा तु विस्तरोक्तमपि न जानाति। किं पुनः संक्षेपप्रोक्तम्। ग्रंथकर्त्तुरयं गुणो यदस्य संक्षेपोक्तमपि लक्षणं जडात्मनोऽपि वैद्यस्यावगमं करोति॥ ४१ ॥

चरक आदि उत्कृष्ट ग्रन्थ जिसने नहीं देखे ऐसे अज्ञ वैद्य के लिये भी संक्षेप से कहे हुए उपर्युक्त लक्षण वातज रोग आदि से पीडित पुरुषों का ज्ञान करवा देते

हैं। बुद्धिमान् कायचिकित्सक के लिये तो क्या कहना अर्थात् उन्हें तो ज्ञान हो ही जाता है ॥ ४१ ॥

साम्प्रतं विज्ञातलिङ्गस्य रोगस्य प्रथमोक्तगणैरगदैश्चिकित्सां कुर्वन् भिषक् सिद्धिमवाप्नोतीत्येतत्कथनायाह—

प्राक्प्रोक्तभेषजगणैरगदैर्गदेषु
कुर्यात् क्रियां कथमलक्षितलक्षणेषु।
सर्वत्र शास्त्रकुशलोऽप्युपलब्धलिङ्गो
रोगैर्भिषक् भवति भेषजसिद्धकर्म्मा ॥ ४२ ॥

गदेषु रोगेषु कथं भिषक् चिकित्सां कुर्यात्। कीदृग्गुणविशिष्टेषु? अलक्षितलक्षणेषु। न लक्षितानि लक्षणानि येषां ते तथा तेष्वज्ञातलिंगेषु। अगदैरौषधैः। कीदृग्गुणविशिष्टैः? प्राक्प्रोक्तभेषजगणैः प्राक् प्रथमं प्रोक्ता भेषजगणा रास्नादयो येषां अगदानां ते तथा। तस्मात् प्रथमं भिषजो रोगाणां वातादिलिंगानि ज्ञातव्यानि। ततश्चिकित्सा कार्य्या। सर्वत्रस्मिन् वैद्यके शास्त्रकुशलो भिषक् उपलब्धलिङ्गो रोगे भेषजसिद्धकर्मा भवति। भेषजैः सिद्धं कर्म क्रियानुष्ठानं यस्य स भेषजसिद्धकर्मा। तथा च चरकः—"रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्। ततः कर्म भिषक् पश्चात् ज्ञानपूर्वं समाचरेदिति" ॥ ४२ ॥

रोगों के लक्षणों के प्रथम ज्ञात न होने पर आगे कहे हुए औषध—वर्ग से रोगों की चिकित्सा नहीं हो सकती। अतः शास्त्रकुशल वैद्य को सर्वत्र प्रथम रोग के लक्षणों के जानने के अनन्तर ही औषधों से सफलता होती है ॥ ४२ ॥

इदानीं दोषादिमूलमिदं शरीरमुक्तं, तेषां दोषादीनां विकृतिं ज्ञात्वा प्रशमनमौषधं कर्त्तव्यमिदं प्रतिपादयन्नाह—

दोषधातुमलमूलमिदं रुग्-
युक्तमुक्तमृषिभिर्नृशरीरम्।
तद्विकारमुपलभ्य भिषग्भि-
र्भेषजैरुपशमः करणीयः ॥ ४३ ॥

इदं नृशरीरं प्राणिनां शरीरमृषिभिः पूर्वाचार्यैः रुग्युक्तं रोगसमेतं उक्तम्। दोषधातुमलमूलं चोक्तम्। दोषाश्च धातवश्च मलाश्च

दोषधातुमलास्ते मूलं कारणं यस्य शरीरस्य। तच्छरीरं दोषधातुमल-मूलम्। यतश्चैवमतस्तेषां दोषादीनां विकृतिं विकारमुपलभ्य ज्ञात्वा भिषग्भिर्वैद्यैर्भेषजैरौषधैरुपशमः करणीयः कर्त्तव्य इति ॥ ४३ ॥

यह रोगाधिष्ठान मनुष्यों का शरीर अविकृत दोष, धातु तथा मल पर ही आश्रित है। अतएव दोष आदि के विकार को यथावत् जान कर ही औषधों द्वारा रोग की शान्ति करनी चाहिये ॥ ४३ ॥

तत्रैवं स्थिते वातस्यैव प्राधान्यादुपशमः प्रथमं क्रियत इत्याह—

तत्र तावदनिलः शममेति
स्नेहवास्तिपरिषेकनिरूहैः।
भुक्तमात्रबलदेन नराणा-
मोदनेन मृदुमांसरसेन ॥ ४४ ॥

तत्र प्रथमं तावत् अनिलो वायु शममेत्युपशमं याति। कैः? स्नेहवस्तिपरिषेकनिरूहैः। स्नेहवास्तिरनुवासनम्, परिषेकः परिषिञ्चनं, निरूह आस्थापनं तैः। केषां? नराणाम्। न केवलं स्नेहवस्त्यादिभि-रुपशमं याति। ओदनेन च भक्तेन मृदुमांसरसेन च। मृदुभिर्द्रव्यैर्म-रिचचव्यदाडिमजीरकदधिस्नेहगोरसधान्यादिभिः संस्कृतो मांसरसः तेन सह। कीदृग्गुणविशिष्टेन? भुक्तमात्रबलदेन। भुक्तमात्र एव स चौदनो मृदुमांसरसो वा बलं ददाति-इति। तथा च सुश्रुताचार्य्यः-"आहारः प्रीणनः सद्यो बलकृद्देहधारक इति" ॥ ४४ ॥

स्निग्धवस्ति (अनुवासन), परिषेक, निरूहण तथा भोजनमात्र से ही बल देने वाले लघु मांसौदन के भक्षण से प्रकुपित वात शान्त होता है ॥ ४४ ॥

वातोपशमानन्तरं पित्तोपशमनमाह—

द्राक्षया त्रिफलया तृवृता च
स्रंसनेन रुधिरस्रुतिभिश्च।
सर्पिषा च पयसा सितया च
स्वादुना भवति पित्तनिवृत्तिः ॥ ४५ ॥

पित्तस्य निवर्त्तनं भवति द्राक्षया त्रिफलया त्रिवृता चोपयुक्तया। स्रंसनेन विरेचनेन च कृतेन। रुधिरस्रुतिभिश्च रुधिरस्रावैः सुकृतैः।

सर्पिषा घृतेन। पयसा दुग्धेन। सितया शर्करया। स्वादुना मधुरेणोपयुक्तेनेति ॥ ४५ ॥

द्राक्षा, त्रिफला ( हरड, बहेडा, आंवला ), निसोत; इन के सेवन से, विरेचन से, शोणितनिर्हरण से, घृत, दूध, खांड तथा अन्य मधुररस युक्त-द्रव्यों के उपयोग से प्रकुपित पित्त शान्त होता है ॥ ४५ ॥

पित्तोपशमानन्तरं कफोपशमनमाह—

लङ्घनेन वमनेन यवान्न-
प्राशनेन शिरसश्च विरेकैः ।
कट्फलादिकवलैरहिमाभि-
श्चाद्भिरत्र शममेति कफश्च ॥ ४६ ॥

अत्रायुर्वेदे कफः शमं एति। केन? लङ्घनेन दशविधेनापि कृतेन। लङ्घनं दशविधं चरकाचार्येणोक्तम्। "चतुःप्रकारा संशुद्धिः पिपासा मारुतातपौ। पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् ॥" इति। वमनेन च। ननु वमनस्य लङ्घनान्तःपातित्वात् किमर्थं पृथगुपादानं तस्य क्रियते। सत्यं वमनस्यातिशयेन कफहारित्वप्रतिपादनार्थम्। उक्तञ्च-"वमनं श्लेष्महराणां।" इति। यवान्नप्राशनेन च। यवान्नानि सक्तुयावकापूपलिकाकुल्माषास्तानि। तेषां प्राशनं भक्षणं तेन। शिरसश्च विरेकैः पिप्पलीसैन्धवादिना नस्यैः। कट्फलादिकवलैश्च कट्फलादिगणसंस्कृतकवलधारणैः अहिमाभिश्चाद्भिरुष्णोदकपानैः शममुपशाम मुपैति गच्छति कफ इति ॥ ४६ ॥

लंघन, वमन, यवप्रधान भोजन, शिरोविरेचन ( नस्य आदि द्वारा ), कट्फलादि गण की औषधों से सिद्ध जल के कवलधारण तथा उष्ण जल के पीने से कुपित कफ शान्त होता है ॥ ४६ ॥

साम्प्रतं समुच्चयसूत्रमुक्त्वा गणैरन्याञ्चिकित्सितमाह—

इतीदमुक्तं यदुदीरितं पुरा
समुच्चये सूत्रमविस्तरौषधम्।
कियद्भिरप्यौषधसंग्रहैर्गणै-
र्निगद्यते चान्यदतश्चिकित्सितम् ॥ ४७ ॥

इत्यनेन प्रकारेण पूर्वोक्तेन इदमेतत् सूत्रमुक्तम्। यदुदीरितं कथितं पुरा "प्रकोपहेतुः कुपितस्य लिङ्गं चिकित्सितं चेति निरूपणीयमिति"। समुच्चये इदं चेति समुच्चयस्तस्मिन्। कीदृग्गुणविशिष्टं सूत्रम्? अविस्तरौषधं अविस्तरेण औषधानि यस्मिन् सूत्रे तदविस्तरौषधं संक्षेपौषधमिति। अतः अस्मादूर्ध्वं कियद्भिर्गणैः औषधसंग्रहैः औषधैः संग्रहो येषु तैः, अन्यच्चिकित्सितं निगद्यत इति॥ ४७॥

इस प्रकार हमने संक्षेप से दोषों के प्रकोप के कारण, उनके लक्षण तथा चिकित्सा कही है। अब कुछ औषध के गणों द्वारा दोषों की चिकित्सा का वर्णन किया जाता है॥ ४७॥

पूर्वं गणैर्निगद्यते अन्यच्चिकित्सितमित्युक्तमतस्तान् गणानाह—

रास्नात्रिकण्टकगुहातिगुहाश्वगन्धा-
गन्धर्वहस्तकपिकच्छुपुनर्नवाभिः।
छिन्नाबलाद्विपबलातिबलावरीभि-
रित्यौषधीभिरनिलामयभिद्गणोऽयम्॥ ४८॥

अयमनिलामयजिद् गणः। अनिलो वायुः तेन आमयाः रोगाः अनिलामयास्तान् जयतीत्यनिलामयजित्। इति आभिरौषधीभिः रास्नादिभिरिति। रास्ना सुरभी। त्रिकण्टको गोक्षुरकः। गुहा पृथक्पर्णी पीठवनीत्यर्थः। अतिगुहा शालिपर्णी। अश्वगन्धा वाजिगन्धा। गन्धर्वहस्त एरण्डः। कपिकच्छुः स्वयंगुप्ता। पुनर्नवा वर्षाभूः। छिन्ना गुडूची। बला समङ्गा। द्विपबला नागबला। अतिबला बलाभेदः। वरी शतावरी। रास्नादिरयं गणः प्रथमः॥ ४८॥

रास्नादिगण—रास्ना, गोखरू, पृश्निपर्णी, शालिपर्णी, असगन्ध, एरण्ड, कौंछ पुनर्नवा, गिलोय, बला (खिरैंटी), नागबला, अतिबला, शतावरी। यह औषधिगण वातनाशक है॥ ४८॥

वातघ्नगणानन्तरं पित्तघ्नगणमाह—

काकोलीद्वयमृद्धिवृद्धिमधुकं मेदाद्वयं पद्मकं
भृङ्गी कीचकरोचनामृतलता द्वे मुद्गमाषच्छदे।
जीवन्ती च सजीवका सवृषभा स्यात्पुण्डरीकान्विता
काकोल्यादिरुदीरितोऽयमृषिभिः पित्तापहस्तर्पणः॥ ४९॥

अयं गणः काकोल्यादिः उदीरितः कथितः। कैः? ऋषिभिः। पित्तापहः पित्तघ्नः। तर्पणः प्रीणनः। काकोलीद्वयं काकोलीक्षीरकाकोल्यौ। ऋद्धिः पुष्टिः। वृद्धिस्तद्भेदः। मधुकं यष्टीमधु। मेदाद्वयं मेदामहामेदे द्वे। पद्मकं हिमपद्मकम्। शृङ्गी कर्कटशृङ्गी। कीचकरोचना वंशरोचना। अमृतलता गुडूची। द्वे मुद्गमाषच्छदे मुद्गपर्णीमाषपर्ण्यौ। जीवन्ती द्विविधा-कन्दवती मूलिनी च। जीवकः कूर्चशीर्षकः। ऋषभको वृषभकः गोपतिः। पुण्डरीकं प्रसिद्धम्। इति काकोल्यादिरयं द्वितीयः गणः॥ ४९॥

काकोल्यादिगण—काकोली, क्षीरकाकोली, ऋद्धि, वृद्धि, मुलहठी, मेदा, महामेदा, पद्मक (पद्माख), काकड़ासिंगी, वंशलोचन, गिलोय, मुद्गपर्णी, माषपर्णी, जीवन्ती, जीवक, ऋषभक, पुण्डरीक (कमल)। यह गण पित्तनाशक तथा तर्पण है॥ ४९॥

पित्तघ्नगणानन्तरं श्लेष्मघ्नगणमाह—

कृष्णाग्रन्थिकचव्यचित्रकविषाविश्वौषधाजाजिभिः
पाठारामठरेणुकामधुरसासिद्धार्थतिक्तोषणैः।
द्रेक्काशक्रयवाजमोदत्रुटिभिर्भार्गीविडङ्गान्वितै-
रेभिर्दीप्तिकरः कफामयहरः कृष्णादिरुक्तो गणः॥ ५०॥

कृष्णादिः पिप्पल्यादिः उक्तः कथितः कफामयहरः कफरोगहरः। दीप्तिकरोऽग्निदीप्तिकरः। एभिः कृष्णादिभिः। कृष्णा पिप्पली। ग्रन्थिकं पिप्पलीमूलम्। चव्यं चविकम्। चित्रकः प्रसिद्धः। विषा अतिविषा। विश्वौषधं शुण्ठी। अजाजी जीरकम्। पाठा अम्बष्ठा। रामठं हिंगु। रेणुका हरेणुका। मधुरसा मूर्वा। सिद्धार्थः सर्षपः। तिक्ता कटुका। ऊषणं मरिचं। द्रेक्का महानिम्बः वकाइणीति लोके। शक्रयवाः इन्द्रयवाः। अजमोदा दीप्यकः। त्रुटिः एला। भार्गी ब्राह्मणयष्टिका। विडङ्गं कृमिशत्रुः। इति कृष्णादिस्तृतीयो गणः॥ ५०॥

पिप्पल्यादिगण—पिप्पली, पिप्पलीमूल, चव्य, चित्रक (चीता), अतीस, सोंठ, जीरा, पाठा (पाढ), हींग, रेणुका, मूर्वा, श्वेत सरसों, कटुकी, कालीमिर्च, बकायन, इन्द्रजौ, अजवाइन, छोटी इलायची, भारंगी, वायविडंग। यह गण अग्निप्रदीपक तथा कफरोगनाशक है॥ ५०॥

श्लेष्मघ्नगणानन्तरं इदानीं वातपित्तघ्नगणमाह—

स्थिरापृथक्पर्णिपुनर्नवाभि-
स्त्रिकण्टकैरण्डजटोच्चटाभिः।
विदारिकानागबलावरीभि-
रयं गणः पित्तसमीरणघ्नः ॥ ५१ ॥

पित्तं च समीरणश्च पित्तसमीरणौ तौ हन्तीति पित्तसमीरणघ्नः। समीरणो वायुः। अयमेष गणः। स्थिरा शालिपर्णी। पृथक्पर्णी पृष्टिपर्णी। पुनर्नवा वर्षाभूः। त्रिकण्टको गोक्षुरकः। एरण्डजटा एरण्डमूलम्। उच्चटा कपिकच्छुः गुञ्जा वा। विदारिका क्षीरविदारी। नागबला द्विपबला। वरी शतावरी। स्थिरादिश्चतुर्थो गणः ॥ ५१ ॥

स्थिरादिगण—शालिपर्णी, पृष्टपर्णी, पुनर्नवा ( विषखपरा, गदहपूर्णा, सांठ ), गोखरू, एरण्डमूल, उच्चटा ( गुञ्जामूल ), विदारीकन्द, नागबला, शतावरी। यह गण वात पित्त नाशक है ॥ ५१ ॥

वातपित्तघ्नगणानन्तरं साम्प्रतं वातश्लेष्मघ्नं गणमाह—

कट्फलाम्बुधरधान्यकभार्गी-
शृङ्गिपर्पटकविश्ववचाभिः।
साभयामरसुगन्धितृणाभि-
र्वर्ग एष कफवातगदघ्नः ॥ ५२ ॥

कफश्च वातश्च कफवातौ ताभ्यां गदाः कफवातगदाः, तान् हन्तीति कफवातगदघ्नः। एष वर्गो गणः। कट्फलं प्रसिद्धम्। अम्बुधरो मुस्तम्। धान्यकं कुस्तुम्बरु। भार्गी ब्राह्मणयष्टिका। शृङ्गी कर्कटशृङ्गी। पर्पटकः प्रसिद्धः। विश्वं शुण्ठी। वचा उग्रगन्धा। अभया हरीतकी। अमरं देवदारु। सुगन्धितृणं कट्तृणम्। कट्फलादिः पञ्चमो गणः ॥ ५२ ॥

कट्फलादिगण—कट्फल, मोथा, धनियां, भारंगी, काकड़ासिंगी, पित्तपापड़ा, सोंठ, वच, बड़ीहरड़, देवदारु, सुगन्धितृण। यह गण कफवातरोग नाशक है ॥ ५२ ॥

कफवातघ्नगणानन्तरमिदानीं पित्तश्लेष्मघ्नगणमाह—

त्रायन्तिकाकुटजबीजवृषामृताभि-
स्तिक्तापटोलपिचुमन्ददुरालभाभिः।

भूनिम्बराजतरुपद्मकपर्पटाख्यै-
रेभिर्गणोऽयमिति पित्तकफामयघ्नः ॥ ५३ ॥

अयं गणः पित्तकफामयघ्नः। पित्तं च कफश्च पित्तकफौ, ताभ्यां आमया रोगाः पित्तकफामयाः तान् हन्तीति पित्तकफामयघ्नः। इत्येभिर्द्रव्यैः। त्रायन्तिका त्रायमाणा। कुटजबीजं इन्द्रयवाः। वृषं आटरूषकम्। अमृता गुडूची। तिक्ता कटुका। पटोलं पटोलपत्रम्। पिचुमन्दो निम्बः। दुरालभा धन्वयासकः। भूनिम्बः किराततिक्तः। राजतरुर्गिरिमालकः। पद्मकपर्पटकौ प्रसिद्धौ। त्रायन्तिकादिः पित्तश्लेष्मघ्नो गणः षष्ठः ॥ ५३ ॥

त्रायन्तिकादिगण—त्रायमाणा, इन्द्रजौ, अडूसा, गिलोय, कुटकी, पटोलपत्र, नीम, दुरालभा ( धमासा ), चिरायता, अमलतास, पद्माख, पित्तपापड़ा। यह गण कफपित्तरोगनाशक है ॥ ५३ ॥

इदानीं त्रिफलामाह—

बिभीतकामलकहरीतकीभिः
फलत्रयं कथितमिदं भिषग्भिः।
सकुष्ठिनां मुखनयनामयानां
प्रमेहिणां व्रणगलगण्डिनाञ्च ॥ ५४ ॥

इदमेतत् भिषग्भिर्वैद्यैः फलत्रयं कथितम्। प्रत्यनीकमेषां मुखनयनामयानां। मुखञ्च नयने च मुखनयनं प्राणितूर्य्यसेनाङ्गानामित्येकवद्भावः। तत्र आमयास्तेषाम्। सकुष्ठिनां सह कुष्ठेन वर्त्तन्त इति सकुष्ठिनस्तेषाम्। प्रमेहिणां च प्रमेहयुक्तानाम्। व्रणगलगण्डिनां च। व्रणितानां गलगण्डिनां च। एतत् कथितमिति। बिभीतकं अक्षफलम्। आमलकं धात्रीफलम्। हरीतक्यभयाफलम्। फलानां त्रयम्। इयं त्रिफला। सप्तमोऽयं गणः ॥ ५४ ॥

त्रिफला—बहेड़ा, आंवला, हरड़। ये तीनों मिल त्रिफला कहलाती है। यह कुष्ठ, मुखरोग, नयनरोग ( आंखों के रोग ), प्रमेह, व्रण तथा गलगण्ड आदि रोगों में प्रशस्त है ॥ ५४ ॥

साम्प्रतं त्रिकटुकमाह—

विश्वोपकुल्यामरिचैरमीभि-
र्द्रव्यैस्त्रिभिस्त्र्यूषणमुक्तमेतत् ।
भिषग्भिराद्यैर्मतिबोधनाय
ससन्निपातस्य जडस्य जन्तोः ॥ ५५ ॥

एतत् त्र्यूषणमुक्तम् । भिषग्भिराद्यैश्चिरन्तनैः सुश्रुतादिभिः । किमर्थम् ? मतिबोधनाय । जन्तोः प्राणिनः । जडस्य मूकात्मनः । ससन्निपातस्य सह सन्निपातेन वर्त्तते इति ससन्निपातस्तस्य । त्रिभिर्द्रव्यैरमीभिर्विश्वादिभिः । विश्वं शुण्ठी । उपकुल्या पिप्पली । मरिचमूषणमिति । त्र्यूषणं त्रिकटुकं नाम गणोऽष्टमः ॥ ५५ ॥

त्रिकटु—सोंठ, पिप्पली, कालीमिर्च । यह तीनों मिल त्रिकटु कहलाता है । सन्निपात में अथवा अन्य कारणों से निःसंज्ञ पुरुष को चेतना में लाने के लिये सुश्रुत आदि प्राचीन चिकित्सकों ने नस्य द्वारा उपयुक्त कहा है ॥ ५५ ॥

इदानीं पञ्चकोलमाह—

सपिप्पलीग्रन्थिकचव्यचित्रकैः
सनागरैः पञ्चभिरेभिरौषधैः ।
इतीरितं तत्खलु पञ्चकोलकं
प्रनष्टवह्नेरतिदीप्तिकारकम् ॥ ५६ ॥

अतिशयेन दीप्तिकरं पञ्चभिरौषधैः पिप्पल्यादिभिः । ग्रन्थिकं पिप्पलीमूलम् । चव्यचित्रकौ प्रसिद्धौ । ग्रन्थिकं च चव्यं च चित्रकश्च ग्रन्थिकचव्यचित्रकाः । सह पिप्पल्या ग्रन्थिकचव्यचित्रकाः तैः सपिप्पलीग्रन्थिकचव्यचित्रकैः । पिप्पली उपकुल्या । सह नागरेण वर्त्तत इति सनागरः । नागरं शुण्ठी । तैः सनागरैरेभिः पञ्चकोलकं नाम नवमो गणः ॥ ५६ ॥

पञ्चकोल—पिप्पली, पिप्पलीमूल, चव्य, चित्रक, सोंठ । ये पांच औषध मिलकर पञ्चकोल कहलाता है । यह गण मन्द हुई २ अग्नि को अत्यन्त प्रदीप्त करता है ॥ ५६ ॥

इदानीं पञ्चवल्कलमाह—

वटीवटोदुम्बरवेतसाना-
मश्वत्थवृक्षेण समन्वितानाम्।
त्वक्पञ्चकं पञ्च महीरुहाणा-
मिति व्रणघ्नं श्वयथुघ्नमेतत्॥ ५७॥

एतत् त्वक्पञ्चकं व्रणघ्नं च। त्वचां पञ्चकं त्वक्पञ्चकम्। व्रणान् हन्तीति व्रणघ्नम्। श्वयथुं हन्तीति श्वयथुघ्नम्। केषां? पञ्च महीरुहाणां वृक्षाणाम्। वटीवटोदुम्बरवेतसानाम्। मही पृथ्वी तस्यां रोहन्तीति महीरुहाः। पञ्च च ते महीरुहाश्च पञ्चमहीरुहाः तेषां वटीवटोदुम्बरवेतसानाम्। वटी प्लक्षः। वटो न्यग्रोधः। उदुम्बरः स्कन्धफलः। वेतसो वञ्जुलः। अश्वत्थः पिप्पलः। तेन समन्विताः सयुंक्ताः तेषां पञ्चवल्कलानां दशमो गणः॥ ५७॥

पञ्चवल्कल—प्लक्ष (पिलखन), वट, गूलर, वेत, पीपल; इन पांचों वृक्षों की छाल को एकत्र पञ्चवल्कल कहते हैं। यह व्रण एवं शोथ नाशक है॥ ५७॥

साम्प्रतमेलादिकं गणमाह—

एलाग्गुगुलुदारुकुंदुरुमुरास्थौणेयकौन्तीनतै-
श्चण्डाचोरकचोचचन्दननखश्रीवेष्टकध्यामकैः।
स्पृक्काकुङ्कमरुक्तुरुष्कफलिनीमांसीलवङ्गागुरु-
त्वक्पत्रोरगकेसरैरितिविषश्लेष्मानिलघ्नो गणः॥ ५८॥

अयं गणो विषश्लेष्मानिलघ्नः। विषं च श्लेष्मा च अनिलश्च विषश्लेष्मानिलाः, तान् हन्तीति विषश्लेष्मानिलघ्नः। एभिर्द्रव्यैरेलादिभिः। एला पृथ्वीका। गुग्गुलुः पलंकषा। दारु देवदारु। कुंदुरुः सल्लकी खपुरः। मुरा गन्धवती। स्थौणेयकं क्षौमम्। कौन्ती रेणुका। नतं तगरम्। चण्डा तस्करी अजमोदानुकारी॥ चोरकस्तस्करो ग्रन्थिपर्णानुकारी। चोचं माणवकः। चन्दनं रक्तचन्दनम्। नखं व्याघ्रनखम्। श्रीवेष्टकः श्रीवासः। ध्यामकं कत्तृणम्। स्पृक्का कुटिलपुष्पा। कुंकुमं बाह्लीकम्। रुक् कुष्ठम्। तुरुष्कं सिह्लकम्। फलिनी प्रियङ्गुः। मांसी

जटिला। लवङ्गं लवङ्गपुष्पम्। अगुरु लोहम्। त्वक् वरांगम्। पत्रं तमालपत्रम्। उरगकेसरं नागकेसरम्। इति एलादिरयं गणः एकादशः॥ ५८॥

एलादिगण—छोटी इलायची, गुग्गुलु, देवदारु, कुन्दुरु ( शल्लकीनिर्यास ), मुरामांसी, स्थौणेयक ( थूनेर ), रेणुका, तगर, चण्डा, चोरक, चोच ( गन्धबाला ) लालचन्दन, नखी, श्रीवास, ध्यामक ( सुगन्धितृण ), स्पृक्का, केसर, कुष्ठ, तुरुष्क ( शिह्लक ) प्रियङ्गु, जटामांसी, लौंग, अगर, दारचीनी, तेजपत्र, नागकेसर। यह गण विष, कफ, एवं वात को नष्ट करता है॥ ५८॥

अष्टकवर्गमाह—

काकोल्यौ द्वे जीवकः सर्षभः स्या-
न्मेदायुग्मं सार्द्धमृद्धिश्च वृद्धया।
इत्युद्दिष्टैरष्टवर्गः प्रदिष्टः
सद्भिः पित्तव्याधिजिद् बृंहणश्च ॥ ५९ ॥

सद्भिः सद्वैद्यैरष्टकवर्गः प्रदिष्टः। पित्तेन व्याधयः तान् जयन्तीति पित्तव्याधिजित्। बृंहणश्च। इत्येतैरुद्दिष्टैः कथितैः काकोल्यादिभिः। काकोल्यौ द्वे काकोली क्षीरकाकोली। जीवकः कूर्चशीषकः। ऋषभको वृषभकः। मेदायुग्मं मेदामहामेदे। ऋद्धिः पुष्टिः। वृद्धिस्तद्भेदः। इति अष्टकवर्गो द्वादशः॥ ५९॥

अष्टवर्ग—काकोली, क्षीरकाकोली, जीवक, ऋषभक, मेदा, महामेदा, ऋद्धि, वृद्धि। यह अष्टवर्ग पित्तजरोगों को नष्ट करता है तथा बृंहण है॥ ५९॥

साम्प्रतं त्रिसुगन्धिचतुर्जातकौ द्वौ गणौ आह—

त्वक्पत्रकैलं त्रिसुगन्धि चैतत्
प्रकीर्त्तितं वातकफापहारि।
वर्ण्यं विषघ्नं च सनागपुष्पं
ज्ञेयं चतुर्जातकमेतदेव ॥ ६० ॥

त्रिसुगन्धि एतत् प्रकीर्तितं कथितम्। किं तत्? त्वक्पत्रकैलम्। त्वक् वराङ्गम्। पत्रं तमालपत्रम्। एला पृथ्वीका। वातकफापहारि वातश्च कफश्च तावकफौ तावपहरतीति वातकफापहारि। वर्ण्यं वर्ण-

जनकम् । विषघ्नं स्थावरजङ्गमविषं हन्ति । एतदेव त्रिसुगन्धि सनागपुष्पं, नागकेसरेण सह चतुर्जातकं ज्ञेयमित्येतौ त्रयोदशचतुर्दशगणौ ॥

त्रिसुगन्धि—दारचीनी, तेजपत्र, छोटी इलायची। यह गण वात तथा कफ को हरने वाला, वर्णजनक तथा विषनाशक है। यदि उपर्युक्त तीन द्रव्यों के साथ नागकेसर मिला दें तो इसी का नाम चतुर्जात है ॥ ६० ॥

इदानीं वरुणादिकं गणमाह—

वरुणकुरण्टकशिग्रुबृहतीद्वयदर्भवरी-
ककुभकरञ्जबिल्वारणीशिखिभिः ।
द्विपबलयाग्निमन्थयुतया च समोरटया
भवति गणः सकर्कटकमेषविषाणिकया ॥ ६१ ॥
गुल्मेषु विद्रधिषु वातबलासजेषु
कोष्ठान्तरस्थितिषु शूलरुगातुरेषु ।
प्रायः कफानिलविकारनिपीडिताना-
मुक्तो नृणां वरुणकादिरयं भिषग्भिः ॥ ६२ ॥

अयं गणो वरुणकादिरुक्तो भिषग्भिः । वरुणस्तिक्तशाकद्रुमः । कुरण्टकः पीतपुष्पः सहचरः । शिग्रुद्वयं शिग्रुसञ्ज्ञितम् । शिग्रुः हरितशिग्रुः । मधुशिग्रुः शोभाञ्जनकः । बृहतीद्वयं बृहती स्थूलफला, चणकबृहती श्लक्ष्णफला । दर्भः भीरुः । वरी शतावरी । ककुभ आर्त्तगलः सुगन्धमूलः । करञ्जः वृक्षकरञ्जः । बिल्वः शाण्डिल्यः । चिरबिल्वः पूतिकरञ्जः । अरणी तर्कारी । शिखी चित्रकोऽग्निनामभिः । द्विपबला नागबला । अग्निमन्थस्तेजोवृक्षः । मोरटः अंकोलपुष्पम् । कर्कटकः कर्कटश्रृङ्गी । मेषविषाणिका अजश्रृङ्गी उत्तरवारुणीतिलोके विख्याता । केषामुक्तः? नृणां प्राणिनां कफानिलविकारनिपीडितानाम् । कफश्च अनिलश्च कफानिलौ ताभ्यां विकाराः कफानिलविकाराः तैर्निपीडिताः कफानिलविकारनिपीडिताः तेषाम् । प्रायो बाहुल्येन । केषु चोक्तम्? गुल्मेषु विद्रधिषु च । कीदग्गुणविशिष्टेषु ? वातबलासजेषु । वातश्च बलासश्च वातबलासौ ताभ्यां जाता तेषु । बलासः श्लेष्मा । कोष्ठान्तरस्थितिषु । कोष्ठं जठरं तस्मिन्नन्तराणि कुक्ष्यादीनि तेषु । कुक्षिस्तन-

नितम्बेषु स्थितिर्येषां गुल्मविद्रधीनां तेषु शूलरुगातुरेषु च। शूलं रुक् पीडा तया आतुराः शूलरुगातुराः। तेषु चोक्तो गणोऽयं पञ्चदशो वरुणादिः ॥ ६१-६२ ॥

वरुणादिगण—वरुण ( वरना ), पियावांसा, शिग्रु, मधुशिग्रु, छोटी कटेरी, बड़ी कटेरी, दर्भ, शतावर, ककुभ (नीलझिण्टी), वृक्षकरञ्ज, लताकरञ्ज, अरणी, चित्रक, नागबला, अग्निमन्थ, अंकोलफूल, काकड़ासिंगी, मेढासिंगी। यह गण कफवातज विकारों से पीड़ित पुरुषों के लिये विशेषतः कोष्ठान्तःस्थित कफवातज शूलयुक्त गुल्म एवं विद्रधि में अत्यन्त हितकर है ॥ ६१-६२ ॥

इदानीं महत्पञ्चमूलमाह—

श्रीपर्णिनीज्वलनमन्थवसन्तदूती-
टिण्टूकबिल्वमिति तत्पृथुपञ्चमूलम् ।
श्लेष्मानिलामयहरं हितमेतदेव
मेदस्विनामलसकोपहतात्मनां हि ॥ ६३ ॥

एवं पृथु पञ्चमूलमिति श्रीपर्ण्यादिभिः। श्रीपर्णिनी काश्मरी। ज्वलनमन्थोऽग्निमन्थः। वसन्तदूती पाटला। टिण्टुकः श्योनाकः। बिल्वं श्रीफलम्। एतत् श्लेष्मानिलामयहरं वातश्लेष्मविकारहरम्। मेदस्विनां मेदुराणां एतदेव हितम्। अलसकोपहतात्मनां च हितम्। अलसकं विसूचिकाविशेषः तेन उपहत आत्मा शरीरं येषां ते तथा तेषाम्। चोक्तोऽयं षोडशो गणः ॥ ६३ ॥

महत्पञ्चमूल—गाम्भारी, अग्निमन्थ, पाढल, श्योणाक, बिल्व ( बेल )। यह गण कफवातजरोगों को हरता है तथा मेदस्वी एवं अलसक रोग से पीड़ित पुरुषों के लिये हितकर है ॥ ६३ ॥

साम्प्रतं लघुपञ्चमूलमाह—

व्याघ्री बृहत्यतिगुहा सुगुहा श्वदंष्ट्रा
संयुक्तमेभिरिति तत्कथितं कनीयः ।
पित्तानिलोल्बणविकारहरं गणाभ्या-
माभ्यां भवेदिति गणो दशमूलसंज्ञः ॥ ६४ ॥

एतत् कथितं कनीयो लघु आभिर्व्याघ्र्यादिभिः। व्याघ्री कण्टकारिका। बृहती वार्त्ताकफलाकारा। अतिगुहा शालिपर्णी।गुहा पृष्टिपर्णी।

श्वदंष्ट्रा गोक्षुरः । एतल्लघुपञ्चमूलं पित्तानिलोल्वणविकारहरम् । सप्तदशोऽयं गणः। आभ्यां। पृथुलघुपञ्चमूलाभ्यां दशमूलसंज्ञो गणो भवेदष्टादशः ॥ ६४ ॥

लघुपञ्चमूल—छोटी कटेरी, बड़ी कटेरी, शालिपर्णी, पृष्टपर्णी, गोखरू। ये एकत्र मिलित लघु पञ्चमूल कहलाता है। यह गण वातपित्तज व्याधियों को हरता है॥

दशमूल—महत्पञ्चमूल तथा लघुपञ्चमूल एकत्र संयुक्त दशमूल कहलाता है॥ ६४ ॥

तस्य गुणानाह—

प्रायस्त्रिदोषशमनं पवनामयेषु
श्लेष्मोल्वणेषु च गदेषु भिषग्भिरुक्तम् ।
कासेषु सन्निपतितेषु शिरोरुजायां
श्वासेषु हिक्किषु हितं दशमूलमेतत् ॥ ६५ ॥

एतत् दशमूलं प्रायो बाहुल्येन त्रिदोषशमनम्। त्रीन् दोषान् शमयतीति त्रिदोषशमनम्। भिषग्भिर्वैद्यैः कथितम्। केषु ? पवनामयेषु वातविकारेषु। गदेषु रोगेषु । श्लेष्मोल्वणेषु च कफविकारेषु गदेषु कथितम्। एतत् दशमूलं कासेषु सन्निपातेषु शिरोरुजायां श्वासेषु हिक्किषु च हितमिति प्रत्येकमभिसम्बन्धः । तत्र च हितयोगे चतुर्थी वक्तव्या तत्कथमत्र सप्तमी ? तत्रोच्यते-हितयोगे षष्ठीसप्तमीचतुर्थी विभक्तयो दृश्यन्ते ॥ ६५ ॥

यह दशमूल त्रिदोषशामक तथा वातरोग, कफरोग, कास (खांसी), सन्निपात, शिरोरोग, श्वास एवं हिक्कारोग में हितकर कहागया है ॥ ६५ ॥

इदानीं वातपित्तकफरोगाणां पूर्वोक्तगणैस्तैलादियोगकल्पनामाह-

अष्टादशभिरमीभिर्द्रव्यगणैर्वीक्ष्य वातपित्तकफान् ।
योगा रोगार्त्तानां विभज्य भिषजा प्रकल्प्यन्ते ॥ ६६ ॥
तैलघृतचूर्णकल्कप्रलेपसेकावगाहपानानि ।
आस्थापनानुवासननस्याञ्जनवस्तिविधयश्च ॥ ६७ ॥

भिषजा वैद्येन योगाः प्रकल्प्यन्ते। के ? तैलादयः। केषां ? रोगार्त्तानाम्। किं कृत्वा ? वीक्ष्य। कान् ? वातपित्तकफान् लिङ्गद्वारेण। कैः कल्प्यन्ते ? अमीभिर्गणैरष्टादशभिर्विभज्य वातादिप्रत्यनीकान्।

ततो वातपित्तकफरोगाणां योगाः कल्प्यन्ते तैलादयः। वातजे विकारे वातघ्नगणेन तैलघृते पक्त्वा बाह्याभ्यन्तरोपयोगः क्रियते। कल्कचूर्णपानान्यभ्यन्तरोपयोगाः। प्रलेपसेकावगाहा बाह्योपयोगाः। आस्थापनानुवासननस्यैरभ्यन्तरप्रयोगः। अञ्जनबस्त्यादिविधानं बाह्यतः। एवं वातपित्तकफानामेकद्वित्रिविभागेन रास्नादिभिर्गणैः प्रयोगाः कल्पनीया इति बुद्धिमता वैद्येनेति। तथा च सुश्रुते—'एभिर्लेपांस्तथा तैलं सर्पींष्यपि च पानकान्। प्रविभज्य यथान्यायं कुर्वीत मतिमान् भिषक्॥ समीक्ष्य दोषभेदांश्च गणान् भिन्नान् प्रयोजयेत्। पृथग्व्यस्तं समस्तं वा गणं वा व्यस्तसंहतम्'' ॥ इति ॥ ६७ ॥

चिकित्सक को चाहिये कि प्रथम लक्षणों द्वारा रोग के वातज, पित्तज अथवा कफज होने का निश्चय करके इन उपर्युक्त ओषधियों के अठारह गणों द्वारा बुद्धिपूर्वक तैल, घृत, चूर्ण, कल्क, प्रलेप, सेक, अवगाहन पानक, आस्थापन, अनुवासन, नस्य, अञ्जन तथा वस्ति आदि के बाह्य एवं आभ्यन्तर योगों की कल्पना करे॥ ६७॥

प्रागुक्तं ते दोषजा भेषजशुद्धिसाध्याः। सा च शुद्धिः कस्मिन् काले क्रियते इत्याह—

प्रावृट्घनात्ययवसन्तदिनेषु यस्मात्
प्रादुर्भवन्ति पवनादिरुजस्ततश्च।
वातादिरोगविगमाय शरीरशुद्धिः
स्यादम्बुदागमशरन्मधुवासरेषु ॥ ६८ ॥

यस्मात्पवनादिरुजो वातादिविकाराः प्रादुर्भवन्ति। प्रावृडादिषु कालेषु। प्रावृट्काले वातविकाराः। घनात्ययकाले पित्तविकाराः। घना मेघाः तेषां अत्ययो विनाशो यस्मिन् काले स घनात्ययः शरत्कालः। वसन्तदिनेषु वसन्तदिवसेषु श्लेष्मविकाराः प्रादुर्भवन्ति। ततस्तस्मात् कारणात् शरीरसंशुद्धिः शरीरसंशोधनं वमनादिभिः पञ्चभिः कर्मभिः स्यात् भवेत्। किमर्थम्? वातादिरोगविनाशायोपशमाय। केषु कालेषु सा शुद्धिर्भवेत्? अम्बुदागमशरन्मधुवासरेषु। अम्बुदाः मेघास्तेषामागमो यस्मिन् काले स अम्बुदागमः प्रावृट्कालः। तत्र वस्तिदानं वातरोगोपशमार्थं क्रियते। शरत्काले विरेचनं पित्तरोगोपशमार्थम्। मधुवासरेषु वसन्तदिनेषु वमनं श्लेष्मरोगोपशमनार्थं क्रियते इति।

तथा च सुश्रुतः—'तत्र वर्षाहेमन्तग्रीष्मेषु सञ्चितानां दोषाणां शरद्वसन्तप्रावृट्सु च प्रकुपितानां निर्हरणं कर्त्तव्यमिति ॥ ६८ ॥

यतः प्रावृट् , शरत् तथा वसन्त ऋतु में क्रमशः वातज, पित्तज एवं कफज रोग पैदा होते हैं अतः इन ऋतुओं में वातज आदि रोगों की शान्ति के लिये वस्ति आदि द्वारा शरीर का संशोधन करना चाहिये। प्रावृट् ऋतु में वातजरोगों की शान्ति के लिये वस्तिकर्म, शरद् ऋतु में पित्तरोगों की शान्ति के लिये विरेचन तथा वसन्त ऋतु में कफज रोगों की शान्ति के लिये वमन की व्यवस्था देनी चाहिये ॥ ६८ ॥

इदानीं केन क्रमेण शुद्धिः क्रियते इत्याह—

प्राक् पाचनं स्नेहविधिस्ततश्च
स्वेदस्ततः स्याद् वमनं विरेकः।
निरूहणान्वासनवस्तिकर्म-
नस्यक्रमश्चेति भिषग्वराणाम् ॥ ६९ ॥

भिषजां वराः भिषग्वराः तेषामिति क्रमः। प्राक् पाचनं प्रथमं पाचनं विरूक्षणं सामानां दोषधातुमलानाम्। अथ कोऽयमामो नाम? अविपक्वोऽन्नरस इति ब्रूमस्तथा च तन्त्रान्तरम्—"जाठरानलदौर्बल्यादविपक्वस्तु यो रसः। स आमसंज्ञितो देहे सर्वदोषप्रकोपणः ॥ आमेन तेन संयुक्ता दोषा दूष्याश्च दूषिताः। सामा इत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः ॥ इति ॥ विरूक्षितस्य च स्नेहविधिः सप्तरात्रं विधेयः। यदुक्तं सुश्रुतेन—'विरूक्षितस्य स्नेहनं स्नेहैरिति। स्नेहस्यानन्तरं स्वेदः। ततः स्यात् भवेत्। स्वेदस्विन्नशरीरस्तु वमनादिना पञ्चकर्मणाधिक्रियते। तथा च ग्रन्थान्तरम्—"कर्मणां वमनादीनामन्तरे त्वन्तरे पुनः। स्नेहस्वेदौ प्रयुञ्जीत संशोधनमनन्तरमिति"। कृतवमनविरेकस्य निरूहणाधिकारः। यदुक्तं सुश्रुतेन—"पक्षाद्विरेको वान्तस्य ततश्चापि निरूहणम्। सद्यो निरूढोऽन्वास्यः स्यात् सप्तरात्राद्विरेचितः ॥" पुनरप्युक्तम्—"निरूहशोधितान् मार्गान् सम्यक् स्नेहोऽनुगच्छति"। तथा तेनैव सुश्रुतेन विरेकानन्तरमनुवासनमुक्तम्। "विरेचनात् सप्तरात्रे गते जातबलाय वा। कृतान्नायानुवास्याय सम्यग्देयोऽनुवासन इति" ॥ निरूहणान्वासनबस्तिकर्म। निरूहणमास्थापनम्। अनुवासनं स्नेहनम्। बस्तिरनुवासनतः। ततः

पश्चान्नस्यम्। क्रमश्चेति भिषग्वराणां पञ्चकर्मार्हस्य। कश्चिदेककर्मार्हः। कश्चिद् द्विकर्मार्हः। कश्चित् त्रिकर्मार्हः। कश्चिच्चतुःकर्मार्हः। एवं विधि-प्रतिषेधौ निरूप्य पञ्चकर्माणि क्रियन्त इति। तथा चोक्तं सुश्रुतेन—"कर्मणा कश्चिदेकेन कश्चिद् द्वाभ्यां त्रिभिस्तथा। विकारः साध्यते कश्चिच्चतुर्भिरपि कर्मभिरिति॥ कर्मशब्दस्य सामान्यवाचित्वात् शस्त्र-कर्माष्टविधं तथा वमनादिपञ्चविधं गृह्यत इति॥ ६९॥

शरीर की शुद्धि के लिये प्रथम पाचन तदनन्तर स्नेहन, स्वेदन, वमन, विरेचन, निरूहण, अनुवासन तथा नस्य कर्म क्रमशः किये जाते हैं॥ ६९॥

प्राक् पाचनस्य सूत्रितत्वात् प्रथमं पाचनमेवाह—

रास्नापटोलपिचुमन्दपयोभिरादौ
शुण्ठ्याटरूषकफलत्रयवारिभिर्वा।
पक्कामदोषवपुषस्तदनन्तरं हि
स्नेहो हितः सुरभिवासकषट्पलादिः॥ ७०॥

पक्का आमा दोषा यस्य वपुषि स पक्कामदोषवपुः तस्य। कैः? रास्नापटोलपिचुमन्दपयोभिः क्वाथैः यथासंख्येन। एतदुक्तं भवति रास्नाक्वाथेन वातरोगे। पटोलक्वाथेन पित्तरोगे। पिचुमन्दो निम्बस्तस्य क्वाथेन श्लेष्मरोगे पाचनमादौ कार्य्यम्। द्वितीयं पाचनप्रकारमाह—शुण्ठ्याटरूषकफलत्रयवारिभिः क्वाथैर्वा यथासंख्येन। वातरोगे शुण्ठी-क्वाथेन। पित्तरोगे आटरूषकक्वाथेन। श्लेष्मरोगे फलत्रयक्वाथेन पाच-नमिति। तदनन्तरं पाचनानतरं स्नेहो हितः स्नेहनं कार्यम्। सुरभि-वासकषट्पलादिः। आदिशब्दोऽन्ते पठितत्वात् प्रत्येकमभिसंबध्यते। सुरभिः रास्ना। रास्नादिभिः वातपित्तकफरोगाणाम्। तेन रास्नादि-संस्कृतः स्नेहो वाते, वासकादिस्नेहः पित्ते, षट्पलादिस्नेहः कफ इति॥ ७०॥

वातरोग में रास्नाक्वाथ, पित्तरोग में पटोलपत्रक्वाथ, कफरोग में निम्बक्वाथ अथवा वातरोग में शुण्ठी (सोंठ) क्वाथ, पित्तरोग में अडूसाक्वाथ एवं कफरोग में त्रिफलाक्वाथ से आमदोषों का पाचन करने के अनन्तर वातदोषनाशक द्रव्यों से सिद्ध रास्नादि तैल द्वारा वातज व्याधियों में, पित्तदोषनाशक द्रव्यों से सिद्ध वासादि घृत द्वारा पैत्तिक व्याधियों में तथा च कफदोषनाशक द्रव्यों से सिद्ध षट्पल घृत द्वारा कफज व्याधियों में स्नेहन करना चाहिये॥ ७०॥

पूर्वमुक्तं स्नेहो हितः सुरभिवासकषट्पलादिः। अधुना द्वितीयं स्नेहप्रकारमाह—

बलादिना वानिलजे विकारे
पैत्ते महातिक्तकसर्पिषा वा।
धान्वतरेणाथ बलासरोगे
स्नेहेन मिश्रेण विमिश्रितेषु ॥ ७१ ॥

बलादिना तैलेन अनिलजे विकारे वातविकारे स्नेहो हितः। पैत्ते पित्तजे विकारे महातिक्तकसर्पिषा घृतेन स्नेहो हितः। धान्वन्तरेण घृतेन बलासरोगे श्लेष्मरोगे स्नेहो हितः। स्नेहेन मिश्रेण बलातैलद्रव्यैः महातिक्तकद्रव्यैश्च एकीकृतैः स्नेहं पक्त्वा विमिश्रिते विकारे वातपित्तजे स्नेहो हितः। एवं वातश्लेष्मजे पित्तश्लेष्मजे च विकारे स्नेहेन विमिश्रेण स्नेहो हितः ॥ ७१ ॥

वातज विकार में बलादितैल, पित्तजविकार में महातिक्तकघृत तथा कफज विकार में धान्वन्तरघृत हितकर है। द्वन्द्वज दोषों में उन २ दोषों के नाशक स्नेहों के द्रव्यों को एकत्र मिश्रित कर उनसे सिद्ध तैल आदि स्नेहों का प्रयोग करना चाहिये ॥ ७१ ॥

पूर्वमुक्तं स्नेहो हितः सुरभिवासकषट्पलादिरत्र च रास्नातैलं वातजे यदुक्तं तत्साम्प्रतमाह—

रास्नादिभिः पलचतुष्कमितैर्जलस्य
द्रोणे शृतैश्चरणशेषकृते कषाये।
एलादिभिः समधुरैरिति दुग्धपिष्टै-
स्तैलं विपक्वमनिलापहरं नराणाम् ॥ ७२ ॥

रास्नादिभिरिति रास्नात्रिकण्टकगुडूच्यादिभिः। पलचतुष्कमितैः प्रत्येकं चतुःपलप्रमाणैः। जलस्य पानीयस्य द्रोणे शृतैः क्वथितैः। द्रोणं च पञ्चभिः पलशतैर्द्वादशोत्तरैर्भवति। ततश्चरणशेषकृते कषाये चरणः पादः स शेषः कृतो यस्मिन् स चरणशेषकृतः तस्मिन् चरणभागावशेषे। एलादिभिः एलागुग्गुलुदारुकुन्दुरुमुरेत्यादिभिः। मधुरैरिति काकोल्यादिभिः। दुग्धपिष्टैः कल्कं कृत्वा तैलं विपचेत्। कल्कप्रमाणं च चतुर्थी-

शेन तैलस्य। तैलप्रमाणं प्रस्थम्। तत्प्रमाणं च द्वात्रिंशत्पलानि। ततस्तैलमनया कल्पनया विपक्वमनिलापहरं नराणां प्राणिनां रास्नातैलं भवतीति ॥ ७२ ॥

रास्नातैल—तिल तैल २ प्रस्थ। क्वाथार्थ—रास्नादिगण की प्रत्येक औषध ४ पल, जल २ द्रोण, शेष क्वाथ आधा द्रोण। कल्कार्थ–एलादिगण तथा काकोल्यादिगण (एकत्र दूध से पीस कर); मिलित ८ पल। यथाविधि तैलपाक करें। यह तैल वातनाशक है ॥ ७२ ॥

इदानीं बलादिना वानिलजे विकार इति यदुक्तं तद्बलातैलमाह–

रास्नादिभिः समधुरैः ससुगन्धिभिश्च
कल्कीकृतैरिति बलातुलया कषाये।
द्रोणेऽम्भसः क्वथितया दशमूलजे च
तैलं सृतं पवनजित् सपयस्कमेतत् ॥ ७३ ॥

रास्नादिभिः रास्नात्रिकण्टकेत्यादिभिः पूर्वोक्तैः, समधुरैः सकाकोल्यादिभिः, ससुगन्धिभिश्च एलादिसहितैरेव। रास्नादिकाकोल्यादिएलादिगणैः कल्कीकृतैः इत्युक्तम्। बलायास्तुला पलशतम् बलातुला तया कषाये क्वाथे कृते। तथा द्रोणेऽम्भसः क्वथितया। द्रोणे पूर्वोक्तं अम्भसः सलिलस्य क्वथितया सृतया चतुर्भागावशेषं यावत् कृते कषाये। दशमूलजे च कषाये। दशमूलपलशतं द्रोणेऽम्भसः प्रक्वाथ्य चतुर्भागावशेषो दशमूलस्य कषायः तस्मिन्बलाकषाये दशमूलकषाये च तैलं प्रस्थमितं सृतं पक्वं कल्कपादं सपयस्कं चतुर्गुणदुग्धमेतत् पवनजिद् वातजिद् भवतीति ॥ ७३ ॥

बलातैल—तिलतैल २ प्रस्थ। क्वाथार्थ—बलामूल १ तुला (१०० पल), जल २ द्रोण, अवशिष्ट क्वाथ आधाद्रोण। दशमूल (मिलित) १ तुला, जल २ द्रोण, अवशिष्ट क्वाथ आधाद्रोण। दूध ८ प्रस्थ। कल्कार्थ—रास्नादिगण, काकोल्यादिगण, तथा एलादिगण; मिलित ८ पल। यथाविधि तैल को सिद्ध करें। यह तैल वातनाशक है ॥ ७३ ॥

साम्प्रतं द्वितीयं बलातैलमाह—

शैलेयचन्दनदलद्रविडीगुडूची-
रास्नाबलाद्विपबलानलदैः सकुष्ठैः।

साभीरुदारुतगरागुरुजीवनीयै-
स्तैलं बलाम्भसि पचेत् पयसानिलघ्नम् ॥ ७४ ॥

तैलं पचेत् शैलेयादिभिः। शैलेयं शैलजम्। चन्दनं रक्तचन्दनम्। दलं तमालपत्रम्। द्रविडी एला । गुडूची छिन्नरुहा। रास्ना सुरभिः। बला भद्रबला। द्विपबला नागबला । नलदं मांसी। सकुष्ठैः कुष्ठसहितैरिति। अभीरुः शतावरी। दारु देवदारु। तगरं नतम्। अगुरु लोहम्। जीवनीयानि काकोल्यादीनि । एभिः कल्कैः तैलं बलाम्भसि बलाक्वाथे पयसा दुग्धेन तैलं पक्वमनिलघ्नं वातघ्नं भवतीति तैलपाककल्पना। बलापलशतं द्रोणे जलस्य प्रक्वाथ्य चतुर्भागावशेषं कषायमादाय तस्मिन् तैलं प्रस्थमितं कल्कपादं चतुर्गुणदुग्धं पक्वं बलातैलं भवतीति ॥ ७४ ॥

द्वितीय बलातैल—तिलतैल २ प्रस्थ। क्वाथार्थ—बला १ तुला, जल २ द्रोण, शेष क्वाथ आधा द्रोण। दूध ८ प्रस्थ। कल्कार्थ—शैलज (भूरिछरीला), लालचन्दन, तेजपत्र, छोटी इलायची, गिलोय, रास्ना, बला, नागबला, जटामांसी, कुष्ठ, शतावर, देवदारु, तगर, अगर तथा काकोल्यादिगण; मिलित ८ पल। यथाविधि तैलपाक करें। यह तैल वातनाशक है ॥ ७४ ॥

इदानीं बलातैलानन्तरं सहचरगुडूचीप्रसारणीतैलान्याह—

शैरेयकामृतलतासरणीकषायैः
शैलेयकादिभिरिति प्रथमोक्तकल्कैः।
युक्पञ्चमूलयवकोलकुलत्थतोयै-
स्तैलानि वानिलहराणि पचेत् सदुग्धैः ॥ ७५ ॥

न केवलं रास्नाबलातैले वातघ्ने प्रोक्ते। अन्यानि वा तैलानि अनिलहराणि पचेत् । शैरेयकामृतलतासरणीकषायैः । शैरेयकः सहचरः। अमृतलता गुडूची। सरणी प्रसारणी तासां कषायाः तैः। कषायकल्पना च एतासां प्रत्येकं पलशतं द्रोणेऽम्भसः प्रक्वाथ्य चतुर्भागावशेषैः कषायैः क्वाथैः। शैलेयकादिभिः शैलेयचन्दनदलेत्यादिभिः। प्रथमोक्तकल्कैः प्रागुक्तैरौषधैः कल्कीकृतैश्चतुर्थांशप्रमाणैस्तैलप्रस्थानि चतुर्गुणदुग्धसहितानि पचेत्। अथवा युक्पञ्चमूलयवकोलकुलत्थतोयैः। युक्पञ्चमूलं दशमूलम् । यवाः प्रसिद्धाः। कोलं आरण्यबदरम्।

कुलत्थाः प्रसिद्धाः। एतेषां चतुर्भागावशेषैः क्वाथैः शैलेयकादिभिः प्रथमोक्तैः शैलेयचन्दनदलेत्यादिभिः। स्नेहस्य चतुर्थांशप्रमाणैः कल्कैः कल्कीकृतैः सदुग्धैस्तैलानि पचेत्। सहचरगुडूचीप्रसारणीतैलानि चतुर्गुणदुग्धानि अनिलहराणि वातघ्नानि वा पचेदिति ॥ ७५ ॥

सहचरतैल—तिलतैल २ प्रस्थ। क्वाथार्थ-पियावासा १ तुला, जल २ द्रोण, शेष क्वाथ आधा द्रोण। दूध ८ प्रस्थ। कल्काथ-पूर्वोक्त तैल का कल्क; मिलित ८ पल। यदि इसी तैल के मान के अनुसार उपर्युक्त तैल के क्वाथ के स्थल पर गुडूची क्वाथ लिया जाय तो इस तैल का नाम गुडूचीतैल, यदि प्रसारणीकाथ लिया जाय तो इसीका नाम प्रसारणीतैल होजाता है। इसी प्रकार दशमूल, जौ, कोल (जंगली बेर) अथवा कुलथी; इनके पृथक् २ क्वाथों से, दूध तथा उपर्युक्त कल्क द्वारा पृथक् २ तैल पाक कर सकते हैं। यह सब तैल वातनाशक हैं ॥ ७५ ॥

पूर्वमुक्तं स्नेहो हितः सुरभिवासकषट्पलादिः। साम्प्रतं पित्तस्नेहनं वासाघृतमाह—

वासापटोलपिचुमन्दकिराततिक्त-
त्रायन्तिकामृतलताकुटजप्रसूनैः।
तिक्तायवासकफलत्रयपर्पटैश्च
पक्वं घृतं जयति पित्तरुजः समस्ताः ॥ ७६ ॥

वासा आटरूषकः। पटोलं पटोलपत्रम्। पिचुमन्दो निम्बः। किराततिक्तको भूनिम्बः। त्रायन्तिका त्रायमाणा। अमृतलता गुडूची। कुटजप्रसूना इन्द्रयवाः। तिक्ता कटुका। यवासकः दुरालभा। फलत्रयं त्रिफला। पर्पटः प्रसिद्धः। एभिः कल्कीकृतैर्घृतचतुर्थांशमितैश्चतुर्गुणेन जलेन घृतं गव्यं प्रस्थमितं पक्वम्। स तु समस्ताः पित्तरुजो जयति। घृतं पित्तहरं भवतीत्यर्थः। "अनुक्तद्रवकार्ये तु सर्वत्र सलिलं हितमिति" चान्वयः ॥ ७६ ॥

वासाघृत—गव्यघृत २ प्रस्थ। कल्कार्थ—अडूसा, पटोलपत्र, नीम छाल, चिरायता, त्रायमाण, गिलोय, इन्द्रजौ, कुटकी, यवासक (जवासा), त्रिफला, पित्तपापड़ा; मिलित ८ पल। पाकार्थ जल ८ प्रस्थ। यथाविधि घृत सिद्ध करें। यह घृत सम्पूर्ण पैत्तिक विकारों को हरता है ॥ ७६ ॥

पूर्वमुक्तं स्नेहो हितः सुरभिवासषट्पलादिः । तत्र षट्पलं कफस्नेहनमाह—

शुण्ठीकणाग्रन्थिकचव्यचित्रकैः
ससैन्धवैर्वा सयवाग्रजैरथ ।
सदुग्धमेभिः पलभागिकैः सृतं
घृतं कफव्याधिहरं हि षट्पलम् ॥ ७७ ॥

घृतं सृतं पक्वं षट्पलं नाम कफव्याधिहरम् । कफेन व्याधयो रोगाः तान् हरतीति कफव्याधिहरम् । पलभागिकैः पलप्रमाणैरेभिर्द्रव्यैः । शुण्ठी विश्वभेषजम् । कणा पिप्पली । ग्रन्थिकं पिप्पलीमूलम् । चव्यं हस्तिपिप्पलीलता । चित्रकं शिखी । एभिः ससैन्धवैर्वा सयवाग्रजैरथेति । कदाचित् सैन्धवेन सह । कदाचित् यवाग्रजेन यवक्षारेण सह । द्वयोरपि ग्रन्थान्तरेषु दर्शनात् । सदुग्धं चतुर्गुणेन दुग्धेन सह । घृतं प्रस्थमिति ॥ ७७ ॥

षट्पलघृत—गव्यघृत २ प्रस्थ । दूध ८ प्रस्थ । कल्कार्थ—सोंठ, पिप्पली, पिप्पलीमूल, चव्य, चित्रक, सैन्धानमक; प्रत्येक १ पल । पाकार्थ जल ८ प्रस्थ । यथाविधि घृतपाक करें । यह घृत कफज रोगों को हरता है । इस तैल के पाक में सैन्धानमक की जगह किसी२ तन्त्रान्तर में यवक्षार ( जवाखार ) का कल्क देना लिखा है ॥७७॥

साम्प्रतं पृथुषट्पलमाह—

शुण्ठ्यादिभिः सलवणत्रययावशूकैः
सस्वर्जिकाख्यचिरबिल्वजवल्ककल्कैः ।
षड्भिः पलैरिति सृतं घृतमग्निहेतुः
स्यादार्द्रकद्रवयुतं पृथुषट्पलाख्यम् ॥ ७८ ॥

इत्यनेन प्रकारेण शृतं घृतं पक्वं घृतप्रस्थं अग्निहेतु स्यात् भवेत् । आर्द्रकद्रवः स्वरसः तेन चतुर्गुणेन युतम् । पृथुषट्पलाख्यं महाषट्पलसंज्ञं भवति । कैः शृतम् ? शुण्ठ्यादीनां षड्भिः पलैः । शुण्ठ्यादिभिरिति पञ्चकोलकम् । लवणत्रयं सैन्धवबिडसौवर्चलानि । यावशूको यवक्षारः । चिरबिल्वजवल्कम् वल्कलम् तेषां कल्कैः षट्पलप्रमाणैः शृतमिति ॥ ७८ ॥

महाषट्पलघृत—गव्यघृत २ प्रस्थ । अदरक का रस ८ प्रस्थ । कल्कार्थ—सोंठ, पिप्पली, पिप्पलीमूल, चव्य, चित्रक, सैन्धानमक, सौंचलनमक, विडनमक,

यवक्षार, सर्जिक्षार, पूतिकरञ्ज की छाल; मिलित ६ पल। यथाविधि घृत पाक करें। यह घृत विशेषतः अग्निप्रदीपक है॥ ७८॥

इदानीं स्निग्धे स्वेदनं अधिक्रियते इति स्नेहनानन्तरं स्वेदमाह—

पुनर्नवैरण्डयवातसीभिः
कार्पासजैरस्थिभिरारनालैः।
स्विन्नैरमीभिस्त्विति षड्भिरेव
स्वेदः समीरार्त्तिहरो नराणाम्॥ ७९॥

अमीभिरनन्तरोक्तद्रव्यैः आरनाले काञ्जिके स्विन्नैरुत्स्विन्नैः। अयं स्वेदः समीरणो वायुः, तेन अर्तिः पीडा, तां हरतीति समीरार्त्तिहरो भवति। केषां? नराणाम्। कैः? पुनर्नवादिभिः। पुनर्नवा वर्षाभूः। एरण्ड उरुबुकः। यवः शूकधान्यम्। अतसी उमा। कार्पासजैरस्थिभिर्बीजैः काञ्जिकसहितैः। षड्भिरेव स्वेदः कार्य्य इति॥

पुनर्नवा, एरण्डमूल, जौ, अलसी, कपास के बिनौले; इन्हें कांजी में उत्स्विन्न कर स्वेद देने से वातरोग नष्ट होते हैं॥ ७९

साम्प्रतं स्निग्धस्विन्नस्य वमनं क्रियते इति वमनमाह—

सकलिङ्गवचामगधामधुकं
लवणेन युतं मदनाम्बु पिबेत्।
वमनं कफरोगहरं नृणा-
मथवा पिचुमन्दकषायकृतम्॥ ८०॥

मदनाम्बु मदनक्वाथम्। कीदृग्गुणविशिष्टं? सकलिङ्गवचामगधामधुकम्। कालिङ्ग इन्द्रयवः। वचा हैमवती। मगधा पिप्पली। मधुकं यष्टीमधु। सह कालिङ्गादिभिर्वर्त्तत इति सकलिङ्गवचामगधामधुकम्। लवणेन सैन्धवेन युतं मदनाम्बु पिबेत्। वमनं कफरोगहरं भवति। नृणां प्राणिनाम्। कालिङ्गादीनि चूर्णीकृत्य कल्कीकृत्य वा योजनीयानि मदनक्वाथे। अथवेति पक्षान्तरम्। पिचुमन्दकषायेण कृतं कलिंगादिसंयुक्तं वमनं भवति इति। पिचुमन्दो निम्बः। तच्च वमनमेकाहो विश्राम्य स्नेहान् ग्राम्योदकैः मांसरसैरुत्क्लेश्यापरस्मिन् प्रभाते वमनं कुर्यात्। तथा च भेलः—"एकाहोपरतः स्नेहः स्थित्वा प्रच्छर्दनं पिबेत्। भुक्त्वा

ग्राम्योदकैर्मांसैरानूपैश्च सुसंस्कृतैरिति" । क्राथस्य प्रमाणेषूत्तममध्य-माधममात्रा यथासंख्येन नव षट् त्रयः प्रस्थाः पातव्याः । तथा च भेलः—"नवप्रस्था तु ज्येष्ठा स्यात् मध्यमा षट् प्रकीर्तिता। निःक्राथस्य त्रयः प्रस्था मात्रा सा तु कनीयसी । त्रिपलं ज्येष्ठमाख्यातं कनीयस्तु पलं पिबेत्। मध्यमं द्विपलं विद्यादिति मे निश्चिता मतिः।" तस्य वमनस्य उत्तममध्यमाधमस्य लक्षणमाह—'वमने चास्यवेगाः स्युरष्टौ पित्तान्त उत्तमः । षड्वेगान्मध्यमो वेगश्चत्वारस्त्वधमे मताः।' इति चक्षुष्येणात्। "वामितं लङ्घयेत्सम्यक् शुद्धिलिंगानि लक्षयेत्। तानि दृष्ट्वा तु पेयादिक्रमं कुर्य्यान्न लङ्घयेत्" । तथा च—"पेयाविलेपीमकृतं कृतं च यूषं रसं द्वित्रिरथैकशश्च । क्रमेण सेवेत नरोऽन्नकालात् प्रधानमध्यावरशुद्धिशुद्धः" । इति एष पेयादिक्रमः कायचिकित्सकानां मत इति । शल्यतन्त्रकर्तृणां सुश्रुतादीनां यूषादिक्रमोऽभिप्रेतः । तथा च सुश्रुतः—"ततोऽपराह्णे सुविशुद्धदेहमुष्णाभिरद्भिः परिषिक्तगात्रम्। कुलत्थमुद्गाढकिजांगलानां यूषै रसैर्वाप्युपभोजयेत" । इति ॥ ८० ॥

मदनफल के क्राथ में अथवा नीम के क्राथ में इन्द्रजौ, वच, पिप्पली, मुलहठी, सैन्धानमक; इनके चूर्ण का प्रक्षेप देकर पीने से वमन होता है। यह वमन कफजरोगों को नष्ट करता है ॥ ८० ॥

एवं कृतसंसर्जनस्य पुनरपि स्निग्धस्विन्नस्य पक्षादूर्ध्वं वमनात् विरेचनं प्रहरे सत्रिभागे गते देयमित्यत आह—

उरुबूकतैलमथ बिन्दुघृतं
त्रिफलाकषायमथ गुग्गुलुना।
सुविरेचनं विरचितं हि नृणा-
मिति वातपित्तकफरोगवताम् ॥ ८१ ॥

नृणां प्राणिनां सुविरेचनं शोभनं विरेचनं विरचितमिति । उरुबूकतैलं एरण्डतैलं वातरोगे विरेचनम्। विन्दुघृतं पित्तरोगे विरेचनम्। त्रिफलाकषायं गुग्गुलुना सह श्लेष्मरोगे विरेचनम्। तच्च विरेचनं क्रूरमध्यममृदुकोष्ठं ज्ञात्वा ज्येष्ठमध्यमकनीयसी मात्रा देया। तथा च सिद्धसारः—"पित्तेन स्यान्मृदुः कोष्ठः क्रूरो वातकफात्मकात्। मध्यमः समदोषत्वान्मात्रा योज्यानुरूपतः" । सा च मात्रा भेलेनोक्ता। "द्विपलं

ज्येष्ठमाख्यातं मध्यमं तु पलं भवेत्। पलार्द्धमथ दातव्यं कनीयस्तु विरेचनमिति" ॥ स्नेहादूर्ध्वं त्रिरात्रं मांसरसं भुक्त्वा पेयम्। तथा च चक्षुष्येण:—'एकाहात्परतः स्नेहं भुक्त्वा प्रच्छर्दनं पिबेत्। भुक्त्वा त्रिरात्रं परतः पिबेत् संशोधनं नरः॥' तच्च विरेचनं पित्तप्रधाने रोगे पित्ते चोत्क्लिष्टे देयम्। तस्य च लक्षणं चक्षुष्येणेनोक्तम्—'प्रमाणेनाढकं त्रिंशद्वेगः श्लेष्मान्त उत्तमः। दशवेगोऽवरः प्रस्थो मध्योऽर्द्धाढक-विंशकैः॥ वमने च विरेके च तथा शोणितमोक्षणे। सार्द्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः॥" तस्मिंश्च विरेके कृते यदि सम्यक् विरेको न भवति मन्दाग्नित्वादातुरस्तदा न भोजनीयः। अथ सम्यक् विरेको भवति, विरेचने जीर्णे बुभुक्षिते च तदा तस्मिन्नेवाहनि पेया दातव्या। तथा च सुश्रुतः—"मन्दाग्निमक्षीणमसद्विरिक्तं न पाययेताहनि तत्र पेयाम्। क्षीणं तृडार्तं सुविरेचितं च तन्वीं सुखोष्णां लघु पाययेत्तु॥ सायाह्ने जीर्णभैषज्ये न विरिच्येत यो नरः। मृद्वल्पमात्रपीतश्च पाययेदौषधं मृदु॥ भुक्त्वा नेच्छेद्दिने तस्मिन् भुक्त्वान्येद्युः पुनः पिबेत्। अदृढ-स्निग्धकोष्ठस्तु पिबेदूर्ध्वं दशाहतः॥ वमनेऽतिप्रवृत्ते तु हृद्यं कार्यं विरेचनम्। विरेके चातिवृत्ते तु वमनं योजयेद् भिषक्" ॥ ८१ ॥

वातरोग में एरण्डतैल, पित्तरोग में बिन्दुघृत तथा कफरोग में शुद्ध गुग्गुलु के साथ त्रिफलाक्काथ को विरेचनार्थ पीना चाहिये ॥ ८१ ॥

इदानीं कृतविरेकस्योर्ध्वं सप्तरात्रात्, अभ्यर्चितद्विजस्य, स्निग्ध स्विन्नस्य, मध्याह्ने, कृतमूत्रपुरीषस्य, बुभुक्षितस्य, कृतमङ्गलस्वास्तिवाच-नस्य सतो निरूहणाधिकार इत्याह—

गुडतिन्तडीककुडवस्तु भवे-
दपि चात्र मूत्रकुडवद्वितयम्।
मिशिराठरामठकसिन्धुयुतं
नृनिरूहणं हि विहितं मुनिभिः ॥ ८२ ॥

मुनिभिः पूर्वर्षिभिर्नृनिरूहणं नृणां प्राणिनां निरूहणमास्थापनं विहितं युक्तम्। गुडतिन्तिडीककुडवस्तु भवेत्। गुडः प्रसिद्धः। तिन्ती-डीकमम्लीका। द्वयोरपि कुडवं चत्वारि पलानि। अत्र च मूत्रकुडव-

द्वितयं गोमूत्रस्याष्टौ पलानि। द्विगुणपरिभाषात्र कुडवादूर्ध्वं क्रियत इति। मिशिराठरामठकसिन्धुयुतं कर्त्तव्यम्। मिशिः शतपुष्पा। राठं मदनफलम्। रामठकं हिंगु। सिन्धु सैन्धवम्। एषां कल्केन संयुक्तम्। सावरणे रूक्षम्। निरावरणे तैलपलान्वितम्। अनुक्तान्यप्यत्र मांसरसक्षीरकाञ्जिकादीनि प्रक्षिप्य दातव्यम्। तथा च हारीतः—'स्नेहो गुडो मांसरसः पयांसि साम्लानि मूत्रं मधु सैन्धवं च। एतान्यनुक्तान्यपि दापयेत युक्ते निरूहे मदनात् फलेन'। एरण्डाद्यबलाद्यरास्नाद्येषु प्रसिद्धेषु वस्तिषु विद्यमानेष्वपि यद्गोमूत्रबस्तिस्तीसटाचार्येणोक्तः स निरपायत्वात् शीघ्रमागच्छतीति। कदाचित्तेन निरामयः सन् एरण्डादिभिरधिक्रियते। तेषां च सामान्या कल्पना पूर्वाचार्यैः व्याख्याता मयोच्यते। निरूहस्य प्रमाणं चतुर्विंशतिपलानि। तथा च पराशरः—"निरूहस्य प्रमाणं तु प्रस्थः पादोत्तरं परम्। मध्यमं प्रस्थमुद्दिष्टं हीनं च कुडवात्त्रयः"॥ सुश्रुतचरकखरनादप्रभृतीनां मतं चतुर्विंशतिपलानि परं प्रमाणम्। तथा च खरनादः—'अत ऊर्ध्वं प्रवक्ष्यामि निरूहस्य प्रकल्पनाम्। द्वादशप्रसृतानाद्ये ततोऽन्यांस्तु प्रकल्पयेत्॥ सर्वेष्वेव निरूहेषु मदनं च प्रदापयेत्। स्नेहं गुडं माक्षिकं च लवणं चापि युक्तितः। पक्त्वा द्रोणे पलांशानि क्वाथ्यान्यष्टौ पलानि च। शिष्टोऽष्टांशस्त्रिवस्त्याहो बस्तावेकैकशस्त्रिधा॥ षडंशेनैव वातादीनुच्छ्रितान् वीक्ष्य कल्पयेत्। नातिसान्द्राच्छकृतोऽप्यस्नेहभागैर्मलं प्रति॥ मधुयुक्तो गुडपलं कर्षार्द्धं लवणस्य च। निरूहे स्नेहभागः स्यात् पित्ते वापि पलाष्टकम्॥ वाताधिके चतुर्भागं प्रकृतिस्थे तु पित्तवत्। दधिमस्तुरसक्षीरगोमूत्रबदरादयः। यस्मिन्निरूहे निर्द्दिष्टाः प्रमाणं न च कीर्त्तितम्॥ तस्मिन् दोषाधिकं दृष्ट्वा युक्त्या संविभजेद्भिषक्। मदनानां विमृद्यांशं क्वाथं क्षीररसादिषु॥ शास्त्रप्राप्ताप्तविन्यासं कल्पयेद् गुरुशिक्षया। तं बस्तिं सर्वसंयुक्तं द्वादशप्रसृतोन्मितम्। खजेन मथितं पूतं दशदोषविवर्जितम्॥ नेत्रे सवस्तौ प्रक्षिप्य वर्त्तिकां द्वारपीडिताम्। उत्थाप्य निर्वलिं बध्वा गृहीत्वा सव्यपाणिना॥ कनिष्ठिकाधृतं नेत्रं पिधायाङ्गुष्ठकेन तम्। बस्तिं च दक्षिणे न्यस्य नाड्या वायुं विसर्जयेत्॥ अथ जीर्णान्नमक्षामं संभुक्तं तमवेगिनम्। देशे निवाते स्वभ्यक्तगात्रमीषद्बुभुक्षितम्॥ निरिन्धनाग्निसन्तापात् पित्ते कोष्ठसमाश्रिते। प्रविलीने कफे चापि जीर्य्यमाणे

निरूहयेत् ॥ इति ॥ सुश्रुताचार्येणापि वातादिविभागेन माक्षिकादीनां प्रमाणमुक्तम् । 'त्रिषट्द्वयेकाष्टचत्वारः त्र्यब्ध्यक्षीलेशवह्नयः । षट्त्रिद्वये काष्टचत्वारः प्रतिपक्षा व्यवस्थिताः ॥ वाते पित्ते कफे क्षौद्रं स्नेहः कल्को गुडादयः । क्वाथो वापो पृथक्बस्तिश्चतुर्विंशतिकः पलैः ॥ वाते गुडः सिता पित्ते कफे सिद्धार्थकादयः । कल्कावापरसक्षीरमूत्रप्रायं द्रवं क्षिपेत्' ॥ सुश्रुताचार्येणापि सामान्येनैव सैन्धवादीनां प्रमाणमुक्तम् । " दत्त्वादौ सैन्धवस्याक्षं मधुनः प्रसृतिद्वयम् । विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रसृतित्रयम् ॥ एकीभूते ततः स्नेहे कल्कस्य प्रसृतं क्षिपेत् । संमूर्च्छिते कषायं तु चतुःप्रसृतसंमितम् । वितरेच्च तथावापमन्ते द्विप्रसृतोन्मितम् ॥ एवं प्रकल्पितो बस्तिर्द्वादशप्रसृतो भवेत् । ज्येष्ठायाः खलु मात्रायाः प्रमाणमिदमीरितम् ॥ अपह्रासे भिषक् कुर्यात्तद्वत्प्रसृतह्रापनम् । यथावयो निरूहाणां कल्पनेयमुदाहृता ॥ सैन्धवादिद्रवान्तानां सिद्धिकामैर्भिषग्वरैः"॥इति॥ तस्य निरूहस्य सुश्रुतादिभिः शल्यतन्त्रकर्तृभिः उत्क्लेशदोषहरसंशमनबस्तिपुटपाकदानमित्यनेन क्रमेण कल्पना आश्रीयते । तथा च सुश्रुतः—'दद्यादुत्क्लेशनं पूर्वं मध्ये दोषहरं पुनः । पश्चात्संशमनीयं च दद्याद्बस्तिं विचक्षणः । एरण्डबीजमधुकं पिप्पली सैन्धवं वचा । हपुषाफलकल्कश्च बस्तिरुत्क्लेशनः परः ॥ शताह्वा मधुकं बीजं कौटजं बीजमेव च । सकाञ्जिकः सगोमूत्रो स्तिर्दोषहरः स्मृतः ॥ प्रियङ्गुमधुकं मुस्ता तथैव च रसाञ्जनम् । सक्षीरः शस्यते बस्तिर्दोषाणां शमनः स्मृतः" इति ॥ तस्मिन् वृत्ते हीनातिसम्यङ् निरूढलक्षणं सुश्रुतेनोक्तम्—'अल्पाल्पवेगो विड्वातहीनो हीननिरूहणः । मूर्च्छाशूलकफप्रायो महावेगो निरूहणः ॥ यस्य क्रमेण गच्छन्ति विट्पित्तकफवायवः । लाघवं चोपजायेत सुनिरूढं तमादिशेत् ॥ सुनिरूढं ततो जन्तुं स्नातं भुक्तं रसौदनम् । यथोक्तेन विधानेन योजयेत् स्नेहबस्तिभिरिति ॥ तस्य सम्यक्दत्तस्य फलं चरकोक्तमुच्यते— "बस्तिर्वयःस्थापयिता सुखायुर्बलाग्निमेधास्वरवर्णकृच्च । सर्वार्थकारी शिशुवृद्धयूनां निरत्ययः सर्वगदापहश्च ॥ विट्श्लेष्मपित्तानिलमूत्रकर्षी दार्ढ्यावहः शुक्रबलप्रदश्च । वृष्यः स्थितं दोषचयं निरस्य सर्वान् विकारान् शमयेन्निरूह इति" ॥ ८२ ॥

गोमूत्र ८ पल। गुड २ पल, बीजयुक्त इमली २ पल। सोये १ कर्ष, सैन्धानमक १ कर्ष, मैनफल १ (संख्या से), किंचित् हींग॥ प्रथम गोमूत्र में १ कर्ष सैन्धानमक मिलाकर इसमें इमली को मसल दें और गुड घोललें। पश्चात् वस्त्र से छानकर सोये, मैनफल तथा हींग का अत्यन्त श्लक्ष्ण पीसा हुआ कल्क डालें और अच्छी प्रकार विलोडित करें। यदि कोष्ठ शुद्ध हो तो इसमें १ पल तिलतैल मिला सकते हैं। इसमें अनुक्त कांजी, मांसरस तथा दूध आदि का यथादोष आवाप दिया जाता है॥ ८२॥

इदानीं निरूहानन्तरं यतः सद्यो निरूढोऽन्वास्य इति कृत्वा कदाचिद्विरेचनादूर्ध्वं सप्तरात्रेऽतीते अनुवासनदानं षट्पलप्रमाणं प्रोक्तम्। तथा च सुश्रुतः—"विरेकात्सप्तरात्रे गते जातबलाय वै। कृतान्नायानुवास्याय सम्यग्देयोऽनुवासनः। यथावयो निरूहाणां या मात्रा परिकीर्त्तिता। पादावशिष्टा वै कार्य्या स्नेहबस्तिषु देहिनामिति, अतो अनुवासनमाह—

मगधामधुकामयबिल्ववचा-
मिशिपुष्करमूलशिखीसटिभिः।
मदनामरदारुयुतैर्विपचेत्
पयसा गुदबस्तिषु तैलमिदम्॥ ८३॥
गुदजानि गुल्फगुदगुह्यकटी-
जठरान्तरेषु पवनस्य रुजः।
विनिहन्ति गुल्ममतिसारगदान्
ग्रहणीविकारमनुवासनतः॥ ८४॥

इदं तैलं पयसा क्षीरेण विपचेत्। मगधादिभिश्च, मगधा पिप्पली, मधुकं यष्टीमधु। आमयं कुष्ठम्। बिल्वं श्रीफलम्। वचा षड्ग्रन्था। मिशिः शतपुष्पा। पुष्करमूलं कुष्ठाकारम्। शिखी चित्रकः। सटी कर्चूरः। मदनं राठफलम्। अमरदारु देवदारु। एभिः पलप्रमाणैः। तिलतैलपलान्यष्टाशीति, द्विगुणक्षीराणि, चतुर्गुणजलानि विपाच्य गुदबस्तिष्वनुवासनेषु तैलं विधेयम्। गुदबस्तिग्रहणं शिरोबस्तिनिवारणार्थम्। एतच्च सुश्रुते—'सट्याद्यं प्रथममनुवासनतैलम्। चरकेऽपि

पिप्पल्याद्यमर्शश्चिकित्सते प्रसिद्धमिति कृत्वा तीसटाचार्येणोक्तम्—अस्य च फलम् गुदजान्यर्शांसि। गुल्फगुदगुह्यकटीजठरान्तरेषु रुजो ये विकारास्तान् विनिहन्ति। गुल्मांदीश्च। अनुवासनतः स्नेहबस्त्युपयोगतः। स चानुवासनो भुक्ते सुखोष्णे एकदिवसान्तरितो विधेयः स्नेहवस्तिः। तस्मिंश्च दीयमाने शुण्ठीधान्याम्बु प्रभाते पेयमग्निसंधुक्षणार्थं रुच्यर्थश्च। तथा च सुश्रुतः—'प्रातरुष्णोदकं देयं धान्यनागरसाधितम्। तेनास्य दीप्यते वह्निर्भक्ताकांक्षा च जायते॥ तस्य च हीनातिसम्यग्दत्तस्य लक्षणम्। विष्टब्धानिलविण्मूत्रः स्नेहो हीनेऽनुवासने। दाहक्लमप्रवाहार्तिकरश्चात्यनुवासने॥ सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु। ओषचोषौ विना शीघ्रं स सम्यगनुवासितः॥ तस्य च फलं चरकेणोक्तम्—"मूले निषिक्तो हि यथा द्रुमः स्यान्नीलच्छदः कोमलपल्लवाग्रः। काले महान् पुष्पफलप्रदश्च तथा नरः स्यादनुवासनेन॥ सुश्रुतेनाप्युक्तम्—"बस्तिर्वाते च पित्ते च कफे रक्ते च शस्यते। संसर्गे सन्निपाते च बस्तिरेव हितः सदा" ॥ ८३—८४ ॥

तिलतैल ८८ पल। दूध १७६ पल। जल ३५२ पल। पिप्पली, मुलहठी, कुष्ठ, विल्व, वच, सोये, पोहकरमूल, चित्रक, कचूर, मैनफल, देवदारु; प्रत्येक १ पल। यथाविधि तैल सिद्ध कर अनुवासन करना चाहिये। इस तैल के अनुवासन से अर्श, गुल्म, अतीसार, संग्रहणी और गुल्फ, गुदा, गुह्यदेश, कमर तथा कुक्षि आदि में उत्पन्न वातिक वेदनायें नष्ट होती हैं॥ ८३—८४ ॥

एवं संशुद्धशरीरस्य कृतसंसर्जनस्य च स्विन्नशिरसः शिरोगतदोषनिर्हरणार्थं नस्यमाह—

शिग्रुबीजसुरसार्जकबीजै-
र्विश्वजीरककणामरिचैश्च।
नस्यमूर्ध्वरुजि योज्यममीभिः
कारवीरुचकतुम्बुरुभिश्च॥ ८५ ॥

ऊर्ध्वरुजि शिरोविकारे वातश्लेष्मजे नस्यं योज्यं योजनीयम्। अमीभिर्द्रव्यैः शिग्रुबीजादिभिः एकशो द्विशस्त्रिशः समस्तैर्वा कल्कपिष्टैः शिरोविरेचनम्। कदाचित् समस्तैस्तैलं पक्त्वा स्नैहिकं नस्यं

कर्त्तव्यम्। शिग्रुः शोभाञ्जनकः तस्य बीजानि। सुरसः प्रसिद्धः। अर्जकः कुठेरकः। द्वयोरपि बीजानि। विश्वं शुण्ठी। जीरकः अजाजी। कणा पिप्पली। मरिचमूषणमिति। न केवलमभिः कारवीरुचकतुम्बुरुभिश्च नस्यं योज्यम्। कारवी शतपुष्पा अजमोदा च। रुचकं सौवर्चलम्। तुम्बुरु प्रसिद्धम्। तच्च नस्यं पञ्चधा। 'स्नैहिकशिरोविरेकः प्रतिमर्शोऽवपीडनम्। ज्ञेयं प्रधमनं चेति नस्यकर्म तु पञ्चधा॥ ततो नस्ये कृते धूमं पिबेत्कफविनाशनम्'। हितान्नभुक् निवातोष्णसेवी स्यान्नियतेन्द्रियः॥ विधिरेषोऽवपीडस्य कार्य्यः प्रधमनस्य च। तच्छडङ्गुलया नाड्या धमेच्चूर्णं मुखेन तु॥ विरिक्तशिरसं तूर्णं पाययित्वाम्बु भोजयेत्। स्नैहिकनस्यस्य प्रमाणम्—षोडशद्वात्रिंशच्चतुःषष्टिबिन्दवस्तिस्रो मात्राः। तथा च मात्रामाह वृद्धविदेहः—'प्रदेशिन्या निमग्ने द्वे पर्वणी च ततो गलन्। नस्यकर्मणि विज्ञेयो भिषग्भिर्बिन्दुसंज्ञितः॥ नस्यस्य स्नैहिकस्यात्र ज्ञेया द्वयष्टौ च बिन्दवः। प्रत्येकशो नस्यकार्ये नृणामिति विनिश्चयः। शुक्तिश्च पाणिशुक्तिश्च मात्रास्तिस्रः प्रकीर्तिताः द्वात्रिंशद्बिन्दवश्चापि शुक्तिरित्यभिधीयते॥ द्विशुक्तिः पाणिशुक्तिश्च ज्ञेयात्र कुशलैः नरैः। नस्यस्य स्नैहिकस्यैतत्प्रमाणं विहितं नृणामिति॥ शिरोविरेकस्य प्रमाणं चतुःषडष्टौ बिन्दवस्तिस्रो मात्राः। तथा च तन्त्रान्तरम्—"चत्वारो बिन्दवः षड्वा तथाष्टौ वा यथाबलम्। शिरोविरेचने योज्या ऊर्ध्वजत्रुविकारिणाम्"॥ प्रतिमर्शस्य च प्रमाणम्—"ईषदुच्छिङ्घतः स्नेहो यावद्वक्त्रं प्रपद्यते। नस्ये निषिक्तं तं विद्यात् प्रतिमर्शं प्रमाणतः"॥ तच्च नस्यमेकदिवसान्तरितं द्विदिवसान्तरितं वा प्रयोज्यम्। तथा च भोजः—'एकान्तरं द्वयन्तरं वा नस्यं दद्याद्विचक्षणः। सप्ताहं तु परं देयं विश्रान्तस्य पुनः पुनः॥ त्र्यहं पञ्चाहमथवा सप्ताहं वा सुयन्त्रितः। परं नवाहमूर्ध्वं तु नवाहात् साम्यतां व्रजेत्'॥ स्नैहिकनस्यशिरोविरेकयोः फलं चक्षुष्येणोक्तम्—"पित्तानिलहरं केश्यं वक्त्रोपचयवर्णकृत्। प्रसादनं चेन्द्रियाणां स्नैहिकं नस्यमुच्यते"॥ शिरोविरेचनं नेत्रगलवर्त्मामयापहम्। हितं मेदःकफग्रस्ते गौरवारुचितन्द्रिष्विति॥ तच्च नस्यं कृष्णात्रेयेण सप्तवर्षादूर्ध्वं विहितम्। "सप्तवर्षमुपादाय नस्यकर्म चतुर्विधम्। प्रतिमर्षः प्रधमनं जन्मप्रभृति शस्यते।

धूमो द्वादशवर्षस्य कवलः पञ्चमे मतः। दोषव्याधिबलावस्थां वीक्ष्य चैतत्प्रयोजयेदिति" ॥ तस्य च फलं सामान्येन सुश्रुतेनोक्तम्—"नस्येन रोगाः शाम्यन्ति नराणामूर्ध्वजत्रुजाः। इन्द्रियाणां च वैमल्यं कुर्यादास्यं सुगन्धि च ॥ हनुदन्तशिरोग्रीवात्रिकबाहूरसां बलम्। वलीपलित खालित्यव्यङ्गानां चाप्यसम्भवः ॥ तैलं कफे सवाते स्यात् केवले पवने वसाम्। दद्यात् सर्पिः सदा पित्ते मज्जानं च समारुते ॥" इति ॥ ८५ ॥

सहिजन के बीज, सुरसा (तुलसी) बीज, अर्जक (तुलसीभेद) बीज, सोंठ, श्वेतजीरा, पिप्पली, कालीमिर्च, अजमोदा, कालानमक, धनियां। इन्हें सम-परिमाण में एकत्र मिश्रित कर जत्रुसंधि से ऊपर स्थित रोगों में नस्य लेना चाहिये ॥ ८५ ॥

इदानीं वातादिरोगाणां सामान्येन वमनादिकां क्रियामुक्त्वा ज्वरादीनां प्रत्येकं विशेषचिकित्साविधिमाह—

इतीयमुक्ता पवनादिरोगिणां
क्रिया क्रियान्या तदपि प्रवक्ष्यते।
प्रतिज्वरादिप्रविभक्तभेषजै-
रतश्चिकित्साकलिका भिषग्मता ॥ ८६ ॥

इतिशब्दः परिसमाप्तौ। यद्यपि पूर्वोक्तप्रकारेण पवनादिरोगिणां वातादिरोगिणां इति इयं क्रिया संक्षेपेणोक्ता पूर्वाचार्येण। क्रियते इति क्रिया। तथापि अन्यापि क्रिया प्रचक्ष्यते। कस्मात्? यत इयं सामान्ये-नोक्ता न विशेषेण। इयं च वक्ष्यमाणकाविशेषेण ज्वरादिषु प्रविभक्तभेषजैः। प्रकर्षेण विभक्तैर्भेषजैरौषधैर्वक्ष्यते। अतः अस्मात्कारणात् चिकित्सा-कलिका भिषग्मता। भिषजां वैद्यानां मता सम्मता। यस्मादस्यां दोषविशेषेण ज्वरादिरोगविशेषेण च चिकित्सतमुक्तमिति ॥ ८६ ॥

इसप्रकार सामान्य रूप से वातज, पित्तज तथा कफज रोगों की चिकित्सा कही है। आगे क्रमशः ज्वर आदि रोगों की पृथक् २ चिकित्सा कही जायगी। यतः इस में दोषविशेषों की और ज्वर आदि रोगविशेषों की चिकित्सा कही गई है अतएव यह चिकित्साकलिका वैद्यों द्वारा मान्य है ॥ ८६ ॥

साम्प्रतं श्रेष्ठं येषां रोगिणां लङ्घनं पूर्वाचार्येणोक्तं तदाह—

आदौ ज्वरे ज्वरवतः कफजे विशेषा-
दामातिसारिणि च शोणितपित्तरोगे ।
छर्द्यां शिरोरुजि बलाससमुद्भवायां
नेत्रामयेषु कफजेषु विसूचिकायाम् ॥ ८७ ॥
विस्फोटकामयिनि वक्त्रविकारवत्सु
सद्यःप्रसूतवनितासु च शोफवत्सु ।
सद्यःक्षतेषु नृषु लङ्घनमुद्दिशन्ति
वैद्या यथाबलमजीर्णविकारिणां च ॥ ८८ ॥

वैद्या लङ्घनमुद्दिशन्ति ज्वरादिषु । आदौ प्रथमं ज्वरवतः । ज्वरो विद्यते यस्यासौ ज्वरवांस्तस्य । ज्वरे सति कफजे ज्वरे विशेषात् विशेषेण लङ्घनम् । आमातिसारिणि च सामेऽतिसारे । शोणितपित्तरोगे रक्तपित्ते । छर्द्यां वम्याम् । शिरोरुजि मस्तकरुजि । बलाससमुद्भवायां द्वयोरपि विशेषणम् । नेत्रामयेषु च लोचनविकारेषु कफजेषु । विसूचिकायां अलसे । विस्फोटकामयिनि विस्फोटविकारवति । वक्त्रविकारवत्सु मुखविकारसमेतेषु । सद्यःप्रसूतवनितासु च । सद्यः सप्तरात्रं प्रसूतासु वनितासु स्त्रीषु न चिरकालम् । शोफवत्सु अवयवशोफसमेतेषु । सद्यःक्षतेषु सद्योव्रणेषु व्रणयुक्तेषु । नृषु प्राणिषु । एषां सर्वेषामेव च लङ्घनमुद्दिशन्ति उपदिशन्ति वैद्या भिषजः । तच्च यथाबलं यावन्मात्रं बलम् । तथा च चरकाचार्य्यैः—"प्राणाविरोधिना चैनं लङ्घनेनोपपादयेत् । बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रम इति ॥ अजीर्णविकारिणां च प्राणिनां लङ्घनमुद्दिशन्तीति ॥ ८७—८८ ॥

ज्वर से पीडित रोगी को विशेषतः कफज्वर के प्रारम्भ में तथा आमातिसार, रक्तपित्त, कफज छर्दि ( कै ), कफज शिरोरोग, कफज नेत्ररोग, विसूचिका, विस्फोटक, मुखविकार, सद्योव्रण, शोफ, एवं अजीर्ण आदि से पीडित रोगियों और सद्यः प्रसूतस्त्रियों को उनके बलानुसार लंघन कराना चाहिये ॥ ८७—८८ ॥

पूर्वं ज्वरादिषु लङ्घनं विहितमतः सुलङ्घितलक्षणमाह—

विण्मूत्रवातसरणे तनुलाघवे च
तन्द्राक्लमे च विरते वपुषः पटुत्वे।
उद्गारवक्त्रविवरोदरहृद्विशुद्धौ
स्वेदोद्गमे सति भवत्यशनाभिलाषे ॥ ८९ ॥
इत्येतदातुरसुलङ्घितलिङ्गमङ्गे
सम्यग्भिषग्भिरवधार्य विचार्य बुद्ध्या।
तद्दोषदेशबलकालविकारसात्म्य-
मुद्दिश्यते तदनु पथ्यमथौषधञ्च ॥ ९० ॥

भिषग्भिर्वैद्यैरेतत्पूर्वोक्तमातुरं सुलङ्घितलिङ्गमङ्गे सम्यक् यथावद्-वधर्यावगम्य। बुद्ध्या प्रज्ञया विचार्य। कानि? तद्दोषदेशबलकाल-विकारसात्म्यानि। तस्यातुरस्य दोषाः वातादयः, । देश आनूपजांगल-साधारणाख्यः। बलं शरीरमोजःसंज्ञञ्च। कालं शिशिरादिकम् ॥ विकारा ज्वरादयः। सात्म्यं ऋत्वादिकम्। एतत्समस्तं विचार्य निरूप्य तदनु तदनन्तरञ्च पथ्यमौषधं च वक्ष्यमाणकमुद्दिश्यते। कस्मिन्सति? सुलङ्घितलिङ्गे। विण्मूत्रवातसरणे, विट् च मूत्रं च वातश्च विण्मूत्रवाताः, तेषां सरणे गमने अनिबद्धे। विट् पुरीषम्। तनु शरीरम्। तस्य लाघवे लघुत्वे। तन्द्राक्लमे च विरते। तन्द्रा निद्राविशेषः। क्लमो मूर्च्छाविशेषः। तन्द्रा च क्लमश्च तन्द्राक्लमम्। तस्मिन् विरते विगते। वपुषः शरीरस्य पटुत्वे निर्विकारत्वे। उद्गारवक्त्रविवरोदरहृद्विशुद्धौ, उद्गारश्च वक्त्र-विवरं च उदरं च हृच्च उद्गारवक्त्रविवरोदरहृदि तेषां विशुद्धौ अवि-कृतत्वे। स्वेदोद्गमे प्रस्वेदे सति। अशनाभिलाषे च भोजनकाङ्क्षायां च इत्येतदातुरं सुलङ्घितलिङ्गमिति ॥ ८९-९० ॥

पुरीष, मूत्र तथा अधोवात का प्रवृत्त होना, शरीर में लघुता, तन्द्रा एवं ग्लानि का अभाव, शरीर का स्वस्थ होना, उद्गारशुद्धि, मुखवैरस्य का न होना, उदरशुद्धि तथा हृदयस्थल पर गौरव का न होना, पसीना आना एवं भोजन में रुचि होना इत्यादि लक्षणों से जानना चाहिये कि लङ्घन सम्यक्तया होगया है। लङ्घन होजाने पर तथा च दोष, देश, बल, काल, विकार तथा सात्म्य आदि का निरूपण करके पथ्य और औषध का प्रयोग करना चाहिये ॥ ८९—९० ॥

पूर्वमुक्तमुद्दिश्यते तदनु पथ्यमिति। तच्च पथ्यमोदनमांसरस-शाकादिकमनेकप्रकारमाह—

पथ्यैः पुराणसितषष्टिकरक्तशालि-
मृद्वोदनैः सघृतमुद्गमसूरसूपैः।
गोधूममण्डकयुतैर्यवसक्तुभिश्च
साजाजिसैन्धवघृतैरथतक्रयुक्तैः॥ ९१॥
लावैणतित्तिरिकपिञ्जलकेकिकूर्म-
गोधाशशक्रकरमांसरसैः समांसैः।
सस्वादुदाडिमरसैः पिशित*प्रलेहै-
र्दुग्धैः शृतैरपि च शर्करया समेतैः॥ ९२॥
शाकैः कलायलघुमूलकतन्दुलीय-
चिल्लीपटोलदलवास्तुककासमर्दैः।
वार्त्ताकपुष्पफलशाककृतैः प्रकारै-
रेभिः कृतैरिति नृणां न भवन्ति रोगाः॥ ९३॥

एभिः पूर्वोक्तैः प्रकारैः कृतैर्नृणां रोगा न भवन्ति। सितषष्टिकश्च रक्तशालिश्च सितषष्टिकरक्तशाली। पुराणौ च तौ सितषष्टिकरक्तशाली च पुराणसितषष्टिकरक्तशाली, तयोर्मृद्वोदनानि पुराणसितरक्तशालि-मृद्वोदनानि तैः। मुद्गश्च मसूरश्च मुद्गमसूरौ तयोः सूपैर्मुद्गमसूरसूपैः। घृतं च मुद्गमसूरसूपौ च घृतमुद्गमसूरसूपौ, ताभ्यां सह वर्त्तते यान्योदनानि तानि सघृतमुद्गमसूरसूपानि, तैः। गोधूममण्डकयुतैः गोधूमानां मण्डकाः गोधूममण्डकाः, तैर्युतानि पथ्यानि। अतस्तैर्गोधूममण्डकयुतैः, यवसक्तुभिश्च पथ्यैः। सजाजिसैन्धवघृतैः। अजाजी जीरकम्। सैन्धवं

* स्थूलानि मांसखण्डानि क्षालितानि च वारिणा। तप्तस्नेहे विनिक्षिप्य दर्व्या सञ्चालयन् पचेत्॥ ततस्तत्र विनिक्षिप्य लवणं जलमल्पकम्। पचेत्पटपटाशब्दं तस्मिन्मांसे प्रकुर्वति। प्रक्षिपेद्दाडिमीनीरं बहु तेन पचेत्पुनः॥ मांसपिण्डेषु सिद्धेषु देया शुण्ठी सजीरका। तत उत्तार्य तन्मांसं पृथक् कुर्यात्प्रलेहतः॥ प्रलेहं वाससा पूतं स्थापयेदन्यभाजने। हिङ्गुना घृतयुक्तेन धूपं तत्रैव दापयेत्॥ इति क्षेमकुतूहले।

माणिमन्थम्। घृतं गव्यम्। सह तैर्वर्त्तन्ते यानि पथ्यानि तानि साजाजिसैन्धवघृतानि तैः। अथ तक्रयुक्तैः। तक्रं मथितं तेन युक्तैः। लावादिभिर्मांसरसैश्च। लावश्च एणश्च। एणः कृष्णहरिणः। तित्तिरिश्च कृष्ण तित्तिरिः। कपिंजलश्च। कपिञ्जलो गौरतित्तिरिः। केकी च। केकी मयूरः। कूर्मश्च। कूर्मः कच्छपः। गोधाश्च क्रकरश्च शशश्च। क्रकरो वान्तकः कपिञ्जलात् पृथुः। लावैणतित्तिरिकपिञ्जलकेकिकूर्मगोधाशशक्रकराः। तेषां मांसानि तैः रसाः तैः। समांसैः मांससहितैः। पिशितं मांसं तेन प्रलेहाः तैः। सस्वादुदाडिमरसैः प्रलेहैर्मांसरसैश्च। स्वादुदाडिमं मधुरदाडिमं तस्य रसः स्वादुदाडिमरसः, सह स्वादुदाडिमरसेन वर्त्तन्ते प्रलेहाः मांसरसाश्च तैः। दुग्धैश्च क्षीरैः शृतैः क्वथितैः। शर्करया समेतैः दुग्धैरेव शाकैश्च कलायादिभिः। कलायश्च लघुमूलकं च। लघुमूलकं मूलकपोतिका। तन्दुलीयश्च चिल्ली च। चिल्ली क्षेत्रवास्तुकः। पटोलं च दलं च। पत्रं पटोलस्यैव। वास्तुकश्च कासमर्दश्च कलायलघुमूलमूलकतन्दुलीयचिल्लीपटोलदलवास्तुककासमर्दाः तैः। वार्ताकं भण्टकः। पुष्पफलं कूष्माण्डम्। तदाख्यानि शाकानि तैः कृता ये प्रकाराः। एभिः सर्वैरेवौदनादिभिः पथ्यैः कृतैराचरितैः रोगा न भवन्ति इति॥ ९१—९३॥

पुराने श्वेत साठी के चावल तथा पुराने लाल शालि का मृदु ओदन, घृत, मूंग तथा मसूर की दाल, गेहूँ का मण्ड, जौ के सत्तू, जीरा, घी एवं सैन्धानमक से संस्कृत भोजन, छाछ, लाव, हरिण, तीतर, कपिञ्जल (गोरैया), मोर, कछुआ, गोधा (गोह) शशक, क्रकर (पक्षीविशेष) इनका मांस तथा मांसरस, अनार के रस से संस्कृत प्रलेह, खांडयुक्त उबाला हुआ दूध, एवं मटर, बालमूलक (कच्चीमूली), चौलाई, चिल्ली (बथुआ), पटोलपत्र, जंगली बथुआ, कसौंदी, बैंगन तथा कूष्माण्ड (पेठा); इनका शाक पथ्य है। इस प्रकार पथ्य का सेवन करते हुए पुरुष को रोग नहीं सताते॥ ९१—९३॥

साम्प्रतं एतत्पूर्वोक्तं पथ्यं सामान्येनोक्तं सर्वविकारिणां। यद्यस्य यौगिकं तत्तस्मै प्रदेयमित्याह—

यद्यस्य यौगिकमिति प्रविकल्प्य पथ्यं<br>
तस्मै तदेव भिषजामयिने प्रदेयम्।

इत्यातुरस्य निरुजोऽथ जनस्य नित्य-
मन्नान्यथौषधमुपाचरतो न रोगाः ॥ ९४ ॥

यत्पथ्यं पूर्वोक्तानां मध्यात् यस्यातुरस्य यौगिकं युक्त्या बुध्यते। इत्येतत् प्रविकल्प्य तस्मै आमयिने विकारिणे तदेव भिषजा प्रदेयं प्रदातव्यम्। इत्यातुरस्य विकारिणो जनस्य लोकस्य निरुजो निर्गतविकारस्य नित्यं सर्वदा अन्नानि पूर्वोक्तानि पथ्यानि। औषधं च पूर्वोक्तं वक्ष्यमाणकञ्च। उपाचरतः उपयोगं कुर्वतः रोगाः न भवन्तीति ॥ ९४ ॥

वैद्य को चाहिये कि वह जिस रोगी के लिये जो पथ्य उचित हो उसको वही पथ्य सेवन करावे। इस प्रकार रोगी और स्वस्थ पुरुष प्रतिदिन उचित पथ्य सेवन करते हुए रोगों से मुक्त रह सकते हैं ॥ ९४ ॥

पूर्वमुक्तं प्रतिज्वरादिप्रविभक्तभेषजैरन्या क्रिया वक्ष्यते। तेषां च ज्वरादीनां येन क्रमेण चिकित्सितमुच्यते तदुद्देशार्थमाह—

ज्वरातिसारग्रहणीविकारिणां
ततोऽर्शसां चापि भगन्दरावताम्।
सशोफरोगोदरगुल्मरोगिणां
सविद्रधीनां गलगण्डमालिनाम् ॥ ९५ ॥
विस्फोटकश्लीपदवातरक्तिनां
विसर्पकुष्ठामयिनां किलासिनाम्।
प्रमेहिणां पाण्डुविकारिणां नृणां
सश्वासकासामयरक्तपित्तिनाम् ॥ ९६ ॥
सतृड्वमीहिक्किषु शूलरोगिषु
प्रोक्तं ह्युदावर्त्तिषु मूत्रकृच्छ्रिषु।
सराजयक्ष्मक्रिमिषु प्रकीर्त्तितं
चिकित्सितं कायचिकित्सितं मया ॥ ९७ ॥

मया कायचिकित्सिते चिकित्सितं ज्वरादीनां प्रकीर्त्तितम्। ज्वरश्च अतीसारश्च ग्रहणीविकारश्च ज्वरातिसारग्रहणीविकाराः।

ते ज्वरातीसारग्रहणीविकाराः सन्ति येषां ते तथा तेषाम् । ततोऽनन्तरमर्शसाम् । अर्शसोऽनन्तरं भगन्दरावतां च । शोफरोगश्च उदरं च गुल्मरोगिणश्च ते तथा । सह शोफादिभिर्वर्त्तन्ते ये ज्वरादयः तेषां स विद्रधीनाम् । तेषामनन्तरं गलगण्डमालिनाम् । गलगण्डश्च गण्डमाला च गलगण्डमाले ते विद्यते येषां ते गलगण्डमालिनः तेषाम् । एकस्य गण्डशब्दस्य लोपो द्रष्टव्यः । दृश्यन्ते च तन्त्रेषु आदिमध्यान्तलोपाः । तदनु विस्फोटकाश्च श्लीपदानि च वातरक्तं च तानि विद्यन्ते येषाम् ते तथा तेषाम् । विसर्पश्च कुष्ठामयश्च विसर्पकुष्ठामयौ तौ विद्येते येषां ते विसर्पकुष्ठामयिनः तेषाम् । ततोऽनु किलासिनां श्वित्रिणामित्यर्थः । ततोऽनन्तरं प्रमेहिणां पाण्डुविकारिणां नृणाम् । सश्वासकासामयरक्तपित्तिनाम् । श्वासश्च कासामयश्च श्वासकासामयौ । रक्तपित्तं विद्यते येषां ते रक्तपित्तिनः । सह श्वासकासामयाभ्यां रक्तपित्तिनः, सश्वासकासामयरक्तपित्तिनः तेषाम् । तृट् तृष्णा । वमी छर्दिः, हिक्का हिध्मा एतानि विद्यन्ते येषां ते तृड्वमीहिक्किनः । सह तृड्वमीहिक्किभिर्वर्त्तन्ते इति, सतृड्वमीहिक्किनः । के ते ? शूलरोगिणः तेषु सतृड्वमीहिक्किषु शूलरोगिषु । उदावर्त्तिषु च मूत्रकृच्छ्रिषु च । सराजयक्ष्मकृमिषु पूर्वोक्तेषु । एषां सर्वेषां प्रोक्तं चिकित्सितम् । कायचिकित्सितं मयेति ॥ ९५-९७ ॥

चिकित्साकलिका के कायचिकित्साविभाग में ज्वर, अतीसार, संग्रहणी, अर्श, भगन्दर, शोफरोग, उदररोग, गुल्म, विद्रधि, गलगण्ड, गण्डमाला, विस्फोटक, श्लीपद, वातरक्त, विसर्प, कुष्ठ, किलास, ( श्वित्र ) प्रमेह, पाण्डु, श्वास, कास, रक्तपित्त, तृष्णा, छर्दि, हिक्का, शूल, उदावर्त्त, मूत्रकृच्छ्र, राजयक्ष्मा तथा क्रिमिरोग से पीडितों की यथाक्रम चिकित्सा कही गई है ॥ ९५—९७ ॥

कायचिकित्सितानन्तरं शालाक्यादीनामुद्देशमाह—

शालाक्यशल्यामयभूतविद्या-
कौमारतन्त्रं विषतन्त्रमुक्तम् ।
रसायनं तन्त्रमनन्तरञ्च
वाजीकरं तन्त्रमपि प्रदिष्टम् ॥ ९८ ॥

कायचिकित्सानन्तरं शालाक्यम् । तदनन्तरं शल्यामयम् । तदनन्तरं भूतविद्या । ततः कौमारतन्त्रम् । तन्त्रशब्दस्यान्ते परिपठि-

तत्वात् शालाक्यादिभिः प्रत्येकमभिसम्बन्धः । अनन्तरं विषतन्त्र-मुक्तम् । तदनु रसायनतन्त्रम् । अनन्तरं च वाजीकरणतन्त्रं प्रदिष्ट-मुद्दिष्टमिति ॥ ९८ ॥

कायचिकित्सा के पश्चात् शालाक्यतन्त्र, शल्यतन्त्र, भूतविद्या, कौमारतन्त्र, अगदतन्त्र, रसायनतन्त्र और वाजीकरण तन्त्र का क्रमशः वर्णन है ॥ ९८ ॥

## ज्वरचिकित्सा।

एवं क्रमेणोद्दिश्य ज्वरादीन् यथोद्देशं ज्वरस्य चिकित्सितमाह—

सालस्यमस्वेदमरोचकार्त्त-
मुन्निद्रमानद्धमनिद्धवह्निम् ।
साङ्गव्यथं साममिति ज्वरार्त्त-
मभोजनैरुष्णजलैश्चिकित्सेत् ॥ ९९ ॥

इत्येभिः ज्वरार्त्तं सामं ज्ञात्वा अभोजनैरुपवासैः उष्णजलैः उष्णोदकपानैश्चिकित्सेदिति । सालस्यं, सह आलस्येन वर्त्तत इति सालस्यः तम् । अस्वेदं, स्वेदो न विद्यते यस्य तमस्वेदम् । अरोचकार्त्तं अरुचिपीडितम् । उन्निद्रं उद्गतनिद्रम् । आनद्धं ततोदरम् । अनिद्धवह्निं अदीप्ताग्निम । साङ्गव्यथं शरीरपीडार्तम् । इत्येवं सामं ज्ञात्वा वैद्य उपवासैरुष्णोदकपानैश्चिकित्सां कुर्यादिति ॥ ९९ ॥

आलस्य, अस्वेद (पसीना न आना), अरुचि, नींद न आना, आनाह, मन्दाग्नि, अंगों में वेदना इत्यादि लक्षणों के रहते हुए एवं दोष और रस की सामावस्था में ज्वर से पीडित रोगी की उपवास तथा पानार्थ गर्मजल द्वारा चिकित्सा करें ॥ ९९ ॥

पूर्वमुष्णजलैश्चिकित्सेदित्युक्तं सामान्येन साम्प्रतं अवस्था-विशेषेण विशिष्टद्रव्यसंस्कृतं शीतमुदकमाह—

तृट्छर्दिदाहमुखशोषसमन्वितः स्या-
देभिः षडङ्गगणसंगसुगन्धिभिस्तम् ।
लामज्जपर्पटकपद्मकचन्दनाब्द-
ह्रीवेरवारिभिरनुष्णतमैश्चिकित्सेत् ॥ १०० ॥

ज्वरार्त्तमित्यनुवर्त्तते । यदि तृडादिभिः संयुक्तः स्यात् भवेत् । तदा तं ज्वरार्त्तं आतुरं षडङ्गगणसंगसुगन्धिभिश्चिकित्सेत् । षड् अङ्गानि

यस्य स षडङ्गः। षडङ्गश्चासौ गणश्च षडङ्गगणः। तस्य संगः प्रयुक्तता। तेन सुगन्धीनि तैः। लामज्जपर्पटकपद्मकचन्दनाब्दह्रीवेरवारिभिः। लामज्जमुशीरभेदः। पर्पटकं रेणुः। पद्मको मलयश्चारुः। चन्दनं रक्तचन्दनम् अब्दं मुस्तम्। ह्रीवेरं बालकम्। एभिः संस्कृतानि यानि वारीणि तैः अनुष्णतमैः। न उष्णानि अनुष्णानि। बहूनां मध्ये अतिशयेनानुष्णतमानि तैः अतिशयेन शीतैः। चिकित्सेदुपक्रमेत्। अत्र चोदकव्यवस्था सर्वेषां पलेनाढकमुदकस्य प्रक्वाथ्य अर्धावशेषं शीतं प्रयोज्यम्। तथा च तन्त्रान्तरम्—'यदप्सु शृतशीतासु षडङ्गादि प्रयुज्यते। कर्षमात्रं ततो दत्त्वा क्वाथयेत्प्रास्थिकेऽम्भसि॥ अर्द्धशृतं प्रयोक्तव्यं पाने पेयादिसंविधौ॥' इति॥ १००॥

यदि रोगी में तृषा (प्यास) छर्दि (कै) दाह, मुखशोष आदि लक्षण विद्यमान् हों तो लामज्जक (खवी), पित्तपापड़ा, पद्माख, लालचन्दन, मोथा, गन्धबाला; इस षडंगगण द्वारा सिद्ध सुगन्धित शीत जल द्वारा उसकी चिकित्सा करें। इसके सिद्ध करने का नियम यह है—कि क्वाथ्य द्रव्यों को समपरिमाण में एकत्र २ तोला लेकर २ प्रस्थ जल में सिद्ध करें। जब जल आधा शेष रह जाय तब उतार कर वस्त्र से छान लें। उपर्युक्त लक्षणों से युक्त रोगी को जब २ प्यास लगे तब २ यही षडंगपानीय दें॥ १००॥

पूर्वमुक्तं अभोजनैश्चिकित्सेत्। तच्चाभोजनं कियन्तं कालं यावदित्याह—

बलाविरोधेनकृतापतर्पण-
स्ततो दिनस्यापगमे बुभुक्षितः।
गतामदोषः पवनादिजज्वरी
विधिं विदध्यादिति पथ्यभेषजम्॥ १०१॥

वातादिजज्वरी विधिं विदध्यात्। कृतापतर्पणः, कृतं अपतर्पणं लङ्घनं येन स कृतापतर्पणः। केन प्रकारेण? बलाविरोधेन। बलं प्राणः। प्राणाविरोधेनानतिक्रमेण। तथा च चरकः—'प्राणाविरोधिना चैनं लङ्घनेनोपपादयेत्' इति। ततोऽनन्तरं दिनस्य अपगमे दिवसे गते। बुभुक्षितः क्षुत्संयुक्तः सुलङ्घितः। गतामदोषः, गता आमा दोषाः यस्य स गतामदोषः। कोऽसौ? पवनादिजज्वरी। इति विधिं विधानं वक्ष्यमाणं पथ्यं भोजनं भेषजमौषधं विदध्यात् कुर्यादिति॥ १०१॥

ज्वर का रोगी जब अपने बल के अनुसार उपवास कर चुका हो और दोष की सामता नष्ट होगई हो तब बुभुक्षित ( जिसे भूख लगी हो ) रोगी सायंकाल से पथ्य और औषध के क्रम को प्रारम्भ करे ॥ १०१ ॥

पूर्वं विधिं विदध्यादिति पथ्यं भेषजं चेत्युक्तम् । लङ्घनानन्तरं यवाग्वादिपथ्यक्रममाह—

सजीरकुस्तुम्बुरुकण्टकारिका-
त्रिकण्टकैः षष्टिकतण्डुलैः कृताम् ।
पिबेद् यवागूमथवा दुरालभा-
निदिग्धिकाम्भःशृतशालितण्डुलाम् ॥ १०२ ॥

षष्टिकतण्डुलैः कृतां पिबेत् यवागूम् । सजीरकुस्तुम्बुरुकण्टकारिकात्रिकण्टकैः शृतामिति । जीरकमजाजी । कुस्तुम्बुरु धान्यकम् । कण्टकारिका निदिग्धिका । त्रिकण्टकं गोक्षुरकम् । सह जीरकादिभिर्वर्त्तन्ते इति सजीरकुस्तुम्बुरुकण्टकारिकात्रिकण्टकास्तैः शृतैः षष्टिकतण्डुलैः कृताम् । संस्कारकरणं च विदेहोक्तपरिभाषया । "सर्वेषां तु पलं चैकं हिङ्गुमाषकसंयुतम् । सुधौतं जर्जरीकृत्य तोयाढकसमन्वितम् ॥ पिबेदर्द्धावशेषं तु मन्दाग्नौ पिठरे नवे । तण्डुलानां पलान्यष्टौ तस्मिन्पूते समावपेत् । मण्डपेयाविलपीनामोदनस्य च साधनम् । खडयूषयवागूनामितराणां च कीर्त्तितमिति" । अनया परिभाषया सर्वत्र मण्डपेयायवाग्वादीनां साधनं कर्त्तव्यमिति ॥ अथवा द्वितीययवागूमाह । दुरालभानिदिग्धिकाभ्यां संस्कृतं यदम्भस्तेन शृतास्तण्डुला यस्यां यवाग्वां सा तथा तां पिबेत् ॥ १०२ ॥

श्वेतजीरा, धनियां, छोटीकटेरी, गोखरु; इनके क्काथ में सांठी के चावलों से सिद्ध यवागू अथवा दुरालभा और छोटी कटेरी के क्काथ में सिद्ध शालिचावलों की यवागू को रोगी खावे ॥ विदेह के अनुसार यवागू का साधन इस प्रकार किया जाता है कि एक नवीन मट्टी के पात्र में क्काथ्य द्रव्य समपरिमाण में मिश्रित कर १ पल, हींग १ मासा, इन्हें क्काथार्थ २ आढक ( १२८ पल ) जल मे पाक करें । जब जल १ आढक शेष रहजाय तव उतार कर वस्त्र से छान लें । तदनन्तर उसमें ८ पल चावलों का चूर्ण डालकर पाक करें । यद्यपि इसमें १ मासा हींग डालना लिखा है परन्तु आजकल ४ रत्ती मात्रा में देना ही उपयुक्त होगा । रोगी अपनी भूख के अनुसार ही यवागू पीवे ॥ १०२ ॥

साम्प्रतं कफज्वरस्य विशेषेण पथ्यमाह—

सशीतनिद्रारुचिगौरवाधिकं
कफज्वरं मुद्गदलोदकोदनैः।
सतृड्वमीदाहमनल्पपित्तजं
जयेत्सितामाक्षिकलाजसक्तुभिः ॥ १०३ ॥

कफज्वरं जयेत्। कीदृग्गुणविशिष्टम्? सशीतनिद्रारुचिगौरवाधिकम्। सह शीतेन निद्रा सशीतनिद्रा। सशीतनिद्रा च अरुचिश्च गौरवं च सशीतनिद्रारुचिगौरवाणि। तान्यधिकानि यस्मिन् कफज्वरे स तथा तं जयेत्। कैः? मुद्गदलैः संस्कृतमुदकं मुद्गदलोदकं तेन सह ओदनानि मुद्गदलोदकोदनानि तैर्जयेदिति। अनल्पपित्तजं बहुपित्तजम्। सतृड्वमीदाहम्। तृट् च वमी च दाहश्च तृड्वमीदाहाः। सह तैर्वर्त्तते इति सतृड्वमीदाहः। तं च सितामाक्षिकलाजसक्तुभिर्जयेत्॥ सिता शर्करा। माक्षिकं मधु। लाजसक्तवः रक्तशालिषष्टिककलमानां भृष्टानां शुक्लश्लक्ष्णचूर्णानीति ॥ १०३ ॥

शीत, निद्रा, अरुचि तथा शरीर का भारीपन; इन लक्षणों से युक्त कफप्रधान ज्वर में मूंग की दाल के पानी और ओदन तथा च प्यास, कै तथा दाह आदि लक्षणों से युक्त पित्तप्रधान ज्वर में सिता (खांड), माक्षिक (शहद) एवं लाजा के सत्तू पथ्य हैं ॥ १०३ ॥

साम्प्रतं निरामस्य वातज्वरस्य मांसरसमाह—

सलावसारंगमयूरतित्तिरि-
प्रकल्पितैर्मांसरसैः सदाडिमैः।
सरुक्प्रकम्पं पवनप्रकोपजं
प्रणाशयेत्प्राणभृतामिति ज्वरम् ॥ १०४ ॥

पवनप्रकोपजं ज्वरं प्रणाशयेत्। केषां? प्राणभृतां प्राणिनामिति। एषां लावादीनां मांसरसैः। लावो विष्किरविशेषः। सारङ्गो हरिणजातिः। मयूरो बर्हिः। तित्तिरिः प्रसिद्धः। लावादिभिः प्रकल्पिता ये मांसरसाः सदाडिमाः तैः। सरुक्प्रकम्पं, रुक् च प्रकम्पश्च रुक्प्रकम्पौ

सह ताभ्यां वर्त्तत इति सरुक्प्रकम्पः, तं सरुक्प्रकम्पम्। पवनप्रकोपजं वातप्रकोपजं ज्वरं प्रणाशयेत् विनाशयेदिति। मांसरसश्च विदेहोक्तया कल्पनया साध्यते। "स्नेहाच्चतुर्गुणं मांसं मांसादष्टगुणं द्रवम्। सौरभं स्नेहपादेन तत्तुल्यं लवणं स्मृतम्। स्नेहार्द्धेनार्द्रकं दद्यात् कल्पितं लवणीकृतम्। स्नेहात् पादार्द्धमानेन योजयेत्कासमर्द्दकम्॥ धूपने तु ततोऽर्द्धेन तत्पादेन तु रामठम्। कुर्यात् स्नेहसमं सूदः फलाम्लं पाकसंविधौ॥ पेयायूषरसादीनां प्रमाणं यत्र नोदितम्। तत्रेयं कीर्त्तिता मात्रा बलेनामिततेजसेति॥ १०४॥

लावा, कृष्णहरिण, मोर, तीतर; इनमें से किसी एक के मांस से सिद्ध तथा अनार के रस से युक्त यूष के सेवन द्वारा वेदना तथा कम्प युक्त वातिक ज्वर को नष्ट करना चाहिये॥ यदि १ पल मांस का यूष बनाना हो तो १६ पल जल डालकर पाक करें। जब ४ पल शेष रह जाय तब छानलें। इसमें मांस के साथ ही उपयुक्त मात्रा में अनारदाना डाल देना चाहिये॥ १०४॥

इदानीं कृतपेयाक्रमस्य ज्वरस्योपशमार्थं दशरात्रादूर्ध्वं पाचनशमनान् योगानाह—

ततश्च विश्वाब्ददुरालभामृताः
किरातदुःस्पर्शपयोदपर्पटाः।
वृषाब्दविश्वौषधधन्वयासकाः
समीरणादिज्वरनाशनाः स्मृताः॥ १०५॥

ततश्च पथ्यादिक्रमानन्तरं समीरणादिज्वरनाशनाय यथासंख्येन विश्वादयस्त्रयो योगाः स्मृताः पूर्वाचार्यैः। विश्वादीनामितरेतरद्वन्द्वः। विश्वं शुण्ठी। अब्दं मुस्तम्। दुरालभा दुःस्पर्शा। अमृता गुडूची। वातजे ज्वरे। किरातं किराततिक्तम्। दुःस्पर्शा धन्वयासकः। पयोदं मुस्तम्। पर्पटः कल्याणकः। पित्तजे ज्वरे। वृषो वासकः। अब्दं मुस्तम्। विश्वौषधं शुण्ठी। धन्वयासको दुरालभा। श्लेष्मजे ज्वर इति॥१०५॥

---

१—हिङ्ग्वार्द्रमरिचं जीरं हरिद्रा धान्यकं तथा। क्रमेण वर्द्धितं सर्वं वेसवारमिदं शुभम्॥ स्तोकेन वारिणा सर्वं वण्टितं वस्त्रगालितम्। मात्रया व्यञ्जने देयं कासमर्दं च तत्स्मृतम्। इति क्षेमकुतूहले। हिङ्ग्वार्द्रकमरिचजीरकहरिद्राधन्याकाः क्रमेण द्विगुणपरिमाणेनैकत्रीकृता वेसवार इति पाकराजेश्वरे पाकपरिभाषा॥

१–सोंठ, मोथा, दुरालभा, गिलोय। २–चिरायता, दुरालभा, मोथा, पित्त-पापड़ा। ३–अडूसाछाल, सोंठ, धन्वयासक (दुरालभा, धमासा)। ये तीनों क्वाथ-योग क्रमशः वातज, पित्तज एवं कफज ज्वर के नाशक हैं ॥ १०५ ॥

इदानीं सर्वज्वराणां सामान्येन विश्वादिकं योगमाह—

विश्वामृतावासककण्टकारिका-
पलं पलैः षोडशभिर्जलस्य।
क्वाथीकृतं तच्चरणावशेषितं
सपिप्पलीचूर्णमिदं ज्वरापहम् ॥ १०६ ॥

इदं विश्वादीनां पलं ज्वरापहम्। चतुर्णां विश्वादीनां प्रत्येकं कार्षिकैर्भागैः पलं षोडशभिर्जलस्य उदकस्य पलैः क्वाथं कृत्वा तच्चरणावशेषितं पादावशेषं चत्वारि पलानि क्वाथस्य। सपिप्पलीचूर्णं, सह पिप्पल्याः चूर्णकर्षेण युक्तमिदं ज्वरापहं भवति। ज्वरं सामान्यश्रुत्या सर्ववातादिज्वरमपहन्तीति। इयमेव प्रासङ्गतन्त्रयुक्त्या अन्येषामपि पातव्यकषायाणां अनुक्तद्रव्योदकावशेषप्रमाणानां परिभाषाङ्गीक्रियते। तेन समस्तद्रव्याणां पलं प्रस्थेन तोयस्य प्रक्वाथ्य पादावशेषा अञ्जलिः पातव्येति। तथा च तन्त्रान्तरम्—'पयो भागादिके क्वाथः पेयश्च स्याच्चतुःपलम्। शीतस्वरसयोरेष विधिर्ज्ञेयः कषाययोः॥ भेषजात् षोडशगुणे जले क्वाथ्यं पलं मतम्। पादशेषं पिबेत्तद्धि स्नेहक्वाथोऽन्यथा भवेदिति' ॥ १०६ ॥

सोंठ, गिलोय, अडूसाछाल, छोटीकटेरी; मिलित १ पल। क्वाथार्थ जल १६ पल। इन्हें एकत्र एक नवीन मृत्पात्र में डाल कर पकावें। जब ४ पल जल शेष रह जाय तब उतार कर छान लें और यथानियम क्वाथ्य द्रव्यों से चतुर्थांश पिप्पली-चूर्ण का प्रक्षेप देकर रोगी को सेवन करावें। आजकल के अनुसार यह मात्रा बहुत अधिक है। आजकल "गृहीत्वा दशरक्तिक-माषाष्ट-तोलकद्वयम्। दत्त्वा षोडशिकं वारि ग्राह्यं पादावशेषितम्।" इस परिभाषा के अनुसार क्वाथ किया जाता है। जिसका भावार्थ यह है कि १० रत्ती=१ मासा, ८ मासा=१ तोला; इस मान के अनुसार २ तोला क्वाथ्य द्रव्य को १६ गुने अर्थात् ३२ तोले जल में डाल कर पकावें। जब जल चतुर्थांश अर्थात् ८ तोले रहजाय तो उतारकर निर्मल वस्त्र से छानलें। प्रक्षेप के नियम के अनुसार पिप्पलीचूर्ण का प्रक्षेप आधा तोला आता है परन्तु इस के तीक्ष्णवीर्य होने के कारण २ रत्ती मात्रा में ही प्रक्षेप देना उपयुक्त होगा। यह क्वाथ ज्वरनाशक है ॥ १०६ ॥

साम्प्रतं वातश्लेष्मज्वरापहमारोग्यपञ्चककषायमाह—

तिक्ताभयाग्रन्थिकराजवृक्षैः
सवारिदैरुत्क्वथितः कषायः।
पीतः सशूलाममरुद्बलास-
ज्वरापहः पाचनदीपनश्च ॥ १०७ ॥

तिक्तादिभिः क्वथितः कषायः पीतः सन् ज्वरापहो भवति। तिक्ता कटुका। अभया हरीतकी। ग्रन्थिकं पिप्पलीमूलम्। राजवृक्षः किरमालकः तस्य शिम्बिः तैः। सवारिदैः समुस्तैः उत्क्वथितः क्वाथीकृतः। पीतः पानविधिना। सशूलाममरुद्बलासज्वरापहः। मरुद् वायुः। बलासः श्लेष्मा, मरुच्च बलासश्च मरुद्बलासौ। आमश्च तौ मरुद्बलासौ च आममरुद्बलासौ ताभ्यां ज्वरः। सशूलश्चासौ आममरुद्बलासज्वरश्च स तथा। तमपहन्तीति सशूलाममरुद्बलासज्वरापहः। पाचनो दोषाणां दीपनश्चाग्नेरिति ॥ १०७ ॥

कुटकी, हरड़, पिप्पलीमूल, अमलतास, मोथा; इनके क्वाथ को उपर्युक्त विधान के अनुसार सिद्ध करके रोगी को सेवन कराया जाय तो शूल तथा आमयुक्त वातकफज ज्वर नष्ट होता है। यह क्वाथ पाचन तथा अग्निप्रदीपक है। इसमें अमलतास को छोड़ कर शेष का क्वाथ करें और पीछे से अमलतास के गूदे को मसल दें तो उत्तम होगा। अन्यत्र क्वाथ योगों में भी इसी प्रकार जानना चाहिये ॥१०७॥

इदानीं कृष्णादिकं व्याघ्र्यादिकं च ज्वरापहं योगद्वयमाह—

कृष्णाग्निपथ्यामलकैः कषायः
कृतः समस्तज्वरहाग्निहेतुः।
व्याघ्रीगुडूचीवृषजोऽथ कास-
श्वासज्वरघ्नश्च सपिप्पलीकः ॥ १०८ ॥

कृष्णादिभिः कृतः कषायः समस्तज्वरहा भवति। कृष्णा पिप्पली। अग्निश्चित्रकः। पथ्या हरीतकी। आमलकं धात्रीफलम्। समस्तान् वातादिज्वरानपहन्तीति समस्तज्वरहा। अग्निहेतुर्जाठराग्निकारणम्। व्याघ्र्यादिभिश्च। व्याघ्री कण्टकारिका। सपिप्पलीकः सपिप्पलीचूर्णः। कासश्वासज्वरघ्नः। कासश्च श्वासश्च कासश्वासौ ताभ्यां सहितो ज्वरः, तं हन्तीति कासश्वासज्वरघ्न इति ॥ १०८ ॥

पिप्पली, चित्रक, हरड़, आंवला; इनका क्वाथ सम्पूर्ण ज्वरों को नष्ट करता है तथा अग्निदीपक है। छोटी कटेरी, गिलोय तथा अडूसे के क्वाथ में पिप्पली चूर्ण का प्रक्षेप देकर रोगी को सेवन कराने से कास (खांसी) और श्वास युक्त ज्वर नष्ट होता है ॥ १०८ ॥

साम्प्रतं अनन्तादिकं योगमाह—

दुरालभाबालकतिक्तरोहिणी-
पयोदविश्वौषधकल्कितं जलम्।
प्रपीतमुष्णं सकलज्वरापहं
प्रवर्द्धनं जाठरजातवेदसः ॥ १०९ ॥

दुरालभादिकल्कीकृतमुष्णं जलं पीतं सकलज्वरापहं भवति। दुरालभा अनन्ता। वालकं जलम्। तिक्ता कटुका। पयोदं मुस्तम्। विश्वं शुण्ठी। एषां कर्षेणोदकपिष्टेन कल्कीकृतं जलमुष्णं सकलज्वरापहम्। जाठरजातवेदसः प्रवर्द्धनम्। जठरमुदरं तस्मिन् भवो जाठरः। स चासौ जातवेदा च जाठरजातवेदा तस्य प्रवर्द्धनं वृद्धिकरम्। जातवेदा अग्निः ॥ १०९ ॥

दुरालभा, गन्धवाला, कटुकी, मोथा, सोंठ, इन्हें एकत्र २ तोले परिमाण में लेकर ८ तोले गर्म जल में घोटकर छानलें। इस के सेवन से सम्पूर्ण ज्वर नष्ट होते हैं और जाठराग्नि प्रवृद्ध होती है। आज कल यह इससे आधी मात्रा में प्रयुक्त होता है ॥१०९॥

साम्प्रतं गुडूच्यादियोगमाह—

सकुण्डलीपद्मकरक्तचन्दनं
सनिम्बकुस्तुम्बुरु वारि यच्छृतम्।
पिबेन्मनाक्पित्तबलासजं ज्वरं
जयेत्सतृड्तापमरोचकान्वितम् ॥ ११० ॥

पुरुषः पित्तबलासजं ज्वरं जयेत्। यः कुण्डल्यादिद्रव्यसमेतं वारि शृतं पिबेत्। कुण्डली गुडूची। पद्मको मलयश्चारुः। रक्तचन्दनं हरिचन्दनम्। निम्बोऽरिष्टः। कुस्तुम्बुरु धान्यकम्। पित्तं च बलासश्च पित्तबलासौ ताभ्यां जातः पित्तबलासजः तम्। सतृट्तापं तृट् च तापश्च तृट्तापौ। सह तृट्तापाभ्यां वर्त्तत इति सतृट्तापस्तम्। अरोचकान्वितं अरोचकसमेतम्। ननु सुश्रुतेन सर्वज्वरघ्नत्वमुक्तं गुडूच्यादिकस्य।

"एष सर्वज्वरान् हन्ति गुडूच्यादिस्तु दीपनः । हृल्लासारोचकच्छर्दिपिपासा-दाहनाशनः" ॥ इति ॥ तत्कस्मात्तीसटाचार्येण पित्तश्लेष्मज्वरघ्नत्वमुक्तम् । अत्रोच्यते—सर्वज्वरघ्नत्वे सत्यपि विशेषतः पित्तश्लेष्मज्वरघ्नत्वमुक्तम् । कथितं विशेषेणावगतम् । हृल्लासारोचकवमीपिपासादाहनाशनोऽय-मिति ॥ ११० ॥

गिलोय, पद्माख, लाल चन्दन, नीम की छाल, धनियां; इनसे यथाविधि साधित क्वाथ के पीने से प्यास, ताप, अरुचि आदि लक्षणों से युक्त कफपित्तज ज्वर शान्त होता है ॥ ११० ॥

साम्प्रतं सन्निपातज्वरस्य योगद्वयमाह—

निम्बाब्ददारुकटुकात्रिफलाहरिद्रा-
क्षुद्रापटोलदलनिःक्वथितः कषायः ।
पेयस्त्रिदोषजनितज्वरनाशनाय
क्वाथः समं मगधया दशमूलजो वा ॥ १११ ॥

निम्बादिश्रृतः कषायस्त्रिदोषजनितज्वरनाशनाय पेयः पातव्यः । त्रिभिर्दोषैर्जनितः त्रिदोषजनितः । निम्बः पिचुमन्दः । अब्दो मुस्तम् । दारु देवदारु । कटुका तिक्ता । त्रिफला प्रसिद्धा । हरिद्रा गौरी । क्षुद्रा कण्टकारिका । स चासौ ज्वरश्च त्रिदोषजनितज्वरस्तस्य नाशाय विनाशार्थम् । पटोलदलं पटोलपत्रम् । एतैर्निःक्वथितः कषायः पेयः । दशमूलजो वा क्वाथः, सह मगधया पिप्पल्या सह त्रिदोषजनित-ज्वरनाशाय पेयः ॥ ननु च नानिःक्वथितः कषायः तत्कथं निःक्वथित-ग्रहणम् ? श्रृतकषायपरिग्रहार्थं शीतफाण्टादीनाञ्च निवृत्त्यर्थम् । निम्बादियोगोऽयं सुश्रुतोक्तस्तीसटाचार्येणोक्तः । तथा च सुश्रुतः—"हरिद्रा भद्रमुस्तं च त्रिफला कटुरोहिणी । पिचुमन्दः पटोलश्च देवदारु निदिग्धिका । एषां कषायः क्वथितः सन्निपातज्वरं जयेदिति ॥ १११ ॥

नीम की छाल, मोथा, देवदारु, कुटकी, त्रिफला, हल्दी, छोटी कटेरी, पटोलपत्र; इन से यथाविधि साधित क्वाथ अथवा दशमूल के क्वाथ में पिप्पली चूर्ण का प्रक्षेप देकर सन्निपातज ज्वर की शान्ति के लीये पीना चाहिये ॥ १११ ॥

इदानीं सततान्येद्युष्कतृतीयकचतुर्थकादीनां विषमज्वराणां चिकित्सितमाह—

पटोलयष्टीमधुतिक्तरोहिणी-
घनाभयाभिर्विषमज्वरापहः।
कृतः कषायस्त्रिफलामृतावृषैः
पृथक् पृथग्वा विषमज्वरापहः॥ ११२॥

पटोलादिभिः कृतः कषायो विषमज्वरापहः भवति। तिक्तरोहिणी कटुका। घनं मुस्तम्। अभया हरीतकी। द्वितीयस्त्रिफलामृतावृषैः कृतः कषायो विषमज्वरापहः। हरीतक्यामलकबिभीतकानि त्रिफला। अमृता गुडूची। वृषो वासकः। एभिरेवं पटोलादिभिः पृथक् पृथगेकैकशो वा कृताः कषाया विषमज्वरापहा भवन्ति। विषमत्वं च ज्वराणां अनियत कालशीतोष्णवेगकृतम्। तथा च ग्रन्थान्तरम्—'यस्मादनियतात्कालात् शीतोष्णाभ्यां तथैव च। वेगतश्चातिविषमो ज्वरः स विषमः स्मृत इति"॥ ११२॥

पटोलपत्र, मुलहठी; कुटकी, मोथा, हरड़; इनका क्वाथ अथवा त्रिफला, गिलोय, अडूसाछाल; इनका यथाविधि साधित क्वाथ विषमज्वर को नष्ट करता है॥ ११२॥

इदानीं तृतीयकस्य विशेषचिकित्सितमाह—

सनागरोशीरघनः सधान्यः
सपिप्पलीकश्च सचन्दनश्च।
तृतीयकं हन्ति कृतः कषायः
समाक्षिकश्चापि सशर्करश्च॥ ११३॥

नागरादिकृतः कषायस्तृतीयकं हन्ति। सनागरोशीरघनः, नागरं च उशीरं च घनं च तानि तथा तैः सह वर्त्तत इति सनागरोशीरघनः कषायः। नागरं शुण्ठी। उशीरं वीरणम्। घनं मुस्तम्। सधान्यः सधनीयकः। सपिप्पलीकश्च सचन्दनश्च। पिप्पलीरक्तचन्दनाभ्यां सह। समाक्षिकश्चापि सशर्करश्च। सनागरादिकृतः कषायः पीतो माक्षिकशर्कराकर्षयुक्तः तृतीयकं ज्वरं हन्ति॥ ११३॥

सोंठ, खस, मोथा, धनियां, पिप्पली, लालचन्दन; इनसे यथाविधि साधित क्वाथ में शहद तथा खांड का प्रक्षेप देकर पीने से तृतीयक ज्वर नष्ट होता है॥ ११३॥

साम्प्रतं चातुर्थकस्य विशेषचिकित्सितमाह—

पथ्यास्थिरानागरदेवदारु-
धात्रीवृषैरुत्क्वथितः कषायः ।
सितोपलामाक्षिकसंप्रयुक्त-
श्चातुर्थकं हन्त्यचिरेण पीतः ॥ ११४ ॥

पथ्यादिभिरुत्क्वथितः कषायश्चातुर्थकं हन्ति । पथ्या हरीतकी । स्थिरा शालिपर्णी । नागरं शुण्ठी । देवदारुः प्रसिद्धः । धात्री आमलकी । वृषो वासकः । सितोपलामाक्षिकसंप्रयुक्तः । सितोपला शर्करा, माक्षिकं मधु ताभ्यां कर्षेण संयुक्तः शीतः कषायः पीतोऽचिरेणैव कालेन हन्तीति ॥ ११४ ॥

हरड़, शालपर्णी (सरिवन), सोंठ, देवदारु, आंवला, अडूसाछाल; मिलित २ तोला। क्वाथार्थ जल ३२ तोला। शेष ८ तोला। इस क्वाथ में मिश्री तथा शहद; मिलित आधा तोला का प्रक्षेप देकर पीने से चातुर्थक ज्वर शीघ्र नष्ट होता है ॥ ११४ ॥

इदानीं सर्वेषामेव विषमज्वराणां पिप्पलीवर्द्धमानमाह—

त्रिभिरथ प्रवृद्धं पञ्चभिः सप्तभिर्वा
दशभिरथ विवृद्धं पिप्पलीवर्द्धमानम् ।
इति पिबति पुमान् यस्तस्य न श्वासकास-
ज्वरजठरगदार्शोवातरक्तक्षयाः स्युः ॥ ११५ ॥

यः पुमान् पिप्पलीवर्द्धमानं पिबति तस्य श्वासादयो न स्युः न भवेयुः । पिप्पलीवर्द्धमानं कथम्? त्रिभिः परिवृद्धं त्रिभिः त्रिभिः पिप्पलीभिः परिवृद्धिः क्रियते दशदिनानि यावत् । ततः पुनस्तिस्रस्तिस्रोऽपकर्षयेत् यावत्तिस्रः पिप्पल्यो भवन्ति । एवं पञ्चवृद्धिरपकर्षश्च । तथा सप्तवृद्धिरपकर्षश्च । तथा च दशवृद्धिरपकर्षश्च । दशदिनानि यावद् वृद्धिः पुनरपकर्षणं क्रमेणैव कार्यम् । एवमेकोनविंशतिदिनानि प्रयोगो भवति । ताश्च क्षीरपिष्टाः क्षीरौदनाहारेण पातव्याः । इति पूर्वोक्तेन न्यायेन यः पुमान् पुरुषः पिबति तस्य श्वासादयो रोगा न स्युर्न भवेयुः । त्रिपञ्चसप्तदशवृद्धिश्चरकसुश्रुतयोर्दृष्टा वयोदोषापेक्षा । तथा च सुश्रुतः—पिप्पलीर्वा क्षीरपिष्टाः पञ्चाभिवृद्ध्या सप्ताभिवृद्ध्या

वा दशाभिवृद्धया वा पिबेत् क्षीरौदनाहारो दशरात्रम्। दशरात्रात् भूयश्चापकर्षयेत् यावत्पञ्च सप्त दश वेति। एतत्पिप्पलीवर्द्धमानं वातशोणितविषमज्वरारोचकपाण्डुरोगप्लीहोदरार्शःश्वासकासशोषशोफाग्निसादहृद्रोगोदराण्यपहन्ति। चरकमुनिनाप्युक्तम्—"दशपिप्पलिको ज्येष्ठो मध्यमः पञ्च कीर्त्तितः। यस्त्रिपिप्पलिपर्यन्तः स कनीयान् प्रकीर्त्तित इति"॥ दुग्धप्रमाणं तूक्तं हारीतेन—"त्रिः पञ्च सप्त मगधाः प्रकुञ्चं पयसा सह। पिबन् क्रमाद्धवेन्नीरुक् पित्तवातकफान् जयेदिति"॥ क्रमात् प्रकुञ्चं पयसेति प्रकुञ्चवृद्धेन पयसेत्यर्थः। तथा च भोजः—'त्रिः पञ्च सप्त दश वा पिप्पल्यः पयसा सह। प्रकुञ्चवृद्धेन पिबन्नरः प्रोक्तान् गदान् जयेत्॥ दोषदेशर्तुसात्म्यादिवशतो वा यथाहितमिति'। एतेनैतदुक्तं भवति। तिसृषु त्रयः प्रकुञ्चाः, पञ्चसु पञ्च, सप्तसु सप्त, दशसु दश पलानि पयसो भवन्त्येवमावृद्धेः। ह्रासोऽपि तथैव। ताश्च बलवद्भिश्चूर्णिता मध्यबलैरुत्क्वथिताः पातव्या इति सम्प्रदायः। वचनमपि—"ताः पिष्टा बलिभिः पेयाः शृता मध्यबलैर्नरैः। चूर्णीकृता ह्रस्वबलैर्देहदोषामयान् प्रति।" पिप्पलीशब्दस्य पुंल्लिङ्गानभिधानात् तिसृभिरिह कणाभिः पंचभिः सप्तभिर्वा दशभिरथ विवृद्धं पिप्पलीवर्द्धमानमिति पाठः सहृदयचमत्कारित्वात् ज्यायान्॥ ११५॥

रोगी के बलानुसार प्रथम दिन ३, द्वितीय दिन ६, तृतीय दिन ९ पिप्पली; इसी प्रकार क्रमशः तीन २ पिप्पली बढाते हुए दस दिन तक प्रयोग करें तदनन्तर प्रतिदिन तीन २ पिप्पली घटाते जांय। इसीप्रकार प्रतिदिन ५ पिप्पली अथवा ७ पिप्पली अथवा १० पिप्पली के वर्धमानकयोग के सेवन से श्वास, कास (खांसी), ज्वर, उदररोग, अर्श, वातरक्त तथा क्षय प्रभृति रोग नहीं होते।

पिप्पली के अत्यन्त उष्णवीर्य होने के कारण आजकल इस मात्रा में प्रयुक्त करना हानिकारक है। अतः पिप्पली की जगह उपर्युक्त संख्या में ही पिप्पली के दाने लेने चाहियें। इन दानों को उपर्युक्त प्रयोगविधि के अनुसार सेवन करें॥ ११५॥

इदानीं ज्वरिणो यस्यामवस्थायां घृतोपयोगः क्रियते तामाह—

इत्यौषधानुचरणेन हृते बलासे
जीर्णज्वरे मरुति किञ्चिदुपप्लुते च।
वातादिजिद्गणपयःशृतमुक्तमाज्यं
स्यात्षट्पलं पृथुभवेदथ षट्पलं वा॥ ११६॥

इत्यौषधानुचरणेन इति पूर्वोक्तप्रकारेण लंघनोष्णोदकयवागूपाचनादिनौषधानुचरणेन बलासे श्लेष्मणि हृते। जीर्णज्वरे। जीर्णत्वं च ज्वराणां पक्षादूर्ध्वं द्वादशाहगते भवति। तथा च हारीतः—"आसप्तरात्रात्तरुणं ज्वरमाहुश्चिकित्सकाः। मध्यमं द्वादशाहं तु जीर्णज्वरमतः परम्" ॥ मरुति वाते किञ्चिन्मनाक् उपप्लुते प्रकुपिते। अस्यामवस्थायामाज्यं घृतं स्यात् भवेत् ॥ वातादिजिद्गणपयःशृतम्। वातादीन् जयन्तीति वातादिजित् ते च ते गणाश्च वातादिजिद्गणाः। एतदुक्तं भवति—रास्नादिपिप्पल्यादिभिः पयसा क्षीरेण शृतं पक्वं उक्तं घृतं षट्पलं वा भवेत् अथ पृथुषट्पलं वा महाषट्पलं वा भवेदिति। तथा च चरकः—ज्वराः कषायैर्वमनैर्विरेकैर्लघुभोजनैः। रूक्षस्य ये न शाम्यन्ति सर्पिस्तेषां भिषग्जितमिति ॥ ११६ ॥

लंघन, उष्णजल, यवागू तथा पाचन आदि औषध के सेवन से कफ के नष्ट होने पर, जीर्णज्वर में तथा वात के किञ्चित् प्रकुपित होने पर वातादिदोषनाशक गण तथा दूध द्वारा सिद्ध घृत, षट्पलघृत अथवा महाषट्पलघृत का सेवन कराना चाहिये ॥ ११६ ॥

प्रागुक्तं षट्पलं भवेदिति साम्प्रतं तदाह—

विश्वाग्निचव्यमगधामगधाजटाभि-
राभिः पलप्रमितिभिः सयवाग्रजाभिः।
सर्पिः शृतं पयसि षट्पलमेतदर्शः-
प्लीहोदरे ज्वरिषु गुल्मिषु पथ्यमुक्तम् ॥ ११७ ॥

विश्वादिशृतम्। विश्वं शुण्ठी। अग्निश्चित्रकः। चव्यं चविका। मगधा पिप्पली। मगधाजटा पिप्पलीमूलम्। आभिरमीभिः पलप्रमितिभिः पलप्रमाणाभिः। सयवाग्रजाभिः सयवक्षाराभिः। षट्पलमुक्तं सर्पिः। पयसि सलिले च चतुर्गुणे सर्पिःप्रस्थं शृतम्। एतत् पथ्यमुक्तं भाषितम्। केषु ? अर्शःप्लीहोदरे ज्वरिषु गुल्मिषु चेति ॥ ११७ ॥

षट्पलघृत—गव्यघृत २ प्रस्थ। जल ८ प्रस्थ। कल्कार्थ—सोंठ, चित्रक, चव्य, पिप्पली, पिप्पलीमूल, यवक्षार; प्रत्येक १ पल। यथा विधि घृत सिद्ध कर अर्श, प्लीहोदर, ज्वर तथा गुल्मरोग में रोगी को सेवन कराना चाहिये। मात्रा—आधा तोला ॥ ११७ ॥

पूर्वं षट्पलं पृथु चेत्युक्तं इदानीं तत् पृथुषट्पलमाह—

पूतीकाग्निकपञ्चकोलरुचकैः साजाजियुग्मोद्भिदैः
सक्षारैः सविडैः सहिंगुहपुषासिन्धूद्भवैः कल्कितैः।
शुक्तेनार्द्रकसंभवेन च रसेनैतन्महाषट्पलं
सर्पिः पक्वमरोचकाग्निसदनप्लीहोदरश्वासजित्॥११८॥

एतन्महाषट्पलं सर्पिः अरोचकादिजित्। किंभूतम्? पूतीकादिपक्वम्। पूतीकश्चिरबिल्वकः। अग्निकः शिखी। पञ्चकोलं पूर्वोक्तम्। रुचकः सौवर्चलः। अजाजीयुग्मं जीरकद्वयम्। औद्भिदं क्षारलवणम्। क्षारो यवक्षारः। बिडाहिङ्गुहपुषासिन्धूद्भवानि प्रसिद्धानि। कल्कीकृतैर्द्रवपिष्टैः एभिः। शुक्तं चुक्रम्। शुक्तार्द्रकरसाभ्यां पक्वम्। पाककल्पनात्र—घृतप्रस्थः कल्कश्चतुर्थभागः। चुक्रमार्द्रकरसः प्रत्येकं चतुर्गुणोऽरोचकादीन् जयति। अग्निसदनं अग्निमान्द्यम्। ननु च पूर्वोक्तपञ्चकर्माधिकारे स्नेहविधौ षट्पले प्रोक्ते कस्मात्तयोः पुनरत्राभिधानम्? तदुच्यते योगान्यत्वात्। तत्रोक्ते षट्पले दुग्धसैन्धवाभ्यां संस्कारः। ज्वरोक्ते तु सलिलेन। स्नेहविध्युक्तमहाषट्पलात् जीरकद्वययवक्षारलवणहिङ्गुहपुषाशुक्तैराधिकैः संस्कारो ज्वरोक्ते महाषट्पले। स्नेहविध्युक्तषट्पलमहाषट्पलयोर्ज्वरहरश्रुतेरभावात् इत्ययं विशेष इति॥ ११८॥

महाषट्पलघृत—गव्यघृत २ प्रस्थ। शुक्त ८ प्रस्थ। अदरख का रस ८ प्रस्थ। कल्कार्थ—करञ्जबीज, चित्रक, पञ्चकोल (पिप्पली, पिप्पलीमूल, चव्य, चित्रक, सोंठ; मिलित), श्वेतजीरा, कालाजीरा, उद्भिदलवण (रेह का नमक), यवक्षार, बिडनमक, हींग, हपुषा (हाऊबेर) सेन्धानमक; प्रत्येक आधा पल। यथाविधि घृत पाक कर सेवन कराने से अरुचि, अग्निमान्द्य, प्लीहोदर तथा श्वासरोग नष्ट होता है। मात्रा—आधातोला॥ ११८॥

इदानीं पिप्पल्यादिघृतमाह—

कृष्णातामलकीघनप्रतिविषासिंहीस्थिरासारिवा-
विश्वोशीरकलिङ्गबिल्वकटुकात्रायन्तिकाचन्दनैः।
सद्राक्षामलकाग्निभिः पिचुमितैः प्रस्थं पचेत्सर्पिषः
कासश्वासहलीमकारुचिवमीगुल्मज्वरघ्नं नृणाम्॥ ११९॥

सर्पिः प्रस्थं पचेत्। कृष्णा पिप्पली। तामलकी बदरबालिका। घनं मुस्तम्। सिंही बृहती। स्थिरा शालिपर्णी। विश्वं शुण्ठी। कलिंगा इन्द्रयवाः। चन्दनं रक्तचन्दनम्। अग्निश्चित्रकः। प्रतिविषासारिवोशीर-बिल्वकटुकात्रायन्तिकाद्राक्षामलकानि प्रसिद्धानि॥ एभिः पिचुमितैः कर्षप्रमाणैः सर्पिःप्रस्थं सलिले चतुर्गुणे पक्वं नृणां प्राणिनां कासश्वास-हलीमकारुचिवमीगुल्मज्वरान् हन्तीति। तथा च सुश्रुतः—"पिप्पल्य-तिविषाद्राक्षासारिवाबिल्वचन्दनैः" इत्यादि॥ ११९॥

पिप्पल्यादिघृत—गव्यघृत २ प्रस्थ। कल्कार्थ—पिप्पली, भुंइ आंवला, मोथा, अतीस, बड़ीकटेरी, शालिपर्णी, अनन्तमूल, सोंठ, खस, इन्द्रजौ, बिल्वमूल की छाल, कुटकी, त्रायमाण, लालचन्दन, द्राक्षा, आंवला, चित्रक; प्रत्येक १ कर्ष। पाकार्थ जल ८ प्रस्थ। यथाविधि पाक कर सेवन कराने से कास, श्वास, हलीमक, अरुचि, वमी (कै), गुल्म तथा ज्वर प्रभृति रोग नष्ट होते हैं॥ मात्रा—आधा तोला॥ ११९॥

इदानीं लाक्षादिकं तैलमाह—

मूर्वाब्ददारुकटुकामधुकाश्वगन्धा-
रास्नाहरेणुमिशिचन्दनरुङ् निशाभिः।
लाक्षारसेन च समेन समस्तु सिद्धं
तैलं ज्वरापहरमेतदिति प्रसिद्धम्॥ १२०॥

एतत्तैलं मूर्वादिभिः सिद्धं ज्वरापहरम्। मूर्वा चौरस्नायुः। अब्दं मुस्तम्। दारु देवदारु। कटुका रोहिणी। मधुकं यष्टीमधु। अश्वगन्धा वाजिगन्धा। रास्ना सुरभिः। हरेणुः रेणुका। मिशिः शतपुष्पा। चन्दनं रक्तचन्दनम्। रुक् कुष्ठम्। निशा हरिद्रा। एभिः पालिकैस्तैलं पलशतं लाक्षारससमं मस्तुचतुर्गुणे साध्यम्। अतिप्रसिद्धं अतिप्रख्यातं लाक्षादिकं तैलमिति॥ १२०॥

लाक्षादितैल—तिलतैल २ प्रस्थ। लाक्षारस २ प्रस्थ। मस्तु (दही का पानी) ८ प्रस्थ। कल्कार्थ—मूर्वामूल, मोथा, देवदारु, कुटकी, मुलहठी, असगन्ध, रास्ना, रेणुका, सोये, लालचन्दन, कुष्ठ, हल्दी; मिलित ८ पल। यथाविधि सिद्ध कर अभ्यंग करने से यह तैल ज्वर को हरता है॥ लाक्षारस तय्यार करने की यह विधि है कि—लाक्षा के साथ दशमांश लोध्र तथा लोध्र से दशमांश सर्जिक्षार और कुछ बेर के पत्ते डाल १६ गुणा पानी में क्वाथ करें। जब चतुर्थांश शेष रहे तब उतार कर छानलें॥१२०॥

इदानीं सुश्रुतोक्तं षट्कन्धरं तैलमाह—

सस्वर्जिकालोहितयष्टिकारुक्-
सविश्वलाक्षाक्षणदं समूर्वम् ।
सषड्गुणोदश्विदिति प्रसिद्धं
षट्कन्धरं तैलमिदं ज्वरघ्नम् ॥ १२१ ॥

इदं स्वार्जिकादिभिः पक्वं तैलं षट्कन्धरं ज्वरघ्नम् । स्वार्जिका स्वार्जिकाक्षारः। लोहितयष्टिका मञ्जिष्ठा। रुक् कुष्ठं। विश्वं शुण्ठी। क्षणदा हरिद्रा। लाक्षामूर्वे प्रसिद्धे । षड्गुणोदश्वित् षड्गुणमथितं तिलतैल-प्रस्थमर्द्धपलिकैर्द्रव्यैः साधयेदिति प्रसिद्धम् । तथा च सुश्रुतः—'लाक्षाविश्वनिशामूर्वामञ्जिष्ठास्वर्जिकासमैः । षड्गुणेनैव तक्रेण सिद्धं तैलं ज्वरान्तकृत् ॥ १२१ ॥

इति ज्वरचिकित्सा समाप्ता ।

तिल तैल २ प्रस्थ। सारयुक्त दही का तक्र १२ प्रस्थ। कल्कार्थ—सर्जिक्षार, मञ्जिष्ठा, कुष्ठ, सोंठ, लाक्षा, हल्दी, मूर्वामूल; मिलित ८ पल। यथाविधि तैलपाक कर मर्दन करने से ज्वर को नष्ट करता है ॥ १२१ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*ज्वरचिकित्सा समाप्ता ।*

——:०:——

## अथातीसारचिकित्सा ।

ज्वरचिकित्सानन्तरं यथोद्देशमतीसारचिकित्सामाह—

सासृक्सगुह्यगुदवंक्षणवस्तिशूल-
मामातिसारमनिलप्रतिबद्धविट्कम् ।
दोषानुरूपविहितैरिति लङ्घनाद्यैः
पेयादिभिस्तमवलोक्य भिषक् चिकित्सेत् ॥ १२२ ॥

आमातिसारमवलोक्य भिषक् पेयादिभिश्चिकित्सेत्। कीदृशम् ? सासृक् सहासृजा वर्त्तत इति सासृक् सरक्तम्। सगुह्यगुदवङ्क्षण-

बस्तिशूलं, गुह्यं च गुदं च वङ्क्षणे च बस्तिश्च ते तथा तेषु शूलं गुह्यगुदवङ्क्षणबस्तिशूलं, सह तेन वर्त्तते इति। गुह्यं स्त्रियाः साधनं वराङ्गम्। गुदं पायुः। वङ्क्षणे गण्डिके। बस्तिर्मूत्राशयः। अनिलप्रतिबद्धविट्कं, अनिलो वायुः, तेन प्रतिबद्धं विट् पुरीषं यस्य स तथा तम्। पेयादिभिरिति—पेया आदिर्येषां ते पेयादयः। पेयां विलेपीमकृतं कृतं च यूषमित्यादयः। लङ्घनं आद्यं येषां पेयादीनां ते पेयादयो लङ्घनाद्यास्तैः दोषानुरूपविहितैः। दोषाः पवनादयस्तदनुरूपेण विहिताः कृताः दोषानुरूपविहितास्तैः। इति पूर्वोक्तेनैव प्रकारेण भिषक् ऊहापोहवित् तमामातिसारं चिकित्सेदिति ॥ १२२ ॥

गुह्य, गुदा, वंक्षण (जंघासे) तथा वस्ति में शूल, मलवात से उत्पन्न मलबन्ध तथा रक्त प्रवाह युक्त आमातिसार में वात आदि दोष के अनुसार लंघन प्रभृति क्रिया तथा पेया आदि पथ्य द्वारा रोगी की चिकित्सा करें ॥ १२२ ॥

प्राक् पेयादिभिश्चिकित्सेदित्युक्तमतः पेयादीन् प्राहः—

प्राक् पञ्चकोलकजलप्लुततण्डुलाभिः
पेयाभिरप्यथ पृथक् लघुलाजमण्डैः।
मृद्वोदनैर्मधुरदाडिमयूषयुक्तै-
रामातिसारशमनैरुपदिष्टपथ्यैः ॥ १२३ ॥

पेयादिभिश्चिकित्सेत्। प्राक् प्रथमम्। पञ्चकोलकजलप्लुततण्डुलाभिः पञ्चकोलकेन संस्कृतं जलं पञ्चकोलकजलं तेन प्लुतास्तण्डुला यासु पेयासु तास्तथा ताभिः। अथ पृथक्लघुलाजमण्डैः अथवा पृथक् वातादिप्रत्यनीकसंस्कृता ये लघुलाजमण्डास्तैः। मृद्वोदनैर्मधुरदाडिमयूषयुक्तैः मृद्वोदनैः। क्लिन्नसिक्थैर्भक्तैः। मधुरदाडिमेन संस्कृतो यूषो मधुरदाडिमयूषः तेन युक्तानि यान्योदनानि तैः। अन्यैरप्युपदिष्टैः पथ्यैः आमातिसारशमनैश्चिकित्सेदिति ॥ १२३ ॥

पञ्चकोलजल से सिद्ध चावलों की पेया, अथवा वात आदि दोषहर औषध से संस्कृत लाजा (खील) का मण्ड, अथवा मीठे अनार के रस से सिद्ध यूष युक्त मृदु ओदन एवं अन्य आमातिसार को शान्त करने वाले पथ्यों से रोगी की चिकित्सा करें ॥ १२३ ॥

साम्प्रतं पेयादिपथ्यानन्तरं आमातिसारशमनान् योगान् प्राह—

विश्वाभयाघनवचातिविषामराह्व-
क्वाथोऽथ विश्वजलदातिविषाशृतो वा ।
आमातिसारशमनः कथितः कषायः
शुण्ठीघनप्रतिविषामृतवल्लिजो वा ॥ १२४ ॥

विश्वादिभिः कृतः क्वाथः आमातिसारशमनः कथितः। विश्वं शुण्ठी। अभया हरीतकी। घनं मुस्तम्। वचातिविषे प्रसिद्धे। अमराह्वं देवदारु। तैः क्वाथः। एष योगो लोके देवदारुषट्क इति प्रसिद्धः। अथेति द्वितीयं योगमाह। विश्वजलदातिविषाशृतः क्वाथः। जलदं मुस्तम्। एष त्रिकार्षिक इति प्रसिद्धः। तृतीयं योगमाह। शुण्ठीघनप्रतिविषामृतवल्लिजो वा कषायः आमातिसारशमनः। अमृतवल्लिर्गुडूची। एष चातुर्भद्रक इति प्रसिद्धः॥ १२४ ॥

१—विश्वादिक्वाथ—सोंठ, हरड़, मोथा, वच, अतीस, देवदारु; मिलित २ तोले। क्वाथार्थ जल ३२ तोला। अवशिष्ट क्वाथ ८ तोला। इस क्वाथ का नाम देवदारुषट्क भी है। २—सोंठ, मोथा, अतीस, मिलित २ तोला। क्वाथार्थ जल ३२ तोला। शेष ८ तोला। यह क्वाथ त्रिकार्षिक नाम से प्रसिद्ध है। ३—सोंठ, मोथा, अतीस, गिलोय; मिलित २ तोला। क्वाथार्थ जल ३२ तोला। शेष ८ तोला। यह क्वाथ चातुर्भद्रक कहलाता है। ये तीनों क्वाथ आमातिसार को शान्त करते हैं॥ १२४ ॥

इदानीं बिल्वादिकं सुश्रुतोक्तं योगमाह—

ततः कलिङ्गातिविषाब्दबिल्वैः
सबालकैरुत्क्वथितः कषायः ।
तस्मै सशूलाय सशोणिताय
सामाय शस्तोऽथ कलिङ्गषट्कः ॥ १२५ ॥

ततोऽनन्तरं कलिङ्गादिकषायः तस्मै सामाय शस्तः। कलिङ्ग इन्द्रयवः। अब्दं मुस्तम्। उत्क्वथितः कषायकल्पनया। सशूलाय शूलसंयुक्ताय। सशोणिताय शोणितसहिताय। तस्मै आतुराय सामाय आमसहिताय शस्तः प्रशस्तः। अथवा कलिङ्गषट्कः शस्तः अस्यामेवावस्थायामिति।

बिल्वादिक्वाथ—कलिंग ( इन्द्रजौ ), अतीस, मोथा, बिल्वफलमज्जा ( बेल का गूदा ), गन्धबाला; मिलित २ तोला। क्वाथार्थ जल ३२ तोले। शेष क्वाथ ८ तोला। यह बिल्वादिक्वाथ अथवा कलिंगषट्कक्वाथ शूल तथा रक्तप्रवाह युक्त आमातिसार में प्रशस्त है ॥ १२५ ॥

पूर्वं कलिङ्गषट्कः शस्त इत्युक्तं साम्प्रतं तदाह—

सहरीतकीप्रतिविषारुचकं
सवचं सहिङ्गु सकलिङ्गयवम्।
इति तत्कलिङ्गयवषट्कमिदं
रुधिरातिसारगदशूलहरम् ॥ १२६ ॥

इत्येतत् पूर्वोक्तेन प्रकारेण। हरीतकी च प्रतिविषा च रुचकं च तानि तथा तैः सह वर्त्तत इति सहरीतकीप्रतिविषारुचकम्। रुचकं सौवर्चलम्। सह वचया वर्त्तत इति सवचम्। सह हिङ्गुना वर्त्तत इति सहिङ्गु। सह कलिङ्गयवैर्वर्त्तत इति सकलिङ्गयवम्। कलिङ्गयवा इन्द्रयवाः। कलिङ्गषट्कमिति पूर्वाचार्यसंज्ञेयम्। रुधिरप्रधानोऽतिसारो रुधिरातिसारः तदाख्यो गदो रुधिरातिसारगदः। स च शूलश्च रुधिरातिसारगदशूले, ते हरतीति रुधिरातिसारगदशूलहरमिति।

कलिंगषट्कक्वाथ—हरड़, अतीस, सौंचलनमक, वचा, हींग, इन्द्रजौ; इनका क्वाथ रक्तातिसार तथा शूल को हरता है ॥ १२६ ॥

इदानीमामातिसारप्रत्यनीकद्रव्यसंस्कृतां हरीतकीमाह—

स्विन्नामबिल्वयवगोक्षुरकोरुवूक-
च्छिन्नोद्भवातुषजलैर्मधुनावलीढा।
बद्धाल्पविट्कमतिशूलमसृग्विमिश्र-
मामातिसारमपहन्ति हरीतकीयम् ॥ १२७ ॥

इयं हरीतकी आमातिसारं अपहन्ति। कीदृशी? स्विन्ना। कैः? आमबिल्वयवगोक्षुरकोरुवूकच्छिन्नोद्भवातुषजलैः। आमबिल्वं च यवाश्च गोक्षुरकश्च उरुवूकश्च छिन्नोद्भवा च तुषजलं च तानि, तथा तैः। आमबिल्वमपक्वबिल्वम्। यवगोक्षुरकौ प्रसिद्धौ। उरुवूकः एरण्डः। छिन्नोद्भवा गुडूची। तुषजलं काञ्जिकम्। कल्पना च—आमबिल्वादीनां

पलं, पृथु हरीतकीद्वयं, काञ्जिकषोडशपलैः स्विन्नं पिष्टं मधुनावलीढमामातिसारमपहन्तीति। बद्धं विबद्धं अल्पं विट् यस्मिन् स तथा तम्। अतिशयेन शूलं यस्मिन् स तथा तम्। असृक् रक्तं तेन विमिश्रमामातिसारमपहन्तीति ॥ १२७ ॥

कच्चे बेल का गूदा, जौ, गोखरू, एरण्डमूल, गिलोय; इन्हें समभाग में परस्पर मिश्रित कर १ पल, कांजी १६ पल; इन्हें एकत्र मिला दो बड़ी हरड़ों को स्विन्न करें। पश्चात् पीसकर योग्य मात्रा में शहद के साथ रोगी को चटावें। इसके प्रयोग से आमातिसार—जो रक्तमिश्रित हो, अत्यन्त शूलयुक्त हो, जिसमें मल कठोर तथा अल्प परिमाण में आये—नष्ट होता है ॥ १२७ ॥

साम्प्रतं ज्वरातिसारहरं नागरादिकं योगमाह—

सनागरैः सातिविषापयोधरैः
सकुण्डलीकैः सकिराततिक्तकैः।
कलिङ्गकैरुत्क्वथितं निषेवितं
सरुग्ज्वरं हन्त्यतिसारमामजम् ॥ १२८ ॥

सकलिङ्गकैः संस्कृतमुत्क्वथितं क्वाथं निषेवितमुपयुक्तमतीसारमामजं हन्ति। सरुग्ज्वरं शूलज्वरसमेतम्। कीदृशैः कलिङ्गकैः? सनागरैः शुण्ठीसमेतैः। सातिविषापयोधरैः। अतिविषापयोधराभ्यां समेतैः। पयोधरं मुस्तम्। सकुण्डलीकैः गुडूचीसहितैः। सकिराततिक्तकैः किराततिक्तसम्मिश्रैः। कलिङ्गकैः इन्द्रयवैरिति ॥ १२८ ॥

नागरादिक्वाथ—सोंठ, अतीस, मोथा, गिलोय, चिरायता, इन्द्रजौ; मिलित २ तोले। क्वाथार्थ जल ३२ तोले। शेष ८ तोले। यह क्वाथ वेदना तथा ज्वर युक्त-आमातिसार को नष्ट करता है ॥ १२८ ॥

इदानीं पक्वातिसारस्य संग्रहणाय गङ्गाधरयोगमाह—

मुस्तमोचरसरोध्रधातकी-
पुष्पबिल्वगिरकौटजैः फलैः।
चूर्णितैः सगुडतक्रसेवितै-
र्निम्नगाजलरयोऽपि रुध्यते ॥ १२९ ॥

मुस्तादिभिश्चूर्णितैः। सगुडतक्रसेवितैः सगुडमथितोपयुक्तैः। निम्नगा गङ्गा तस्याः जलं तस्य रयो वेगः सोऽपि रुध्यते निवार्यते।

किं पुनरतीसारः प्रवृत्त इति। मुस्तं अब्दम्। मोचरसः शाल्मलीनिर्यासः। रोध्रधातकीपुष्पबिल्वगिराः प्रसिद्धाः। कौटजफलानीन्द्रयवाः। कल्पना च—मुस्तादिचूर्णकर्षं गोमथितचतुःपलेन गुडकर्षविमर्दितं पीतं पक्वातीसारं सङ्गृह्णातीति ॥ १२९ ॥

गंगाधरचूर्ण—मोथा, मोचरस, लोध, धाय के फूल, कच्चे बेल का गूदा, इन्द्रजौ; इनके चूर्णों को एकत्र सम परिमाण में मिलावें। २ मासे चूर्ण, २ मासे गुड; इन्हें एकत्र मर्दन कर छाछ के साथ सेवन करें। इसके सेवन से अत्यन्त प्रवृत्त अतीसार भी नष्ट होता है ॥ १२९ ॥

अपरं पक्वातीसारहरं योगद्वयमाह—

क्वाथश्च मुस्तककृतः समधुः सुशीतः
पीतः प्रवृद्धमतिसारगदं निहन्ति ।
पक्वातिसारमथ कौटजवल्कलेहः
साम्बष्ठकादिमगधादिमधुश्रितो वा ॥ १३० ॥

मुस्तककृतः क्वाथः सुशीतो मधुकर्षसमन्वितः पीतः प्रपक्वमतिसारगदं निहन्ति । अथवा कौटजवल्कलेहः साम्बष्ठकादिमगधादिमधुश्रितः पक्वातिसारमपहन्ति। अथ लेहनात् कुटजवल्कपलशतं जलद्रोणे प्रक्वाथ्य चतुर्भागशेषं पुनस्तावत्क्वाथयेत् यावत् फाणिततुल्यम्। अम्बष्ठकादिपिप्पल्यादिगणयोश्चूर्णं फाणितपादेन देयम्। लेहपाकलक्षणञ्च—"लेहस्य तन्तुमत्ताप्सु मज्जनं सरणं न च" ॥ साम्बष्ठकादिमगधादिमधुश्रितः अम्बष्ठकादिश्च मगधादिश्च अम्बष्ठकादिमगधादिः । सह ताभ्यां वर्त्तत इति। मधुना श्रितः आश्रितः। साम्बष्ठकादिमगधादिश्चासौ मधुश्रितश्च । साम्बष्ठकादिमगधादिमधुश्रितः। कौटजवल्कलेहः। कौटजवल्कं कुटजत्वक्। इत्ययमग्निबलेनोपयुक्तः पक्वातिसारं निहन्तीति ॥ १३० ॥

मोथे के क्वाथ में शीतल होने पर मधु का प्रक्षेप देकर पीने से अतिसार नष्ट होता है। अथवा कुटजवल्क ( कुड़े की छाल ) के क्वाथ को गाढा कर रसक्रिया बनालें। इसमें अम्बष्ठकादिगण तथा पिप्पल्यादिगण के चूर्ण का प्रक्षेप देकर शहद के साथ चाटने से पक्वातिसार नष्ट होता है ॥ १३० ॥

इदानीमवेदनस्यातिपक्वस्य दीप्ताग्नेर्विरूक्षितस्य नानावर्णस्यातिसारस्य पुटपाकमाह—

श्रीपर्णिपर्णावृतदीर्घवृन्तज-
त्वक्पिण्डकात्तण्डुलवारिकल्किताात्।
मृद्वेष्टितादग्निविपाचितादसं
पिबेदतीसारहरं समाक्षिकम्॥ १३१॥

श्रीपर्णिपर्णावृतदीर्घवृन्तजत्वक्पिण्डकादग्निविपाचितात् रसं समाक्षिकं पिबेत् अतीसारहरम्। श्रीपर्णी काश्मरी तस्याः पर्णानि तैरावृतं वेष्टितम्। दीर्घवृन्तमरलुकम्। तस्माज्जातः दीर्घवृन्तजः। स चासौ त्वक्पिण्डकश्च दीर्घवृन्तजत्वक्पिण्डकः। श्रीपर्णिपर्णावृतश्चासौ दीर्घवृन्तजत्वक्पिण्डकश्च श्रीपर्णिपर्णावृतदीर्घवृन्तजत्वक्पिण्डकः। तस्माद्रसं पिबेत्। किं विशिष्टात्? तण्डुलवारिकल्किताात् तण्डुलधावनपिष्टात्। मृद्वेष्टितात् मृदालिप्तात् बाह्यतः। अग्निविपाचितात्। इत्यत्राग्निग्रहणं कालादिपाकनिवृत्त्यर्थम्। इत्थम्भूतात् त्वक्पिण्डकात् यो रसस्तं सुशीतं, समाक्षिकं मधुसंयुक्तं पिबेत्। अतीसारहरमिति। तथा च सुश्रुताचार्य्यः—अवेदनं सुसम्पक्वं दीप्ताग्नेः सुचिरोत्थितम्। नानावर्णमतीसारं पुटपाकैरुपाचरेत्। त्वक्पिण्डकं दीर्घवृन्तस्येत्यादि॥ १३१॥

अरलू की छाल को तण्डुलोदक से पीस पिण्डाकार करके गाम्भारी के पत्तों से लपेट दें। पश्चात् अंगूठे के बराबर मोटी मट्टी का लेप करके अग्नि में पाक करें। जब मट्टी का रंग लाल होजाय उसी समय बाहिर निकाल निष्पीडन करके रस निकाल लें। शीतल होने पर मधु मिलाकर पीने से अतीसार नष्ट होता है॥ १३१॥

द्वितीयं पुटपाकयोगमाह—

इत्युक्तया कल्पनया वटादिना
कल्कीकृतेनोदरगेण तित्तिरेः।
प्रकल्पितः स्यात्पुटपाकजो रसः
सशर्करः क्षौद्रयुतोऽतिसारजित्॥ १३२॥

तित्तिरेः उदरगेण वटादिना न्यग्रोधोदुम्बराश्वत्थेत्यादिना कल्की-

कृतेन। इत्युक्तया कल्पनया अनन्तरोक्तया। तित्तिरिं लुञ्चितनिकृष्टान्त्र-पुरीषतुण्डोरस्कं तस्योदरं न्यग्रोधादिकल्केन सम्पूर्य काश्मरीपत्रैः परिवेष्ट्य तं मृदावलिप्य खदिराङ्गारैरुत्स्वेदयेत्। तस्माद् गालिताद्रसः पुटपाकजः शीतः। सशर्करः शर्करायुक्तः। क्षौद्रयुतश्च क्षौद्रं मधु तेन युक्तः। अतीसारजिद्भवतीति।

इति अतीसारचिकित्सा समाप्ता।

एक तीतर को मारकर पंख उखाड़, आंत, पुरीष, चोंच आदि को निकाल पेट में वट आदि पञ्चवल्कल का कल्क भरलें। पश्चात् गाम्भारी के पत्तों से लपेट पूर्ववत् मट्टी का लेप कर खैर के अंगारों पर उत्स्वेदन करें। मट्टी का रंग लाल होते ही बाहिर निकाल निष्पीडन कर रस निकाल लें। शीतल होने पर खांड तथा शहद मिला रोगी को पिलाने से अतीसार नष्ट होता है॥ १३२॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*अतीसारचिकित्सा समाप्ता।*

---

## अथ ग्रहणीचिकित्सा।

अतीसारचिकित्सानन्तरं यथोद्देशं ग्रहणीचिकित्सामाह—

**विश्वादिभिः सरुजि पाचनमत्र शस्तं**
**मुस्तादिभिर्भवति संग्रहणं ततश्च।**
**स्याद्दीपनं तदनु च ग्रहणीविकारे**
**कल्याणकादिभिरिति ग्रहणीचिकित्सा॥ १३३॥**

अथ ग्रहणीरोगे सरुजि सशूले विश्वादिभिः पाचनमादौ शस्तम्। विश्वादयो विश्वाभयाघनवचातिविषेत्येवमादयोऽतिसारोक्ताः। ततश्च पाचनानन्तरं मुस्तादिभिः सङ्ग्रहणं भवति। मुस्तादयो मुस्तमोचरस-रोध्रधातकीत्यादयः। तदनु सङ्ग्रहणानन्तरं ग्रहणीविकारे कल्याणका-दिभिर्दीपनं स्यात् भवेत्। कल्याणकादयः कल्याणकगुड-भल्लातकगुड-पिप्पल्यादिगण-वार्त्ताकगुटिका-चित्रकगुटिकेत्येवमादयः। इतिशब्दः परिसमाप्तौ। एतावत्येव ग्रहणीचिकित्सा। तथा च सुश्रुताचार्यः—

ततः पाचनसंग्राहिदीपनीयं गणत्रयम् । पिबेत्प्रातः सुरारिष्टस्नेहमूत्र-तुषाम्बुभिरिति ॥ १३३ ॥

शूलयुक्त ग्रहणीरोग में प्रथमतः अतिसारोक्त विश्वादिकाथ प्रभृति योगों द्वारा पाचन तदनन्तर गंगाधरचूर्ण प्रभृति योगों द्वारा संग्रहण और अन्त में कल्याणक-गुड प्रभृति योगों द्वारा अग्नि—दीपन करना चाहिये। प्रधानतः क्रमशः पाचन, संग्रहण तथा जाठराग्निदीपन करना ही ग्रहणी की चिकित्सा है ॥ १३३ ॥

इदानीं भूनिम्बादिचूर्णमाह—

भूनिम्बकौटजकटुत्रिकमुस्ततिक्ताः
कर्षांशकाः सशिखिमूलपिचुद्वयाः स्युः ।
त्वक् कौटजी पलचतुष्कमिता गुडाम्भः-
पीतं नृणामिह हरेद् ग्रहणीविकारान् ॥ १३४ ॥

इह भूनिम्बादीनां चूर्णं गुडाम्भःपीतं नृणां ग्रहणीविकारं हन्ति । भूनिम्बकौटजकटुत्रिकमुस्ततिक्ताः कर्षांशकाः । कर्षांशो येषां भूनिम्बादीनां ते कर्षांशकाः प्रत्येकं कर्षमानाः । भूनिम्बः किराततिक्तकम् । कौटजा इन्द्रयवाः । कटुत्रिकं शुण्ठीमरिचपिप्पल्यः । मुस्तं अब्दम् । तिक्ता कटुका । सशिखिमूलपिचुद्वयाः । शिखी चित्रकः, तस्य मूलं शिखिमूलं, तस्य पिचुद्वयं कर्षद्वयं, शिखिमूलपिचुद्वयम् । सह तेन वर्त्तन्ते ये ते तथा स्युर्भवेयुः । त्वक् कौटजी पलचतुष्कमिता । कुटजस्येयं कौटजी त्वक् । पलचतुष्कमिता चतुःपलप्रमाणेत्यर्थः । एषां चूर्णं कर्षम् । गुडकर्षसंयुक्तैः शृतशीताम्बुपलैश्चतुर्भिः पीतं नृणां प्राणिनाम् । इह ग्रहणीविकारान् हरेदिति ॥ १३४ ॥

भूनिम्बादिचूर्ण—चिरायता, इन्द्रजौ, कालीमिर्च, पिप्पली, सोंठ, मोथा, कुटकी; प्रत्येक २ तोले, चित्रकमूल ४ तोले, कुड़े की छाल ४ पल ( ३२ तोले )। प्रत्येक के चूर्ण को उपर्युक्त परिमाण में मिश्रित करें । मात्रा—१ मासे से ३ मासे तक। औषध के समान गुड़ को सोलहगुना जल में घोल कर इस अनुपान से रोगी को सेवन करावें ॥ १३४ ॥

साम्प्रतं ग्रन्थिकाद्यं चूर्णमाह—

सग्रन्थिकं त्रिकटुकं लवणत्रयञ्च
क्षारद्वयं सचविकं च सचित्रकञ्च ।

साजाजिमोदमिशिहिङ्गु विधाय चूर्णं
तद्बीजपूरकरसप्लुतमेतदेषाम् ॥ १३५ ॥
तक्रेण कोष्णसलिलेन तुषाम्बुना वा
पीतं कुलत्थयवकोलजलेन वापि ।
मन्दानलेषु नृषु दीप्तिकरं ग्रहण्या-
मर्शःसु गुल्मिषु च भेषजमेतदेव ॥ १३६ ॥

एतदेषां ग्रन्थिकादीनां चूर्णं तक्रादिभिः पीतं नृषु मन्दाग्निषु दीप्तिकरम्। ग्रहण्यादिष्वेतदेव भेषजं भवति। सग्रन्थिकं सपिप्पलीमूलम्। त्रिकटुकं पूर्वोक्तम्। लवणत्रयं बिडसैन्धवसौवर्चलानि। क्षारद्वयं यवक्षारस्वर्जिकाक्षारौ। सचविकं सचव्यं च। सचित्रकं सह चित्रकेण। साजाजिमोदमिशिहिङ्गु। अजाजी जीरकम्। मोदं अजमोदा। मिशिः शतपुष्पा। हिङ्गु रामठम्। विधाय कृत्वा चूर्णं तद्बीजपूरकरसेन भावितम्। एषां ग्रन्थिकादीनां द्रव्याणां चूर्णं गोमथितेन, कोष्णसलिलेनोष्णोदकेन, तुषाम्बुना काञ्जिकेन वा। कुलत्थयवकोलजलेन चैषां क्वथितेन पीतं, नृषु प्राणिषु मन्दानलेषु मन्दाग्निषु दीप्तिकरमग्नेः। ग्रहण्यां सङ्ग्रहणीविकारेष्वर्शःसु गुल्मिषु चैतदेव भेषजं भवतीत्येवकारेणैकान्तप्रत्यनीकता ख्याप्यत इति ॥ १३५—१३६ ॥

ग्रन्थिकाद्यचूर्ण—पिप्पलीमूल, सोंठ, पिप्पली, कालीमिर्च, सैन्धानमक, बिडनमक, सौंचलनमक, यवक्षार, सर्जिक्षार, चव्य, चित्रक, जीरा, अजमोदा, सोये, हींग; इनके चूर्णों को समपरिमाण में मिलाकर बिजौरे के रस से तबतक भावना दें जबतक चूर्ण का स्वाद कुछ २ खट्टा न होजाय। मात्रा—४ रत्ती से ८ रत्ती तक। अनुपान—छाछ, कोसाजल, कांजी अथवा कुलथी, जौ तथा बेर; इनमें से किसी एक द्रव्य का क्वाथ। यह चूर्ण ग्रहणी में मन्द हुई २ अग्नि को प्रदीप्त करता है तथा अर्श (बवासीर) और गुल्म में भी यह हितकर है ॥ १३५—१३६ ॥

इदानीं चाङ्गेरीघृतमाह—

शुण्ठीत्रिकण्टमगधागजपिप्पलीभिः
पाठाग्निबिल्वगिरधान्ययवानिकाभिः ।

सग्रन्थिकाभिरिति दध्नि घृतं विपक्कं
चाङ्गेरिकारससमं ग्रहणीघ्नमेतत् ॥ १३७ ॥

एतत् घृतं शुण्ठ्यादिविपक्कं ग्रहणीघ्नं भवति। शुण्ठी विश्वा। त्रिकण्टकं गोक्षुरकम्। मगधा पिप्पली। गजपिप्पली हस्तिपिप्पली। अग्निश्चित्रकः। ग्रन्थिकं पिप्पलीमूलम्। पाठाबिल्वगिरधान्ययवानिकाः प्रसिद्धाः। आभिरर्द्धपलिकाभिः घृतप्रस्थं दध्नि चतुर्गुणे चाङ्गेरिकारससममित्यनया कल्पनया विपक्कं ग्रहणीं हन्तीति ग्रहणीघ्नमिति ॥ १३७ ॥

चाङ्गेरीघृत—गव्यघृत २ प्रस्थ। दही ८ प्रस्थ। चाङ्गेरी का रस २ प्रस्थ। कल्कार्थ—सोंठ, गोखरू, पिप्पली, गजपिप्पली, पाढ़, चित्रक ( चीता ), पिप्पलीमूल, बेलफल का गूदा, धनियाँ, अजवाइन; समपरिमाण में मिलित ८ पल। यथानियम घृतपाक कर रोगी को सेवन करावें। मात्रा—आधा तोला। यह घृत संग्रहणी को नष्ट करता है ॥ १३७ ॥

साम्प्रतं कल्याणकं गुडं ब्रूते—

पाठाधान्ययवान्यजाजिहपुषाचव्याग्निसिन्धूद्भवैः
सश्रेयस्यजमोदकीटरिपुभिः कृष्णाजटासंयुतैः।
सव्योषैः सफलत्रिकैः सबहुलैस्त्वक्पत्रकैरौषधै-
रित्यक्षप्रमितैः सतैलकुडवैः साष्टत्रिवृन्मुष्टिभिः ॥ १३८ ॥
एतैरामलकीरसस्य तुलया सार्द्धं तुलार्द्धं गुडात्
पक्तव्यं भिषजावलेहवदयं प्राग्भोजनाद्भक्ष्यते।
ये केचिद् ग्रहणीगदाः सगुदजाः कासाः सशोषामयाः
सश्वासश्वयथुस्वरोदररुजः कल्याणकस्तान् जयेत् ॥१३९॥

एतैः पाठादिभिरौषधैः आमलकीरसस्य च तुलया सार्द्धं सह भिषजा वैद्यन गुडतुलार्द्धं पक्तव्यम्। तुलार्द्धं पञ्चाशत्पलानि। पाठादीनि प्रसिद्धानि। किंविशिष्टैः पाठादिभिः ? सश्रेयस्यजमोदकीटरिपुभिः कृष्णाजटासंयुतैश्च। श्रेयसी हस्तिपिप्पली। अजमोदा खराह्वा। कीटरिपुर्विडङ्गम्। कृष्णाजटा पिप्पलीमूलम्। सव्योषैः सकटुत्रिकैः।

सफलत्रिकैः त्रिफलया सह । सबहुलैस्त्वक्पत्रकैरौषधैः । बहुला एला । त्वक् वराङ्गम् । पत्रकं छदम् । एभिरक्षप्रमितैः कर्षप्रमाणैः । द्वितैलकुडवैः तिलतैलपलाष्टकसमेतैः । साष्टत्रिवृतो मुष्टयः । मुष्टिः पलम् । अष्टौ च ते त्रिवृन्मुष्टयश्च अष्टत्रिवृन्मुष्टयः । सह ताभिर्वर्त्तन्ते यानि पाठादीनि तानि तथा तैः । आमलकीरसस्येति निरुपपदोऽयं रसशब्दः । तेन क्वाथेऽपि वर्त्तते मांसरसेनेति यथा । तस्मात्स्वरसक्वाथयोर्यथासम्भवेन पक्तव्यम् । कथम् ? अवलेहवत् । अवलेहतुल्यमिति । अयं च प्राग्भोजनात् भक्ष्यते । ये केचित् गदाः सगुदजाः सार्शसः । सकासाः सशोषामयाः सश्वाससश्वयथुस्वरोदररुजश्च । श्वासश्च श्वयथुश्च स्वरश्च उदरश्च श्वासश्वयथुस्वरोदराणि तेषां रुजः पीडाः । सह ताभिर्वर्त्तन्ते ये ग्रहणीगदाः कासाश्च ते तथा । तान् सर्वान् कल्याणको जयेदिति ॥ १३८—१३९ ॥

कल्याणकगुड—आंवले का रस १ तुला ( १० सेर ), गुड ५ सेर; इन दोनों को एकत्र मिश्रित कर कलई किये हुए तांबे के पात्र में पाक करें। पाक करते २ जब गाढा होजाय तब पाढ़, धनियां, अजवाइन, जीरा, हाऊबेर, चव्य, चित्रक, सैन्धानमक, गजपिप्पली, अजमोदा, वायविडंग, पिप्पलीमूल, त्रिकटु, त्रिफला, छोटी इलायची, दारचीनी, तेजपत्र; प्रत्येक २ तोले, तिलतैल ८ पल, निसोत का चूर्ण ८ पल; इनका प्रक्षेप दें और अच्छी प्रकार मिला दें। मात्रा—आधे तोले से १ तोले तक। इसे भोजन से पूर्व सेवन करने की व्यवस्था देनी चाहिये। इसके सेवन से ग्रहणी, अर्श, कास ( खांसी ), क्षय, श्वास, शोथ, स्वरभेद तथा उदररोग नष्ट होते हैं॥

साम्प्रतं भल्लातकगुडमाह—

द्रोणाम्भसा सह सहस्रमरुष्कराणा-
मुत्क्वाथ्य तत्र च जले चरणप्रमाणे ।
दत्त्वा गुडस्य च तुलां विपचेदमूनि
द्रव्याणि च द्विपलिकानि विचूर्णितानि ॥१४०॥
दन्तीत्रिवृत्करिकणाचविकाजमोदा-
पाठाग्निपिप्पलिजटात्रिकटूनि लेहे ।
शीते पलप्रमितमत्र विधाय चूर्ण-
मेलावराङ्गदलकुञ्जरकेसराणाम् ॥ १४१ ॥

गुल्माग्निसादगुदजग्रहणीविकारे
पाण्ड्वामयश्वयथुरुग्विषमज्वराणाम्।
शस्तः कफोदरकिलासभगन्दराणा-
मेषामरुष्करगुडः क्रिमिरोगिणाञ्च ॥ १४२ ॥

एषां गुल्माग्निसादादीनां अरुष्करगुडः प्रशस्तः। तस्य चेदं पाकविधानम्-द्रोणाम्भसा सह सहस्रमरुष्कराणामुत्क्वाथ्य। अरुष्कराणां भल्लातकानां सहस्रमुत्क्वाथ्य क्वाथं कृत्वा। केन? द्रोणाम्भसा सह। द्रोणमितमम्भः द्रोणाम्भः। शाकपार्थिवादित्वात् मध्यपदलोपीसमासः। तेन। तत्र च जले क्वाथे चरणप्रमाणे पादप्रमाणे गुडस्य तुलाममूनि च द्रव्याणि दन्त्यादीनि द्विपलिकानि विचूर्णितानि चूर्णीकृतानि दत्त्वा पुनर्विपचेत्। दन्तीत्रिवृत्करिकणाचविकाजमोदापाठाग्निपिप्पलिजटा-त्रिकटूनि। करिकणा हस्तिपिप्पली। शेषाणि प्रसिद्धानि। तावद्विपचे-द्यावल्लेहो भवति। तस्मिन् लेहे शीते तं पलप्रमाणं चूर्णमत्र लेहे निधाय निक्षिप्य। केषां? एलावराङ्गदलकुञ्जरकेसराणाम्। एला त्रुटिः। वराङ्गं त्वक्। दलं पत्रकम्। कुञ्जरकेसरं नागकेसरम्। गुल्मादीनामितरेतर-द्वन्द्वः। तेषां कफोदरादीनां च कृमिरोगिणां च। अरुष्करगुडो भल्लातक-गुडः। एषां सर्वेषां वातश्लेष्मसमुद्भवानां शस्तः प्रशस्त इति। ननु च सामान्येनोक्तत्वाद् गुल्मादीनां कस्मादेवं विशेषोऽवधार्यत इति? उच्यते-अत्यग्निगुणभूयिष्ठत्वात् वातश्लेष्महरत्वाच्च भल्लातकगुडस्यादरः प्रतीतः। तथा च हारीतः—"गुडं गुल्महरं श्रेष्ठं ग्रहण्यर्शोनिवर्त्तनम्। तीक्ष्ण-मग्निसमं वीर्ये वैद्याः प्राहुररुष्करम्" ॥ १४०—१४२ ॥

इति ग्रहणीचिकित्सा।

भल्लातकगुड—शुद्ध भल्लातक १००० ( संख्या से )। क्वाथार्थ जल २ द्रोण। अवशिष्ट क्वाथ आधा द्रोण (८ प्रस्थ)। इस क्वाथ को छानकर इसमें १ तुला (१० सेर) गुड़ घोलकर पकावें। जब गाढा होजाय तब दन्तीमूल, निसोत, गजपिप्पली, चव्य, अजमोदा, पाढ, चित्रक, पिप्पलीमूल, त्रिकटु; प्रत्येक के २ पल चूर्ण का प्रक्षेप दें और अच्छीप्रकार मिला नीचे उतार लें। शीतल होने पर छोटी इलायची, दारचो ो तेजपत्र, नागकेसर; प्रत्येक का १ पल चूर्ण मिलादें। मात्रा—आधा तोला। यह गुल्म,

अग्निमान्द्य, अर्श, संग्रहणी, पाण्डुरोग, शोथ, विषमज्वर, कफोदर, किलास ( श्वित्र ) भगन्दर तथा कृमिरोग में प्रशस्त है ॥ १४२—१४२ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*ग्रहणीचिकित्सा समाप्ता ।*

## अथार्शश्चिकित्सा ।

ग्रहणीचिकित्सानन्तरं यथोद्देशमर्शश्चिकित्सामाह—

अर्शांसि सन्ति पवनादसितानि पित्ता-
द्रक्ताच्च विद्रुमनिभानि कफात्सितानि ।
सर्वोद्भवानि सहजानि च दुःसहानि
घ्राणाक्षिकर्णमुखगुह्यगुदेषु च स्युः ॥ १४३ ॥

अर्शांसि पवनाद्वातादसितानि कृष्णानि सन्ति भवन्ति । पित्ताद्रक्ताच्च विद्रुमनिभानि प्रवालवर्णानि । कफात् सितानि । सर्वोद्भवानि त्रिदोषजानि । सहजानि दुष्टशुक्रशोणितसम्भवानि । दुःसहान्यसाध्यानि सम्भवन्ति । तानि च घ्राणाक्षिकर्णमुखगुह्यगुदेषु च स्युः भवेयुः । गुह्यं वराङ्गं लिङ्गश्च ॥ १४३ ॥

वातज अर्श, पित्तज अर्श तथा कफज अर्श क्रमशः काले, मूंगे के समान रक्तवर्ण के तथा श्वेतवर्ण के होते हैं। त्रिदोषज तथा सहज अर्श असाध्य होते हैं। ये अर्श ( मांसाङ्कुर ) नाक, आंख, कान, मुख, गुह्य ( शिश्न तथा योनि ) एवं गुदा में भी हो सकते हैं ॥ १४३ ॥

इदानीं सर्वार्शसां सामान्यलक्षणमाह—

आध्मानसक्थिसदनानलमान्द्यगुल्म-
प्लीहोदरश्वयथुपाण्डुगुदग्रहाः स्युः ।
सश्वासकासगलदाहमुखप्रसेकाः
सामान्यमेतदिति लक्षणमर्शसां स्यात् ॥ १४४ ॥

इत्येतत् आध्मानादिलक्षणं चिह्नं सामान्यं साधारणं सर्वेषां अर्शसां स्यात् भवेत् । आध्मानं जठरस्य । सक्थिसदनमिति सक्थिः गुल्फविटपान्तम् । सदनमवसादः । अनलमान्द्यमग्निमान्द्यम् । गले दाहः कण्ठदहनम् । मुखप्रसेकः मुखे श्लेष्मक्षरणम् । गुल्मादयः प्रसिद्धाः । आध्मानादीनामितरेतरद्वन्द्वसमास इति ॥ १४४ ॥

अर्श रोग में सामान्यतः आध्मान, सक्थिसदन ( टांग की शिथिलता ), अग्निमान्द्य, गुल्म, प्लीहोदर, शोथ, पाण्डु, गुदा में वेदना, श्वास, कास, गलदाह ( गले में जलन ) तथा मुखप्रसेक ( मुख में श्लेष्मा का स्राव ) आदि लक्षण दिखाई देते हैं ॥ १४४ ॥

इदानीमर्शसां लक्षणानन्तरं चिकित्साभेदमाह—

तत्रार्शसामुपदिशन्ति चतुःप्रकार-
मारोग्यमेकमगदैरपरं च शस्त्रैः ।
क्षारेण चान्यदनलेन चतुर्थमित्थ-
मित्यागमैककृतिनः किल सुश्रुताद्याः ॥ १४५ ॥

तत्रैवं स्थिते अर्शसां किल चतुःप्रकारं चतुर्भिः प्रकारैः सुश्रुताद्या आरोग्यमुपदिशन्ति । तदेव चातुर्विध्यमाह—एकं तावदगदैरौषधैः । अपरं द्वितीयं शस्त्रैः शस्त्रकर्मभिः । अन्यत् तृतीयं क्षारेण क्षारकर्मणा । अन्यच्चतुर्थमनलेनाग्निकर्मणेति । इत्थमनेन प्रकारेण चतुःप्रकारमारोग्यसाधनमिति । सुश्रुताद्याः सुश्रुत आदौ येषां औपधेनवौरभ्रपुष्कलावतादीनां शल्यतन्त्रविदां ते तथा । आगमैककृतिनः आगमे वैद्यकशास्त्रे त एव एककृतिनः पण्डिता इति ॥ १४५ ॥

अर्श की चिकित्सा—(१) औषध; (२) शस्त्र; (३) क्षार, तथा (४) अग्नि द्वारा चार प्रकार से की जाती है ऐसा सुश्रुत आदि प्राचीन आचार्यों ने कहा है ॥१४५॥

इदानीं तस्यारोग्यचतुष्टयस्य अवस्थाभेदेन साधनभेदमाह—

स्यादौषधैरचिरजेषु चिरोद्गतेषु
क्षारेण च क्षतजपित्तसमुद्भवेषु ।
स्थूलेषु वातकफजेष्वनलेन शस्त्रैः
सत्त्वाधिकस्य बलिनश्च सतश्चिकित्सा ॥ १४६ ॥

अचिरजेषु स्तोककालजेष्वर्शस्सु वक्ष्यमाणैरौषधैश्चिकित्सा स्यात् भवेत्। चिरोद्भतेषु बहुकालजेषु। क्षतजपित्तसमुद्भवेषु क्षतजं च पित्तं च क्षतजपित्तं ताभ्यां उद्भवो येषां तानि तथा। क्षतजं रक्तम्। तेषु च क्षारेण चिकित्सा। चकारादौषधैश्च। स्थूलेषु पृथुषु वातकफजेषु अनलेनाग्निना चिकित्सा। सत्त्वाधिकस्य च सुसत्त्वस्य। बलिनः सतः सञ्जातबलस्य शस्त्रैश्चिकित्सा कार्येति ॥ १४६ ॥

नवीन उत्पन्न अर्श में औषध द्वारा, चिरकालोत्पन्न, पैत्तिक अर्श अथवा रक्तार्श में क्षार प्रयोग एवं औषध द्वारा, स्थूल (मोटे) तथा वातकफज अर्श में अग्नि द्वारा एवं सहनशील तथा बलवान् पुरुष की अर्श में शस्त्र द्वारा चिकित्सा की जाती है ॥ १४६ ॥

पूर्वमौषधैः साधनमुक्तमतस्तान्याह—

सद्भेषजैरचिरजातगुदामयघ्नैः
शाम्यन्ति तक्रयवसक्तुगुडाभयाद्यैः।
काङ्कायनोक्तवटकैरथ सूरणाद्यैः
प्राक् प्राणदैरिति मतं हि भिषग्वराणाम् ॥१४७॥

सद्भेषजैर्वीर्योत्कटैरौषधैः। अचिरजातगुदामयघ्नैः न चिरमचिरं, अचिरं जाता अचिरजाता, अचिरजाताश्च ते गुदामयाश्च अचिरजातगुदामयाः, तान् घ्नन्तीत्यचिरजातगुदामयघ्नानि तैः। कतरैः? तक्रयवसक्तुगुडाभयाद्यैः। तक्रं च यवसक्तवश्च गुडेन सह अभया च तक्रयवसक्तुगुडाभयास्ता आद्या येषां तैः तथा काङ्कायनोक्तवटकैः काङ्कायनो नाम ऋषिः तेनोक्ता ये वटकास्तैः। अथ सूरणाद्यैः प्राणदैश्च वटकैर्वक्ष्यमाणैः। प्राक् प्रथमं प्रयुक्तैः शाम्यन्ति सम्यगुपशमं यान्ति। भिषग्वराणां सद्वैद्यानामिति मतम् ॥ १४७ ॥

नवीन उत्पन्न अर्श को नष्ट करनेवाले–तक्र ( छाछ ) जौ के सत्तू, गुडयुक्त हरड़, काङ्कायन वटक, सूरणमोदक, प्राणदवटक, प्रभृति प्रशस्त औषधों द्वारा प्रथम चिकित्सा करने से अर्श शान्त होते हैं ॥ १४७ ॥

पुनरप्यपराण्यौषधान्याह—

तक्रेण वा मगधजादिभिरन्वितेन
चूर्णीकृतैः कफकृता न गुदामयाः स्युः।

भल्लातकैरथ तिलैरसितैः प्रयुक्तैः
प्राग्भोजनादिति न सन्ति कृतैरुपायैः ॥ १४८ ॥

तक्रेण वा मथितेन मगधजादिभिः पिप्पल्यादिगणोक्तैश्चूर्णीकृतैः। अन्वितेन संयुक्तेन। कफकृताः श्लेष्मजाः गुदामया अर्शोविकारा न स्युर्न भवेयुः। भल्लातकैश्च प्रयुक्तैः प्रयोजितैः स्वविधानेन। अथवा तिलैः असितैः कृष्णैः। प्राक्भोजनात्प्रयुक्तैरितिपूर्वोक्तैरुपायैः कृतैर्न सन्ति न भवन्ति अर्शोविकारा इति ॥ १४८ ॥

पिप्पल्यादिगण की औषधों के चूर्ण से युक्त छाछ के पीने से कफज अर्श नष्ट होते हैं। इसीप्रकार भोजन से पूर्व यथाविधि भल्लातक ( भिलावे ) अथवा काले तिलों के प्रयोग से अर्श पैदा नहीं होते ॥ १४८ ॥

काङ्कायनोक्तवटकैः शाम्यन्तीत्युक्तमतः काङ्कायनोक्तं वटकमाह–

पथ्याफलस्य गुरुणः पलपञ्चकं स्या-
देकं पलञ्च मरिचादपि जीरकाच्च ।
कृष्णा तदुद्भवजटा चविकाग्निशुण्ठ्यः
कृष्णादिपञ्चकमिदं पलतः प्रवृद्धम् ॥ १४९ ॥
एतैररुष्करपलाष्टकसंयुतैश्च
कन्दस्त्वरुष्करपलात् द्विगुणः प्रकल्प्यः ।
स्याद्यावशूककुडवार्द्धमतः समस्तात्
योज्यो गुडो द्विगुणितो वटकीकृतश्च ॥ १५० ॥
काङ्कायनेन मुनिना वटकः किलाय-
मुक्तः प्रजाहिततमेन गुदामयघ्नः ।
क्षाराग्निशस्त्रपतनैरपि ये न सिद्धाः
सिध्यन्त्यनेन वटकेन गुदामयास्ते ॥ १५१ ॥

पथ्याफलस्य गुरुणः पलपञ्चकं स्यादिति–पथ्या हरीतकी, तस्या गुरुणोः फलस्य पलपञ्चकं स्याद्भवेत्। एकं पलं मरिचादपि जीरकाच्च मरिचादेकं पलं जीरकाच्चैकं पलम्। कृष्णा तदुद्भवजटा चविकाग्निशुण्ठ्यः इदं कृष्णादिपञ्चकं पलतः पलादारभ्य उत्तरोत्तरं प्रवृद्धम्। एतदुक्तं भवति–

कृष्णा पिप्पली तस्या एकं पलम्। तदुद्भवजटा तच्छब्देन कृष्णायाः परामर्शः तेन पिप्पलीमूलस्य द्वे पले। चविका चव्या तस्याः त्रीणि पलानि। अग्निश्चित्रकस्तस्य चत्वारि पलानि। शुण्ठ्याः पञ्चपलानि। एतैः अरुष्करपलाष्टकसंयुतैः स्यात्। एतैः पूर्वोक्तैर्द्रव्यैः अरुष्करं भल्लातकं तस्य पलाष्टकं अष्टौ पलानि तैः संयुतैः सयुक्तैः स्यात् भवेत्। कन्दस्त्वरुष्करपलात् द्विगुणः प्रकल्प्यः। भल्लातकात् द्विगुणः सूरणः षोडशपलानि प्रकल्प्यः कल्पनीयः। यावशूकं कुडवार्द्धं स्यात् भवेत्। यावशूको यवक्षारः तस्य कुडवार्द्धं द्वे पले। अतः अस्मात् पूर्वोक्तात् समस्तात् योज्यो योजनीयो गुडो द्विगुणितो द्विगुणीकृतः षण्णवतिपलानि भवन्ति। अवटको वटकः क्रियते स्म इति वटकीकृतः। काङ्कायनेन मुनिना वटकः किलायमुक्तः। किलैवं विश्रूयते। काङ्कायनो नाम मुनिः मुमुक्षुः तेनायं वटकः प्रोक्तो भाषितः प्रजाहिततमेन। गुदामयघ्नः गुदामयोऽर्शोविकारस्तं हन्तीति गुदामयघ्नः। ये गुदामयाः क्षाराग्निशस्त्रपतनैर्न सिद्धाः न सिद्धिं गताः ते सर्वे अनेन वटकेन गुदामयाः सिध्यन्तीत्येवमुक्तमिति ॥ १४९—१५१ ॥

काङ्कायनवटक—हरड़ ५ पल, कालीमिर्च १ पल, जीरा १ पल, पिप्पली १ पल, पिप्पलीमूल २ पल, चव्य ३ पल, चित्रक ४ पल, सोंठ ५ पल, शुद्ध भिलावे ८ पल, सूरण (ज़मींकन्द) १६ पल, यवक्षार २ पल। समस्त चूर्ण से दुगुना गुड़। यथाविधि पाक कर वटक बनावें। मात्रा—आधा तोला। जो अर्श क्षार, अग्नि तथा शस्त्रकर्म द्वारा भी नष्ट नहीं होते वे भी इस वटक के सेवन से शान्त होजाते हैं। प्रजा के कल्याण की कामना करते हुए काङ्कायन मुनि ने यतः इन वटकों का अपने शिष्यों को उपदेश दिया था अत एव इसका नाम काङ्कायनवटक है ॥ १४९—१५१ ॥

पूर्वमुक्तमथ सूरणाद्यैः शाम्यन्तीत्यथ सूरणमोदकानाह—

भागाः षोडशवृद्धदारसहितात् कन्दात् कृतात्कर्कशात्
अष्टौ चित्रकमूलतश्च तुलिताः स्युस्तालमूलीयुतात्।
तालीसत्रिफलाविडङ्गमगधाविश्वोपकुल्याजटा-
भल्लातैश्च चतुःपलैर्द्विपलिकैरेलावराङ्गोषणैः ॥ १५२ ॥
इत्याभिः सकलैर्गुडद्विगुणितैः कुर्याद् भिषङ् मोदकान्
तैर्भुक्तैश्च नृणां न सन्ति गुदजा न प्लीहपाण्ड्वामयाः।

नो गुल्मग्रहणीगुदोदररुजः कोष्ठे न शूलानि च
श्वासश्लीपदशोफविद्रधियकृद्ग्रन्थ्यर्बुदादीनि च ॥१५३॥

भागाः षोडशवृद्धदारसहितात्कन्दात्कृतात्कर्कशादिति कन्दात् सूरणात्। कर्कशात् रूढात्। षोडशभागाः स्युर्भवेयुः। वृद्धदारो वृद्धदारकस्तेनसहितात्कन्दात् तथैव षोडश वृद्धदारकस्य भागाः प्रत्येकं ददाति। अष्टौ चित्रकमूलतश्च तुलिताः स्युः। तालमूलीयुतादिति। तालमूली मूषली मूशलकन्दः। चकारात्तालमूल्याश्चाष्टौ भागाः। चित्रकमूलतश्चित्रकमूलादष्टौ भागाः स्युः। तालीसत्रिफलाविडङ्गमगधाविश्वोपकुल्याजटाभल्लातैश्चेति—तालीसादीनामितरेतरद्वन्द्वसमासः। तालीसं तालीसपत्रम्। त्रिफला हरीतक्यामलकविभीतकानि। विडङ्गं कृमिशत्रुः। मगधा पिप्पली। विश्वं शुण्ठी। उपकुल्याजटा पिप्पलीमूलम्। भल्लातं भल्लातकास्थीनि। इत्येभिः प्रत्येकं चतुःपलैर्द्विपलिकैश्चैलावराङ्गोषणैरिति-एला त्रुटिः। वराङ्गं त्वक्। ऊषणं मरिचम्। एभिरेलादिभिः प्रत्येकं द्विपलिकैरित्येभिः सकलैः समस्तैः कन्दादिभिः गुडद्विगुणितैरिति गुडो द्विगुणितो येषां कन्दादीनां तानि तैरेतदुक्तं भवति—सर्वेषां द्विगुणो गुडः। भिषग्वैद्यो मोदकान् कुर्यात्। यैर्मोदकैर्भक्षितैर्नृणां गुदजादयो न भवन्ति ॥ १५२—१५३ ॥

सूरणमोदक—ज़मीकन्द (सूरण) १६ पल, विधारा बीज १६ पल, चित्रकमूल ८ पल, मूसली ८ पल, तालीशपत्र, त्रिफला, वायविडंग, पिप्पली, सोंठ, पिप्पलीमूल, शुद्ध भिलावे; प्रत्येक ४ पल, छोटी इलायची, दारचीनी, कालीमिर्च; प्रत्येक २ पल। इन्हें एकत्र मिश्रित करके समस्त चूर्ण से द्विगुण गुड द्वारा यथाविधि पाक कर मोदक बनालें। मात्रा—आधे तोले से एक तोले तक। इस मोदक के सेवन से अर्श, प्लीहारोग (तिल्ली), पाण्डु, गुल्म, ग्रहणी, गुदारोग, कोष्ठज शूल, श्वास, श्लीपद, शोफ, विद्रधि, यकृद्रोग, ग्रन्थि तथा अर्बुद आदि रोग नष्ट होते हैं॥ १५२—१५३ ॥

प्रागुक्तं प्राणदैः शाम्यन्तीति प्राणदमोदकानाह—

तालीसज्वलनोषणाः सचविकास्तुल्या द्विभागा भवेत्
कृष्णा मूलसमन्वितास्त्रिपलिका शुण्ठी चतुर्जातकम्।
स्यान्मुष्टिप्रमितं गुडात्त्रिगुणितैरेभिः कृता मोदकाः
कासश्वासगदाग्निमान्द्यगुदजप्लीहप्रमेहापहाः ॥ १५४ ॥

तालीसज्वलनोषणाः सचविकास्तुल्या इति—तालीसंतालीसपत्रम्। ज्वलनश्चित्रकः। ऊषणानि मरिचानि। सचविकाः चविकायुक्तास्तुल्याः प्रत्येकं पलिकाः। द्विभागा भवेत् कृष्णा मूलसमन्विता पिप्पलीमूलसमन्विता। मूलेन सहिता द्विभागा भवेदेतदुक्तं भवति—पिप्पली पिप्पलीमूलयोर्द्वे द्वे पले। त्रिपलिका शुण्ठी त्रिपलप्रमाणा। चतुर्जातकमेलापत्रत्वङ्नागकेसराणि। स्यात् भवेत्। मुष्टिप्रमितं पलप्रमाणम्। गुडद्विगुणितैरेभिः पूर्वोक्तैः सर्वैर्गुडो द्विगुणितो येषां तानि तथा तैः कृताः संस्कृता मोदकाः कासादीनपघ्नन्तीति ॥ १५४ ॥

इति अर्शश्चिकित्सा समाप्ता।

प्राणदमोदक—तालीसपत्र, चित्रकमूल, कालीमिर्च, चव्य; प्रत्येक १ पल, पिप्पली २ पल, पिप्पलीमूल २ पल, सोंठ ३ पल चतुर्जात ( छोटी इलायची, दारचीनी, तेजपत्र, नागकेसर ); प्रत्येक १ पल। सम्पूर्ण चूर्ण से तिगुना गुड। यथाविधि पाक कर मोदक बनावें। मात्रा—आधे तोले से २ तोले तक। इसके सेवन से कास, श्वास, मन्दाग्नि, अर्श, प्लीहा ( तिल्ली ) तथा प्रमेह प्रभृति रोग नष्ट होते हैं ॥ १५४ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*मर्शश्चिकित्सा समाप्ता।*

---

## अथ भगन्दरचिकित्सा।

अर्शश्चिकित्सानन्तरं यथोद्देशं भगन्दरचिकित्सामाह—

वातेन पित्तेन कफेन सर्वैः
क्षतेन च स्युर्गुदसन्निकृष्टाः।
भगन्दराख्याः पिटिकाः प्रपक्वा
बहुव्रणाः कष्टतमाः प्रदिष्टाः ॥ १५५ ॥

भगन्दराख्याः पिटिका भवेयुः। वातपित्तकफैः प्रत्येकं सर्वैस्त्रिभिरपि क्षतेन च व्रणेन। गुदसन्निकृष्टा गुदाभ्यासे अङ्गुले द्व्यङ्गुले

वा। यदा च प्रपक्का बहुव्रणाश्च भवन्ति तदा कष्टतमा अतिशयेन कष्टाः प्रदिष्टा उपदिष्टा इति। अभिन्नाः पिटिकाः, भिन्नाः भगन्दराः। तथा च सुश्रुतः—"अभिन्नाः पिटिकाः ज्ञेया भिन्नाश्चापि भगन्दराः। घोराः साधयितुं दुःखाः सर्व एव भगन्दराः॥ तेष्वसाध्यस्त्रिदोषोत्थः क्षतजश्च विशेषत इति" ॥ १५५ ॥

वात, पित्त, कफ, सन्निपात एवं क्षत से गुदा के चारों ओर दो अंगुल के भीतर २ जो पिडका पक्क होकर नाडीव्रण का रूप धारण करले उसे भगन्दरपिडका कहते हैं। सम्पूर्ण भगन्दर कष्टसाध्य होते हैं ॥ १५५ ॥

वातपित्तकफसन्निपातक्षतनिमित्तभगन्दराख्या पिडकोक्ता साम्प्रतं तस्याः यथासंख्येन शतपोनकादिप्रकारमाह—

तस्याः प्रकाराः शतपोनकोष्ट्र-
ग्रीवापरिस्राविकृताः क्रमेण।
शम्बूकिकोन्मार्गगता भिषग्भि-
स्तथा चिकित्स्या न यथैति पाकम् ॥१५६॥

तस्याः भगन्दरपिडकायाः शतपोनकादयः प्रकारा भेदाः क्रमेण यथासंख्येन भवन्ति। एतदुक्तं भवति-वातेन शतपोनकः। शतपोनकश्चल्लणिका। यथा बहुच्छिद्रा चल्लणिका तथा सोऽपि बहुच्छिद्रो व्रणो भवति। पित्तेन उष्ट्रग्रीवस्तदाकृतिः। श्लेष्मणा परिस्रावि अजस्रं पिच्छिलस्रावि। शम्बूकिकावर्त्तस्त्रिदोषजः। उन्मार्गी क्षतनिमित्तः। एवमनेकप्रकारा सा पिडका। भिषग्भिर्वैद्यैस्तथा सा पिटिका चिकित्स्या यथा न पाकमेति गच्छति ॥ १५६ ॥

शतपोनक, उष्ट्रग्रीव, परिस्रावी, शम्बूकावर्त्त तथा उन्मार्गी नामक भगन्दर क्रमशः वात, पित्त, कफ, सन्निपात तथा क्षत से उत्पन्न होते हैं। इसमें चिकित्सा द्वारा पिडकाओं को पक्क होने से बचाना चाहिये ॥ १५६ ॥

इदानीं तस्याश्चिकित्सितमाह—

हिता जलौकोभिरसृग्विशुद्धिः
प्राक् पाकतः स्यादचिरोद्गतायाः।

पक्वां च सम्यग्व्रणवच्चिकित्से-
च्चिकित्सकस्तामतिकृच्छ्रसाध्याम् ॥ १५७ ॥

अचिरोद्गतायाः स्तोककालजातायाः पिटिकायाः पाकतः प्राक् पूर्वं जलौकोभिरसृग्विशुद्धिः रक्तशुद्धिर्हिता मोक्षणात् । चिकित्सको वैद्यः सम्यक् पक्वां व्रणवच्चिकित्सेत् । व्रणवच्चिकित्सां शोधनरोपणादिकां क्रियां कुर्यात् । ताम्भगन्दरपिडकामतिकृच्छ्रसाध्यां अतिशयेन दुःखसाध्यां महता प्रयत्नेन चिकित्सेत् त्वरितमिति ॥ १५७ ॥

परिपक्व होने से पूर्व नवीन उत्पन्न हुई २ पिड़का पर जोंकें लगा कर अशुद्ध रक्त का निर्हरण करना चाहिये। जब पिड़का पक्व हो जाय तब उस अत्यन्त कष्टसाध्य भगन्दरपिडका की व्रण के समान चिकित्सा करनी चाहिये ॥ १५७ ॥

पक्वां व्रणवच्चिकित्सेदित्युक्तमतः पक्वायाश्चिकित्सितमाह—

शुक्राशयं यदि गतिर्नगता गुदं वा
स्यात्सेवनीमथ भवेत्प्रचुरव्रणा वा ।
शस्त्रैर्विदार्य विधिवद् व्रणवद्भिषक् तां
क्षारेण वा ज्वलनतप्तशलाकया वा ॥ १५८ ॥

शुक्राशयं गुदं वा अथ सेवनीं यदा गतिर्गता न भवति। शुक्राशयो बस्तिद्वारस्याधः द्व्यङ्गुले दक्षिणे पार्श्वे। "द्व्यङ्गुले दक्षिणे पार्श्वे बस्तिद्वारस्य चाप्यधः। मूत्रस्रोतःपथाच्छुक्रं पुरुषस्य प्रवर्त्तते"। एतदुक्तं भवति-शुक्राशयगुदसेविन्योर्यदि न भिन्ना भवन्ति प्रचुरव्रणा बहुव्रणा वा यदि न भवन्ति तदा शस्त्रैर्मण्डलाग्रादिभिर्विदार्य छेदं कृत्वा विधिवत् भगन्दरोक्तेन विधिना व्रणवत् व्रणविधानेन सामान्यविशेषोक्तेन भिषक् वैद्यस्तां क्षारेण वा। ज्वलनोऽग्निस्तेन तप्ता या शलाका तया च दग्ध्वा चिकित्सेत् ॥ अग्निक्षारयोर्विषयविभागः—"कृशदुबर्लभीरूणां या गती रक्तपित्तजा तां क्षारेण । मांसोपचयप्राणसत्त्वादिसंयुक्तानां वातश्लेष्मजां ज्वलनेन चिकित्सेदिति" ॥

इति भगन्दरचिकित्सा समाप्ता।

यदि नाड़ीव्रण शुक्राशय, गुदा तथा सेवनी (सीवन) तक न पहुंचा हो, जो बहुव्रणा हो अर्थात् यदि एक नाड़ीव्रण की बहुत सी शाखायें हो गई हों

तो यथाविधि शस्त्र द्वारा काट कर व्रण के समान चिकित्सा करें अथवा क्षार एवं अग्नितप्त लोहशलाका द्वारा दाह करें ॥ १५८ ॥

इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां
परिमलाख्यायां चिकित्साकलिकाव्याख्यायां
भगन्दरचिकित्सा समाप्ता ।

---

## अथ श्वयथुचिकित्सा

भगन्दरचिकित्सानन्तरं यथोद्देशं श्वयथुचिकित्सामाह—

गुडार्द्रकं वाथ सदारुविश्वं
सनागरं वाथ किराततिक्तम् ।
योगत्रयं शोफहरं प्रदिष्ट-
मित्यौषधं श्रेष्ठतमं नराणाम् ॥ १५९ ॥

एतद् गुडार्द्रकादियोगत्रयं शोफहरं प्रदिष्टम् । गुडतुल्यमार्द्रकं प्रथमो योगः । अथ सदारुविश्वम्, दारु देवदारु । विश्वं शुण्ठी । देवदारु शुण्ठीसमं द्वितीयो योगः । अथवा किराततिक्तं सनागरं किराततिक्तं शुण्ठीसमं तृतीयो योगः । गुडार्द्रकभक्षणेन । देवदारुशुण्ठी किरातशुण्ठी वा एतत् द्वयं क्वाथकल्कविधिना नराणां प्राणिनां शोफवतां शोफयुक्तानाम् । इत्येतद्योगत्रयं प्रदिष्टमुद्दिष्टमिति ॥ १५९ ॥

१—गुड़ और अदरख । २—देवदारु और सोंठ । ३—चिरायता और सोंठ । ये तीनों योग शोथ को हरने में श्रेष्ठतम हैं ॥ १५९ ॥

इदानीं कृष्णाद्यं चूर्णं चरकोक्तमाह—

कृष्णाग्निविश्वघनजीरककण्टकारी-
पाठानिशाकरिकणामगधाजटानाम् ।
चूर्णं कवोष्णसलिलैरवलोड्य पीतं
नातः परं श्वयथुरोगहरं नराणाम् ॥ १६० ॥

कृष्णादीनां चूर्णं कवोष्णसलिलैः पीतं नराणां नातः परं श्वयथुरोगहरमस्ति । कृष्णादीनामितरेतरद्वन्द्वसमासः । कृष्णा पिप्पली ।

अग्निश्चित्रकः। विश्वं शुण्ठी। घनं मुस्तम्। निशा हरिद्रा। करिकणा हस्तिपिप्पली। मगधाजटा पिप्पलीमूलम्। जीरककण्टकारीपाठाः प्रसिद्धाः। एषां समानं चूर्णं कवोष्णसलिलैरुष्णोदकैरवलोड्यालोडनं कृत्वा पीतं नराणां परमस्मात्परमुत्कृष्टं श्वयथुरोगहरं नास्तीति॥

कृष्णाद्य चूर्ण—पिप्पली, चित्रक, सोंठ, मोथा, श्वेतजीरा, छोटी कटेरी, पाढ़ हल्दी, गजपिप्पली, पिप्पलीमूल; इनके चूर्णों को एकत्र समपरिमाण में मिला योग्य-मात्रा में इस चूर्ण को कोसे जल में आलोडन कर सेवन कराना चाहिये। मात्रा—४ रत्ती से ८ रत्ती तक। इसके सेवन से सर्वांग शोथ नष्ट होता है। शोथ को नष्ट करने के लिये यह अत्यन्त उत्कृष्ट औषध है॥ १६०॥

अतः परं चरकोक्तां कंसहरीतकीमाह—

कथनपलशतं युताष्टविंशं
गुडतुलया च सहाभयाशतेन।
गुडवदिति पचेत् द्विपश्चमूल्याः
श्रृतमवतार्य ततः सुशीतले च॥ १६१॥
त्रिकटुकरजसा त्रिजातचूर्णं
सुरभि निधाय यवाग्रजं च किञ्चिद्।
मृदुमधुकुडवद्वयेन सार्द्धं
श्वयथुहरश्चरकोदितोऽवलेहः॥ १६२॥

कथनपलशतम्। किं विशिष्टम्? युताष्टविंशं युताष्टविंशतिर्यस्मिन् तद्युताष्टविंशं कंसद्वयमित्यर्थः। कस्याः? द्विपश्चमूल्याः। द्विपश्चमूली दशमूली तस्याः पलशतं उदकद्रोणे विपाच्य चतुर्भागावशेषं कंसो भवति। ततः गुडतुलया गुडपलशतेन अभयाशतेन हरीतकीफल-शतेन च सह पचेत् क्वाथं गुडवदिति। गुडपाकं पचेदित्यनेन लेहपाक आक्षिप्तः। श्रृतं पक्वमवतार्य ततोऽनन्तरं सुशीतले च अतिशयेन शीते। त्रिकटुकं शुण्ठीमरिचपिप्पल्यः। तस्य रजसा उपलक्षितं त्रिजातचूर्णम् त्रिजातं एलादलदारुसिताः। एषां चूर्णाष्टपलं सुरभि सुगन्धि निधाय दत्त्वा यवाग्रजं यवक्षारश्च किञ्चित्। किञ्चिच्छब्देनार्द्धपलं जेज्झटाचार्येण चरके श्वयथुचिकित्सायां व्याख्यातम्। मृदुमधुकुडवद्वयेन सार्द्धं,

मृदु च तन्मधु च मृदुमधु। मृदुशब्दस्य सौकुमार्यवाचित्वात् असान्द्रवाचित्वाच्च तद्रूपद्वयस्य माक्षिकस्य ग्रहणम्। तस्य कुडवद्वयं षोडशपलानि तेन सार्द्धं सह। श्वयथुहरः श्वयथुं हरति चरकोक्तोऽवलेह इति॥ १६१—१६२॥

इति श्वयथुचिकित्सा समाप्ता।

कंसहरीतकी—दशमूल के १२८ पल क्वाथ में १ तुला गुड को घोल कर उसमें १०० हरड़ें डाल पाक करें। पकते २ जब गाढा होजाय तब नीचे उतार लें। शीतल होने पर त्रिकटु (मिलित), छोटी इलायची, तेजपत्र, दारचीनी; प्रत्येक २ पल, यवक्षार ४ पल का प्रक्षेप देकर अच्छी प्रकार आलोडन करें और अन्त में १६ पल शहद मिला लें। मात्रा—लेह आधा तोला तथा १ हरड़। यहां पर दशमूल का क्वाथ करते हुए हरड़ों को पोटली में बांध डाल देना चाहिये। क्वाथार्थ—दशमूल (मिलित) ४ प्रस्थ, जल ३२ प्रस्थ, शेष ८ प्रस्थ (१२८ पल)। पश्चात् गुड़ के साथ पाक करते हुए हरड़ों को डाल दें। अथवा हरड़ों को स्विन्न न कर गुड़ के साथ पाक करते समय उनके चूर्ण को डाल दें और गाढ़ा होने पर पूर्ववत् प्रक्षेप आदि दें। हरीतकीचूर्ण के साथ पाक करने पर इसकी मात्रा आधा तोले से १ तोले तक है॥ १६१—१६२॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*श्वयथुचिकित्सा समाप्ता।*

---

## अथ उदररोगचिकित्सा।

श्वयथुचिकित्सानन्तरं यथोद्देशमुदरचिकित्सितमाह—

**रोहीतकत्वक्त्रिफलाद्रवन्ती-**
**दन्तीकषायः सकटुत्रिकश्च।**
**सयावशूकः सकलोदरघ्नः**
**स्नुक्पिप्पली वा सकलोदरघ्नी॥ १६३॥**

रोहीतकादिकषायः सकलोदरघ्नः। रोहीतकत्वक् च त्रिफला च द्रवन्ती च दन्ती च तास्तथा रोहीतकत्वक्त्रिफलाद्रवन्तीदन्त्यस्तासां कषायः। रोहीतको दाडिमपुष्पकः तस्य त्वक् वल्कलं रोहीत-

कत्वक्। त्रिफला पूर्वोक्ता। द्रवन्ती चीरितपत्रा। दन्ती घुणप्रिया। एषां क्वाथः सकटुत्रिकस्त्रिकटुकसहितः। सयावशूकः सयवक्षारः। एतदुक्तं भवति—त्रिकटुकयवक्षारचूर्णकर्षयुतः क्वाथः सकलोदरघ्नः। सकलाण्युदराणि हन्तीति सकलोदरघ्नः। स्नुक्पिप्पली वा स्नुहीक्षीरभाविता पिप्पली वा। वृद्ध्या सहस्रं यावत् पीता सकलोदरघ्नी। तथा च सुश्रुतः—"स्नुहीक्षीरभावितानां वा पिप्पलीनां सहस्रं कालेनेति" ॥ १६३ ॥

रोहीतकादिक्वाथ—रोहेड़े की छाल, हरड़, वहेड़ा, आंवला, द्रवन्तीमूल ( बड़ी दन्ती की जड़ ), दन्तीमूल; मिलित २ तोले। क्वाथार्थ जल ३२ तोले। अवशिष्ट क्वाथ ८ तोले। इस क्वाथ में त्रिकटु चूर्ण तथा यवक्षार का प्रक्षेप देकर पीने से सम्पूर्ण उदररोग नष्ट होते हैं। अथवा स्नुहीक्षीर से भावित पिप्पलीचूर्ण के सेवन से भी विरेचन होकर उदररोग नष्ट होते हैं। मात्रा १ रत्ती से २ रत्ती तक ॥ १६३ ॥

इदानीं चरकोक्तं नारायणचूर्णमाह—

द्वौ क्षारौ लवणानि पञ्च हपुषाधान्याजगन्धाशठी-
व्योषाजाज्युपकुञ्चिकाकृमिजितः कङ्कुष्ठकुष्ठाग्नयः।
उग्राग्रन्थिककारवीमिशियुतं योज्यं फलानां त्रयं
मूलं पुष्करजं यवान्यपि भवेदेतानि तुल्यान्यथ ॥१६४॥
त्रिवृद्विशाले द्विगुणे च दन्तिनी
त्रिसंगुणा स्याद्यवतिक्तका भवेत्।
चतुर्गुणा, चूर्णमुदाहृतं जनै-
रिदं हि नारायणमौषधं बुधैः ॥ १६५ ॥
उष्णोदकेन यवकोलकुलत्थतोयै-
स्तक्रेण मद्यदधिमस्तुसुरासवैर्वा।
नारायणं प्रपिबतः सकलोदराणि
नश्यन्ति विष्णुमिव दैत्यगणा द्विषन्तः ॥ १६६ ॥

नारायणं चूर्णं प्रपिबतः सकलोदराणि नश्यन्ति। यथा विष्णुं द्विषन्तो दैत्यगणा नश्यन्ति। द्वौ क्षारौ यवक्षारस्वर्जिकाक्षारौ।

लवणानि पञ्च सैन्धवबिडसौवर्चलसामुद्रपांशुलवणानि। हपुषाधान्याजगन्धासटीव्योषाजाज्युपकुञ्चिकाकृमिजितः। अजगन्धा वस्तगन्धा वोवइका। व्योषं त्रिकटुकम्। अजाजी जीरकम्। उपकुञ्चिका कृष्णजीरकम्। कृमिजिद्विडङ्गम्। हपुषाधान्यसटीकङ्कुष्ठकुष्ठाग्नयश्च प्रसिद्धाः। एवं उग्राग्रन्थिककारवीमिशियुतमिति—उग्रा वचा। ग्रन्थिकं पिप्पलीमूलम्। कारवी अजमोदा। मिशिः शतपुष्पा। योज्यं फलानां त्रयं त्रिफला। मूलं पुष्करजं यवान्यपि भवेदेतानि तुल्यान्यथ। मूलं पुष्करजं पुष्करमूलम्। यवानी प्रसिद्धा। एतानि सर्वाण्यपि तुल्यानि तुल्यभागानि। त्रिवृद्विशाले द्विगुणे। त्रिवृत्त्रिवृता। विशाला इन्द्रवारुणी। एते द्विगुणे मूलभागात्। दन्तिनी द्रवन्ती त्रिसङ्गुणा स्याद्भवेत् मूलभागात्। यवतिक्तका भवेच्चतुर्गुणा मूलभागात्। चूर्णमुदाहृतं जनैरिदं हि नारायणमौषधं बुधैः—पण्डितैः इदं नारायणं चूर्णमुदाहृतं कथितम्। उष्णोदकादिभिः प्रपिबतः सकलोदराणि नश्यन्ति। यद्यपि सामान्येन सङ्क्षेपेणोक्तं तथापि रोगविशेषेण विशिष्टैर्द्रव्यैर्द्रष्टव्यम्। तथा च चरकाचार्यः—"तक्रेणोदरिभिः पेयो गुल्मिभिर्बदराम्बुना। आनद्धवाते सुरया वातरोगे प्रसन्नया। दधिमण्डेन विट्सङ्गे दाडिमाम्बुभिरर्शसि। परिकर्त्ते तु वृक्षाम्लैरुष्णाम्भोभिरजीर्णके। भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे। दंष्ट्राविषे मूलविषे सगरे कृत्रिमे विषे। यथार्हं स्निग्धकोष्ठेन पेयमेतद्विरेचनमिति"। एतच्चूर्णं विरेचनीयमुदरघ्नैर्घृतैः स्निग्धेन पातव्यमिति ॥ १६४—१६६ ॥

नारायणचूर्ण—यवक्षार, सर्जिकाक्षार, सैन्धानमक, बिडनमक, सौंचल नमक, सामुद्रनमक, औद्भिदलवण (रेह का नमक), हाऊबेर, धनियां, अजगन्धा (अजमोदाभेद) कचूर, त्रिकटु, जीरा, काला जीरा, वायविडंग, कंकुष्ठ, कुठ, चित्रक, वच, पिप्पलीमूल, कारवी ( अजमोदा )। सोये, त्रिफला, पुष्करमूल ( पोहकरमूल ), अजवाइन; सम्पूर्ण १ भाग, निसोत २ भाग, इन्द्रायण २ भाग, द्रवन्तीमूल ( बड़ी दन्ती की जड़ ) ३ भाग, यवतिक्ता ( कालमेघ ) ४ भाग; उपर्युक्त परिमाण में चूर्णों को एकत्र मिश्रित करें। इस चूर्ण को गरमजल, जौ का क्वाथ, बदरक्वाथ, कुलथी का क्वाथ, छाछ, मद्य, दधिमस्तु ( दही का पानी ), सुरा, आसव; इन में से किसी अनुपान के साथ उदररोग में अथवा अन्यरोगों में लक्षण तथा उपद्रवों की विवेचना करके सेवन करावें। यथा—उदररोग में छाछ के साथ, गुल्म में बदरक्वाथ ( बेर का क्वाथ ) के साथ, बद्धवात में सुरा के साथ, मलबन्ध में दही के पानी के साथ, इत्यादि। मात्रा—४ मासे ॥ १६४—१६६ ॥

इदानीं चरकोक्तं पटोलाद्यं चूर्णमाह—

पटोलमूलात्रिफलादलक्षपा-
विडङ्गबीजं समषट्कमेकतः।
सनीलिनीबीजपिचुत्रयं त्रिवृत्-
पलञ्च कम्पिल्लपलार्द्धयोजितम् ॥ १६७ ॥
गवाम्बुपीतं सकलोदरापहं
पलोन्मितं शोफहरञ्च कीर्त्तितम्।
सकामलं पाण्डुगदं हलीमकं
हरेत्पटोलादि भिषग्भिरुच्यते ॥ १६८ ॥

भिषग्भिः पटोलादिचूर्णमुच्यते। पटोलमूलत्रिफलादलक्षपा-विडङ्गबीजम्। पटोलादीनां समाहारद्वन्द्वः। त्रिफलाया दलं त्रिफला-दलम्। समषट्कं समानि कर्षप्रमाणानि षडेव यस्मिंस्तत्समषट्कम्। एकशः समस्तम्। सनीलिनीबीजपिचुत्रयम्। नीलिनी फलाञ्जनिका शारदा तस्याः बीजानि। तेषां पिचुत्रयं कर्षत्रयम्। सह तेन त्रिवृत्पलं च कम्पिल्लपलार्द्धयोजितम्। कम्पिल्लं रोचनिका तस्याः पलार्द्धेन योजितम्। समस्तं चूर्णं कृत्वा गवाम्बुपीतं गोमूत्रपीतं पलप्रमाणं सकलोदरापहं प्रकीर्त्तितं शोफहरं च। सकामलं कामलया सह वर्त्तते। पाण्डुरोगं हलीमकं च हरेत्। पटोलादि भिषग्भिरुच्यते। एतच्चूर्णं च विरेचनं स्निग्धेन पेयम्। पीतौषधश्च यदि मृदुविरिक्तो भवति तदा जाङ्गलमांसरसैरोदनं मृदु भोजयेत्। यदि सम्यग् विरिक्तोऽतिरिक्तो वा तदा मण्डपूर्वां यवागूं सेवेत। अनन्तरं क्षीरं त्रिकटुकशृतं पिबेत्। मृद्वोदनं तेनैव भोजयेत् षडहम्। सप्तमे दिवसे पुनश्चूर्णं पिबेत्। एवमनेन क्रमेण वारं वारं पिबेत् आरोग्यं यावत्। तथा च चरकमुनिः—"पटोलमूलं रजनीं विडङ्गं त्रिफलात्वचम्। कम्पिल्लकं नीलिनीं च त्रिवृतं चेति चूर्णयेत्। षडाद्यान् कार्षिकान-न्त्यांस्त्रींश्च द्वित्रिचतुर्गुणान्। कृत्वा चूर्णं ततो मुष्टिं गवां मूत्रेण पाययेत्। विरिक्तं जाङ्गलरसैरोदनं मृदु भोजयेत्। मण्डपेयाश्च पीत्वा वा सव्योषं षडहं पयः। शृतं पिबेत्ततश्चूर्णं पिबेदेवं पुनः पुनः।

हन्ति सर्वोदराण्येतच्चूर्णं जातोदकान्यपि। कामलां पाण्डुरोगञ्च श्वयथुं चापकर्षति"। इति ॥ १६७—१६८ ॥

पटोलादिचूर्ण—पटोलमूल ( परवल की जड़ ), हरड़, बहेड़ा, आंवला, हल्दी वायविडंग; प्रत्येक २ तोले, नीलनीबीज ६ तोले, निसोत ८ तोले। इनके चूर्णों को एकत्र मिश्रित कर गोमूत्र के साथ योग्य मात्रा में सेवन करावें। मात्रा—२ मासा॥ यह चूर्ण सम्पूर्ण उदर, शोफ, कामला, पाण्डु तथा हलीमक रोग को नष्ट करता है। यद्यपि मूल में १ पल मात्रा दी है परन्तु आजकल इतनी बड़ी मात्रा घातक है॥ १६७—१६८ ॥

अधुना चरकोक्तं विस्राद्यं चूर्णमाह—

विस्राशिलात्मकफलत्रयनीलिनीभिः
कृष्णावचारुचकतिक्तकरोहिणीभिः।
सत्रायमाणविदुलायवचित्रकाभि-
श्चूर्णं त्रिवृद्युतमिदं सकलोदरघ्नम् ॥ १६९ ॥

इदं विस्राद्यचूर्णं सकलोदरघ्नम्। विस्रादीनामितरेतरद्वन्द्वः। विस्रा हबुषा। शिलात्मकं सैन्धवम्। रुचकं सौवर्चलम्। विदुला शातला। यवचित्रा स्वर्णक्षीरी। शेषाणि प्रसिद्धानि। यद्यप्यत्र पानार्थं न किंचिद् द्रव्यमुद्दिष्टं संक्षेपार्थिना ग्रन्थकर्त्रा तथापि दाडिमांभस्त्रिफला-क्काथमांसरसगोमूत्रसुखाम्बुभिः पातव्यं गुल्मप्लीहोदरादिषु। तथा च चरकः—हपुषां काञ्चनक्षीरीं त्रिफलां कटुरोहिणीम्। नीलिनीं त्राय-माणां च सातलां त्रिवृतां वचाम्। सैन्धवं काललवणं पिप्पलीं चाव-चूर्णयेत्। दाडिमत्रिफलामांसरसमूत्रसुखोदकैः। पेयोऽयं सर्वगुल्मेषु प्लीह्नि सर्वोदरेषु च। श्वित्रकुष्ठेष्वजरके सदने विषमाग्निषु। शोफार्शः-पाण्डुरोगेषु कामलायां हलीमके। वातपित्तकफांश्चापि विरेकात्सम्प्रसा-धयेदिति" ॥ १६९ ॥

विस्राद्यचूर्ण—हाऊबेर, सैन्धानमक, त्रिफला, नीलिनीमूल, पिप्पली, वच, निसोत, सौंचलनमक, कुटकी, त्रायमाण, सातला, स्वर्णक्षीरीमूल ( चोक ); इन्हें एकत्र समभाग में मिला चूर्ण तय्यार करलें। इसे कोसे जल, त्रिफलाक्काथ अथवा गोमूत्र के साथ सेवन करने से सम्पूर्ण उदररोग नष्ट होते हैं। मात्रा—२ मासे ॥१६९॥

तदनन्तरं रोहीतकघृतमाह—

रोहीतकत्वक्तुलया समेतं
द्विसङ्गुणं स्याद्बदराढकन्तु।
पचेदपां द्रोणचतुष्टयेन
द्रोणावशेषेण घृताढकं तु॥ १७०॥
स्यात्पञ्चकोलात्पलपञ्चकेन
रोहीतकत्वक्समभागिकेन।
सिद्धं तु रोहीतकसर्पिरेत-
त्प्लीहोदरघ्नं यकृतामयघ्नम्॥ १७१॥

रोहीतकत्वक्तुलया समेतमिति—रोहीतकस्य त्वक् रोहीतकत्वक् तस्य तुला पलशतं तया समेतम्। किं तद्बदराढकम्। किं विशिष्टम्? द्विसङ्गुणं द्विगुणम्। तदध्यर्ष्टाविंशच्छतपलयुतं अपां द्रोणचतुष्टयेन पचेत्। द्रोणावशेषेण घृताढकं तु द्रोणावशेषेण क्वाथेन घृताढकमष्टाविंशं शतं पलं पचेत्। स्यात्पञ्चकोलात्पलपञ्चकेन—पञ्चकोलपलपञ्चकेन सह रोहीतकत्वक् समभागिकेन। रोहीतकत्वक् समभागा यस्मिन् तद्रोहीतकत्वक्समभागिकम्। एतदुक्तं भवति—पञ्चकोलस्य पञ्चपलानि रोहीतकत्वचोऽपि पञ्चपलानि। कल्कीकृतं साधयेत्। सिद्धं तु रोहीतकसर्पिः एतत् स्याद्भवेत्। प्लीहोदरमपहन्तीति प्लीहोदरघ्नम्। यकृदामयो यकृदुदरं तं हन्तीति यकृदामयघ्नम्॥ १७०—१७१॥

रोहीतकघृत—गव्यघृत ८ प्रस्थ। क्वाथार्थ—रोहेड़े की छाल १ तुला (१० सेर), बदर (बेर) ४ आढक (१६ प्रस्थ), जल ८ द्रोण। अवशिष्ट क्वाथ २ द्रोण। कल्कार्थ-पञ्चकोल (पिप्पली, पिप्पलीमूल, चव्य, चित्रक, सोंठ) मिलित ५ पल, रोहेड़े की छाल ५ पल। यथाविधि पाककर सेवन करने से प्लीहोदर एवं यकृदुदर रोग नष्ट होता है। मात्रा—आधा तोला॥ १७०—१७१॥

इदमपरमुदरादिप्रत्यनीकं घृतमाह—

द्विपञ्चमूलीजलमस्तुसिद्धं
सपञ्चकोलं च सयावशूकम्।

सर्वोदरघ्नं घृतमेतदुक्तं
दुर्नामगुल्मग्रहणीगदघ्नम् ॥ १७२ ॥

द्विपञ्चमूली दशमूली तस्या जलं क्वाथम् । मस्तु गवाम् । द्विपञ्चमूलीक्वाथमस्तुभ्यां चतुर्गुणाभ्यां सिद्धं घृतं प्रस्थसम्मितम्। सपञ्चकोलं च सयावशूकम् । यावशूको यवक्षारः । पञ्चकोलकः पूर्वोक्तः । पञ्चकोलयवक्षाराभ्यां पलचतुष्ककल्कीकृतम्। एतद् घृतं सर्वोदरघ्नमुक्तं कथितं दुर्नामगुल्मग्रहणीगदान् हन्तीति ॥ १७२ ॥

इति उदरचिकित्सा समाप्ता।

दशमूलघृत—गव्यघृत २ प्रस्थ। दशमूलक्वाथ ८ प्रस्थ। दही का पानी ८ प्रस्थ। क्वाथार्थ—पञ्चकोल तथा यवक्षार मिलित ८ पल। यथाविधि पाक कर सेवन कराने से सम्पूर्ण उदररोग नष्ट होते हैं। मात्रा—आधा तोला। यह घृत अर्श, गुल्म तथा ग्रहणीरोग को नष्ट करता है ॥ १७२ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*उदरचिकित्सा समाप्ता।*

———:०:———

## अथ गुल्मचिकित्सा।

साम्प्रतं उदरचिकित्सानन्तरं यथोद्देशं गुल्मचिकित्सितमाह—

हिङ्ग्वग्निचव्यलवणत्रयवेतसाम्ल-
क्षारद्वयं त्रिकटुदाडिमतिन्तिडीकम्।
सग्रन्थिकाग्निकशठीहपुषाजगन्धा-
पाठाभयासितजीरकपौष्कराह्वम् ॥ १७३ ॥
सोग्रं सधान्यकमिति प्रविधाय चूर्णं
भूयः प्लुतं हि फलपूरफलद्रवेण।
उष्णोदकादिपरिपीतमिदं निहन्ति
शूलानि गुल्मगुदजग्रहणीगदांश्च ॥ १७४ ॥

इदं हिङ्ग्वाद्यं चूर्णं उष्णोदकादिपरिपीतं शूलादीन्निहन्ति।

हिङ्ग्वादीनां समाहारद्वन्द्वः। अग्निश्चित्रकः। लवणत्रयं सैन्धवबिडसौवर्चलानि। वेतसाम्लं अम्लवेतसम्। क्षारद्वयं स्वर्जिकाक्षारयवक्षारौ। तिन्तिडीकं वृक्षाम्लम्। सह ग्रन्थिकेन वर्त्तत इति सग्रन्थिकं, सग्रन्थिकं च तत् अग्निकं च सग्रन्थिकाग्निकम्। सग्रन्थिकाग्निकञ्च शठी च हपुषा च अजगन्धा च पाठा च अभया च ससितजीरकपुष्कराह्वञ्च सग्रन्थिकाग्निकशठीहपुषाजगन्धापाठाभयाससितजीरकपुष्कराह्वम्। समाहारो द्वन्द्वः। सह सितजीरकेण वर्त्तत इति ससितजीरकम्। ससितजीरकं च तत् पुष्कराह्वञ्च ससितजीरकपुष्कराह्वम्। ग्रन्थिकं पिप्पलीमूलम्। अग्निकं अजमोदा। शठी कर्चूरः। अजगन्धा वस्तगन्धा बोबइका इति लोके। शेषाणि प्रसिद्धानि। सोग्रं सवचम्। सधान्यं सधनीयकं पूर्वोक्तं द्रव्यकदम्बकम्। इत्येभिर्द्रव्यैः पूर्वोक्तैः प्रविधाय कृत्वा चूर्णं प्लुतं भूयः वारम्वारम्। केन? फलपूरं बीजपूरं तस्य फलं तस्मात् द्रवः स्वरसः तेन प्लुतं भावितम्। उष्णोदकादिपरिपीतं आदिग्रहणेन तक्रकाञ्जिकमस्तुमद्यदाडिमाम्बुप्रभृतीनि गृह्यन्ते। तथा च हारीतः—पिबेन्मद्याम्लसुखोदकेनेत्यादि। तैः परिपीतं शूलानि हन्ति। गुल्मगुदजग्रहणीगदांश्च हन्तीति ॥ १७३—१७४ ॥

हिङ्ग्वाद्य चूर्ण—हींग, चित्रक, चव्य, सैन्धानमक, बिडनमक, सौंचलनमक, अम्लवेतस, यवक्षार, सर्जिक्षार, सोंठ, कालीमिर्च, पिप्पली, अनारदाना, तिन्तिडीक ( वृक्षाम्ल, विषांबिल ), पिप्पलीमूल, अजमोदा, कचूर, हाऊबेर, अजगन्धा ( अजमोदा भेद ), पाढ़, हरड़, श्वेतजीरा, पुष्करमूल, वच, धनियां; इनके चूर्ण को एकत्र समपरिमाण में मिश्रित कर बिजौरे के रस से बारम्बार भावना दें। जब चूर्ण का स्वाद कुछ खट्टा होजाय तब भावना बन्द कर दें। मात्रा—१ मासा। अनुपान—गरमजल, तक्र, कांजी, मस्तु, मद्य अथवा अनार का रस। इस चूर्ण के सेवन से शूल, गुल्म, अर्श तथा संग्रहणी प्रभृति रोग नष्ट होते हैं॥ यदि अजगन्धा न हो तो यवानी ( अजवाइन ) का प्रयोग कर सकते हैं॥ १७३—१७४ ॥

ततोऽनन्तरमेभिरेव द्रव्यैः साधितं घृतमाह—

हिङ्ग्वादिभिर्विरहितैर्वचयाविपक्व-
मेतद् घृतं दधिचतुर्गुणमेभिरेव।
स्याद्बीजपूररसेन चतुर्गुणेन
गुल्मापहं गुदगदग्रहणीगदघ्नम् ॥ १७५ ॥

एभिरेव हिङ्ग्वादिभिर्द्रव्यैर्वचया विरहितैर्वियुक्तैः कल्कीकृतैर्विपक्वं घृतं दधिचतुर्गुणं बीजपूरकरसेन चतुर्गुणेन समेतमेतद् गुल्मापहं स्यात् गुदगदग्रहणीगदघ्नं च स्यादिति ॥ १७५ ॥

हिंग्वाद्यघृत—वचा से रहित इन्हीं चूर्णोक्त हींग आदि द्रव्यों के कल्क से तथा घृत से चौगुने दही एवं बिजौरे के रस से यथाविधि साधित घृत गुल्म, अर्श तथा संग्रहणी को नष्ट करता है। अर्थात् गव्यघृत २ प्रस्थ। बिजौरे का रस ८ प्रस्थ। कल्कार्थ—हींग, चित्रक, चव्य, सेन्धानमक, बिडनमक, सौंचलनमक, अम्लवेतस, यवक्षार, सर्जिकाक्षार, त्रिकटु, अनारदाना, बिषांबिल, पिप्पलीमूल, अजमोदा, कचूर, हाऊबेर, अजगन्धा, पाढ़, हरड़, श्वेतजीरा, पुष्करमूल, धनियां; मिलित ८ पल। यथाविधि घृतपाक करें। मात्रा—आधा तोला ॥ १७५ ॥

अधुना बिन्दुघृतमाह—

श्यामा[1]त्रिवृद्वह्निपलत्रयं च
हरीतकीनां च शतार्द्धमन्यत्।
तोयार्मणार्द्धेन विपाच्य तेन
प्रस्थं पचेद् गव्यघृतस्य वैद्यः ॥ १७६ ॥
कम्पिल्लकं स्यात्प्रसृतिप्रमाणं
सनीलिनीबीजपलद्वयन्तु।
चतुःपलं स्नुक्पयसश्च दत्त्वा
गुल्मापहं बिन्दुघृतं विरेकात् ॥ १७७ ॥

एतद् घृतं गुल्मापहं भवति। श्यामात्रिवृद्वह्निपलत्रयं च। श्यामा वृद्धदारकः। त्रिवृत् त्रिवृता। वह्निश्चित्रकम्। एषां पलत्रयं हरीतकीनाञ्च शतार्द्धमन्यत्। अन्यच्च हरीतकीनां हरीतकीफलानां शतार्द्धं पञ्चाशत् हरीतक्याः। तोयार्मणार्द्धेन विपाच्य तेन। तोयार्मणार्द्धे सलिलद्रोणार्द्धे षट्पञ्चाशदधिके द्वे पलशते। तेन विपाच्य क्वाथं कृत्वा चतुर्भागशेषेण क्वाथेन प्रस्थं पचेत् गव्यघृतस्य वैद्यः। कम्पिल्लकं स्यात्प्रसृतिप्रमाणम्। कम्पिल्लकं रोचनिकम्, स्याद्भवेत्। प्रसृतिप्रमाणं द्विपलप्रमाणम्। सनीलिनीबीजपलद्वयन्तु। नीलिनी अञ्जनिका शारदा तस्याः बीजानि

१—अत्र श्यामा इत्यनेन श्यामवर्णा त्रिवृद् गृह्यत इति केचित्।

तेषां पलद्वयम्। चतुःपलं स्नुक्पयसश्च दत्त्वा। स्नुक्सेहुण्डस्तस्य पयः क्षीरं तस्य चतुःपलमेतत्कल्कं दत्त्वा गव्यघृतस्य प्रस्थं द्वात्रिंशत्पलानि पचेत् वैद्यः। एतद्बिन्दुघृतं विरेकात् विरेकेण गुल्मानपहन्तीति ॥१७७॥

बिन्दुघृत—गव्यघृत २ प्रस्थ। क्वाथार्थ—विधारामूल, निसोत, चित्रक; प्रत्येक ३ पल, हरड़ ५० पल, जल १ द्रोण (१६ प्रस्थ), अवशिष्ट क्वाथ ४ प्रस्थ। कल्कार्थ—कमीला २ पल, नीलिनी बीज २ पल, सेहुण्ड का दूध ४ पल। यथाविधि पाक करें इस घृत के प्रयोग से विरेचन होकर गुल्म नष्ट होता है॥ मात्रा—रोगी को जितनी वार विरेचन कराना हो उतनी ही घृत की बूंदें दें॥ १७६—१७७॥

साम्प्रतं महाबिन्दुघृतमाह—

त्रिवृत्पलं स्नुक्पयसः पलं च
कम्पिल्लकस्यापि पलं तृतीयम्।
चतुःपलं चामलकीरसस्य
शाणार्द्धमन्यल्लवणस्य[1] चैव॥ १७८॥
प्रस्थार्द्धमेभिर्हविषो[2] विपक्वं
जले महाबिन्दुघृतं प्रसिद्धम्।
निहन्ति गुल्मं जठराणि चैव
प्लीहानमप्याशु विरेकयोगात्॥ १७९॥

महाबिन्दुघृतं गुल्मादीन्निहन्ति। एभिस्त्रिवृतादिभिः। प्रस्थार्द्धं षोडशपलानि हविषो घृतस्य विपक्वं साधितम्। त्रिवृत्पलं त्रिवृतः पलं ग्राह्यम्। स्नुक्पयसः सेहुण्डक्षीरस्य पलम्। काम्पिल्लकस्य रोचनिकायास्तृतीयं पलम्। चत्वारि पलानि आमलकीरसस्य स्वरसस्य। शाणार्द्धमन्यल्लवणस्य चैव। लवणं प्रधानकल्पनया सैन्धवं तस्य शाणार्द्धं द्विमाषिकं ग्राह्यम्। एभिः कल्कीकृतैः प्रस्थार्द्धं हविषो विपक्वम्। कस्मिन्? जले सलिले घृतचतुर्गुणे[2]। महाबिन्दुघृतं प्रसिद्धं प्रख्यातं

१—अत्र तीसटाचार्येण लवणस्य शाणार्द्धं ग्राह्यमित्युक्तं परमन्यत्र पलार्द्धं सैन्धवस्येत्युक्तम्।

२—अन्यत्र प्रस्थार्द्धञ्चैव सर्पिषः तोयप्रस्थेन विपचेदिति पाठात् घृताद् द्विगुणमेव जलं गृह्यत इति केचित्।

निहन्ति गुल्मं जठराणि उदराणि प्लीहानं च विरेकयोगात् आशु शीघ्रमिति ॥ १७८-१७९ ॥

इति गुल्मचिकित्सा समाप्ता।

महाबिन्दु घृत—गव्यघृत १ प्रस्थ। कल्कार्थ—निसोत १ पल, सेहुण्ड का दूध १ पल, कमीला १ पल, आंवले का रस ४ पल, सैन्धानमक आधा शाण (चौथाई तोला)। पाकार्थ जल—४ प्रस्थ। यथाविधि घृतपाक करें। इस घृत के सेवन से विरेचन होकर, गुल्म, उदररोग तथा प्लीहा (तिल्ली) रोग नष्ट होता है। मात्रा—चौथाई तोला ॥ १७८-१७९ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*गुल्मचिकित्सा समाप्ता।*

——:o:——

## अथ विद्रधिचिकित्सा।

गुल्मचिकित्सानन्तरं यथोद्देशं विद्रधिचिकित्सामाह—

**कासीससैन्धवशिलाजतुहिङ्गुचूर्ण-**
**मिश्रीकृतो वरुणवल्कलजः कषायः।**
**अभ्यन्तरोत्थितमपक्कमतिप्रमाणं**
**नृणामयं जयति विद्रधिमुग्रशोफम् ॥ १८० ॥**

अयं कषायो विद्रधिं जयति। कासीससैन्धवशिलाजतुहिङ्गुचूर्ण-मिश्रीकृतः। कासीसं च सैन्धवश्च शिलाजतु च हिङ्गु च तानि तथा तेषां चूर्णेन मिश्रीकृतो व्यतिमिश्रः। कोऽसौ? वरुणवल्कलजः कषायः। वरुणस्य वल्कलं वरुणवल्कलम्। वरुणवल्कलाज्जातो वरुणवल्कलजः। एतदुक्तं भवति—वरुणवल्कलक्काथः कासीसादीनां चूर्णं दत्त्वा पीतो विद्रधिं जयति। अभ्यन्तरे उत्थितं अभ्यन्तरोत्थितम्। अपक्कं आमम्। अतिप्रमाणं महाप्रमाणम्। उग्रोऽसह्यवेदनः शोफो यस्मिन् स तथा तम्। नृणां प्राणिनां जयतीति ॥ १८० ॥

वरुणछाल के ८ तोले क्काथ में कासीस, सैन्धानमक, शिलाजीत, हींग; इनके

२ रत्ती चूर्ण का प्रक्षेप देकर पीने से शोथ तथा अत्यन्त वेदनायुक्त, विस्तृत एवं अपक्व आभ्यन्तर विद्रधि नष्ट होती है ॥ १८० ॥

अधुना त्रिफलागुग्गुलुं त्रिफलाघृतञ्चाह—

पक्वेषु विद्रधिषु पूयमतिस्रवत्सु
नाडीषु च व्रणिषु चापि भगन्दरेषु ।
स्याद् गण्डमालिषु फलत्रिकगुग्गुलुश्च
पथ्यः फलत्रिकघृतं लघुभोजनञ्च ॥ १८१ ॥

विद्रध्यादिषु फलत्रिकगुग्गुलुः पथ्यः स्यात् भवेत् । पक्वेषु पाकं गतेषु पूयमतिस्रवत्सु नाडीषु च भगन्दरेषु सर्वेषु फलत्रिकगुग्गुलुः पथ्यः स्यात् । फलत्रिकघृतं त्रिफलाघृतं च । लघुभोजनञ्च पुराणषष्टिकरक्तशालिकलमयवमुद्गजाङ्गलमांसवास्तुकपटोलकासमर्द्दाडिमामलकगव्यघृतसैन्धवसंस्कृतं पथ्यं स्यादिति सर्वप्रकारेण ॥ १८१ ॥

पक्व तथा अतिपूयस्रावयुक्त विद्रधि, नाडीव्रण, व्रण, भगन्दर, तथा गण्डमाला में त्रिफलागुग्गुलु, त्रिफलाघृत तथा लघु भोजन हितकर है ॥ १८१ ॥

पूर्वं त्रिफलागुग्गुलुर्विद्रध्यादिषु पथ्यः स्यादित्युक्तमतस्तस्योपदेशमाह—

त्रीणि पलानि फलत्रितयस्य
द्वे तु पले तुलिते मगधायाः ।
पञ्च पलानि भवन्ति पुरस्य
स्यात्स फलत्रिकगुग्गुलुयोगः ॥ १८२ ॥

फलत्रिकगुग्गुलुयोगः फलत्रिकगुग्गुलुः स स्यात् । योऽनेन विधिना कल्प्यते—त्रीणि पलानि फलत्रितयस्य, त्रीणि पलानि त्रिफलायाः । द्वे च पले तुलिते मगधायाः । मगधायाः पिप्पल्या द्वे पले तुलाधृते । पञ्च पलानि भवन्ति पुरस्य, गुग्गुलोः पञ्चपलानि भवन्ति । अनेन विधिना कल्पितस्त्रिफलागुग्गुलुः पूर्वोक्तेषु विद्रध्यादिष्वभिहितो भवेदिति ॥ १८२ ॥

इति विद्रधिचिकित्सा समाप्ता ।

त्रिफलागुग्गुलु—त्रिफला ( मिलित )-३ पल, पिप्पली २ पल, विशुद्ध गुग्गुलु

५ पल । प्रथम किंचित् घृत से गुग्गुलु को कुट्टित कर त्रिफला चूर्ण और पिप्पलीचूर्ण को मिश्रित करें । मात्रा—४ रत्ती से ८ रत्ती तक । यह विद्रधि आदि में अत्यन्त हितकर है ॥ १८२ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*विद्रधिचिकित्सा समाप्ता ।*

——:o:——

## अथ गण्डमालागलगण्डचिकित्सा ।

विद्रधिचिकित्सानन्तरं यथोद्देशं गण्डमालागलगण्डचिकित्सित-माह—

सकाञ्चनारा त्रिफला जले शृता
प्रशस्यते मागधिकावचूर्णिता ।
सगण्डमाले गलगण्डरोगिणि
फलत्रिकाज्यं यवमुद्गभोजनम् ॥ १८३ ॥

सकाञ्चनारा त्रिफला जले शृता क्वथिता मागधिकावचूर्णिता पिप्पलीचूर्णसंयुक्ता प्रशस्यते । सह गण्डमालया वर्त्तत इति सगण्डमालः पुरुषः तस्मिन् । गलगण्डरोगो विद्यते यस्यासौ गलगण्डरोगी तस्मिंश्च । फलत्रिकाज्यं त्रिफलाघृतं वक्ष्यमाणं शालाक्ये । यवमुद्गभोजनं च प्रशस्यत इति ॥ १८३ ॥

कचनार की छाल, हरड़, बहेड़ा, आंवला; मिलित २ तोले । क्वाथार्थ जल ३२ तोले । अवशिष्ट क्वाथ ८ तोले । इस क्वाथ में २ रत्ती पिप्पली चूर्ण का प्रक्षेप देकर पीने से गलगण्ड तथा गण्डमाला रोग नष्ट होता है । इन रोगों में त्रिफलाघृत का सेवन तथा जौ और मूंग का भोजन हितकर है ॥ १८३ ॥

साम्प्रतं तुम्बीतैलमाह—

तुम्बीरसेन कटुकेन चतुर्गुणेन
कल्कीकृतैर्मगधजादिगणौषधैश्च ।
तैलं शृतं हरति देहिषु गण्डमाला-
मत्युल्बणामपि गले गलगण्डरोगम् ॥ १८४ ॥

तैलं श्रृतं देहिषु गण्डमालां गले गलगण्डरोगं च हरति। श्रृतं पक्वम्। कैः? मगधादिगणौषधैः पिप्पल्यादिगणौषधैः कल्कीकृतैः। तुम्बीरसेन कटुकेन कटुतुम्बीरसेन स्वरसेन तैलाच्चतुर्गुणेन। प्रधान-कल्पनया तिलतैलं गृह्यते। अत्युल्बणामपि गण्डमालां गले गलगण्ड-रोगञ्च सम्यक् पानाभ्यङ्गैर्हन्तीति ॥ १८४ ॥

इति गण्डमालागलगण्डचिकित्सा समाप्ता।

तुम्बीतैल—तिलतैल २ प्रस्थ। कड़वी तुम्बी का रस ८ प्रस्थ। कल्कार्थ-पिप्पल्यादिगण की औषध, मिलित ८ पल। यथाविधि पाक कर—इस तैल के मर्दन से अति दारुण गण्डमाला तथा गलगण्डरोग नष्ट होता है ॥ १८४ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*गण्डमालागलगण्डचिकित्सा समाप्ता।*

——:o:——

## अथ विस्फोटचिकित्सा।

गण्डमालागलगण्डचिकित्सानन्तरं यथोद्देशं विस्फोटचिकित्सि-तमाह—

निम्बामृताब्दकटुकावृषधन्वयास-
भूनिम्बपर्पटपटोलफलत्रिकाणाम्।
क्वाथो नृणामिह भवेत्स गतेषु पाकं
विस्फोटकेष्वभिहितः पठितो भिषग्भिः ॥ १८५ ॥

भिषग्भिर्निम्बादीनां क्वाथो विस्फोटकेष्वभिहितः पठितः। केषाम्? नृणां प्राणिनाम्। कीदृशेषु? पच्यमानेषु पाकं गतेषु। अमृता गुडूची। अब्दं मुस्तम्। धन्वयासो दुरालभा। भूनिम्बं किराततिक्तकम्। शेषाणि प्रसिद्धानि। ग्रन्थान्तरेषु त्रिफलास्थाने कटुका पठिता। अपरैश्च कटुकां विहाय त्रिफला पठिता। तीसटाचार्य्येण भूरिग्रन्थदर्शनाद् द्वयमपि पठितं ग्रन्थान्तरेष्वेवं दृष्टत्वादिति ॥ १८५ ॥

इति विस्फोटकचिकित्सा समाप्ता।

निम्बादिक्काथ—नीम की छाल, गिलोय, मोथा, कुटकी, अडूसाछाल, धन्वयास ( दुरालभा, धमासा ), चिरायता, पित्तपापड़ा, पटोलपत्र, त्रिफला; मिलित २ तोले। क्काथार्थ जल ३२ तोले। अवशिष्ट क्काथ ८ तोले। यह क्काथ पक्व विस्फोटक रोग में अत्यन्त हितकर है ॥ १८५ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*विस्फोटचिकित्सा समाप्ता।*

———:o:———

## अथ श्लीपदचिकित्सा।

विस्फोटकचिकित्सानन्तरं यथोद्देशं श्लीपदचिकित्सतमाह—

**विश्वौषधं वा क्कथितं गुडूचीं-**
**शृतां सुराह्वाक्कथनं पिबेद्वा।**
**समाक्षिकं श्लीपदरोगवान् यः**
**सिद्धार्थकास्तस्य हिताः प्रलेपे ॥ १८६ ॥**

श्लीपदरोगो विद्यते यस्यासौ श्लीपदरोगवान् यः स विश्वौषधं क्कथितं शृतशीतं समाक्षिकं पिबेत्। विश्वौषधं शुण्ठी। गुडूचीं वा शृतशीतां समाक्षिकां पिबेत्। सुराह्वं देवदारुस्तस्य क्कथनं शृतशीतं समाक्षिकं पिबेत्। एतत्त्रयो योगाः। कदाचित् विश्वौषधगुडूचीसुराह्वैस्त्रिभिरप्येको योगश्चतुर्थस्तस्य च श्लीपदरोगिणः सिद्धार्थाः सर्षपाः प्रलेपे विहिता इति ॥ १८६ ॥

इति श्लीपदचिकित्सा समाप्ता।

शुण्ठीक्काथ, गुडूचीक्काथ ( गिलोय का क्काथ ) अथवा देवदारुक्काथ में मधु का प्रक्षेप देकर क्रमशः कफज, पित्तज तथा वातज श्लीपद रोग में पीना चहिये। श्लीपद रोग में प्रलेपार्थ श्वेतसरसों का प्रयोग हितकर है ॥ १८६ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*श्लीपदचिकित्सा समाप्ता।*

———:o:———

## अथ वातरक्तचिकित्सा ।

श्लीपदचिकित्सानन्तरं यथोद्देशं वातरक्तचिकित्सितमाह—

युक्पञ्चमूलपयसा लघुपञ्चमूल्याः
क्राथेन वामृतलताक्रथनेन वापि ।
वाट्यालकस्य सलिलेन युतं शृतेन
पीतं शिलाजतु समीरणशोणितघ्नम् ॥ १८७ ॥

शिलाजतु पीत सत् समीरणशोणितघ्नं वातरक्तघ्नं भवति । समीरणशोणितं वातरक्तं तद्धन्तीति समीरणशोणितघ्नम् । केन पीतम्? युक्पञ्चमूलपयसा, युक्पञ्चमूलं दशमूलं तस्य पयः सलिलं क्राथमित्यर्थः तेन पीतं लघुपञ्चमूल्याः क्राथेन वा। लघुपञ्चमूली व्याघ्रीबृहत्यादिका तस्याः क्राथेन वा पीतम् । अमृतलता गुडूची तस्या वा क्राथेन पीतम् । वाट्यालकस्य वा सलिलेन क्राथेन पीतं शिलाजतु समीरणशोणितघ्नम्। वाट्यालको बला। एवं चत्वारो योगा भवन्तीति ॥

इति वातरक्तचिकित्सा समाप्ता ।

शुद्ध शिलाजीत को दशमूलक्काथ ( अथवा दशमूल से यथाविधि साधित दूध ), लघुपञ्चमूल क्वाथ, गिलोय क्वाथ अथवा बलाक्वाथ के साथ सेवन करने से वातरक्त नष्ट होता है। शिलाजीत की मात्रा—२ रत्ती से ४ रत्ती तक ॥ १८७ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*वातरक्तचिकित्सा समाप्ता ।*

——:o:——

## अथ विसर्पचिकित्सा ।

वातरक्तचिकित्सानन्तरं यथोद्देशं विसर्पचिकित्सितमाह—

वासाफलत्रयपटोलगुडूच्यरिष्टै-
रम्भः शृतं सखदिरैः सुखकृद्विसर्पे ।
लेपः शिरीषरजनीद्वयकुष्ठयष्टी-
मांसीनतैः सतृटिबालकचन्दनैश्च ॥ १८८ ॥

वासादिभिरम्भः शृतं कथितं विसर्पे सुखकृत् सुखकारि। अरिष्टो निम्बः। सखदिरैरेभिः। शेषाणि प्रसिद्धानि। खदिराष्टकोऽयं योगः। शिरीषादिभिः सघृतैर्लेपः सुखकृत् सुखकारी च भवति। रजनीद्वयं हरिद्रा दारुहरिद्रा। नतं नगरम्। तृटिः एला। शेषाणि प्रसिद्धानि। दशाङ्गोऽयं लेप इति ॥ १८८ ॥

इति विसर्पचिकित्सा समाप्ता।

खदिराष्टक—अडूसाछाल, त्रिफला, पटोलपत्र, गिलोय, नीम की छाल, खदिरकाष्ठ; मिलित २ तोले। क्राथार्थ जल—३२ तोले। अवशिष्ट क्राथ ८ तोले। विसर्प रोग में इस क्राथ का सेवन करना अत्यन्त हितकर है।

दशांगलेप—शिरीष की छाल, हल्दी, दारुहल्दी, कुठ, मुलहठी, जटामांसी, तगर, छोटी इलायची, गन्धबाला, श्वेतचन्दन; इन्हें एकत्र पीस विसर्प की शान्ति के लिये लेप देना चाहिये ॥ १८८ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*विसर्पचिकित्सा समाप्ता।*

——:o:——

## अथ कुष्ठचिकित्सा।

**विसर्पचिकित्सानन्तरं यथोद्देशं कुष्ठचिकित्सितमाह—**

**त्रिफलापटोलपिचुमन्द**
**वचारुणयष्टिका सकटुका रजनी।**
**नवभिः शृतं प्रपिबतः सलिलं**
**न भवन्ति पित्तकफकुष्ठरुजः ॥ १८९ ॥**

त्रिफलादिभिर्नवभिः शृतं सलिलं क्राथं प्रपिबतः पित्तकफकुष्ठरुजो न भवन्ति। पित्तञ्च कफश्च पित्तकफौ ताभ्यां कुष्ठरुजः कुष्ठविकाराः। पिचुमन्दो निम्बः। अरुणयष्टिका मञ्जिष्ठा। रजनी हरिद्रा। शेषाणि प्रसिद्धानि। अयं नवकषायो योगः प्रसिद्ध इति ॥ १८९ ॥

नवकषाय—त्रिफला, पटोलपत्र, नीम की छाल, वच, मञ्जिष्ठा कुटकी, हल्दी; मिलित २ तोले। क्राथार्थ जल ३२ तोले। अवशिष्ट क्राथ ८ तोले। इस क्राथ को पीने से पैत्तिक एवं श्लैष्मिक कुष्ठ के विकार उत्पन्न नहीं होते ॥ १८९ ॥

अधुना तिक्तकं घृतमाह—

निम्बत्वक्त्रिफलापटोलकटुकादुःस्पर्शदार्वीवृषाः
त्रायन्ती च सपर्पटैर्द्विपलिकैरब्द्रोणमेभिः पचेत्।
तेनाब्देन्द्रयवैः किरातमगधात्रायन्तिकाचन्दनैः
सिद्धं कुष्ठविघाति तिक्तकमिदं[1] सर्पिर्विसर्पापहम् ॥ १९० ॥

इदं सर्पिस्तिक्तकं नाम। निम्बादीनामितरेतरद्वन्द्वः। निम्बत्वक् निम्बछल्ली। दुःस्पर्शा दुरालभा। दार्वी दारुहरिद्रा। वृषो वासकः। त्रायन्तिका त्रायमाणा। शेषाणि प्रसिद्धानि। एभिर्द्रव्यैः सपर्पटैः पर्पटसहितैर्द्विपलिकैर्द्विपलप्रमाणैः। अब्द्रोणं सलिलद्रोणमेभिः सह पचेत्। पक्त्वा चतुर्थांशावशेषक्वाथेन अब्देन्द्रयवादीनर्द्धपलिकान् कल्कीकृत्य सर्पिःप्रस्थं सिद्धं तिक्तकं नाम। कुष्ठविघाति कुष्ठापहारि। विसर्पापहं विसर्पमपहन्ति। एतच्च सुश्रुतोक्ततिक्तकक्वाथ्यद्रव्येषु च दारुहरिद्रा या पठिता सा चरकाद्यभिप्रायात् यौगिकेति कृत्वा तीसटाचार्येणोक्ता। तथा च क्षारपाणिः—यत्र दृष्टगुणं द्रव्यं संयोगे क्वापि नास्ति यत्। तस्माद् द्रव्यप्रमाणेन तत्कर्म विनियोजयेत्। इयं च संयोगे दृष्टा चेति ॥ १९० ॥

तिक्तकघृत—गव्यघृत २ प्रस्थ। क्वाथार्थ—नीम की छाल, त्रिफला, पटोलपत्र, कुटकी, दुरालभा, दारहल्दी, अडूसाछाल, त्रायमाण, पित्तपापड़ा; प्रत्येक २ पल। जल २ द्रोण। अवशिष्ट क्वाथ आधा द्रोण। कल्कार्थ—मोथा, इन्द्रजौ, चिरायता, पिप्पली, त्रायमाण, लालचन्दन; प्रत्येक आधा पल। यथाविधि घृतपाक करें। यह घृत कुष्ठ तथा विसर्परोग को नष्ट करता है। मात्रा—आधा तोला ॥ १९० ॥

तिक्तकानन्तरं महातिक्तकमाह—

भूनिम्बाम्बुदनिम्बवत्सककणात्रायन्त्यनन्तामृता-
तिक्ताभीरुफलत्रयं प्रतिविषामूर्वाविशालावृषैः।

---

१—तन्त्रान्तरे तिक्तकघृतोक्तेषु क्वाथ्यद्रव्येषु हरिद्रा त्वधिका पठ्यते। यथा त्रिफला द्विनिशेत्यादि। तथा च यतोऽत्र कल्कद्रव्याणां परिमाणं नोक्तमतः प्रस्थद्वयसाध्यघृते कल्कस्तु स्नेहपादिक इति वचनात् मिलित्वा पलाष्टकं ग्राह्यमिति केचित्। परं "घृतप्रस्थं पचेद् द्व्यक्षैः पिप्पलीघनचन्दनैः। त्रायन्तीशक्रभूनिम्बैस्तत्पीतं तिक्तकं घृतम्" इति तन्त्रान्तरोक्तवचनबलात् कल्कद्रव्याणां प्रत्येकमर्द्धपलिकत्वमिति युक्तमुत्पश्यामः ॥

पाठापर्पटसारिवाद्वयनिशायुग्यष्टिकापद्मकैः
सोशीरैः सपटोलचन्दनवचाशम्याकसप्तच्छदैः ॥ १९१ ॥
इत्येभिर्गदितैर्जलाष्टगुणितं प्रस्थं पचेत्सर्पिषो
गव्यस्यामलकीरसद्विगुणितं नाम्ना महातिक्तकम् ।
हन्त्येतद्गलगण्डमण्डलरुजः कण्डू सपाण्ड्वामयाः
शोफश्लीपदवातरक्तविकृतीः कुष्ठानि चाष्टादश ॥ १९२ ॥

एतद् घृतं महातिक्तकं नाम्ना । गव्यस्य सर्पिषः प्रस्थं पचेत् । एभिर्द्रव्यैर्भूनिम्बादिभिः कर्षप्रमाणैः । भूनिम्बादीनामितरेतरद्वन्द्वः । भूनिम्बः किराततिक्तकः । अम्बुदं मुस्तम् । निम्बोऽरिष्टः । वत्सक इन्द्रयवः । कणा पिप्पली । गजपिप्पली जेज्जटेन व्याख्याता । त्रायन्ती त्रायमाणा । अनन्ता दुरालभा । अमृता गुडूची । तिक्ता कटुका । अभीरु शतावरी । विशाला इन्द्रवारुणी । सारिवाद्वयं सारिवोत्पल-सारिवे । निशायुक् हरिद्रा दारुहरिद्रा । यष्टिका यष्टिमधु । शम्याकं आरोग्यशिम्बी । सप्तच्छदः सप्तपर्णः । शेषाणि प्रसिद्धानि । इति गदितैः उक्तैः सार्पिषः प्रस्थम् । कीदृग्गुणविशिष्टम्? जलाष्टगुणितम् । अष्टाभिर्गुणितं जलमष्टगुणितं यस्मिन् तत्तथा । आमलकीरसद्विगुणितं, आमलक्या रसः आमलकीरसः । रसशब्दो रसक्काथेऽपि वर्त्तते यथा मांसरसेनेति । आमलकीरसो द्विगुणितो यस्मिन् तत्तथा । एतन्महातिक्तकं गल-गण्डादीन् निहन्ति । मण्डलरुजो मण्डलकुष्ठानि । ननु चाष्टादशकुष्ठ-ग्रहणेनैव मण्डलकुष्ठं लभ्यत एव तत्किमर्थं मण्डलकुष्ठग्रहणं क्रियते । विशेषेण तद्धन्तीति । एतच्चरकोक्तं महातिक्तकं नाम घृतमिति ॥ १९१-१९२ ॥

महातिक्तकघृत—गव्यघृत २ प्रस्थ । आंवले का रस ४ प्रस्थ । जल १६ प्रस्थ । कल्कार्थ—चिरायता, मोथा, नीम की छाल, इन्द्रजौ, पिप्पली, त्रायमाण, दुरालभा, गिलोय, कटुकी, शतावर, हरड़, बहेड़ा, आंवला, अतीस, मूर्वामूल, इन्द्रायण, अड़ूसाछाल, पाढ़, पित्तपापड़ा, अनन्तमूल, श्यामालता, हल्दी, दारहल्दी, मुलहठी, पद्माख, खस, पटोलपत्र, लालचन्दन, वचा, अमलतास, सतौने की छाल; प्रत्येक २ तोले । यथाविधि घृतपाक करें । यह घृत गलगण्ड, मण्डलकुष्ठ, कण्डू, पाण्डु, शोफ, श्लीपद, वातरक्त तथा अठारह कुष्ठों को नष्ट करता है । मात्रा—आधा तोला ॥ १९१—१९२ ॥

अधुना वज्रकं घृतमाह—

व्याघ्रीपटोलपिचुमन्दकरञ्जवासा-
छिन्नोद्भवाभिरिति सत्रिफलाभिराभिः।
पक्वं हविर्हरति कुष्ठमिदं नराणा-
मष्टादशात्मकमपि श्रुतवज्रकाख्यम्॥ १९३॥

हविर्घृतं विपक्वं व्याघ्रयादिभिः कुष्ठं हरति। व्याघ्री कण्टकारिका। पटोलं पटोलपत्रम्। पिचुमन्दो निम्बः। करञ्जो वृक्षकरञ्जः। वासा आटरूषकः। छिन्नोद्भवा गुडूची। आभिः सत्रिफलाभिः। एषाञ्च द्रव्याणां कल्ककषायाभ्यां घृतं साध्यते। कथमेतदवसीयत इति चेत् तीसटेनोक्तत्वात्। इदं कुष्ठं हरति। अष्टादशात्मकमप्यष्टादशभेदम्। श्रुतवज्रकाख्यमिति श्रुता प्रख्याता वज्रकमित्याख्या संज्ञा यस्य तच्छ्रुतवज्रकाख्यमिति॥ १९३॥

वज्रकघृत—गव्यघृत २ प्रस्थ। क्वाथार्थ—छोटी कटेरी, पटोलपत्र, नीम की छाल, करञ्जबीज, अडूसाछाल, गिलोय, त्रिफला, मिलित ४ प्रस्थ, जल ३२ प्रस्थ; अवशिष्ट क्वाथ ८ प्रस्थ। कल्कार्थ—सम्पूर्ण क्वाथ्य द्रव्य; मिलित ८ पल। यथाविधि पाक करें। यह घृत अठारहों कुष्ठ को नष्ट करता है। मात्रा—आधा तोला॥ १९३॥

वज्रकानन्तरं महाखादिरं घृतमाह—

प्राक् क्वाथयेत्खदिरसारतुलाश्चतस्र-
स्तोयार्मणैरविकृतैः शुचिभिश्चतुर्भिः।
क्वाथे च तत्र च पचेद् घृतपात्रमेभिः
कल्कीकृतैरिति पिचुद्वितयप्रमाणैः॥ १९४॥
त्रायन्तिकाकुटजबीजकरञ्जभूर्ज-
भूनिम्बनिम्बघनपर्पटकाटरूषैः।

---

१—चक्रदत्ते तु अस्मिन् योगे व्याघ्री न पठिता एवं च तत्परिवर्त्ते अशनकृष्णवेत्रयोरधिकः पाठः दृश्यते। यथा "वासागुडूचीत्रिफलापटोलं करञ्जनिम्बाशनकृष्णवेत्रम्। तत्क्वाथकल्केन घृतं विपक्वं तद्वज्रवत् कुष्ठहरं प्रदिष्टम्। विशीर्णकर्णाङ्गुलिहस्तपादः क्रिम्यर्दितो भिन्नगलोऽपि मर्त्यः। पौराणिकीं कान्तिमवाप्य जीवेद्व्याहतो वर्षशतञ्च कुष्ठी" इति॥

तिक्ता पटोल्यमृतवल्ल्यभयाक्षधात्री-
गायत्रिपद्मकनिशाद्वयचन्दनैश्च ॥ १९५ ॥
क्षुद्रेन्द्रदारुनृपवृक्षदुरालभाभिः
सप्तच्छदासनशुकद्रुमशिंशपाभिः ।
मूर्वावरीमगधजामृगभोजिनीभिः
पाठावचाप्रतिविषासितसारिवाभिः ॥ १९६ ॥
एतन्महाखादिरसर्पिरिति प्रसिद्धं
त्वग्दोषिणामखिलकुष्ठविकारहारि ।
श्वित्रापहारि च किलासरुगातुराणां
मेदस्विनामपि हरेदति मेदुरत्वम् ॥ १९७ ॥
प्रमेहिणां मेहहरं जडानामोजस्करं मेध्यममेधसां च ।
माङ्गल्यमायुः प्रदमन्यदस्मान्न विद्यते पित्तकफामयघ्नम् ॥१९८॥

प्राक् क्वाथयेत्खदिरसारतुलाश्चतस्रः, खदिरस्य सारः खदिरसारः तस्य तुलाश्चतस्रश्चत्वारि पलशतानि । ताश्च प्राक् क्वाथयेत्। कैः? तोयार्मणैः सलिलद्रोणैः । अविकृतैर्गन्धादिरहितैः शुचिभिरच्छभूतैः । कतिभिः? चतुर्भिः । तत्र तस्मिन् पादस्थिते क्वाथे घृतपात्रमाढकं पचेत् । एभिश्च कल्कीकृतैः । त्रायन्तिकादिभिः पिचुद्वितयप्रमाणैः अर्द्धपलिकैः । त्रायन्तिकादीनामितरेतरद्वन्द्वः । त्रायन्तिका त्रायमाणा । कुटजबीजानि इन्द्रयवाः । करञ्जो वृक्षकरञ्जः । भूर्जो भूर्जपत्रम् । भूनिम्बं किराततिक्तकम् । निम्बः पिचुमन्दः । घनं मुस्तम् । असनो बीजकसारः । शुकद्रुमः शिरीषः । शिंशपा वृत्तसारः । मूर्वा चौरस्नायुः । वरी शतावरी । मगधजा पिप्पली । मृगभोजिनी इन्द्रवारुणी । सारिवा उत्पलसारिवा । एतन्महाखादिरं सर्पिः । अतिप्रसिद्धं अतिप्रख्यातम् । त्वग्दोषिणां कुष्ठिनां अखिलकुष्ठविकारहारि, अखिला निरवशेषाः कुष्ठविकारा एतान् हन्तीति अखिलकुष्ठविकारहारि घृतम् । किलासरोगातुराणां श्वित्रापहारि च । मेदस्विनां मेदुराणामपि अपहरेदति मेदुरत्वम् । प्रमेहिणां मेहहरं च । जडानां निरोजसामोजस्करम् । ओजः करोती-

त्योजस्करम्। अमेधसां मेधारहितानां मेध्यम्। मेधाहितं मेध्यम्। मङ्गलानि जनयतीति माङ्गल्यम्। आयुःप्रदं आयुः प्रकर्षेन ददातीत्यायुःप्रदम्। आयुः शब्देन शरीरेन्द्रियसत्त्वानां संयोगः। तथा च चरकाचार्यः—"शरीरेन्द्रियसत्त्वात्मसंयोगो धारि जीवितम्। नित्यगश्चानुबन्धश्च पर्य्यायैरायुरुच्यते"। पित्तकफामयान् हन्तीति पित्तकफामयघ्नमन्यदस्मान्महाखादिरान्न विद्यते ॥ १९४-१९८ ॥

गव्यघृत ८ प्रस्थ। क्वाथार्थ—खदिरकाष्ठ ४ तुला (४० सेर), जल विशुद्ध ८ द्रोण, अवशिष्ट क्वाथ २ द्रोण। कल्कार्थ—त्रायमाण, इन्द्रजौ, करञ्जबीज, भोजपत्र, चिरायता, नीम की छाल, मोथा, पित्तपापड़ा, अडूसा, कुटकी, पटोलपत्र, गिलोय, हरड़, बहेड़ा, आंवला, खदिरकाष्ठ, पद्माख, हल्दी, दारहल्दी, लालचन्दन, सतौने की छाल, असन (पीतशाल) काष्ठ, शिरीषछाल, शिंशपा (शीशम) काष्ठ, मूर्वामूल, शतावर, पिप्पली, इन्द्रायण, पाढ़, वच, अतीस, अनन्तमूल, प्रत्येक ४ तोले। यथाविधि घृत पाक करें। मात्रा—आधा तोला। यह घृत कुष्ठ श्वित्र, अत्यन्त प्रवृद्ध मेद (चर्बी), तथा प्रमेह आदि रोगों से पीडित पुरुषों के उन २ रोगों को नष्ट करता है। यह घृत ओज तथा मेधा को बढ़ाता है। यह मंगलकर तथा आयुःप्रद है। पित्तकफज रोगों के नाश के लिये इस घृत से बढ़ कर अन्य औषध नहीं ॥ १९४—१९८ ॥

महाखादिरानन्तरं खदिरघृतमाह—

**खदिरसारकषायविपाचितं कृतफलत्रिककल्कमिदं घृतम्।**
**हरति कुष्ठमथ त्रिफलामृताखदिरनिम्बपटोलवृषैः श्रृतम् ॥१९९॥**

खदिरसारकषायविपाचितं, खदिरसारपलशतं जलद्रोणे विपाच्य चतुर्थांशेन कषायेण विपाचितं घृतं प्रस्थसम्मितम्। कृतफलत्रिककल्कं, कृतः फलत्रिकेण कल्को यस्मिन्तथा फलत्रिकस्य चत्वारि पलानि कल्कीक्रियन्ते। इदं खदिरघृतं कुष्ठं हरति। खदिरघृतानन्तरं त्रिफलाघृतमाह—अथ त्रिफलामृताखदिरनिम्बपटोलवृषैः श्रृतम्। त्रिफलादिभिः कषायकल्कैः घृतं श्रृतं पक्वं कुष्ठं हरतीति ॥ १९९ ॥

खदिरघृत—गव्यघृत २ प्रस्थ। क्वाथार्थ—खदिरकाष्ठ १ तुला (१० सेर), जल २ द्रोण, अवशिष्ट क्वाथ आधा द्रोण। कल्कार्थ—त्रिफला ४ पल। यथाविधि पाक करें। यह घृत कुष्ठ को हरता है। मात्रा—आधा तोला।

त्रिफलाघृत—गव्यघृत २ प्रस्थ। क्वाथार्थ—त्रिफला, गिलोय, खदिर काष्ठ, नीम की छाल, पटोलपत्र, अडूसा; मिलित ४ प्रस्थ, क्वाथार्थ जल ३२ प्रस्थ, अवशिष्ट क्वाथ ८ प्रस्थ। कल्कार्थ—उपर्युक्त क्वाथ्यद्रव्य मिलित; ८ पल। यथाविधि साधित करें। यह घृत भी कुष्ठ नाशक है। मात्रा—आधा तोला ॥ १९९ ॥

मरिचाद्यं तैलमाह—

मरिचचन्दनदारुनिशाद्वयैर्नलदमेघशिलालशकृद्रसैः ।
त्रिवृतयाश्वहरार्कपयोविषैः सुरभिमूत्रयुतैर्विपचेद्भिषक् ॥ २०० ॥
कटुकतैलमिदं मरिचादिकं किटिभचर्मदलालसकापहम् ।
बहुलमण्डलसिध्मविचर्चिकाप्रचुरकण्डुकिलासविसर्पजित् ॥२०१॥

इदं मरिचादिकं नाम तैलम् । मरिचादिभिः कल्कैः पालिकैः कटुतैलाढकम् । विषं द्विपलम् । गोमूत्रं चतुर्गुणं दत्त्वा विपचेत् । निशाद्वयं हरिद्राद्वयम् । नलदं मांसी । मेघं मुस्तम् । शिला मनःशिला । आलं हरितालम् । शकृद्रसं गोमयरसम् । अश्वहरं श्वेतकरवीरमूलम् । अर्कपयः अर्कदुग्धम् । सुरभिमूत्रं गोमूत्रम् । एतत्किटिभाद्यपहन्तीति बहुलमण्डलादिजिच्च । बहुलमण्डलं मण्डलकुष्ठम् । किलासं श्वित्रमिति ॥ २००—२०१ ॥

मरिचाद्य तैल—कटुतैल २ आढक ( ८ प्रस्थ ), गोमूत्र ८ आढक । कल्कार्थ— कालीमिर्च, लालचन्दन, देवदारु, हल्दी, दारहल्दी, जटामांसी, मोथा, मनःशिला, हरिताल, गोमयरस, निसोत, श्वेत कनेर की जड़, मदार का दूध; प्रत्येक १ पल, मीठाविष २ पल । यथाविधि पाक करें । यह तैल किटिभ, चर्मदल ( चम्बल ) अलसक, मण्डलकुष्ठ, सिध्म, विचर्चिका, कण्डू, किलास ( श्वित्र ) तथा विसर्प को नष्ट करता है ॥ २००—२०१ ॥

साम्प्रतमौषधायस्कृतिमाह—

सतिल्वकविभीतकामलकसप्तलाशङ्खिनी-
पलाशतरुशिंशपाप्रभृतिभिः पृथक् प्रास्थिकैः ।
त्रिवृत्स्थविरदारुकज्वलनमन्थपथ्यायुतै-
रमीभिरुदकार्मणद्वितयपाचितैरेकशः ॥ २०२ ॥
पुनस्तत्रोत्तीर्णे भृतचरणशेषौषधिजले
पलाशद्रोण्यन्तःस्थितवति विनिर्वाप्य बहुशः ।
ततस्तप्त्वा सम्यक् तरुणखदिराङ्गारनिकरै-
रयःपिण्डं तस्मिन्नयसि च विलीने घनतमे ॥२०३॥

---

१—तन्त्रान्तरोक्ते मरिचाद्ये तैले विशाला रुक्चेति द्वे द्रव्येऽधिके पठ्येते ।

अयस्तुला गोमयपावकेन संसाध्यते सिध्यति चात्र देयम् ।
अयःसमं मागधिकादिवर्गचूर्णं घृतं क्षौद्रमतो द्विभागम् ॥२०४॥
इत्यामयैरप्रतिवार्यवीर्या सैषौषधायस्कृतिरुक्तमात्रा ।
प्रयुक्तया प्रत्यहमायुषश्च बुद्धेर्धियश्चापि भवेद्विवृद्धिः ॥ २०५ ॥

न चानया स्थौल्यमपि प्रमेहः
क्षयश्च कुष्ठानि नृणां न सन्ति ।
न पाण्डुता श्लीपदरुङ् न च स्या-
दूर्वोर्न च स्तम्भरुजः कदाचित् ॥ २०६ ॥

अमीभिस्तिल्वकादिभिर्द्रव्यैरुदकार्मणाद्वितयमेकशः पाचयेत् । सह तिल्वकेन वर्त्तत इति सतिल्वकः । सतिल्वकाश्चासौ विभीतकश्च सतिल्वकविभीतकः । स च आमलकं च सप्तला च शङ्खिनी च पलाशतरुश्च शिंशपा च तास्तथा । एतत्प्रभृतिभिरेवं प्रकारैः । पृथक् प्रास्थिकैः प्रत्येकं प्रस्थप्रमाणैः । त्रिवृतादियुक्तैः । तैः संयुक्तैस्तिल्वकादिभिः । तिल्वकः पट्टिकालोध्रः । सप्तला यवतिक्तका । शङ्खिनी कम्बुपुष्पी । स्थविरदारुकं वृद्धदारुकम् । ज्वलनमन्थोऽग्निमन्थः । शेषाणि प्रसिद्धानि । अमीभिरनन्तरोक्तैरेकशः एकीकृत्य उदकार्मणद्वितयं पानीयद्रोणद्वयं पाचयेत् । पुनरनन्तरं तत्र तस्मिन् उत्तीर्णे उत्तारिते श्रृतचरणशेषौषधिजले । औषधादिभिः संस्कृतं जलमौषधिजलम् । श्रृतं चरणशेषं चतुर्थांशशेषं यदौषधिजलं तच्छृतचरणशेषौषधिजलं तस्मिन् । पलाशद्रोण्यन्तःस्थितवति । पलाशद्रोणी पलाशकाष्ठमयी द्रोणी तस्या अन्तर्मध्यं तस्मिन् क्वाथे स्थितवति । अयःपिण्डं लोहपिण्डं तप्त्वा कैः ? तरुणखदिराङ्गारनिकरैर्निर्वाप्य बहुशः एकविंशतिवारान् । अयसि च विलीने विलयं गते घनतमे अतिशयेन घने सति पुनस्तत्कषायमद्भुतलोहमन्यस्मिन् लोहपात्रे साध्यते चतुर्भागावशेषं यावत् । कियत्प्रमाणमयः संसाध्यते ? अयस्तुला लोहपलशतम् । केन ? गोमयपावकेन गोमयाग्निना । सिध्यति चात्र देयं दातव्यं मागधिकादिवर्गात् पिप्पल्यादिगणात् चूर्णमयःप्रमाणं लोहसमं पलशतप्रमाणमित्यर्थः । अतः अस्मान्मागधिकादिचूर्णात् घृतं क्षौद्रं च मधु

द्विभागं घृतं द्विशतं मधु द्विशतमिति। सा एषा औषधायस्कृतिरुक्-मात्रा उक्तप्रमाणा। यया कल्पितया आमयै रोगैः कुष्ठादिभिः अप्रति-वार्यं वीर्यं शक्तिर्यस्याः सा तथा। अनया च प्रयुक्तया औषधियुक्त्या प्रत्यहं प्रतिदिवसमायुषो वृद्धिः। धियश्च बुद्धेर्वृद्धिर्भवति। अनया स्थौल्यं मेदुरत्वं च न भवति। प्रमेहक्षयकुष्ठानि नृणां प्राणिनां न भवन्ति। पाण्डुता पाण्डुरोगः। श्लीपदरुक् श्लीपदव्याधिः। ऊर्वोः स्तम्भ-रुजः ऊरुस्तम्भनं कदाचिन्न स्यात् न भवेदिति प्रत्येकमभिसम्बध्यते। ननु च शिंशपाप्रभृतिभिरिति किमनेन प्रभृतिग्रहणेन? यावता हि यथा परिपठितैरेतैर्द्रव्यैरियमयस्कृतिः साध्यते। न चानेन प्रभृतिग्र-हणेनापराण्यपि द्रव्याण्याक्षिप्यन्ते सुश्रुतेनाप्यनुक्तत्वात्। तथाहि त्रिवृच्छ्यामाग्निमन्थसप्तलाशङ्खिनीतिल्वकत्रिफलापलाशशिंशपानां स्वर-समादायेत्यादि। तस्मात्प्रभृतिग्रहणं निरर्थकम्। अत्रोच्यते—आचार्येण-तल्लिंगमात्रमदर्शि। यथा एवं प्रकारैः कुष्ठप्रत्यनीकैरपरैरपि द्रव्यैरप-रेष्वपि लोहेष्वन्या अप्यस्कृतयो विधेयाः। तथा च सुश्रुतः—एवं न्यग्रोधादिष्वप्ययस्कृतीर्विदध्यात्। तथा एतेन सर्वलोहेष्वयस्कृतयो व्याख्याताः"। "तथारिष्टासवसुरालेहचूर्णान्ययस्कृतीः। सहस्रशोऽपि कुर्वीत बीजेनानेन बुद्धिमानिति॥ २०२—२०६॥

इति कुष्ठचिकित्सा समाप्ता।

औषधायस्कृति-तिल्वक ( पट्टिकालोध्र ), बहेड़ा, आंवला, सातला, शंखिनी (शंखपुष्पी), पलाशतरु (ढाक का वृक्ष) की छाल, शीशम काष्ठ, निसोत, विधारामूल, अग्निमन्थ ( अरणी ) की छाल, हरड़; प्रत्येक १ प्रस्थ, क्वाथार्थ जल ४ द्रोण, अवशिष्ट क्वाथ १ द्रोण। इस क्वाथ को पलाश की लकड़ी से बनी हुई द्रोणी ( टब ) में डाल दें। पश्चात् १ तुला ( १० सेर ) परिमिति विशुद्ध लोहे के गोलों को खदिर ( खैर ) के अंगारों पर तपावें। जब लाल होजांय तब उस क्वाथ में बुझादें। इस प्रकार तबतक करते रहें जबतक कि सम्पूर्ण लोहे का श्लक्ष्णचूर्ण होकर क्वाथ में न मिल जाय। तदनन्तर गोमयाग्नि से इसे पुनः पकावें। जब पाकशेष हो तब पिप्पल्यादि गण का चूर्ण १ तुला तथा घी २ तुला मिलावें और नीचे उतार लें। शीतल होने पर मधु २ तुला का प्रक्षेप दें। इस औषधायस्कृति की रोगनाशिनी शक्ति रोगों द्वारा पराभूत नहीं होती अर्थात् यह रोगों को अवश्य ही नष्ट करती है। इसके प्रयोग से आयु, बुद्धि तथा मेधा की प्रतिदिन उत्तरोत्तर वृद्धि होती है। इसके सेवन से स्थूलता, प्रमेह, क्षय, कुष्ठ, पाण्डु, श्लीपद, ऊरुस्तम्भ प्रभृति रोग नष्ट होते हैं।

मात्रा—६ रत्ती॥ इस औषधायस्कृति के समान अन्य कुष्ठनाशक द्रव्यों द्वारा भी अयस्कृति प्रस्तुत की जा सकती है॥ २०२—२०६॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां परिमलाख्यायां चिकित्साकलिकाव्याख्यायां कुष्ठचिकित्सा समाप्ता।*

——:०:——

## अथ श्वित्रचिकित्सा।

कुष्ठचिकित्सानन्तरं यथोद्देशं श्वित्रचिकित्सितमाह—

विभीतकत्वङ्मलयूजटानां
क्वाथेन पीतं गुडसंयुतेन।
आवल्गुजं बीजमपाकरोति
श्वित्राणि कृच्छ्राण्यपि पुण्डरीकम्॥ २०७॥

अवल्गुजस्येदमावल्गुजं वाकुचीबीजं श्वित्राणि कृच्छ्राण्यपि कृच्छ्रसाध्यान्यपि अपाकरोति निवर्त्तयति। केन पीतम्? क्वाथेन। कासां? विभीतकत्वङ्मलयूजटानां, विभीतकत्वचश्चमलयूजटाश्च विभीतकत्वङ्मलयूजटाः। मलयू काकोदुम्बरिका स्वल्पविटपा। तासां क्वाथेन गुडसंयुतेनेति। क्रियाक्रमश्च वृद्धभिषजाम्—विभीतकत्वक्काकोदुम्बरिकाजटापलं क्वाथेन चतुःपलेन गुडकर्षेणालोडितेन बाकुचीबीजकर्षपिष्टं पीतं पुण्डरीकाश्वित्रयोर्नाशनं भवति। पीत्वा च कटुतैलेनाभ्यज्य ग्रीष्मे शरदि वर्षे यावत् यथाशक्ति स्थातव्यम्। जीर्णगव्यमथितेन दाडिमयूषेण वा भोक्तव्यमिति तेन स्फोटा जायन्ते। तेषु च भिन्नेषु हस्तिचित्रव्याघ्रचर्मणामन्यतरेण दग्धेन विषाणिकासिद्धेन तैलेन सह प्रलेपनं कार्यमिति। तथा च सुश्रुतमुनिः—"द्वैपं दग्धं चर्म मातङ्गजं वा भिन्ने स्फोटे तैलयुक्तः प्रलेपः। पूतिःकीटो राजवृक्षोद्भवेन क्षारेणाक्तः श्वित्रमेको निहन्ति"॥

बहेड़ा तथा मलयू (काकोदुम्बर, कठूमर) की जड़ के क्वाथ में गुड का प्रक्षेप देकर इसके साथ बाकुचीबीज के चूर्ण को सेवन करने से श्वित्र एवं पुण्डरीक कुष्ठ नष्ट होता है॥

अधुना नीलघृतमाह—

शङ्खिन्याः काकमाच्याश्च वायस्याश्च तुलाः पृथक्।
लोहचूर्णाढकार्द्धश्च त्र्याढका त्रिफला भवेत् ॥ २०८ ॥
अब्द्रोणद्वितये क्वाथः शेषः षोडशभागिकः।
सर्पिःप्रस्थं पचेत्तेन कर्षमात्रप्रयोजितैः ॥ २०९ ॥
व्योषबाकुचिकाव्याघ्रीदन्तीदारुकलिङ्गकैः।
भृङ्गशम्याकवरुणैः पारावतपदीयुतैः ॥ २१० ॥
परं श्वित्रापहं चैतन्नीलं[१] नाम घृतं भृतम्।
कुष्ठानि हन्ति सर्वाणि कपालव्याधिनाशनम् ॥ २११ ॥

शङ्खिनी यवतिक्तकाभेदः किञ्चित्पृथुपत्रा। काकमाची प्रसिद्धा। वायसी काकमाचीभेदोऽवगुण्ठितगौरफला गौरभुंभुलय इति लोके। आसां प्रत्येकं तुला ग्राह्या। लोहचूर्णाढकार्द्धश्च प्रस्थद्वयमित्यर्थः। त्र्याढका त्रिफला भवेत् त्रिफलाया आढकत्रयम्। अब्द्रोणद्वितयं सलिलद्रोणद्वयं दत्त्वा क्वाथः कर्त्तव्यः। शेषः षोडशभागिकः प्रस्थद्वयशेषः। तेन क्वाथेन सर्पिः प्रस्थं पचेत्। कर्षमात्रप्रयोजितैः प्रयुक्तैर्व्योषादिभिः। व्योषं त्रिकटुकम्। व्याघ्री कण्टकारिका। कलिङ्गका इन्द्रयवाः। भृङ्गो भृङ्गराजः। शम्याकः किरिमालफलम्। पारावतपदी हंसपदीविशेषः ईषल्लोहिता। अन्ये काकजङ्घा ज्योतिष्मती चाहुः। इदं नीलं नाम घृतं परं श्वित्रापहमेतत् कुष्ठानि हन्ति। सर्वाण्यष्टादशभेदभिन्नानि। कपालव्याधयो दारुणकाकालपलिततिलकालकप्रभृतयः। तान्नाशयति हन्तीति। एतच्च नीलघृतं क्षारपाणिप्रोक्तं तीसटाचार्येण लिखितमिति ॥२०८-२११॥

नीलघृत—गव्यघृत २ प्रस्थ। क्वाथार्थ-शंखिनी (यवतिक्ता भेद), १ तुला

---

१—भेले तु-"द्वौ प्रस्थौ लौहचूर्णस्य त्रिफला त्र्याढकं तथा। वायसीकाकमाचीभ्यां द्वे पले शंखिनी तुला ॥ त्रिद्रोणेऽपां विपक्तव्यं चतुर्भागावशेषितम्। घृतप्रस्थं पचेत्तेन गर्भं चैनं समावपेत् ॥ वरुणं वत्सकफलं त्र्यूषणं देवदारु च। अवल्गुजफलं दन्तीफलान्यारग्वधस्य च ॥ निदिग्धिका भृङ्गरजः पारावतपदी तथा। नीलकं नाम विख्यातमित्येतत् कुष्ठनुद् घृतम् ॥ श्वित्राणि रञ्जयेच्चैव पानाभ्यंगे प्रयोजितम्। पामाविचर्चिकासिध्मकिटिमानि च नाशयेत् ॥" इति पाठो दृश्यते किञ्चिद्भेदेन।

( १० सेर ), जल ४ द्रोण, अवशिष्ट क्वाथ ४ प्रस्थ। काकमाची ( मकोय ) १ तुला, जल ४ द्रोण, अवशिष्ट क्वाथ ४ प्रस्थ। वायसी ( काकनासा, कौआठोडी ) १ तुला, जल ४ द्रोण, अवशिष्ट क्वाथ ४ प्रस्थ। लोहचूर्ण २ प्रस्थ, त्रिफला ( मिलित ) आढक (१२ प्रस्थ), जल ८ द्रोण, अवशिष्टक्वाथ ८ प्रस्थ। कल्कार्थ—त्रिकटु,बाकुची-बीज, छोटीकटेरी, दन्तीमूल, देवदारु, इन्द्रजौ, भांगरा, अमलतास, वरुणछाल, पारावतपदी ( मालकंगनी अथवा काकजंघा ); प्रत्येक २ तोले। यथाविधि घृत पाक कर पान तथा अभ्यंग द्वारा प्रयुक्त कराने से कुष्ठ एवं दारुणक, पलित आदि कपाल रोग नष्ट होते हैं। यह श्वित्ररोग के नाश के लिये अत्यन्त उत्कृष्ट है ॥ २०८—२११ ॥

नीलानन्तरं महानीलमाह—

काकाह्वा मदयन्तिका ससुरसा शम्याकसंयोजिता-
श्चैतास्तु त्रिफलाढकात्रययुताः कल्प्यास्तुलाभागिकाः।
दन्तीचित्रककाकमाचिवरुणक्षुद्राहरिद्राद्वयै-
रित्येभिश्च सकौटजैः सखदिरैः सार्कैस्तुला कल्पिता ॥२१२॥
तोयद्रोणचतुष्टयेन विपचेत्पादावशेषे घृतात्
पात्रं चात्र सगोशकृद्रसदधिक्षीरं समूत्रं पृथक्।
भूनिम्बत्रिकटूत्पलैः पलमितैः श्यामाकरञ्जेङ्गुदी-
निम्बावल्गुजशिग्रुबीजसहितैर्नीलीसमायोजितैः ॥२१३॥
एतन्महानीलमतिप्रसिद्धं श्वित्रापहं कुष्ठगदापहश्च।
सर्पिर्विसर्पव्रणविद्रधिघ्नमुन्मादरोगघ्नमपस्मृतिघ्नम् ॥२१४॥

---

१—भेले तु—आरग्वधं वायसीं च बीजकं मदयन्तिका। एकैकस्य तुला देया प्रत्येकं त्रिफलाढकम्। दन्ती दार्वी हरिद्रा च वरुणं कुटजत्वचम्। चित्रकं चार्कमूलं च काकमाची निदिग्धिका। एषां दशपलान् भागान् त्रिद्रोणेऽपां विपाचयेत्। अष्टभागावशिष्टं तु पुनरग्नावधिश्रयेत्। धात्रीरसं वृषरसं जातीस्वरसमेव च। दधि सर्पिषश्च दुग्धं च गोमूत्रं गोशकृद्रसः। आढकाढकमेतेषां गर्भं चेमं समावपेत्। अवल्गुजं त्रिकटुकं नक्तमालफलानि च। पिचुमर्दं च जात्याश्च पीलुतिल्वकपल्लवाः। किराततिक्तकं श्यामा नीलिकानीलपल्लवाः। एतैः सिद्धं परिस्राव्य पाययेत् कुष्ठरोगिणम्। महानीलमिति प्रोक्तमेतत्कुष्ठापहं घृतम्। भगन्दरमथार्शांसि क्रुमींश्चापि विनाशयेत्। अष्टादशैव कुष्ठानि सर्पिरेतन्नियच्छति। अथर्वप्रहितो दीप्तो ब्राह्मयो दण्ड इवासुरान्। विशेषतस्तु श्वित्राणि रञ्जयेच्च भिनत्ति च। प्रसंगतः सेव्यमानं पानेनाभ्यञ्जनेन च। इति पाठः समुपलभ्यते।

अर्शांसि शोषमुपदंशशिरोविकार-
वल्मीकगुल्मगलगण्डगलामयांश्च ।
ग्रन्थ्यर्बुदश्वयथुमारुतरुक्प्रमेह-
मोहान् हरेद्बहुविधं विषमज्वरञ्च ॥ २१५ ॥

एताश्चतस्रः काकाह्वादयस्तुलाभागिकाः कल्प्याः कल्पनीयाः। काकाह्वा काकमाचीविशेषः गौरभुंभुलका इति । शम्याकः आरोग्यशिम्बिः। त्रिफला फलात्रिकं तस्याढकत्रययुता। एवं दन्त्यादीनां सर्वेषां तुला कल्पिता। क्षुद्रा कण्टकारिका। शेषाणि प्रसिद्धानि । तोयद्रोणचतुष्टयेन सर्वाण्येतानि विपचेत् । पादावशेषे क्वाथे घृतपात्रं विपचेदिति। कीदृग्गुणविशिष्टं घृतपात्रम्? सगोशकृद्रसो गोमयो रसः दधि च क्षीरं च सह एभिर्वर्त्तत इति सगोशकृद्रसदधिक्षीरं तत्तथा। सह मूत्रेण वर्त्तत इति समूत्रम्। पृथक् प्रत्येकमेषां पात्रमाढकमात्रं घृते देयमिति । भूनिम्बादिभिः पलमितैः पलप्रमाणैः कल्कीकृतैर्विपचेत् । भूनिम्बः किराततिक्तः। उत्पलं नीलमुत्पलम्। श्यामा वृद्धदारुकम्। करञ्जो वृक्षकरञ्जः। इङ्गुदस्तापसवृक्षः। अवल्गुजो बाकुचिका । शिग्रु शोभाञ्जनकम्। नीली नीलाञ्जनिका शारदा । शेषाणि प्रसिद्धानि । एतन्महानीलमतिप्रसिद्धं प्रख्यातं श्वित्रमपहन्तीति श्वित्रापहं, कुष्ठगदानपहन्तीति कुष्ठगदापहञ्च । विसर्पादीन् हन्तीति। अर्शःप्रभृतींश्च हरेत्। विषमज्वरं बहुविधं नानाप्रकारं हरेदिति। एतन्महानीलं हारीतोक्तं तीसटाचार्य्येणोक्तमिति ॥ २१२—२१५ ॥

इति श्वित्रचिकित्सा समाप्ता।

महानीलघृत—गव्यघृत–२ आढक। क्वाथार्थ–काकाह्वा ( काकनासा, कौआठोडी ), मदयन्तिका ( मल्लिका, मोतिया ), सुरसा ( तुलसी ), अमलतास; प्रत्येक १ तुला, त्रिफला (मिलित ) ३ आढक, दन्तीमूल, चित्रक, मकोय, वरुणछाल, छोटी कटेरी, हल्दी, दारहल्दी, कुटजछाल, खदिरकाष्ठ, मदार की जड़; मिलित १ तुला, जल ८ द्रोण; अवशिष्ट क्वाथ २ द्रोण। गोमयरस २ आढक, दही २ आढक (८ प्रस्थ) दूध २ आढक। कल्कार्थ—चिरायता, त्रिकटु, नीलोत्पल, विधारामूल, वृक्षकरञ्जबीज, हिंगोट, नीम की छाल; बाकुचीबीज, सहिजन के बीज, नीलीवृक्ष; प्रत्येक १ पल। यथाविधि पाक करें। इस घृत के पान तथा अभ्यंग से श्वित्र, कुष्ठ, विसर्प, व्रण, विद्रधि उन्माद, अपस्मार, अर्श, शोष, उपदंश, शिरोरोग, वल्मीक, गुल्म, गलगण्ड, गलरोग,

ग्रन्थि, अर्बुद, श्वयथु, वातरोग, प्रमेह, मोह, तथा नानाविध विषमज्वर नष्ट होते हैं॥ मात्रा—आधा तोला॥ २१२—२१५॥

इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां
परिमलाख्यायां चिकित्साकलिकाव्याख्यायां
श्वित्रचिकित्सा समाप्ता।

——:०:——

## अथ प्रमेहचिकित्सा॥

श्वित्रचिकित्सानन्तरं यथोद्देशं प्रमेहचिकित्सितमाह—

मुस्तेन्द्रदारुत्रिफलाकषायः
प्रमेहहृन्मेहवतां जनानाम्।
धात्रीफलक्वाथयुतः क्षपायाः
कल्कोऽथवा माक्षिकसम्प्रयुक्तः॥ २१६॥

मेहा विद्यन्ते येषां ते मेहवन्तः तेषां मेहवतां नराणां मुस्तेन्द्रदारुत्रिफलाकषायः शीतो माक्षिकसंयुक्तः मेहहृत्प्रमेहहरो भवति। धात्र्याः फलं धात्रीफलं आमलकं तस्य क्वाथः तेन युतः स्वरसेन वा। पुनः कोऽसौ? क्षपायाः हरिद्रायाः अथवा कल्को वा माक्षिककर्षमात्रप्रयोजितं प्रमेहहृद्भवति। ननु कथमवसीयते यथा पूर्वस्मिन् योगे माक्षिकं सम्बध्यते भेदवचनात्। "त्रिफलाभद्रमुस्तानि भद्रदारु च तत्समम्। सिद्धः कषायः पातव्यः प्रमेहे मधुसंयुतः"। इति चरकवचनात्। अत्र च क्षपायाः कल्कः धात्रीक्वाथयुतः पठ्यते, तत्कथं स्वरसेन चेति व्याख्यायते। "क्षौद्रेण युक्तामथवा हरिद्रां पिबेद्रसेनामलकीफलानामिति"॥ २१६॥

मोथा, इन्द्रजौ, देवदारु, हरड़, बहेड़ा, आंवला, मिलित २ तोले। क्वाथार्थ जल ३२ तोले, अवशिष्ट क्वाथ ८ तोले। इस क्वाथ में शहद का प्रक्षेप देकर पीने से प्रमेह नष्ट होता है। अथवा मधु युक्त हल्दी के कल्क को आंवलों के क्वाथ अथवा रस के साथ सेवन कराने से भी प्रमेह रोग नष्ट होता है॥ २१६॥

अतोऽनन्तरं धान्वन्तरं घृतमाह—

दन्तीदारुशटीशिलाह्वदहनैर्भल्लातकार्काभया-
स्नुग्वर्षाभुकरञ्जयुग्मवरुणैर्युक्पञ्चमूलीयुतैः।

इत्येभिर्दशपालिकैः शृतमपां द्रोणं पृथक् प्रास्थिकै-
रेभिश्चापि कुलत्थकोलयवकैः पादावशेषीकृते ॥ २१७ ॥
तस्मिन्नीपविडङ्गरोहिषकणाकाम्पिल्लविश्वौषधै-
र्भार्गीचव्यगजाह्वपिप्पलियुतैरेभिश्च सिद्धं घृतम् ।
एतन्मेहहरं क्षतक्षयहरं हिध्मापहं गुल्मजित्
पाण्डुत्वप्रतिघाति हृद्गुदगदप्रध्वंसि धान्वन्तरम् ॥२१८॥

एभिर्दन्त्यादिभिर्युक्पञ्चमूलीयुतैः प्रत्येकं दशपालिकैरेभिश्च कोलयवकैः पृथक् प्रास्थिकैः। अपां द्रोणं शृतं क्वथितम्। क्वाथे च पादावशेषीकृते तस्मिन्नीपादिभिः अर्द्धपालिकैः कल्कीकृतैर्घृतप्रस्थमात्रं सिद्धं धान्वन्तरं नाम। शलाटुर्बिल्वम्। दहनश्चित्रकः। स्नुक् सेहुण्डः। वर्षाभू पुनर्नवा। करञ्जयुग्मं वृक्षकरञ्जचिरिबिल्वौ। युक्पञ्चमूली दशमूलम्। कोलं बदरम्। पृथक् प्रास्थिकैः प्रस्थप्रमाणैः। नीपं निचुलम्। रोहिषं कट्तृणम्। कणा पिप्पली। कम्पिल्लकं रोचनिका। विश्वौषधं शुण्ठी। गजाह्वा हस्तिपिप्पली। शेषाणि प्रसिद्धानि। एतद् धान्वन्तरघृतं प्रमेहहरं क्षतक्षयहरं क्षयः शोषस्तस्य हरं विनाशकरम्। हिध्मा हिक्का तामपहन्तीति। गुल्मजित् गुल्मं जयतीति। पाण्डुत्वं पाण्डुरोगं तत्प्रतिहर्तृ शीलं यस्य तत्पाण्डुत्वप्रतिघाति। हृद्गुदरुजाप्रध्वंसि हृच्च गुदं च हृद्गुदे तयो रुजो व्याधयः ताः प्रध्वंसितुं शीलं यस्य तत्तथा। धान्वन्तरं धन्वन्तरिणा प्रोक्तमिति ॥ २१७–२१८ ॥

इति प्रमेहचिकित्सा समाप्ता।

धान्वन्तरघृत—गव्य घृत २ प्रस्थ। क्वाथार्थ–दन्तीमूल, देवदारु, कचूर, बेलगिरी, चित्रक, शुद्ध भिलावे, मदार की जड़, हरड़, सेहुण्ड की जड़, लाल पुनर्नवा, श्वेत पुनर्नवा, वृक्षकरञ्जबीज, लताकरञ्जबीज, वरुणछाल, दशमूल, (मिलित); प्रत्येक १० पल कुलत्थ, कोल (बेर), जौ, प्रत्येक १ प्रस्थ, जल ४ द्रोण, अवशिष्ट क्वाथ १ द्रोण। कल्कार्थ—नीप ( निचुल ), वायविडङ्ग, रोहिष तृण, पिप्पली, कमीला, सोंठ, भारंगी, चव्य, गजपिप्पली, प्रत्येक आधा पल। यथाविधि पाक करें। इस घृत के प्रयोग से प्रमेह, क्षतक्षय, हिक्का गुल्म, पाण्डु, हृद्रोग, तथा गुदारोग नष्ट होते हैं ॥ २१७—२१८ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*प्रमेहचिकित्सा समाप्ता ।*

# अथ पाण्डुरोगचिकित्सा।

प्रेमहचिकित्सानन्तरं यथोद्देशं पाण्डुरोगचिकित्सितमाह—

सग्रन्थिकाब्दचविकासुरदारुदार्वी-
माक्षीकधातुभिरिदं सविडङ्गभागैः।
चूर्णं कटुत्रिकफलत्रिकचित्रकैश्च
मण्डूरकं द्विगुणमष्टगुणं च मूत्रम् ॥ २१९ ॥
पक्त्वावलेहवदनेन कृताः प्रयुक्ताः
मण्डूरकाख्यवटकास्त्वनुपीततक्राः।
पाण्ड्वामयं श्वयथुयुक्तमपि प्रमेहं
बाधिर्यमूरुजडतां च जयन्ति जन्तोः ॥ २२० ॥

कटुत्रिकफलत्रिकचित्रकैरिदं चूर्णं कृत्वा द्विपलिकान्यष्टाविंशतिपलानि भवन्ति। चूर्णं मण्डूरकद्विगुणम्। मण्डूरकस्य षट्पञ्चाशत्पलानि। शेषाणि प्रसिद्धानि। एषां चतुर्दशानां द्रव्याणाम्। कीदृग्गुणविशिष्टैः कटुत्रिकादिभिः? सग्रन्थिकादिभिः साविडङ्गभागैश्च। ग्रन्थिकं पिप्पलीमूलम्। अब्दं मुस्तम्। दार्वी दारुहरिद्रा। तदेकत्र चतुरशीतिपलानि। सर्वेषामष्टगुणं मूत्रम् द्वासप्तत्याधिकानि षट्शतपलानि। मण्डूरकं लोहकिट्टानुकारि धातुद्रव्यम्[1]। एतत्सर्वमेकत्र पक्त्वा अवलेहवदवलेहविधिना। अनेन कृता वटका मण्डूरकाख्याः मण्डूरवटकाः प्रयुक्ता भक्षिताः। अनुपीततक्राः, अनु पश्चात् पीतं तक्रं येषां ते तथा। पाण्ड्वामयादीन् जयन्ति। तक्रवास्याशिनो जन्तोः बाधिर्यं स्थूलत्वं ऊरुजडतामूरुस्तम्भश्च। तत्रवास्याशन इति इति चरकवचनादनुक्तमपि व्याख्यातमिति ॥

मण्डूरवटक—पिप्पलीमूल, मोथा, चव्य, देवदारु, दारहल्दी, स्वर्णमाक्षिक भस्म, वायविडङ्ग, त्रिकटु, त्रिफला, चित्रक, प्रत्येक समभाग। सम्पूर्ण चूर्ण से दुगना मण्डूर चूर्ण। मण्डूरचूर्ण से आठगुणा गोमूत्र। गोमूत्र में मण्डूरचूर्ण को डाल पकावें। पकाते २

---

१—यद्यपि मण्डूरं लौहकिट्टमेव परं लौहकिट्टानुकारि धातुद्रव्यमित्युक्त्या तस्य कालेन पिण्डीभूतत्वं ख्यापयंष्टीकाकारः सर्वश्रेष्ठं शतवार्षिकं मण्डूरं ग्राह्यत्वेनातिदिशति। यथोक्तं रसतरंगिण्याम्—"षष्टिवर्षीयमधमं मध्यं सप्ततिवार्षिकम्। सर्वश्रेष्ठं समाख्यातं मण्डूरं शतवार्षिकम्"—इति ॥

जब यथावत् गाढा होजाय तब पिप्पलीमूल आदि के चूर्ण का प्रक्षेप देकर अच्छी प्रकार आलोडन करलें। इस प्रकार अवलेह—पाक विधि द्वारा पाक करके तीन रत्ति या चार रत्ति परिमाण के वटक बनावें। अनुपान—तक्र। इन वटकों के सेवन से पाण्डु, शोथ, प्रमेह, बधिरता तथा ऊरुस्तम्भ प्रभृति रोग नष्ट होते हैं। मण्डूरचूर्ण तय्यार करने लिये पुरातन मण्डूर को अग्नि में तपा कर बहुशः गोमूत्र में बुझाना चाहिये। परन्तु मण्डूरचूर्ण की जगह यदि मण्डूरभस्म का प्रयोग किया जाय तो लाभ अधिक होगा॥ २१९—२२०॥

अथानन्तरं विभीतकलवणमाह—

कृत्वाग्निवर्णं मलमायसं च मूत्रेऽभिषिञ्चेद्बहुशो गवां च।
तत्रैव सिन्धूत्थसमं विपाच्य निरुद्धधूमं च विभीतकाग्नौ[1] ॥२२१॥
तक्रेण पीतं मधुनाथवापि
विभीतकाख्यं लवणं प्रयुक्तम्।
पाण्ड्वामयिभ्यो हितमेतदस्मात्-
पाण्ड्वामयघ्नं न हि किञ्चिदन्यत्॥ २२२॥

अयो लोहं तस्मान्मलं लोहकिट्टं तप्त्वाग्निवर्णं कृत्वा गवां मूत्रे बहुशोऽभिषिञ्चेत् सप्तवारान्। सिन्धूत्थसमं सिन्धूत्थतुल्यं सिन्धूत्थमपि निर्वापयेत् एकवारम्। तत्रैव गोमूत्रे पञ्चगुणे पिष्ट्वा विपाचयेत्। निरुद्धधूमं बिभीतकाग्नौ। बिभीतककाष्ठैर्योऽग्निस्तस्मिन् तावत् विपाचयेत् यावत् लवणतुल्यं भवति। ततश्च चूर्णीकृतं तक्रेण मथितेन पीतं अथवा मधुना प्रयुक्तमेतद् विभीतकलवणं पाण्ड्वामयिभ्यः पाण्डुरोगिभ्यो हितमेतदस्मात् बिभीतकलवणादन्यत् पाण्ड्वामयघ्नं न तथा यथेदमिति॥ अयं योगः सौश्रुतः पाण्डुरोगे—"सिन्धूद्भवं चाग्निसमं च कृत्वा

---

१—सुश्रुतेन त्वस्य विभीतकाग्निना पाको नोक्तः, न च तेन विभीतकलवणमित्याख्या स्वीकृता। परं तीसटाचार्येणाव्यवहितपूर्वोक्तात् दग्ध्वाक्षकाष्ठैर्मलमायसं वेत्यादि सौश्रुताद्योगात् दग्ध्वाक्षकाष्ठैरित्यनुवर्त्त्यास्य पाक उक्तः। विभीतकाग्निना च कृतेऽपि पाके विभीतकलवणमित्याख्यास्य योगस्य न तथा हृदयंगमा यथा मण्डूरलवणमिति। एवं च विभीतकाख्यमित्यत्र मूलपाठे मण्डूरकाख्यमिति पाठः कर्त्तव्यः। तथा च यद्यपि सुश्रुतेन निरुद्धधूमं पचेदिति नोक्तं तथापि "उखायां स्थाल्यां निक्षिप्य मुखं पिधाय पचेत्" इति निबन्धसंग्रहवचनमनुसृत्य निरुद्धधूम एव पाकः कर्त्तव्यः। एवं च निरुद्धधूमं इति पठनं युक्तमेव।

सिक्त्वा च मूत्रे सकृदेव तत्र । लौहं च किट्टं बहुशश्च तप्त्वा निर्वाप्य मूत्रे बहुशस्तथैव । एकीकृतं गोजलपिष्टमेतदैकध्यमावाप्य पचेदुखायाम् यथा न दह्येत तथा विशुष्कं चूर्णीकृतं पेयमुदश्विता तत् । तक्रोदनाशी विजयेत रोगं पाण्डुं तथा दीपयतेऽनलं वा ॥ श्री जेज्जटाचार्येणाप्ययमेव व्याख्यात इति दर्शनादस्माभिरेवं व्याख्यातम् ॥ २२१-२२२ ॥

विभीतकलवण—मण्डूर को अग्नि में लाल करके सातवार गोमूत्र में बुझावें इसी प्रकार समपरिमाण में सैन्धानमक की डली को तपाकर उसी गोमूत्र में एक वार बुझावें । पश्चात् दोनों को पांच गुने गोमूत्र में पीस एक मट्टी की हांडी में डाल बहेड़े की लकड़ी की आंच पर पकावें । जब यथावत् पाक होजाय अर्थात् जलीयांश उड़ जाय तथा औषध पूर्णरूप से शुष्क होजाय तब हांडी को नीचे उतार लें और औषध को निकाल बारीक पीस लें । मात्रा—२ रत्ती । अनुपान—छाछ अथवा मधु । यह पाण्डुरोगियों के लिये अत्यन्त हितकर औषध है । पाण्डुरोग के नाश के लिये इससे बढ़कर अन्य औषध नहीं ॥ २२१—२२२ ॥

अधुना नवायसं चूर्णमाह—

सत्र्यूषणानि सफलत्रिकचित्रकाणि
साम्भोधराणि सविडङ्गफलानि च स्युः ।
कर्षाणि लोहरजसश्च नवेतिचूर्ण
मेतन्नवायसमिदं मधुनावलिह्यात् ॥ २२३ ॥
न स्युः प्रमेहपिटिका न च पाण्डुरोगाः
स्थौल्यं तनौ स्थविरता न च शीघ्रमेति ।
नो कुष्ठरुक् जठरता जठरस्य नैव-
नाग्नेरपाटवमनेन नवायसेन ॥ २२४ ॥

सत्र्यूषणानि सत्रिकटूनि । सह फलत्रिकचित्रकैः वर्त्तत इति सफलत्रिकचित्रकाणि । साम्भोधराणि समुस्तकानि । सविडङ्गफलानि विडङ्गफलसहितानि । स्युर्भवेयुः । लोहरजसः लोहचूर्णस्य नवकर्षाणि । एतत् चूर्णं नवायसम् । इदं च मधुना सह अवलेह्यम् । न स्युर्न भवेयुः प्रमेहपिटिकाः । न च पाण्डुरोगाः । स्थौल्यं स्थूलत्वम् । तनौ स्थविरता वृद्धत्वं न च शीघ्रमेत्यागच्छति । नो कुष्ठरुक् कुष्ठविकारः ।

जठरस्योदरस्य जठरता मेदुरत्वं नैव । नाग्नेः जठराग्नेरपाटवमपटुत्व-मसमर्थत्वम् । अनेन नवायसेन कृतेनेति ॥ २२३-२२४ ॥

इति पाण्डुरोगचिकित्सा समाप्ता ॥

नवायसचूर्ण—कालीमिर्च, पिप्पली, सोंठ, हरड़, बहेड़ा, आंवला, चित्रक, मोथा, वायविडंग; प्रत्येक १ कर्ष ( २ तोले ), लोहभस्म ९ कर्ष; इन्हें एकत्र मिश्रित कर मधु के साथ रोगी चाटे। मात्रा—१ रत्ती से ४ रत्ती तक। इसके सेवन से प्रमेहपिटिका, पाण्डु, स्थूलता, वार्धक्य, कुष्ठ, उदर में मेदोवृद्धि तथा मन्दाग्नि प्रभृति रोग नष्ट होते हैं ॥ २२३—२२४ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*पाण्डुरोगचिकित्सा समाप्ता।*

——:o:——

## अथ श्वासकासचिकित्सा।

पाण्डुरोगचिकित्सानन्तरं यथोद्देशं श्वासकासचिकित्सितमाह—

युक्पञ्चमूलीतुलया समेतं शतं प्रकल्प्य द्विजयष्टिकायाः ।
हरीतकीनां च शतं जलस्य द्रोणद्वयेन प्रपचेद्विधिज्ञः ॥ २२५ ॥
क्वाथेन तत्रैव हरीतकीस्ताः स्विन्नाः समेतास्तुलया गुडस्य ।
पक्त्वावलेहः शिशिरे च तस्मिन् क्षौद्रं क्षिपेदष्टपलप्रमाणम् ॥२२६॥
पलत्रयं च त्रिकटोर्विचूर्ण्य पलं चतुर्जातकभेषजानाम् ।
इत्यश्विनोर्भार्ग्यभयावलेहः प्रयुक्तमात्रोऽयमिहाचिरेण ॥२२७॥
श्वासं जयेत् पञ्चविधं च कासं शोषं षडेकादशरूपमुग्रम् ।
हिक्कां कफं छर्दिमुरोविकारमरोचकं मेहमपस्मृतिश्च ॥ २२८ ॥

युक्पञ्चमूली दशमूली। तस्यास्तुला तया समेतं संयुक्तम्। शतं प्रकल्प्यं प्रकल्पनीयम्। कस्याः ? द्विजयष्टिकायाः ब्राह्मणयष्टिकायाः। हरीतकीनां च शतं प्रकल्प्यम्। हरीतकीफलानां शतं प्रकल्प्यम्। एतज्जलस्य सलिलस्य द्रोणद्वयेन द्वाभ्यां द्रोणाभ्यां विपचेत् विधिज्ञो वैद्यः। अथानन्तरं ताः स्विन्ना हरीतक्यस्तत्रैव क्वाथे पक्त्वा गुडस्य

तुलया शतेन समेताः संयुक्ताः । अवलेहे संजाते तस्मिन्शिशिरे अतिशीतले क्षौद्रं मधु क्षिपेत् । कियत्? अष्टपलप्रमाणम् । त्रिकटोः त्रिकटुकस्य च पलत्रयं विचूर्ण्य । चतुर्जातकभेषजानां च पलं विचूर्ण्य क्षिपेत् इति सम्बन्धः॥ इत्यनेन प्रकारेण अश्विभ्यां अश्विनीकुमाराभ्यां कल्पिता भार्ग्यभया भार्गीहरीतकी तदाख्योऽवलेहो भार्ग्यभयावलेहः । इह आयुर्वेदप्रयुक्तमात्रः उपयुक्तमात्रोऽचिरेणैव कालेन अयं श्वासादीन् जयेदिति ॥ इति श्वासचिकित्सा ॥ २२५-२२८ ॥

भार्गीहरीतकी—दशमूल; मिलित १ तुला (१०० पल अथवा १० सेर), भारंगी १०० पल, पोटली में बंधी हुई हरड़ १०० (संख्या से); क्काथार्थ जल ४ द्रोण; अवशिष्ट क्काथ १ द्रोण । इस क्काथ को छान कर इसमें १ तुला गुड़ तथा क्काथकाल में स्विन्न की हुई पूर्वोक्त १०० हरड़ डालकर पकावें । पकाते २ जब गाढा होजाय तब नीचे उतार लें और शीतल होने पर त्रिकटु; मिलित ३ पल, छोटी इलायची, दारचीनी, तेजपत्र, नागकेसर; प्रत्येक १ पल, मधु ८ पल; इनका प्रक्षेप देकर अच्छी प्रकार आलोडन करलें । मात्रा—लेह १ तोले से २ तोले तक तथा एक हरड़ । अश्विनीकुमारों द्वारा निर्मित भार्गीहरीतकी के प्रयोग से श्वास, पांचों प्रकार का कास, षड्रूप अथवा एकादशरूप युक्त दारुण शोष (राजयक्ष्मा), हिक्का, दुष्ट कफ, छर्दि (कै), उरोविकार (फुप्फुसरोग), अरुचि, प्रमेह तथा अपस्मार; प्रभृति रोग नष्ट होते हैं । तन्त्रान्तरों में इसका ही नाम भार्गीगुड़ है । भेद केवल इतना ही है कि इस में चतुर्जातक अर्थात् त्रिसुगन्धि तथा नागकेसर का पृथक् २ एक पल दिया जाता है और अन्यत्र नागकेसर की जगह ४ तोले यवक्षार का प्रक्षेप देते हैं । तन्त्रान्तरोक्त भार्गीगुड़ में मधु ६ पल डालने का आदेश है । आज कल वैद्य हरीतकी का इस प्रकार पाक न करके उसके चूर्ण को गुड़ मिश्रित क्काथ को पकाते समय डाल कर पाक करते हैं । अधुनिक विधि द्वारा पाक किये हुए अवलेह की मात्रा—आधा तोला ॥ २२५—२२८ ॥

अथ यथोद्देशं कासचिकित्सामाह तत्र भार्ग्यभयानन्तरं व्याघ्री हरीतकीमाह—

व्याघ्रीशतं स्यादभयाशतं च द्रोणे जलस्य प्रपचेत् कषायम् ।
तुलाप्रमाणेन गुडेन युक्तं पक्त्वाभयाभिः सह ताभिरत्र ॥२२९॥
शीते क्षिपेच्छणमधुनः पलानि पलानि च त्रीणि कटुत्रिकस्य ।
त्वक्पत्रकैलाकरिकेसराणां चूर्णात्पलं चेति विदेहदृष्टः ॥२३०॥
क्षुद्रावलेहः कफजान् विकारान् सश्वासशोफानपि पञ्चकासान् ।
हिक्कामुरोरोगमपस्मृतिं च हन्याद् विवृद्धिं च करोति वह्नेः ॥२३१॥

व्याघ्री कण्टकारिका तस्याः शतं पलशतं स्यात्। तथा अभया हरीतकीफलं शतं च। द्रोणे जलस्य कषायं विपचेत्। द्रोणं द्रवद्रव्यस्य पञ्चभिः पलशतैर्द्वादशाधिकैर्भवति। पुनस्तत्कषायं चतुर्थांशावशिष्टं ताभिरभयाभिः सह यास्ताः पूर्ववत् स्विन्नाः। तुलाप्रमाणेन गुडेन च युक्तं पक्त्वा अत्र च अस्मिन् शीते मधुनः षट्पलानि। कटुत्रिकस्य चूर्णं त्रीणि पलानि। त्वक्पत्रकैलाकरिकेसराणां च चूर्णात् पलं क्षिपेदिति सर्वत्राभिसंबध्यते। करिकेसराणां नागकसेराम्। इत्येव विदेहदृष्टः क्षुद्रावलेहः कफजान् विकारान् हन्यात् हन्ति। वह्नेरग्नेश्च विवृद्धिं दीप्तिं करोति ॥ २२९—२३१ ॥

छोटी कटेरी १०० पल ( १० सेर ), पोटली में बंधी हुई हरड़ १०० (संख्या से) क्वाथार्थ जल २ द्रोण, अवशिष्ट क्वाथ आधा द्रोण। इस क्वाथ को छानकर इस में १ तुला गुड़ घोल दें और उपर्युक्त स्विन्न १०० हरड़ डालकर पकावें। जब गाढा होजाय तब नीचे उतार लें। शीतल होने पर त्रिकटु ( मिलित ) ३ पल, दारचीनी, तेजपत्र, छोटी इलायची, नागकेसर, प्रत्येक का चूर्ण १ पल तथा मधु ६ पल का प्रक्षेप देकर कड़छी से अच्छी प्रकार मिलालें। मात्रा—लेह आधा तोला तथा आधी हरड़। इस व्याघ्री हरीतकी का दूसरा नाम क्षुद्रावलेह भी है। इस विदेहोक्त क्षुद्रावलेह के सेवन से कफज रोग, श्वास, शोफ, पांचों कास, हिक्का, उरोरोग ( फुप्फुसरोग ), अपस्मार प्रभृति रोग नष्ट होते हैं तथा जाठराग्नि उद्दीप्त होती है। यदि हरीतकी का इस प्रकार पाक न करके गुड़ पाक के काल में ही इसके चूर्ण को डाल पाक किया जाय तो इस की मात्रा आधे तोले से एक तोले तक समझनी चाहिये। भृगूपदिष्ट व्याघ्री हरीतकी और विदेहोक्त व्याघ्रीहरीतकी में थोड़ा सा भेद है। वह भेद केवल इतना ही है कि भृगूपदिष्ट लेह में त्रिकटु चूर्ण का प्रक्षेप पृथक् २ दो पल परिमाण में दिया जाता है और इस में त्रिकटुचूर्ण मिलित ३ पल के प्रक्षेप देने का विधान है ॥२२९।२३१॥

क्षुद्रावलेहानन्तरं चित्रकहरीतकीमाह—

चत्वार्यत्र शतानि चित्रकजटायुक्पञ्चमूलामृता-
धात्रीणामुदकार्मणैस्त्रिभिरपां द्रोणेन च क्वाथयेत्।
पादस्थे क्वथने गुडस्य च शतं पथ्याढकेनान्वितं
पक्तव्यं भृतशीतले च मधुनः प्रस्थार्द्धमात्रं क्षिपेत् ॥२३२॥
व्योषस्य त्रिसुगन्धिकस्य च पलान्यत्रैव षट् प्रक्षिपेत्
क्षारस्यार्द्धपलं रसायनमिदं संसेव्यते सर्वदा।

**शोषश्वासबलासकासवमथुश्लेष्मप्रतिश्यायिभिः**
**क्षीणोरःक्षतहिक्किभिः कफशिरोरुग्भिः प्रनष्टाग्निभिः ॥२३३॥**

चत्वार्यत्र शतानि चित्रकजटायुक्पञ्चमूलामृताधात्रीणामुदकार्मणैस्त्रिभिरपां द्रोणेन च क्वाथयेत्। चित्रकजटामृताधात्रीणां त्रीणि शतानि। युक्पञ्चमूलं दशमूलं तस्य चतुर्थं शतम्। एवं चत्वारि शतानि क्वाथयेत् क्वाथं कुर्यात्। चित्रकदशमूलगुडूच्यामलकानां प्रति शतं जले चतुर्द्रोणे क्वाथ्य अत्र च कथने पादस्थे चतुर्भागस्थे गुडस्य च शतं पथ्याचूर्णाढकेनान्वितं संयुक्तं पक्तव्यमवलेहपाकेन। शृतशीतले च तस्मिन् लेहे मधुनः प्रस्थार्द्धमात्रं षोडशपलस्यार्द्धमष्टपलम्। व्योषस्य त्रिकटोरत्र षट्पलानि। त्रिसुगन्धिकस्य च एलात्वक्पत्राणां च षट्पलानि। क्षारस्य यवक्षारस्यार्द्धपलं प्रक्षिपेदिति सर्वत्र सम्बन्धः। इदं रसायनं सर्वदा सर्वकालं संसेव्यते सम्यक् उपयुज्यते। कैः? शोषश्वासबलासकासवमथुश्लेष्मप्रतिश्यायिभिः। बलासकास इति न श्लेष्मकासे। किंतर्हि? श्लेष्मणि कासे च। कफशिरोरुग्भिः अतिशयेनेति ॥ २३२। २३३ ॥

चित्रकहरीतकी–चित्रकमूल, दशमूल (मिलित), गिलोय, आंवले, प्रत्येक १०० पल (१० सेर), क्वाथार्थ जल ८ द्रोण, अवशिष्ट क्वाथ २ द्रोण। इस क्वाथ को छानकर इस में गुड़ १० सेर तथा हरीतकी चूर्ण १ आढक (४ प्रस्थ) डालकर पकावें जब गाढा होजाय तब नीचे उतारलें। शीतल होने पर त्रिकटु (मिलित) ६ पल, त्रिसुगन्धि (छोटी इलायची, तेजपत्र, दारचीनी) मिलित ६ पल, यवक्षार आधा पल (४ तोले) तथा मधु ८ पल का प्रक्षेप दें। मात्रा–आधा तोला। इस रसायन को प्रतिदिन सेवन करना चाहिये। राजयक्ष्मा, श्वास, दुष्टकफ, कास, कै, कफज प्रतिश्याय उरः क्षत, हिक्का, कफज शिरोवेदना तथा मन्दाग्नि से पीडित पुरुषों को इसका सेवन कराना चाहिये ॥ २३२। २३३ ॥

चित्रकहरीतक्यनन्तरं व्याघ्रीघृतमाह—

**क्वाथस्य कंसमुपकल्प्य रसस्य वापि**
**व्याघ्रीलतामृतलताद्वितयोद्भवस्य।**
**तन्मूलतः पलचतुष्टयमत्र कल्कः**
**सर्पिः पलानि दश षोडश षट् च सिद्धम् ॥२३४॥**

व्याघ्रीघृतं मधुयुतं विधिवत्प्रयुक्त-
मेतन्निहन्ति कफकासमपीनसञ्च ।
भार्गीहविर्हरति पूर्ववदेव पक्वं
श्वासं वृषस्य च घृतं सहसास्रपित्तम् ॥ २३५ ॥

क्वाथस्य कंसं पात्रं प्रकल्प्य रसस्य वा । कीदृग्गुणस्य च ? व्याघ्रीलतामृतलताद्वितयोद्भवस्य । व्याघ्रीलता च अमृतलता च तयोर्द्वितयं तस्मादुद्भवो यस्य क्वाथस्य रसस्य वा स तथा तस्य । तन्मूलतः तयोर्मूलं तन्मूलं तस्मात् । तदिति व्याघ्रीलतामृतयोः परामर्शः । पलचतुष्टयम् । एतदुक्तं भवति—व्याघ्रीलतामूलात् द्वे पले गुडूचीमूलात् द्वे पले च अत्र घृते कल्कः कर्त्तव्यः । सर्पिषश्च पलानि दश षोडश षट् च साध्यानि । एकत्र संख्यया एकं प्रस्थं द्वात्रिंशत्पलानि । ननु प्रस्थमेव कस्मान्नोक्तम् ? किमर्थं विस्तरमुच्यते ? अत्रोच्यते संख्या नात्र तन्त्रेऽस्त्येतत् ज्ञापनार्थं प्रस्थमर्द्धप्रस्थं पादं वा साध्यत इति । एतत्सिद्धं व्याघ्रीघृतं मधुनः पादेन युतं विधिवत् विधिना प्रयुक्तं कफकासपीनसान् निहन्ति । भार्गीहविः पूर्ववदेव पक्वं क्वाथेन रसेन वा तन्मूलकल्केन वा श्वासं निहन्ति । वृषस्य वासकस्य च घृतं पूर्ववत् पक्वं श्वासमुपहन्ति । अस्रपित्तं रक्तपित्तं वृषस्य घृतं सहसा शीघ्रं हन्तीत्यनेन विकारप्रत्यनीकतां महती वासकस्य प्रकाशयतीति ॥२३४-२३५॥

इति श्वासकासचिकित्सा समाप्ता ।

गव्यघृत १ प्रस्थ । छोटी कटेरी तथा गिलोय, मिलित इनका क्वाथ अथवा स्वरस ८ प्रस्थ । अर्थात् छोटी कटेरी का रस ४ प्रस्थ गिलोय का रस ४ प्रस्थ । कल्कार्थ छोटी कटेरी की जड २ पल, गिलोय की जड २ पल । यथा विधि पाक करें । मात्रा—आधा तोला । इस घृत को मधु के साथ मिश्रित कर सेवन करने से कफ, कास तथा अपीनस रोग नष्ट होता है । इसी प्रकार भार्गी द्वारा घृत का पाक कर प्रयोग करने से श्वास तथा वासा द्वारा घृत का पाक करने से श्वास एवं रक्तपित्त शीघ्र शान्त होता है ॥ २३४—२३५ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*श्वासकासचिकित्सा समाप्ता ।*

## अथ रक्तपित्तचिकित्सा ।

श्वासकासचिकित्सानन्तरं यथोद्देशं रक्तपित्तचिकित्सितमाह—

**कल्केन यष्टीमधुकस्य सर्पिर्विदारिकन्दद्रवदुग्धसिद्धम् ।**
**सशर्करं नागबलाविदारीशतावरीभिश्च पृथग्विपक्वम् ॥२३६॥**
**दूर्वाविदारीक्षुशतावरीणां रसैरुशीरोत्पलशर्कराभिः ।**
**मृद्वीकया राजकसेरुकैर्वा विपक्वमाज्यं पयसास्रपित्ते ॥ २३७ ॥**

अस्रपित्ते रक्तपित्ते। सर्पिर्यष्टीमधुकस्य कल्केन विदारिकन्दद्रवदुग्धसिद्धं हितम् । घृतस्य द्वात्रिंशत्पलानि यष्टीमधुकपल[1]चतुष्टयेन विदारीकन्दद्रवदुग्धाभ्यां चतुर्गुणाभ्यां साध्यते । सशर्करं शर्कराकल्केन वा पक्वम् । नागबलाविदारीशतावरीभिः पृथक् क्वथिताभिः पृथग्घृतानि त्रीणि तदाख्यानि रक्तपित्तहराणि । दूर्वादिरसैर्वा चतुर्भिरुशीरोत्पलशर्कराभिः कल्कीकृताभिः पक्वं घृतमसृक्पित्ते ॥ मृद्वीकया कल्कीकृतया राजकसेरुकैर्वा कल्कीकृतैर्विपक्वमाज्यं पयसा दुग्धेन चतुर्गुणेनासृक्पित्ते हितमिति ॥ २३६—२३७ ॥

घृत २ प्रस्थ । विदारीकन्द का रस ८ प्रस्थ । दूध ८ प्रस्थ । कल्कार्थ—मुलहठी ४ पल । यथाविधि सिद्ध करें । इस घृत को शर्करा के साथ रक्तपित्त में प्रयुक्त कराना चाहिये । इसी प्रकार नागबला, विदारीकन्द तथा शतावर; इनके क्वाथ एवं कल्क से पृथक् २ पाक कर क्रमशः नागबलाघृत, विदारीघृत, एवं शतावरीघृत तय्यार करें । तथा च दूर्वा ( दूब ), विदारीकन्द, इक्षु ( ईख ), शतावर; इनके रस तथा खस, नीलोत्पल, खांड; इनके कल्क द्वारा यथाविधि घृतपाक करें । अथवा द्राक्षा के कल्क से तथा कसेरू के कल्क से पृथक् २ चतुर्गुण दुग्ध एवं जल द्वारा घृत पाक करें। ये सम्पूर्ण घृत रक्तपित्त में हितकर हैं ॥ २३६—२३७ ॥

साम्प्रतं वासादिकं योगमब्रवीत्—

**नीलोत्पलाम्बुरुहकेसरमृत्प्रियङ्गु-**
**रोध्राञ्जनानि मधुना सितया युतानि ।**

---

१—यद्यपि स्नेहपाके त्वनिर्दिष्टप्रमाणे समुदितस्य द्रवस्य पादेन स्नेहो योज्यस्तत्पादेन च कल्कः इति साधारणो नियमस्तथापि शौनकमतेनात्राष्टमांशत्वमेव युक्तं घृतस्य स्वरसेन पाकनिर्देशात् । अधीते च शौनकः—"स्नेहे सिध्यति शुद्धाम्बुनिष्क्वाथस्वरसैः क्रमात् । कल्कस्य योजयेदंशं चतुर्थं षष्ठमष्टमम्" इति ॥

पीतानि वासककषायपरिप्लुतानि
घ्नन्ति प्रवृद्धमतिशोणितपित्तरोगम् ॥ २३८ ॥

नीलोत्पलादीनि पीतानि शोणितपित्तरोगं घ्नन्ति। नीलोत्पलं सौगन्धिकम्। अम्बुरुहकेशरं पद्मकेसरम्। मृत्सौराष्ट्रमृत्तिका। प्रियंगुः फलिनी। रोध्रं शबरपादपः। अञ्जनं रसाञ्जनम्। नीलोत्पलादीनां चूर्णं वासककषायपरिप्लुतं शर्करामधुसंयुक्तं पीतं अतिप्रवृद्धं शोणितपित्तं रक्तपित्तमपहन्तीति वाक्यार्थः ॥ २३८ ॥

अडूसे के क्वाथ में नीलोत्पल, कमलकेसर, सौराष्ट्रमृत्तिका ( फिटकरी ) प्रियंगु लोध्र, रसौंत; इनके ६ रत्ती चूर्ण का तथा खांड चौथाई तोला एवं मधु चौथाई तोले का प्रक्षेप देकर पीने से अति प्रवृद्ध रक्तपित्त रोग शान्त होता है ॥ २३८ ॥

अधुना खण्डकूष्माण्डमवोचत—

कूष्माण्डकात्पलशतं कुडवैश्चतुर्भि-
र्भृष्टं घृतादनु पचेत्समखण्डमेतत्।
विश्वाह्वजीरककणापलषट्कयुक्तं
त्वङ्नागपुष्पतृटि-पत्रपलद्वयेन ॥ २३९ ॥
एतत्पुराणमधुनः कुडवद्वयेन
संयोजितं जयति जन्तुषु रक्तपित्तम्।
ऊर्ध्वं प्रवृत्तमपि गुह्यगुदप्रवृत्त-
मस्मात्परं भुवि भवेदपरं न हृद्यम् ॥ २४० ॥
मूत्रं सकृच्छ्रमरुचिं च वमिं सतृष्णां
मूर्च्छामपस्मृतिमुरःक्षतमूर्ध्ववातम्।
उन्मादमप्यपहरेदतिवृष्यमर्शो-
रक्तात्मकं च शमयेद्विदधाति बुद्धिम् ॥ २४१ ॥

कूष्माण्डकात् स्विन्ननिष्कुलीकृतात् पलशतम्। घृतकुडवैश्चतुर्भिर्द्वात्रिंशत्पलैर्भृष्टं लुलितं मधुनिभं मधुसमं खण्डस्य पलशतेन युक्तं अनु पश्चात् विपचेत्। विश्वादीनां चूर्णं पलषट्कयुक्तम्। विश्वाह्वं शुण्ठी। जीरकमजाजी। कणा पिप्पली। तावत्पचेत् यावदवलेहानु-

कारि। शीते त्वगादीनां पलद्वयेन युक्तम्। त्वक् वराङ्गम्। नागपुष्पं नागकेसरम्। त्रुटिः एला। पत्रं तमालपत्रकम्। एतत् खण्डकूष्माण्डं पुराणमधुनः कुडवद्वयेन द्रवद्रव्यत्वात् षोडशभिः संयोजितम्। जन्तुषु प्राणिषु रक्तपित्तं जयति ऊर्ध्वं प्रवृत्तमास्यघ्राणप्रवृत्तम्। गुह्य-गुदप्रवृत्तमपि। भुवि हृद्यमस्मात्परमन्यन्न भवेत्। मूत्रकृच्छ्रादीनपहरेत्। अतिवृष्यं शुक्रजननम्। अर्शः शमयेत् रक्तात्मकं रक्तपित्तसंभवम्। बुद्धि-प्रज्ञां विदधाति करोति॥ २३९—२४१॥

खण्डकूष्माण्ड—एक सुपक एवं पुरातन कूष्माण्ड (पेठे) का छिलका उतारलें और बीजों को निकाल दें। पश्चात् इसके टुकड़े कर अच्छी प्रकार पीस लें और वस्त्र द्वारा निष्पीडन कर रस को पृथक् करलें। अवशिष्ट पेठे को धूप में किंचित् शुष्क करलें। इस प्रकार १०० पल पेठे के कल्क को २ प्रस्थ घी में भूनलें। जब अच्छी प्रकार भृष्ट होकर मधु सदृश हो जाय तब पृथक् किये हुए ८ प्रस्थ पेठे के रस में १०० पल (१० सेर) खांड घोलकर उसमें डालदें और पुनः पाक करें। जब पाक करते२ अवलेह सदृश हो जाय और पाक शेष काल हो तब सोंठ, जीरा, पिप्पली; प्रत्येक का चूर्ण २ पल डाल कर अच्छी प्रकार आलोडन करें और नीचे उतार लें। शीतल होने पर दारचीनी, नागकेसर, छोटी इलायची, तेजपत्र; इनके मिलित २ पल चूर्ण का प्रक्षेप दें और १६ पल पुरातन मधु मिलावें। मात्रा—१ तोले से २ तोले तक। मुख आदि मार्ग द्वारा प्रवृत्त ऊर्ध्वग रक्तपित्त, तथा गुह्य एवं गुदा द्वारा प्रवृत्त होने वाले अधोग रक्तपित्त में इस से उत्कृष्ट अन्य औषध नहीं। यह हृद्य है। इसके सेवन से मूत्रकृच्छ्र, अरुचि, कै, तृष्णा, मूर्च्छा, अपस्मार, उरःक्षत, ऊर्ध्ववात, उन्माद तथा रक्तार्श प्रभृति रोग शान्त होते हैं। यह शुक्रजनक तथा बुद्धिवर्धक है। अन्यत्र पठित खण्डकूष्माण्ड में नागकेसर का पाठ नहीं मिलता। वहां धनियां कालीमिर्च पृथक् २ आधा पल डालने का विधान है॥ २३९—२४१॥

खण्डकूष्माण्डकानन्तरं एलादिगुटिकामाह—

एला वराङ्गमपि पत्रकमेतदर्द्ध-
कर्षांशकं मगधजार्द्धपलं प्रकल्प्यम्।
मृद्वीकया च सितया मधुकेन युक्तं
खर्जूरकेण च पलप्रमितैश्चतुर्भिः॥ २४२॥
एलादिका मधुयुता गुटिकातिहृद्या
वृष्या तृषं प्रशमयेदति रक्तपित्तम्।

वक्षःक्षते च पठितार्शसि रक्तजे च
मूर्च्छासु च भ्रमिषु शस्ततमा नराणाम् ॥२४३॥

एला च वराङ्गश्च ( वराङ्गं त्वक् ) पत्रकं च एतत् त्रितयमप्यर्द्ध-कर्षांशकम् । मगधजार्द्धपलं पिप्पली अर्द्धपलम् । कल्प्यं कल्पनीयम् । मृद्वीकया द्राक्षया, सितया शर्करया, मधुकेन यष्टीमधुकेन, खर्जूरकेण च पलप्रमितैश्चतुर्भिः मृद्वीकादिभिः प्रयुक्ता एलादिका मधुयुता गुटिका अतिहृद्या । अतिशयेन हृदयाय हिता अतिहृद्या । वृष्या शुक्रजननी । तृषं प्रशमयेत् । रक्तपित्तमपि च प्रशमयेत् । वक्षःक्षतादिषु च नृणां प्राणिनां प्रशस्ततमा अतिशयेन हिता पठिता पूर्वाचार्यैरिति॥२४२-२४३॥

इति रक्तपित्तचिकित्सा समाप्ता ।

एलादिगुटिका—छोटी इलायची १ तोला, दारचीनी १ तोला, तेजपत्र १ तोला, पिप्पली ४ तोले, किशमिश, खांड, मुलहठी, पिण्डखजूर; प्रत्येक १ पल ( ८ तोले ); इन्हें एकत्र मिश्रित कर अनुरूप मधु से गुटिका बनावें । इस गुटिका को मुख में रख धीरे २ चूसना चाहिये । यह गुटिका हृद्य एवं वीर्य्यवर्धक है । इस के सेवन से तृषा तथा अत्यन्त प्रवृद्ध रक्तपित्त शान्त होता है । यह गुटिका उरःक्षत, रक्तार्श, मूर्च्छा एवं भ्रम ( सिर में चक्कर आना ) में प्रशस्त है ॥ २४२—२४३ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*रक्तपित्तचिकित्सा समाप्ता ।*

——:०:——

## अथ तृष्णाचिकित्सा ।

रक्तपित्तचिकित्सानन्तरं यथोद्देशं तृष्णाचिकित्सितमाह—

लाजाब्जबीजाञ्जनमुत्पलानि न्यग्रोधरोहः सबिसः सकुष्ठः ।
क्षौद्रेण युक्तो वटकीकृतश्च तृष्णाविघाताय मुखेन धार्यः ॥२४४॥

इलाजादीनां मधुना वटकं कृत्वा । स वटकः तृष्णाविघातार्थं मुखेन धार्यो धारणीयः । लाजा भृष्टधान्यविशेषः । अब्जबीजं पद्मबीजम् । अञ्जनं रसाञ्जनम् । उत्पलं नीलोत्पलम् । न्यग्रोधरोहो वटप्ररोहः । सबिसः समृणालम् । सकुष्ठः कुष्ठसहितः । क्षौद्रेण मधुना युक्तः संयुक्तः । अवटको वटकीक्रियते स्म वटकीकृत इति ॥ २४४ ॥

लाजादिवटक—लाजा, अब्जबीज ( कमलबीज, कमलगट्टा ), रसौंत, नीलोत्पल, वटाङ्कुर, बिस, कुठ; इन्हें एकत्र मिश्रित कर अनुरूप मधु द्वारा वटक बनावें। इस वटक को तृष्णानाश के लिये मुख में रखना चाहिये ॥ २४४ ॥

वटकानन्तरं तृष्णाघ्नं क्वाथमाह—

**लाजाब्जलामज्जमृणालिकाभिः शृङ्गाटनीलाब्जकसेरुकाभिः ।**
**शृतं पयः पीतमनुष्णमेतत् तृष्णां हरेत् क्षौद्रसितासमेतम् ॥१४५॥**

लाजादिभिः पयः सलिलं शृतं क्वथितमनुष्णं शीतम्। क्षौद्रसिते मधुशर्करे ताभ्यां समेतं संयुक्तं पीतं तृष्णां हरेदिति। अब्जं पद्मम्। लामज्जमुशीरभेदः। नीलाब्जं नीलोत्पलम्। कसेरुकं राजकसेरुकम्। एभिरिति ॥ २४५ ॥

इति तृष्णाचिकित्सा समाप्ता ।

लाजा, कमल, लामज्ज ( उशीरभेद, खवी ), मृणाल, सिंघाड़ा, नीलोत्पल, कसेरू; मिलित २ तोले, क्वाथार्थ जल ३२ तोले, अवशिष्ट क्वाथ ८ तोले इस क्वाथ में शीतल होने पर मधु तथा खांड; मिलित आधा तोला का प्रक्षेप देकर पीने से तृष्णा शान्त होती है ॥ २४५ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*तृष्णाचिकित्सा समाप्ता ।*

——:o:——

# अथ छर्दिचिकित्सा ।

तृष्णाचिकित्सानन्तरं यथोद्देशं छर्दिचिकित्सितमाह—

**पथ्याक्षधात्रीमगधोषणानां चूर्णं सलाजाञ्जनकोलमध्यम् ।**
**छर्दिं छिनत्त्याशु समाक्षिकं तु सत्र्यूषणं वाथ कपित्थमध्यम् ॥२४६॥**

पथ्यादीनां चूर्णं समाक्षिकं मधुसंयुक्तं आशु शीघ्रं छर्दिं छिनत्ति छेदयति। पथ्या हरीतकी। अक्षो विभीतकः। धात्री आमलकम्। मगधा पिप्पली। ऊषणं मरीचम्। एषां चूर्णम्। लाजाश्च अञ्जनं च कोलमध्यं च तानि तथा। एभिः सह वर्त्तत इति सलाजाञ्जनकोलमध्यं चूर्णम्। अञ्जनं रसाञ्जनम्। कोलमध्यं बदरमध्यम्। द्वितीयं योगमाह–

कपित्थमध्यं कपित्थगिरं सत्र्यूषणं सत्रिकटुकं मधुना सह छर्दिं निहन्ति ॥ २४६ ॥

इति छर्दिचिकित्सा समाप्ता।

हरड़, बहेड़ा, आंवला, पिप्पली, काली मिर्च, लाजा, रसौत, बेर की गुठली की मींगी; इनके चूर्णो को एकत्र सम परिमाण में मिश्रित कर २ मासा मात्रा में मधु के साथ चाटने से अथवा त्रिकटु तथा कैथ फल प्रत्येक को सपरिमाण में मिश्रित कर मधु के साथ चाटने से छर्दि ( वमन ) शीघ्र निवृत्त होती है ॥ २४६ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*छर्दिचिकित्सा समाप्ता ।*

——:o:——

## अथ हिक्काचिकित्सा ।

छर्दिचिकित्सानन्तरं यथोद्देशं हिक्काचिकित्सितमाह—

**वसन्तदूतीकुसुमं फलं च सगैरिका तिक्तकरोहिणी च।**
**योगद्वयं क्षौद्रसमन्वितं तु हिक्कां हरेत्साद्भुतभाषणाञ्च ॥२४७॥**

वसन्तदूती पाटला तस्याः कुसुमं फलं च क्षौद्रसमन्वितमित्येको योगः। तिक्तकरोहिणी कटुका सगैरिका गैरिकेण सह क्षौद्रसमन्विता इति द्वितीयोयोगः। योगद्वमवलेहद्वयं समधु हिक्कां हरेदिति। अद्भुतभाषणञ्च मनःसाध्वसभावकारि वचनम्। तेन सहिता साद्भुतभाषणा तां तथाभूतां हिक्कामित्यर्थः ॥ २४७ ॥

इति हिक्काचिकित्सा समाप्ता।

पाटला के पुष्प तथा फल को परस्पर समभाग में मिश्रित कर मधु के साथ चाटने से अथवा विशुद्ध गेरू तथा कटुकी को समपरिमाण में मिश्रित कर २ रत्ती मात्रा में मधु के साथ चाटने से भीषण शब्द युक्त हिक्का शान्त होती है ॥ २४७ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*हिक्काचिकित्सा समाप्ता ।*

——:o:——

## अथ शूलचिकित्सा।

अथ हिक्काचिकित्सानन्तरं यथोद्देशं शूलचिकित्सितं ब्रूते—

विश्वौषधेन रुचकेन सदाडिमेन
स्यादम्लवेतसयुतं कृतहिङ्गुभागम्।
ताद्धिङ्गुपञ्चकमिदं हृदयामयघ्नं
भेलाभिधानमुनिना गदितं मुनीनाम्॥ २४८॥

इदं तत् हिंगुपञ्चकं यद् भेलाभिधानेन मुनिना मुनीनां अन्येषां मुनीनां गदितं कथितम्। हृदयामयघ्नं हृदये आमया रोगाः शूलादयो हृदयामयाः तान् हन्तीति हृदयामयघ्नम्। विश्वौषधेन शुण्ठ्या। रुचकेन सौवर्चलेन। सदाडिमेन रुचकेन स्यात् भवेत्। अम्लवेतसयुतं योजितम्। कृतहिंगुभागं कृतः संपादितो हिंगुभागो यस्मिन् तत्तथा। इदं तत् हिंगुपञ्चकं चूर्णमिति।

हिङ्गुपञ्चक—सोंठ, कालानमक, अनारदाना, अम्लवेतस तथा हींग, इनके चूर्णों को समभाग में मिश्रित करें। मात्रा—२ रत्ती। इसके सेवन से हृच्छूल ( अर्थात् मलवात के कारण हृदयस्थल पर शूल होना ) नष्ट होता है। भेल मुनि ने इस योग का अन्य मुनियों को उपदेश दिया था॥ २४८॥

हिङ्गुपञ्चकानन्तरं हिङ्ग्वष्टकमवोचत—

व्योषाजमोदयुतजीरकयुग्मसिन्धु-
चूर्णं सरामठविभागमिति प्रयुक्तम्।
हिङ्ग्वष्टकं हरति हृज्जठरान्तराल-
शूलानि गुल्मगुदजग्रहणीविकारान्॥ २४९॥

व्योषादिचूर्णं हिङ्ग्वष्टकम्। व्योषं च अजमोदेन युतं यज्जीरकयुग्मं तच्च सिन्धुश्च एषां चूर्णम्। व्योषं त्रिकटुकम्। अजमोदा प्रसिद्धा। जीरकयुग्मं जीरकद्वयम्। सिन्धु सैन्धवम्। सह रामठविभागेन यत् वर्त्तत इति तच्चूर्णं तथा। रामठं हिंगु। इत्यनेन क्रमेण प्रयुक्तमुपयुक्तं हिङ्ग्वष्टकं हिंगुसहितमष्टकं हरति हृज्जठरान्तरालशूलानि। हृज्जठरं हृज्जठरे तयोरन्तरालं कोष्ठम् तस्मिन् शूलानि गुल्मादींश्च हरतीति॥२४९॥

हिंग्वष्टकचूर्ण—पिप्पली, काली मिर्च, सोंठ, अजमोदा, जीरा, कालाजीरा, सैंधा-

नमक, हींग, प्रत्येक द्रव्य के चूर्ण को समपरिमाण में मिश्रित करें। मात्रा—२ रत्ती से ४ रत्ती तक। यह चूर्ण हृच्छूल, आन्त्रशूल, गुल्म, अर्श तथा संग्रहणी को नष्ट करता है ॥ २४९ ॥

अधुना विश्वाद्यं चूर्णमाह—

सविश्वसौवर्चलहिङ्गुचूर्णमुष्णाभिरद्भिः परिपीतमेतत्।
हृत्पृष्ठकोष्ठान्तरवङ्क्षणान्तः शूलं जयत्याशु मरुत्कफोत्थम्॥२५०॥

एतत् विश्वादिकं चूर्णं परिपीतं हृदादिशूलं जयति। विश्वं च सौवर्चलं च विश्वसौवर्चले। सह विश्वसौवर्चलाभ्यां वर्त्तत इति सविश्वसौवर्चलम्। तच्च तत् हिङ्गु च सविश्वसौवर्चलहिङ्गु तस्य चूर्णम्। काभिः परिपीतं? उष्णाभिरद्भिः उष्णोदकैः पीतम्। मरुत्कफोत्थं वातश्लेष्मजं शूलं जयति नाशयतीति ॥ २५० ॥

विश्वाद्यचूर्ण—सोंठ, काला नमक, हींग, इन्हें एकत्र समपरिमाण में मिश्रित कर १ रत्ती मात्रा में गरम जल के साथ पीने से वातकफज, हृच्छूल, पृष्ठशूल। कोष्ठान्तरशूल ( पेट में दर्द होना ) तथा वङ्क्षणशूल ( जंघासों में शूल होना ) नष्ट होता है। अथवा सोंठ २४ रत्ती, कालानमक १२ रत्ती तथा हींग ६ रत्ती इस परिमाण में मिला ३ रत्ती मात्रा में सेवन करा सकते हैं ॥ २५२ ॥

अतोऽनन्तरं तुम्बुर्वाद्यं चूर्णमाह—

चूर्णं तदेतदिति तुम्बुरुपुष्कराह्व-
पथ्याम्लवेतसबिडं रुचकं सहिङ्गु।
सिन्धूद्भवेन सहितं यववारिपीतं-
शूलापतन्त्रकविकारहरं यदुक्तम् ॥ २५१ ॥

तदेतत् चूर्णं तुम्बुर्वाद्यमिति। तुम्बुर्वादीनां समाहारद्वन्द्वः। रुचकं सौवर्च्चलम्। सहिङ्गु हिङ्गुना सह। एतत्सर्वं चूर्णीकृतमित्यर्थः। सिन्धूद्भवं सैन्धवं तेन सहितम् संमिश्रम्। यवैः संस्कृतं वारि यववारि। यवक्काथेन पीतं शूलापतन्त्रकविकारहरं यदुक्तं पूर्वाचार्यैस्तदेतदिति ॥ ०५१ ॥

तुम्बुर्वाद्यचूर्ण—तुम्बुरु ( धनियां ), पुष्करमूल, हरड़, अम्लवेतस, बिडनमक, कालानमक, हींग, सैन्धानमक; इन्हें एकत्र समपरिमाण में मिला ४ रत्ती मात्रा में यवक्काथ (जौ का क्काथ) के साथ पीने से शूल एवं अपतन्त्रक रोग नष्ट होता है ॥२५१॥

अधुना दाधिकं घृतमाह—

रुग्यावशूकबिडदाडिमतिन्तडीक-
सिन्धूत्थहिङ्गुहुतभुक्सितकृष्णजीरैः।
सग्रन्थिकैः सचविकारुचकाजमोदै-
र्व्योषाम्लवेतसयुतैरिति कल्कपिष्टैः॥ २५२॥
तद्बीजपूरकरसेन चतुर्गुणेन
दध्ना च दाधिकमिति प्रवदन्ति वैद्याः।
हृत्पृष्ठकोष्ठगुदवङ्क्षणबस्तिशूल-
मर्शांसि गुल्ममपहन्ति विशेषतश्च॥ २५३॥

एतत् घृतं दध्ना संस्कृतं दाधिकमिति प्रवदन्ति वैद्याः। एतत् रुगादिभिः कल्कपिष्टैः साध्यते। रुगादीनामितरेतरद्वन्द्वः। रुक् कुष्ठम्। यावशूको यवक्षारः। तिन्तिडीकं वृक्षाम्लम्। सिन्धूत्थं सैन्धवम्। हुतभुक् चित्रकम्। सितकृष्णजीरके प्रसिद्धे। तैः सग्रन्थिकैः सपिप्पलीमूलैः। सचविकादिभिः। चविका चव्या। रुचकं सौवर्चलम्। व्योषाम्लवेतसाभ्यां युतैः संयुक्तै रुगादिभिः। व्योषं त्रिकटु। शेषाणि प्रसिद्धानि। इत्येभिर्द्रव्यैः कार्षिकैः कल्कपिष्टैः बीजपूरकरसेन दध्ना च चतुर्गुणेन घृतात् द्वात्रिंशत्पलानि साध्यानि। तद्दाधिकं घृतं हृदादिशूलान्यर्शांसि चोपहरति। गुल्मं च विशेषादिति॥ २५२-२५३॥

दाधिकघृत—गव्यघृत २ प्रस्थ। बिजौरे का रस ८ प्रस्थ। दही ८ प्रस्थ। कल्कार्थ—कुष्ठ, यवक्षार, बिडनमक, अनारदाना, तिन्तिडीक (वृक्षाम्ल, विषांबिल), सैन्धानमक, हींग, चित्रक, श्वेतजीरा, पिप्पलीमूल, चव्य, सौंचलनमक, अजमोदा, त्रिकटु, अम्लवेतस; प्रत्येक २ तोले। यथाविधि घृतपाक करें। मात्रा—आधा तोला। यह घृत हृदय, पीठ, कोष्ठ, गुदा, वङ्क्षण एवं वस्ति स्थित शूल तथा अर्श को विशेषतः गुल्म को नष्ट करता है॥ २५२—२५३॥

अधुना सप्तविंशकं गुग्गुलुमाह—

क्षारद्वयं त्रिकटुकं त्रिफला हरिद्रा-
युग्दारुमुस्तलवणत्रयतुम्बुरूणि।

१—चक्रदत्तोक्तं तु दाधिकं घृतमस्मात्पृथगेव स्वीकर्त्तव्यम्।

सग्रन्थिकाग्नितृटिचित्रकचव्यकुष्ठ-
माक्षीकपौष्करविडङ्गविषायुतानि ॥ २५४ ॥
यावन्त्यमूनि गजपिप्पलिसंयुतानि
तावत्प्रमाणमितगुग्गुलुयोजितानि ।
कृत्वा घृतेन गुटिका मनुजैः प्रयोज्या
पीतानुदुग्धजलकाञ्जिकमुद्गयूषा ॥ २५५ ॥
पाण्ड्वामयं क्षयमपस्मृतिमूर्ध्ववात-
मुन्मादमामपवनं श्वयथुं प्रमेहम् ।
हृत्पृष्ठकोष्ठकटिवङ्क्षणकुक्षिकक्षा-
शूलानि नाशयति कुष्ठकिलासरोगान् ॥ २५६ ॥

क्षारद्वयं यवक्षारस्वर्जिकाक्षारौ । त्रिकटुकादीनामितरेतरद्वन्द्वः । हरिद्रायुक् हरिद्रा दारुहरिद्रा । दारु देवदारु । मुस्तं मुस्तकम् । लवणत्रयं सैन्धवबिडसौवर्चलानि । सग्रन्थिकानि सपिप्पलीमूलानि तृट्यादीनि । तृटिः एला । माक्षीकं माक्षिकधातुः । पौष्करं पुष्करमूलम् । विडङ्गं कृमिजित् । विषा अतिविषा । शेषाणि प्रसिद्धानि । गजपिप्पली हस्तिपिप्पली तया संयुतानि क्षारद्वयादीनि द्रव्याणि यावन्त्यमूनि समुदितानि भवन्ति तावत्प्रमाणमितः प्रमाणीकृतो यो गुग्गुलुः स तथा । तेन संयुतानि संयुक्तानि । एषां घृतेन गुटिकां कृत्वा मनुजैः प्राणिभिः प्रयोज्या प्रयोजनीया । पीता अनु पश्चात् भक्षणात् दुग्धजलकाञ्जिक मुद्गयूषा यस्याः सा तथा । पाण्ड्वामयादीन् नाशयति । ऊर्ध्ववातः प्रतिक्षणमुद्गारः । तथा च ग्रन्थान्तरम्—'अधः प्रतिहता वायुः श्लेष्मणा मारुतेन वा । करोत्यनिशमुद्गारमूर्ध्ववातः स उच्यते ॥' इति । आमपवन आमवायुः । किलासः श्वित्रमिति ॥ २५४—२५६ ॥

इति शूलचिकित्सा समाप्ता ।

सप्तविंशकगुग्गुलु—यवक्षार, सर्जिक्षार, पिप्पली, कालीमिर्च, सोंठ, हरड़, बहेड़ा, आंवला, हल्दी, दारहल्दी, देवदारु, मोथा, सैन्धानमक, सौंचलनमक, बिडनमक, धनियां, पिप्पलीमूल, छोटी इलायची, चित्रक, चव्य, कुठ, स्वर्णमाक्षिकभस्म,

पुष्करमूल, वायविडंग, अतीस, गजपिप्पली; प्रत्येक समभाग। सम्पूर्ण चूर्ण के समान विशुद्ध गुग्गुलु। प्रथम किंचित् घृत से गुग्गुलु को पीटकर नर्म कर लेना चाहिये। पश्चात् उपर्युक्त चूर्ण मिश्रित कर गोलियां बनालें। मात्रा—४ रत्ती से ८ रत्ती तक। अनुपान—दूध, जल, कांजी, अथवा मुद्गयूष। इसके सेवन से पाण्डुरोग, क्षय, ऊर्ध्ववात, उन्माद, आमवात, शोथ, प्रमेह, हृच्छूल, पृष्ठशूल, कोष्ठशूल, कटिशूल (कमर में दर्द), वङ्क्षणशूल, कुक्षिशूल, कक्षाशूल, (कांख में दर्द), कुष्ठ तथा श्वित्र; प्रभृति रोग नष्ट होते हैं॥ २५४—२५६॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*शूलचिकित्सा समाप्ता।*

——:०:——

## अथोदावर्त्तचिकित्सा॥

शूलचिकित्सानन्तरं यथोद्देशमुदावर्त्तचिकित्सितमाह—

**गोमूत्रराठफलरामठदन्तिनीभिः**
**सेहुण्डसैन्धवबिडैश्च गुडप्रगाढैः।**
**आगारधूमसहितैरिति वर्त्तिरेषा**
**न्यस्ता गुदे ग्रथितविट्वटकामयघ्नी॥ २५७॥**

गोमूत्रादिवर्त्तिरेषा गुदे न्यस्ता योजिता ग्रथितविट्वटकामयघ्नी भवति। विट् पुरीषं तस्य वटकाः। ग्रथिताश्च ते विट्वटकाश्च ग्रथितविट्वटकाः तदाख्य आमयो रोगो ग्रथितविट्वटकामयः उदावर्त्तः तं हन्ति या वर्त्तिः सा ग्रथितविट्वटकामयघ्नी। राठफलं मदनफलम्। रामठं हिङ्गु। शेषाणि प्रसिद्धानि। गोमूत्रादिद्रव्यैर्गुडप्रगाढैर्गुडप्रधानैः। आगारधूमो गृहधूमस्तेन सहितैः सम्मिश्रैः। एतदुक्तं भवति—गोमूत्रे गुडमग्निना विलाप्य रामठफलादीनां चूर्णं प्रक्षिप्याङ्गुष्ठप्रमाणां वर्त्तिं कृत्वा गुदे न्यस्तव्या॥ २५७॥

इति उदावर्त्तचिकित्सा समाप्ता।

गोमूत्रादिवर्त्ति—गोमूत्र में वर्त्ति निर्माण के लिये अनुरूप गुड डालकर पकावें। जब गाढ़ा हो जाय तब मैनफल, हींग, दन्तीबीज, सेहुण्ड का दूध, सैन्धा-

नमक, बिडनमक तथा गृहधूम डालकर अंगूठे के बराबर मोटी वर्त्ति बनावें। इस वर्त्ति को गुदा में रखने से कठिन तथा वटकरूप मलयुक्त उदावर्त्त रोग नष्ट होता है॥ २५७॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*उदावर्त्तचिकित्सा समाप्ता।*

——:o:——

## अथ मूत्रकृच्छ्रचिकित्सा।

उदावर्त्तचिकित्सानन्तरं यथोद्देशं मूत्रकृच्छ्रचिकित्सितमाह—

त्रुटिहरेणुकणावृषयष्टिका
त्रिकटकोरुवुकोपलभेदकैः।
शृतमिदं जलमश्मजतूत्कटं
जयति साश्मरिमूत्रविनिग्रहम्॥ २५८॥

त्रुट्यादिभिः शृतमिदं जलं क्वाथं अश्मजतूत्कटं शिलाजतु प्रधानं पीतं मूत्रविनिग्रहं मूत्रकृच्छ्रं जयति। साश्मरि अश्मर्या सह। त्रुटि-रेला। हरेणुः रेणुका। कणा पिप्पली। वृषं वासकम्। यष्टिका यष्टी-मधु। त्रिकटको गोक्षुरकः। उरुवुकः एरण्डः। उपलभेदकः पाषाणभेदकः। एभिः पलप्रमाणैः शृतं पक्कं शिलाजतुकर्षयुतं मूत्रकृच्छ्रं जयति निवार-यतीति॥ २५८॥

इति मूत्रकृच्छ्रचिकित्सा समाप्ता।

त्र्युट्यादिक्काथ—छोटी इलायची, रेणुका, पिप्पली, अडूसा, मुलहठी, गोखरू, एरण्डमूल, पाषाणभेद; मिलित २ तोले, क्वाथार्थ जल ३२ तोले, अवशिष्टक्काथ ८ तोले। इस क्वाथ में शीतल होने पर ४ रत्ती विशुद्ध शिलाजीत का प्रक्षेप देकर पीने से अश्मरी (पथरी) तथा मूत्रकृच्छ्र रोग नष्ट होता है॥ २५८॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*मूत्रकृच्छ्रचिकित्सा समाप्ता।*

——:o:——

## अथ शोषचिकित्सा।

मूत्रकृच्छ्रचिकित्सानन्तरं यथोद्देशं शोषचिकित्सितमाह—

शोषातुरस्य ज्वररक्तपित्त-
कासारुचिश्वाससमन्वितस्य।
विड्भेदिनश्चापि हतस्वरस्य
क्रिया न कार्य्या कुशलैर्भिषग्भिः॥ २५९॥

कुशलैः साध्यासाध्यविभागज्ञैः ईदृशस्य शोषातुरस्य क्रिया न कार्या न करणीया। कीदृग्भूतस्य? ज्वरादिसमन्वितस्य ज्वराद्यभिभूतस्य। ज्वरश्च रक्तपित्तं च कासश्च अरुचिश्च श्वासश्च ते तथा तैः समन्वितः संयुक्तः उपद्रुतः। विड्भेदिनश्च अतिसारवतः। हतस्वरस्य स्वरभेदयुक्तस्य। इत्थंभूतस्यासाध्यस्य क्रिया चिकित्सा न कार्या गर्हितत्वात्। तथा च सुश्रुतः—"एकादशभिरेतैर्वा षड्भिर्वापि समन्वितम्। जह्याच्छोषार्दितं जन्तुमिच्छन् सुविमलं यशः"॥ २५९॥

कुशल वैद्य को ज्वर, रक्तपित्त, कास, अरुचि, श्वास, अतीसार, स्वरभेद; इन लक्षणों से युक्त राजयक्ष्मा के रोगी की चिकित्सा नहीं करनी चाहिये। यतः उपर्युक्त सम्पूर्ण लक्षणों से युक्त राजयक्ष्मा असाध्य होता है॥ २५९॥

अथ कीदृशस्य सतः कार्या चिकित्सेत्यत आह—

वित्तान्वितस्यात्मवतश्च जन्तोरमन्दवह्नेरचिरामयस्य।
बलोपपन्नस्य सतश्चिकित्सा चिकित्सकैः कस्यचिदेव दृष्टा॥२६०॥

वित्तं द्रव्यं तेन अन्वितो वित्तान्वितः तस्य। आत्मवतश्च आत्मनो हितस्य। अमन्दवह्नेः न मन्दोऽमन्दस्तीक्ष्णो वह्निर्यस्य स भवत्यमन्दवह्निस्तस्य। न चिरमचिरं स्तोकं कालमामयो रोगो यस्य स भवत्यचिरामयस्तस्य। बलं शारीरमोजःसंज्ञं तेनोपपन्नः संयुक्तः। तस्येत्थं भूतस्य जन्तोः सतश्चिकित्सकैर्वैद्यैश्चिकित्सा कस्यचिदेव शोषातुरस्य सफला दृष्टा चिकित्सेति॥ २६०॥

धनाढ्य, पथ्यसेवी, जिसकी जाठराग्नि मन्द न हुई हो, तथा बलयुक्त रोगी का नवीन उत्पन्न हुआ २ यक्ष्मा रोग तो कदाचित् शान्त हो सकता है। परन्तु धनरहित, अपथ्यसेवी, अग्निमान्द्ययुक्त, बलमांस हीन पुरुष का पुरातन राजयक्ष्मा तो सर्वथा असाध्य ही है॥ २६०॥

साम्प्रतं चिकित्सितमाह—

द्विपञ्चमूलीजलसिद्धमाज्यं वासाघृतं वाप्यथ षट्पलं वा।
हितं पयश्छागलमव्यवायः प्रयुज्यते नागबलाविधानम् ॥२६१॥

द्विपञ्चमूली दशमूली तस्याः जलं क्वाथः, तेन सिद्धं साधितं आज्यं घृतम्। वासाघृतं वासासंस्कृतं घृतं वासाघृतम्। अथ षट्पलं वा पूर्वोक्तं हितं भवतीति। पयश्छागलं क्षीरम्। अव्यवायश्चास्त्रीसम्पर्को हितो भवतीति। नागबलाविधानं च प्रयुज्यते प्रकर्षेण युज्यते क्रियत इत्यर्थः। अन्यान्यपि रसोनपिप्पलीशिलाजतुविधानानि प्रयुज्यन्ते। इदं तु प्रकर्षेण नागबलाविधानम्। तथा च सुश्रुतः—"रसोनयोगं विधिवत् क्षयार्त्तः क्षीरेण वा नागबलाप्रयोगम्। सेवेत वा मागधिकाविधानं यथोपयोगं जतुनोऽश्मजस्येति ॥ २६१ ॥

इस रोग में दशमूलक्वाथ से यथाविधि साधित घृत, अथवा वासाघृत अथवा षट्पल घृत तथा बकरी के दूध, का सेवन, मैथुन त्याग एवं नागबला ( गंगेरन ) का यथाविधि प्रयोग करना चाहिये ॥ २६१ ॥

अधुना च्यवनप्राशमाह—

शृङ्गीतामलकीफलत्रिकबलाछिन्नाविदारीशठी-[1]
जीवन्तीदशमूलचन्दनघनैर्नीलोत्पलैलावृषैः।
मृद्वीकाष्टकवर्गपौष्करयुतैः सार्द्धं पृथक् पालिकैः
अब्द्रोणेन शतानि पञ्च विपचेत् धात्रीफलानामतः ॥२६२॥
उद्धृत्यामलकानि तैलघृतयोः षड्भिश्च षड्भिः पलैः
भृष्टान्यर्द्धतुलां निधाय विधिवन्मत्स्यण्डिकायाः पचेत्।
शीते षण्मधुनः पलानि कुडवं वांश्याश्चतुर्जातका-
न्मुष्टिर्मागधिका पलद्वयमयं प्राशः स्मृतश्च्यावनः ॥२६३॥

---

१—शृंगीतामलकीकणोत्पलबलापथ्याष्टवर्गामृता-
जीवन्तीत्रुटिचन्दनागुरुशठीद्राक्षाविदार्यम्बुदैः।
वर्षाभूदशमूलपुष्करवृषैः सार्द्धं पृथक् पालिकै-
रब्द्रोणेन शतानि पञ्च विपचेद्धात्रीफलानामतः ॥ इति पाठान्तरम् ॥

न[1] शोषः साफल्यं व्रजति वपुषि क्षीयमाणेऽपि जन्तो-
र्न मूर्च्छा नो छर्दिस्तृडपि च न च श्वासकासादयश्च ।
न चालक्ष्मीर्विघ्नं क्वचिदपि न च व्यापदः संभवन्ति
प्रयोगादेतस्मान्मनसि न धियो विभ्रति भ्रान्तिमन्तः ॥२६४॥
प्रसरति पुरः प्रज्ञा ज्ञेये जरा जडतां व्रजेद्
विदधति पदं नैवाकस्मात् वलीपलितानि च ।
भवति न भयं रुग्भ्यः काये न चास्पदमाप्नुयु-
श्च्यवनरचितप्राशप्राशादपुण्यशतान्यपि ॥ २६५ ॥

शृङ्ग्यादिभिः सार्द्धं धात्रीफलानां पञ्चशतानि अब्द्रोणेन विपचेत्। शृङ्ग्यादीनामितरेतरद्वन्द्वः । शृङ्गी कर्कटशृङ्गी । तामलकी दरहलिका । फलत्रिकं त्रिफला । बला वाट्यालकम् । छिन्ना गुडूची । विदारी क्षीरविदारिका । शठी कर्चूरभेदः । जीवन्ती सुवर्णजीवन्ती । दशमूलं द्विपञ्चमूलम् । चन्दनं रक्तचन्दनम् । घनं मुस्तम् । नीलोत्पलं नीलपद्मम् । एला प्रसिद्धा । वृषं वासकम् । मृद्वीका द्राक्षा । अष्टकवर्गः पूर्वोक्तः । पौष्करं पुष्करमूलम् । मृद्वीकादियुतैः संयुक्तैः एभिः शृङ्ग्यादिभिः पृथक्-पालिकैः प्रत्येकं पलप्रमाणैः सार्द्धं सह धात्रीफलानां आमलकीफलानां पञ्चशतानि अपां सलिलानां द्रोणमब्द्रोणं तेन विपचेत् क्काथयेत् चतु-र्भागावशेषं यावत् । अतोऽस्मात्क्काथमुद्धृत्य पृथक् कृत्वा आमलकानि तैलघृतयोः प्रत्येकं षड्भि षड्भिः पलैर्युतानि आमलकानि भृष्टानि तलितानि । अगलितखण्डो मत्स्यण्डिका तस्यार्द्धतुला पंचाशत्पलानि निधाय क्षिप्त्वा विधिवदवलेहविधिना पचेत् । तस्मिन्नवलेहे शीतीभूते मधुनः षट्पलानि । कुडवश्चत्वारिपलानि वांश्या वंशरोचनायाः । चतुर्जा-तकं पूर्वोक्तं तस्मात् मुष्टिः पलम् । मागधिका पिप्पली तस्याः पलद्वयम् । एतत्सर्वं सूक्ष्मं चूर्णं कृत्वा क्षिपेत् । अयं च्यावनः प्राशः स्मृतः कथितः एतस्मात् च्यवनप्राशनप्रयोगात् जन्तोर्वपुषि शरीरे क्षीयमाणेऽपि

---

१—योगारत्नाकरे तु–न शोषः साफल्यं व्रजति वपुषि क्षीणमनसो न मूर्च्छा नो छर्दिस्तदपि च न च श्वासकसनम् । नचालक्ष्मीर्विघ्नः क्वचिदपि न च व्यापदभयं प्रयोगादेतस्मान्मनसिजधियो विभ्रति मनः । इति पाठान्तरं दृश्यते ॥

शोषादयः साफल्यं सफलत्वं न व्रजन्ति । न च मनसि व्यापदः संभवन्ति । उन्मादादयो मानसा विकाराः । न च धियो बुद्धयः भ्रान्ति विभ्रति धारयन्ति । अन्तरन्तःकरणे प्रज्ञा अवबोधो ज्ञेये ज्ञातव्ये पुरः अग्रतः प्रसरति । जरा वृद्धत्वं जडतां व्रजेत् विश्रब्धत्वमायातीत्यर्थः । वलयश्च पलितानि च नैवाकस्मात् सहसा पदमास्पदं विदधति कुर्वन्ति । न च रुग्भ्यो रोगेभ्योऽपि भयं भवति । च्यवनो नाम ऋषिस्तेन रचितो विरचितः प्राशः च्यवनप्राशः च्यवनरचितप्राशः तस्य प्राशनं प्राशः प्रकर्षेणाभ्यवहारः तस्मात् अपुण्यशतानि पापशतानि काये शरीरे आस्पदं स्थानं न प्राप्नुयुः कथञ्चनापि ॥ २६२-२६५ ॥

च्यवनप्राश—काकड़ासिंगी, भुंई आंवला, हरड़, बहेड़ा, आंवला, बलामूल, गिलोय, विदारीकन्द, कचूर, जीवन्ती, बिल्वछाल, अरणीछाल, श्योनाकछाल, गाम्भारीछाल, पाढलछाल, शालपर्णी, पृश्निपर्णी, छोटीकटेरी, बड़ी कटेरी, गोखरू, लालचन्दन, नीलोत्पल, छोटी इलायची, अडूसा छाल, द्राक्षा, अष्टवर्ग ( ऋद्धि, वृद्धि, मेदा, महामेदा, काकोली, क्षीरकाकोली, जीवक, ऋषभक ), पुष्करमूल; प्रत्येक १ पल, पोटली में बंधे हुए ५०० आंवले, इन्हें एकत्र २ द्रोण जल में सिद्ध करें। जब क्वाथ आधा द्रोण अवशिष्ट रह जाय तब क्वाथ को छान लें और आंवलों को पोटली से निकाल बीज एवं रेशों को पृथक् करलें। इन आंवलों को अच्छी प्रकार पीसकर ६ पल घृत एवं ६ पल तिलतैल ( एकत्र मिश्रित ) में भून लें। पश्चात् मत्स्यण्डिका ( विशुद्ध दानेदार खांड ) ५० पल ( ५ सेर ) को क्वाथ में घोल कर भर्जित आंवलों में डाल कर पकावें। पकाते २ जब लेहवत् गाढा होजाय तब नीचे उतार लें और शीतल होने पर ६ पल मधु, वंशलोचन ४ पल, छोटी इलायची, दारचीनी, तेजपत्र, नागकेसर, प्रत्येक का चूर्ण २ तोले, पिप्पली २ पल; इनका प्रक्षेप दें और अच्छी प्रकार आलोडन करें। मात्रा—आधे तोले से दो तोले तक । शरीर के क्षीण होने पर भी च्यवनप्राश के सेवन से शोष ( राजयक्ष्मा ) सफलता को प्राप्त नहीं होता अर्थात् राजयक्ष्मा नष्ट होता है तथा मूर्च्छा, छर्दि ( कै ), तृष्णा, श्वास, कास, प्रभृति रोग शान्त होते हैं, दरिद्रता एवं कोई विघ्न उपस्थित नहीं होता। इसके प्रयोग से उन्माद आदि मानसिक रोग नहीं होते, बुद्धि कभी भ्रान्त नहीं होती तथा च ज्ञेय विषय में प्रज्ञा प्रस्फुरित होती है। वृद्धावस्था एवं वलीपलित आदि इसके सेवक को सहसा आक्रान्त नहीं करते। इसका सेवन करने वाला रोगों के भय से सदा विमुक्त रहता है एवं सेवन करने वाले के शरीर पर पाप अधिकार नहीं कर सकते । यह च्यवनप्राश चरकोक्त च्यवनप्राश से कुछ भिन्न है। चरकोक्त च्यवनप्राश में क्वाथ्य द्रव्यों में माषपर्णी, मुद्गपर्णी, पिप्पली, अगर, पुनर्नवा, काकनासा, इनका पाठ अधिक है तथा वृद्धि, महामेदा, क्षीरकाकोली आंवला, बहेड़ा इनका पाठ नहीं है। यदि टिप्पणी

में निर्दिष्ट पाठान्तर के अनुसार क्वाथ्य द्रव्य लिये जांय—अर्थात् काकडासिंगी, भुंइ आंवला, पिप्पली, नीलोत्पल, बला, हरड़, अष्टवर्ग, गिलोय, जीवन्ती, छोटी इलायची, लालचन्दन, अगर, कचूर, द्राक्षा, विदारीकन्द, मोथा, पुनर्नवा, दशमूल, पुष्करमूल, अडूसा; ये द्रव्य लिये जांय तो इसमें भी माषपर्णी, मुद्गपर्णी, तथा काकनासा की जगह वृद्धि, महामेदा तथा क्षीरकाकोली की विशेषता है॥ २६२–२६५॥

च्यवनप्राशानन्तरममृतप्राशनमाह—

द्राक्षाजमांसरसदुग्धविदारिकेक्षु-
धात्रीवरीरससमं विधिवद्विपाच्य।
प्रस्थं घृतात्समधुकाष्टकवर्गभार्गी-
वीरा[1]वरीबदरनागबलाबलाभिः॥ २६६॥
द्राक्षाकसेरुकपरूषकनालिकेर-
शृङ्गाटकोत्पलपियालमधूलिकाभिः।
शृङ्गीमृणालकपिकच्छुकणाशठीभिः
सौम्यान्विताभिरिति सारिवया युताभिः॥ २६७॥
शीतेऽपरेऽहनि सितार्द्धतुलासमेतं
प्रस्थं पृथक् च मधुनो मगधापले द्वे।
दत्त्वार्द्धपालिकमितोषणनागपुष्प-
पृथ्वीवराङ्गदलचूर्णयुतः प्रयोज्यः॥ २६८॥
शस्तः शोषवतामपस्मृतिवतामुन्मदिनां मेहिनां
हिक्काकामलिनामरोचकवतां सश्वासिनां कासिनाम्।
ऊर्ध्वासृक्प्रदरप्रमूढमनसां हृद्रोगिणां गुल्मिनां
क्षीणानामुरसा भिषग्भिरमृतप्राशः प्रकाशीकृतः॥ २६९॥

घृतात् प्रस्थं द्राक्षादिभिः रसैः समं मधुकादिभिः कल्कीकृतं विधिवत् विपाच्य प्रयोज्यः। द्राक्षा मृद्वीका, आजं मांसं, तयोः रसश्च दुग्धं च विदारिका च इक्षुश्च धात्री च वरी च आसां रसाः। रस-

1—पृष्टिपर्णी महाशतावरी वेति केचित्।

शब्दः क्वाथे स्वरसे च वर्त्तते। द्राक्षादिभिः रसैर्मधुकादिभिः कल्की-कृतैर्विपचेत्। मधुकं यष्टीमधु। अष्टकवर्गः पूर्वोक्तः। भार्गी ब्राह्मणयष्टिः। वीरा क्षीरकाकोली। वरी शतावरी। उत्पलं नीलोत्पलम्। मधूलिका यष्टीमधु जलजा। शृङ्गी कर्कटशृङ्गी। मृणालमुशीरम्। सौम्या शालि-पर्णी। सारिवा उत्पलसारिवा। शेषाणि द्रव्याणि प्रसिद्धानि। शीते तस्मिन् अपरस्मिन् दिने सिता शर्करा तस्या अर्द्धतुलासमेतं संयुक्तम्। किं? प्रस्थम्। कस्य? मधुनो माक्षिकस्य। मगधा पिप्पली। तस्या द्वे पले तत्सर्वं दत्वा अर्द्धपलिकेन भागेन मितानि अर्द्धपालिकमितानि च तानि ऊषणनागपुष्पपृथ्वीवराङ्गदलानि च तेषां चूर्णं, तेन युतः संयुक्तो घृतप्रस्थः। प्रयोज्यः प्रयोजनीयः। स चामृतप्राशः प्रशस्यः प्रशस्तः। केषां? शोषवदादीनाम्। अमृततुल्यः प्राशोऽमृतप्राशः प्रका-शीकृतः प्रकटीकृतः। कैः? भिषग्भिः? वैद्यैः पूर्वाचार्य्यैरिति॥२६६-२६९॥

गव्यघृत २ प्रस्थ। द्राक्षाक्वाथ २ प्रस्थ। बकरे के मांस का क्वाथ २ प्रस्थ। दूध २ प्रस्थ। विदारीकन्द का स्वरस २ प्रस्थ। ईख का रस २ प्रस्थ। आंवलों का क्वाथ २ प्रस्थ। शतावर का रस २ प्रस्थ। कल्कार्थ—मुलहठी, जीवक, ऋषभक, मेदा, महामेदा, ऋद्धि, वृद्धि काकोली, क्षीरकाकोली, भारंगी, क्षीरकाकोली, शतावर, बेर, नागबलामूल ( गंगेरन की जड़ ), बलामूल ( खरैंटी की जड़ ) द्राक्षा, कसेरू, परूषकफल ( फ़ालसे ), नारियल, सिंघाड़ा, नीलोत्पल, चिरौंजी, मधूलिका ( जलज मुलहठी ), काकड़ासिंगी, खस, कौंछबीज, पिप्पली, कचूर, शालिपर्णी; मिलित ८ पल। यथाविधि घृतपाक करें। पश्चात् घृत को छान लें। शीतल होने पर दूसरे दिन इस घृत में ५० पल (५ सेर) विशुद्ध खांड, १ प्रस्थ शहद, पिप्पलीचूर्ण २ पल, कालीमिर्च ४ तोले, नागकेसर ४ तोले, इलायची ४ तोले, दारचीनी ४ तोले, तेजपत्र ४ तोले; इनका घृत में प्रक्षेप देकर अच्छीप्रकार आलोडन करें। मात्रा–चौथाई तोले से एक तोले तक। यह अमृतप्राश राजयक्ष्मा, अपस्मार, उन्माद, प्रमेह, हिक्का, कामला, अरुचि, श्वास, कास, ऊर्ध्वग रक्तपित्त, प्रदर, मोह, हृद्रोग, गुल्म; प्रभृति रोगों से पीडित एव क्षीणोरस्क पुरुषों के लिये अत्यन्त श्रेष्ठ है॥ २६६-२६९॥

अमृतप्राशनानन्तरं शिवगुटिकाकाह—

त्रीन् वारान् प्रथमं शिलाजतु जले भाव्यं भवेत् त्रैफले
निःक्वाथे दशमूलजेऽथ तदनु च्छिन्नोद्भवाया रसे।
वाट्यालक्कथने पटोलसलिले यष्टीकषाये पुन-
र्गोमूत्रेऽथ पयस्यथापि च गवामेषां कषाये ततः॥ २७०॥

शरदि ग्रीष्मकाले वा रवितापाढ्ये गुरु कृष्णं स्निग्धं निःशर्करं गोमूत्र-गन्धगुणेन युक्तं शिलाजतु श्रेष्ठं ज्ञातव्यम् । तथा च सुश्रुतः—"तेषु यत्कृष्णमलघु स्निग्धं निःशर्करं च यत् । गोमूत्रगन्धं यच्चापि तत्प्रधानं प्रचक्षते।"तदनु—"लोहढकीनिम्बगुडूचिसर्पिर्यवैः यथावत्परिधूपयेच्च । दुष्टौषधाकीटपतङ्गदंशसंतानिकादोषनिवारणार्थम् । एतत् द्रव्यैर्धूपयेत् । संतानिकादीन् दोषान् नाशयति । अतोऽनन्तरं जलशुद्धं कृत्वा ततः क्वाथैर्भावयेत् । तथा च ग्रन्थान्तरे—"प्राक् केवले जले धौतं शुष्कं क्वाथैस्ततो भाव्यमिति" । जलशुद्धिविधानं तु ग्रन्थान्तरोक्तं लिख्यते—"उष्णेऽथ काले रवितापयुक्ते व्यभ्रे निवाते समभूमिभागे । चत्वारि पात्राण्यसितायसानि न्यस्यातपे दत्तमनोऽवधानः ॥ शिलाजतु श्रेष्ठ-मथैकपात्रे प्रक्षिप्य तस्माद् द्विगुणं च तोयम् । उष्णं तदर्द्धं शृतमत्र दत्त्वा विशोधयेत् तन्मृदितं यथावत् ॥ ततश्च यत्कृष्णमुपैति चोर्ध्वं विलीय-मानं रविरश्मितप्तम् । पात्रात् तदन्यत्र ततो निदध्यात् तत्रापरं कोष्ण जलं क्षिपेच्च ॥ पुनश्च तस्मादपरत्र पात्रे तस्माच्च पात्रादपरत्र भूयः । पुनस्ततोऽन्यत्र विधाय कृष्णं यत्संहतं तत्पुनराहरेच्च ॥ यदा विशुद्धं जलमच्छमूर्ध्वं प्रसन्नभावान्मलमेत्यधस्तात् । तदा त्यजेत्तत्सलिलं मलश्च शिलाजतु स्याज्जलशुद्धमेवम् ॥ शुद्धं भावितयुक्तं च विधिनानेन मानवः । शिलाजतु प्रयुञ्जानः सर्वरोगैः प्रमुच्यते" इति ॥ एवं श्रेष्ठं धूपितं गतदोषं जलशुद्धं च कृत्वा ततः क्वाथैर्भावनामारभेत् त्रीन् वारा-नित्यादि । प्रथममेव शिलाजतु त्रैफले जले भाव्यं भवेत् त्रीन् वारान् त्रीण्यहोरात्राणि । तत्रायं वारशब्दोऽहोरात्रवाचकः यतो वारेणेत्यादिना अहोरात्रं व्याप्तं भवति । एकेन अहोरात्रेण एका भावना भवति, द्वितीयेन द्वितीया, तृतीयेन तृतीया । एवं त्रीन् वारान् इति । तथा च चरकः—"कौटजत्रिफलानिम्बपटोलघननागरैः। भावितानि दशाहानि" दशाहोरात्राणीत्यर्थः । त्रिफलाया संस्कृतं त्रैफलं जलं क्वाथः । कथं त्रिफलायाः क्वाथसंस्कारो भावनार्थं क्रियते ? शिलाजतुतुल्यं भावना-द्रव्यं जलमष्टगुणं दत्त्वा क्वथितं चतुर्भागावशेषं पूतं कृत्वा तस्मिन् शिलाजतु सुखोष्णे प्रक्षिपेत्, क्षिप्त्वावलोड्य साधयेत् । तथा च क्षार-

१—लोहमन्त्रागुरु ।

पाणिः—"शिलाजतुसमं द्रव्यं क्वाथ्यमष्टगुणे जले। पादावशिष्टं तत्पूतं तस्मिन्कोष्णे विनिक्षिपेत्"। अन्यैश्चाचार्यैः अष्टभागावशेषः क्वाथः क्रियत इत्युक्तम्। तथा च ग्रन्थान्तरम्—"समगिरिजमष्टगुणितैः क्वाथ्यं तद्भावनौषधं तोयैः। तन्निर्यूहेऽष्टांशे पूतोष्णे प्रक्षिपेत् गिरिजम्। तत्समरसतां यातं संशुष्कं प्रक्षिपेद् रसे भूयः॥ स्वैः स्वैरेवं क्वाथैर्भाव्यं वारान् भवेत् सप्त॥ एवं त्रैफले क्वाथे भाव्यं भावनीयम्। तदनन्तरं दशमूलक्वाथेन। तदनु पश्चात् छिन्नोद्भवायाः गुडूच्याः रसे क्वाथे। ततश्च वाट्यालकथने बलाकषाये। ततोऽनु पटोलसलिले पटोलक्वाथे। पुनर्यष्टीकषाये यष्टीमधुक्वाथे॥ अथानन्तरं गोमूत्रे। एवं त्रीन् त्रीन् वारान् क्रमेण एकैकेन त्रिफलादिकषायेण भावनीयम्। तदनन्तरं गवां पयसि दुग्धे भावनीयमेकं वारम्। ततः पश्चादेषां द्राक्षादीनां क्वाथे सप्तवारान् भावयेदिति। कथं एष लक्षणो विशेषो लभ्यत इति चेत् तथा च ग्रन्थान्तरम्—"काले रवितापाढ्ये कृष्णाभासं शिलाजतु प्रवरम्। त्रिफलारससंयुक्तं त्र्यहं विशुद्धं पुनः शुष्कम्॥ दशमूलस्य गुडूच्या रसे बलायास्तथा पटोलस्य। मधुकरसे गोमूत्रे त्र्यहं त्र्यहं भावयेत् क्रमशः॥ एकाहं क्षीरेण तु ततो भावयेत्पुनः शुष्कम्। सप्ताहं भाव्यं स्यात् क्वाथे तेषां यथालाभमिति॥ २७०॥

शिवगुटिका—शरद् ऋतु अथवा ग्रीष्मऋतु में उत्तम शिलाजीत की जल द्वारा शुद्धि करें। इसका जल द्वारा शुद्ध करने का विधान इस प्रकार है कि प्रथम अगर, अरहर, नीम, गिलोय, घी तथा जौ इनके धूम से कीट पतंग आदि के दोष निवारणार्थ धूपन करें और कृष्णलोह के चार पात्रों को धूप में रख ध्यानपूर्वक एक पात्र में शिलाजीत से दुगना साधारण जल और आधे परिमाण में अत्युष्ण जल डाल कर शिलाजीत को अच्छी प्रकार मसल दें। तदनन्तर धूप में निश्चल पड़ा रहने दें। जब शिलाजीत जल में घुल जाय और जल का रंग कृष्ण वर्ण का होजाय तब पानी को नितार कर दूसरे पात्र में डाल दें। इसे भी निश्चलभाव से धूप में पड़ा रहने दें। इससे रेत का अंश नीचे बैठ जायगा। पुनः नितार कर क्रमशः तीसरे पात्र में डालदें और अन्त में तीसरे पात्र में जब रेत का सम्पूर्ण अंश नीचे बैठ जाय तब चौथे पात्र में डाल दें और निश्चलभाव से पड़ा रहने दें। जब शुष्क होजाय तब पृथक् करलें। इस प्रकार तब तक करें जब तक शिलाजीत का सम्पूर्ण भाग पृथक् न होजाय। अर्थात् जल डालने से जल कृष्णवर्ण का न हो वैसा ही स्वच्छ रहे और मल नीचे बैठा रहे। इस प्रकार शिलाजतु का शोधन करके क्रमशः त्रिफलाक्वाथ, दशमूलक्वाथ, गिलोय का रस, बलाक्वाथ, पटोलपत्र का स्वरस, मुलहठी का क्वाथ; गोमूत्र इनसे तीन २ वार

भावना दें। भावनार्थ क्वाथ प्रस्तुत करने की विधि—शिलाजीत के समान—भावनाद्रव्य त्रिफला आदि। क्वाथार्थ—भावनाद्रव्य से आठगुना जल। इन्हें मन्द २ आंच पर पकावें। जब जल चतुर्थांश अवशिष्ट रह जाय तब उतार कर छानलें। शिलाजतु को भावना कोष्ण क्वाथ द्वारा ही दीजाती है। कई आचार्यों के मत है कि अष्टगुण जल में क्वाथ कर जब अष्टमांश अवशिष्ट रह जाय तब उस क्वाथ से भावना देनी चाहिये। इस प्रकार क्रमशः तीन २ वार भावना देकर गौ के दूध से एक वार भावित करें। तदनन्तर अधोलिखित कषाय द्वारा भावना दें॥ २७०॥

प्रागुक्तमेषां कषाये ततः केषामित्याह—

द्राक्षाभीरुविदारिकाद्वयपृथक्पर्णीस्थिरापौष्करैः
पाठाकौटजकर्कटाख्यकटुकारास्नाम्बुदालम्बुषैः।
दन्तीचित्रकचव्यवारणकणावीरा[1]ष्टवर्गौषधै-
रब्द्रोणे चरणस्थिते पलमितैरेभिः शृतैर्भावयेत्॥ २७१॥

एभिर्द्राक्षादिभिः शृतैर्भावयेत्। द्राक्षादीनामितरेतरद्वन्द्वः समासः। द्राक्षा प्रसिद्धा। अभीरुः शतावरी। विदारिकाद्वयं ह्रस्वक्षीरविदारी महाविदारी च। पृथक्पर्णी पृश्निपर्णी। स्थिरा शालिपर्णी। पौष्करं पुष्करमूलम्। कौटजाः इन्द्रयवाः। कर्कटाख्यं कर्कटशृङ्गी। अम्बुदो मुस्तम्। अलम्बुषा मुण्डितिका। वारणकणा हस्तिपिप्पली। वीरा क्षीरकाकोली। अष्टकवर्गौषधानि प्रागुपदिष्टानि काकोल्यादीनि। शेषाणि प्रसिद्धानि। एभिर्द्राक्षादिभिः पलमितैः प्रत्येकं पलप्रमाणैः शृतैः क्वथितैः। कस्मिन्? द्रोणे चरणस्थिते पादशेषे भावयेत् भावनं कुर्यात् सप्ताहोरात्राणि। शिलाजतुपलानि षोडश। क्वाथाढकेन सप्तांशविभागिकेन। एकैकेनांशेनैकैकमहोरात्रं तद् भावयेत् यावत् सप्तदिनानि। ननु कथमेतदवसीयते? यावता प्रतिदिनं एकक्वाथाढकेन कस्मान्न भाव्यते। इत्युच्यते—'एषां कषाये इति वचनात् अन्यथा बहुवचनेनैव कषायैरिति ब्रूयात्। ग्रन्थान्तरेऽप्युक्तम्—'सप्ताहं भाव्यं स्यात् क्वाथे तेषां यथालाभम्'। इत्यत्रापि बहुवचने नैव प्रयोगः। भावना चाढकसप्तांशेनैव षोडशपलप्रमाणस्य गिरिजस्यैका भवति। तथा च ग्रन्थान्तरम्—

१—वीरा मांसीति त्रिविक्रमः, जलजशाकमिति रत्नप्रभा, वीरा स्वनामप्रसिद्धा महाशतावरीति वृद्धवाग्भटटीकायामिन्दुः।

"द्रवेण यावता शुष्कमेकीभूयार्द्रतां व्रजेत् । द्रवप्रमाणं निर्दिष्टं भिषग्भिर्भावनाविधौ" । तस्मात् स्थितमेतदिति ॥२७१॥

द्राक्षा, शतावर, क्षीरविदारी, विदारीकन्द, पृष्टपर्णी, शालिपर्णी, पुष्करमूल, पाढ़, इन्द्रजौ, काकड़ासिंगी, कुटकी, रास्ना, मोथा, गोरखमुण्डी, दन्तीमूल, चित्रकमूल, चव्य, गजपिप्पली, वीरा ( जटामांसी अथवा महाशतावरी ), अष्टवर्ग ( काकोली, क्षीरकाकोली, जीवक, ऋषभक, मेदा, महामेदा, ऋद्धि, वृद्धि ); प्रत्येक १ पल, जल २ द्रोण, अवशिष्ट क्राथ आधा द्रोण (८ प्रस्थ) । इस क्राथ के सात भाग करके प्रत्येक भाग से एक २ दिन भावना दें । इस प्रकार सात दिन भावना दें । परन्तु यतः सम्पूर्ण क्राथ को एक दिन बना कर पड़ा रहने देने से वह बिगड़ जाता है अतः प्रतिदिन नवीन कषाय बनाकर ही भावना देनी चाहिये । तथा च उपर्युक्त परिमाण के अनुपात से ही एक दिन के क्राथ्य द्रव्यों को लेकर उसी अनुपात में जल द्वारा क्राथ करना चाहिये ॥ २७१ ॥

अनेन क्रमेण शुद्धं शिलाजतु ततश्चैतैर्योजयेत् । इत्यत आह—

धात्रीमेषविषाणिकात्रिकटुकैरेभिः पृथक् पञ्चभि-
र्द्रव्यैश्च द्विपलोन्मितैरपि पलं चूर्णाद्विदारीभवात् ।
तालीसात् कुडवश्चतुःपलमिह प्रक्षिप्यते सर्पिष-
स्तैलस्य द्विपलं पलाष्टकमथो क्षौद्राद्भिषग् योजयेत् ॥ २७२ ॥

धात्र्यादीनामितरेतरद्वन्द्वः । धात्री अमलकी । मेषविषाणिका मेषशृङ्गी । त्रिकटुकं शुण्ठीमरिचपिप्पल्यः । एषां धात्र्यादीनां प्रत्येकं द्विपलिकानां चूर्णम् । विदारीभवाच्चूर्णात् पलम् । तालीसात् तालीसपत्रात् कुडवश्चत्वारि पलानि । सर्पिषो घृतात् चतुःपलम् । एतत्सर्वं प्रक्षिप्यते नियुज्यते । तैलस्य द्विपलम् । प्रधानकल्पनया तिलतैलस्य । क्षौद्रात् मधुनः पलाष्टकमष्टौ पलानि भिषक् वैद्यो योजयेत् योगं कुर्य्यादिति ॥ २७२ ॥

इस प्रकार १६ पल शोधित तथा भावित शिलाजीत में आंवला, मेढासिंगी, पिप्पली, कालीमिर्च, सोंठ; प्रत्येक का चूर्ण २ पल, विदारीकन्द का चूर्ण १ पल, तालीसपत्र का चूर्ण ४ पल, गव्यघृत ४ पल, तिल तैल २ पल, शहद ८ पल; मिश्रित करें ॥ २७२ ॥

---

१—वृद्धवाग्भटे तु मेषविषाणिकास्थले कर्कटशृङ्गी पठ्यते एवं चक्रदत्तेऽपि । परन्तु चक्रदत्तेऽत्र धात्र्याः स्थले कटुक इति पाठः समुपलभ्यते तन्नातिसंगतम् वृद्धवाग्भटेऽपि धात्रीपाठोपलम्भात् ।

ततः पुनरेतैर्योजयेदित्याह—

तुल्यं पलैः षोडशभिः सिताया-
स्त्वक्क्षीरिकापत्रककेसरैश्च ।
बिल्वांशकैस्त्वक्त्रुटिसम्प्रयुक्तै-
रित्यक्षमात्रा गुटिकाः प्रकल्प्याः ॥ २७३ ॥

सिता शर्करा तस्याः षोडशभिः पलैस्तुल्यैः तुल्यप्रमाणैः। त्वक्क्षीरिका तुगाक्षीरी। पत्रं तमालपत्रम्। केसरं नागकेसरं प्रसिद्धम्। त्वक् वराङ्गम्। त्रुटिः एला। एभिर्बिल्वांशकैः पलप्रमाणैः सम्प्रयुक्तैः संयोजितैर्युक्तं शिलाजतु। अक्षमात्राः कर्षप्रमाणाः गुटिकाः प्रकल्प्याः प्रकल्पनीयाः। ताश्च शुष्का नवे घटे जातीकुसुमवासिते स्थाप्या इति॥ २७२॥

तदन्तर उसमें खांड १६ पल, त्वक्क्षीरिका (वंशलोचन, तवाशीर), तेजपत्र, नागकेसर, दारचीनी, छोटी इलायची, प्रत्येक का चूर्ण १ पल, मिलाकर कर्षप्रमाण की गुटिका बनावें। शुष्क होने पर चमेली के फूलों से अधिवासित पात्र में रक्खें। आधुनिक मात्रा–८ रत्ती से १६ रत्ती (२ मासे) तक ॥ २७३॥

इदानीं अस्याः शिवगुटिकायाः प्रयोगविधिमाह—

तासामेकतमां प्रयुज्य विधिवत्प्रातः पुमान् भोजनात्
प्राग्वा मुद्गदलाम्बु जाङ्गलरसं शीतं शृतं वा जलम्।
मार्द्वीकं[1] मदिरामगुर्वशनभुक् पीत्वा पयो वा गवां
प्राप्नोत्यङ्गमनङ्गवत्सुभगतासंपन्नमानन्दकृत् ॥ २७४ ॥

तासां पूर्वोक्तविधिना कल्पितानां एकतमां प्रयुज्य पुमान् अनङ्गवदङ्गं प्राप्नोति। तासामेकतमां प्रयुज्य प्रकर्षेणोपयोगं कृत्वा विधिवत् स्वस्त्ययनमङ्गलादिविधिना। प्रातः प्रभातकाले भोजनात् प्राग् अग्रे भोजनात्। पुमान् पुरुषः। किं विशिष्टः? अगुर्वशनभुक्। गुरु च तदशनं गुर्वशनं तद्भुङ्क्ते इत्यगुर्वशनभुक्। एतदुक्तं भवति—लघ्वशनभोजी। मुद्गदलाम्बु मुद्गयूषं ह्यनुपानं यथादोषं यथाव्याधिबलं तं च पीत्वा अङ्गं शरीरं सुभगतासम्पन्नमानन्दकृत् अनङ्गवत् कामदेववत् प्राप्नोतीति ॥ २७४ ॥

---

१—योगरत्नाकरेऽत्र माक्षीकमिति पठ्यते।

इन गुटिकाओं में से एक गुटिका को प्रातःकाल भोजन से पूर्व मुद्गयूष (मूंग का पानी), जांगल मांस रस, शीतल जल, क्वथित जल, मार्द्वीक (अंगूरी शराब), मदिरा अथवा दूध, इनमें से किसी एक के अनुपान से सेवन करें। पथ्य—लघु भोजन। इसके सेवन से मनुष्य कामदेव के समान सुन्दर अंग वाला होता है ॥ २७४ ॥

साम्प्रतं अस्य रोगप्रत्यनीकतामाह—

शोफं ग्रन्थ्यवमन्थवेपथुवमीपाण्ड्वामयश्लीपद-
प्लीहार्शःप्रदरप्रमेहपिटिका मेहाश्मरीशर्कराः।
हृद्रोगार्बुदवृद्धिविद्रधियकृद्योन्यामयामानिला-
नूरुस्तम्भभगन्दरज्वररुजस्तूनीप्रतूनीतृषः ॥ २७५ ॥
वातासृक्प्रबलं प्रवृद्धमुदरं कुष्ठं किलासं कृमीन्
कासं श्वासमुरःक्षतं क्षयमसृक्पित्तं सपानात्ययम्।
उन्मादं मदमप्यपस्मृतिमतिस्थौल्यं कृशत्वं तनो-
रालस्यं च हलीमकं च शमयेन्मूत्रस्य कृच्छ्राणि च॥२७६॥

इयं शिवगुटिका शोफादीन् मूत्रकृच्छ्रान्तान् शमयेत्। शोफादीनामितरेतरद्वन्द्वः। शोफः सर्वसरः ग्रन्थिः शोफसमुत्थानः प्रसिद्धः। अवमन्थो लिङ्गव्याधिः शूकत्वदोषकृत्। वेपथुः कम्पः। योन्यामयाः योनिरोगाः। आमानिलः सामो वायुः। वातसृक् वातरक्तम्। प्रबलं प्रकृष्टबलमवगाढमित्यर्थः। प्रवृद्धमुदरं प्रवर्द्धितमुदरम्। कुष्ठं त्वग्दोषम्। किलासं श्वित्रम्। क्षयं शोषम्। असृक्पित्तं रक्तपित्तम्। आवर्द्धितस्तरुणावस्थः उन्मादो मदसंज्ञः। अतिस्थौल्यं मेदुरत्वम्। कृशत्वं कृशता तनोः शरीरस्य। ननु च तनोरतिस्थूलत्वकृशत्वमपहन्तीति विरुद्धम्। अत्रोच्यते—भोजनात् प्राक् संसेव्य कृतानि मुद्गयूषदाडिमाम्बुपुराणषष्टिकौदनभोजनानि स्थूलत्वहंतृणि कृतं च मांसरसक्षीररक्तशालिभोजनं कृशत्वं हन्तीति ॥ २७५-२७६ ॥

यह शिवगुटिका शोफ, अवमन्थ, वेपथु (कम्प), वमी (कै), पाण्डुरोग, श्लीपद, प्लीहा, अर्श, प्रदर, प्रमेहपिडका, प्रमेह, अश्मरी (पथरी), शर्करा, हृद्रोग, अर्बुद, अण्डवृद्धि, विद्रधि, यकृद्रोग, योनिरोग, आमवात, ऊरुस्तम्भ, भगन्दर, ज्वर, तूनी, प्रतूनी, तृष्णा, प्रबल वातरक्त, प्रवृद्ध उदर, कुष्ठ, श्वित्र, कृमि, कास, श्वास, उरः-

क्षत, क्षय, रक्तपित्त, पानात्यय, उन्माद, मद, अपस्मार, अति स्थूलता, शरीर की कृशता, आलस्य, हलीमक, मूत्रकृच्छ्र प्रभृति रोगों को शान्त करती है ॥२७५-२७६॥

साम्प्रतं रसायनत्वमाह—

झटिति जरया सर्वश्वेतैरकालजराकृतै-
र्वृतमलिकुलाकारैरेभिः शिरश्च शिरोरुहैः।
वलिवदवलिर्व्यस्तातङ्कं[1] वपुश्च समुद्वहन्
प्रभवति शतं स्त्रीणां गन्तुं जनो जनवल्लभः ॥२७७॥

अलिकुलाकारैः शिरोरुहैः केशैः शिरो वृतं व्यस्तातङ्कं वपुश्च समुद्वहन् जनः स्त्रीणां शतं गन्तुं प्रभवति। शिरो मस्तकम्। झटिति शीघ्रं अकालजरया सर्वश्वेतैरेभिः शुक्लैः कृतैः। कैः? शिरोरुहैः। केशैः शिरोवृतं सत्। अलीनां भ्रमराणां कुलं अलिकुलं अलिकुलस्येव आकारो येषां शिरोरुहाणां ते भवन्त्यलिकुलाकाराः तैर्वृतं शिरः समुद्वहन्। एतदुक्तं भवतीति—अत्यन्तकृष्णैः। वलयो विद्यन्ते यस्मिन् वपुषि तद्वलिवत्। अवलिः अपगता वलिः। व्यस्ता विविधप्रकारेणास्ताः क्षिप्ता आतङ्काः रोगाः यस्य तत् व्यस्तातङ्कं तद्वपुः शरीरम्। समुद्वहन् जनः जनानां वल्लभः प्रियो जनवल्लभः स्त्रीणां शतं गन्तुं प्रभवतीति ॥२७७॥

इस शिवगुटिका के प्रयोग से वृद्धावस्था अथवा अकालजरा से श्वेत हुए २ शिर के बाल भ्रमर के समान कृष्णवर्ण के होजाते हैं। वलियुक्त शरीर (जिस शरीर पर झुर्रियां पड़ी हुई हो) वलीरहित होजाता है तथा इसका सेवक लोकप्रिय एवं नीरोग होकर शतस्त्री गमन में समर्थ होता है ॥ २७७ ॥

साम्प्रतं पुनस्तस्याः शिवगुटिकायाः फलमाह—

स्तिमितमतिरप्यज्ञानान्धः सदस्यपटुः पुमान्
सकृदपि यया ज्ञानोपेतः श्रुतिस्मृतिमान् भवेत्।
व्रजति च यया युक्तो योगी शिवस्य समीपतां
शिवगुटिकया कस्तामेनां करोति न मानुषः ॥ २७८ ॥

यया युक्तो योगी शिवस्य समीपतां व्रजति। तामेतां शिवगुटिकां मानुषः को न करोति। स्तिमितमतिरपि पुमान् पुरुषः।

---

१—योगरत्नाकरे तु प्रसरति बलं त्वस्तातंकं इति पाठान्तरमुपलभ्यते।

स्तिमिता जडा मतिर्यस्यासौ स्तिमितमतिः। अज्ञानान्धः न ज्ञानमज्ञानं अनवबोधः तेनान्धो न किञ्चित् पश्यति। सदसि सभायां अपटुरमुखरः। एवंभूतोऽपि यया कृतया सकृदपि स्तोककालमपि ज्ञानोपेतो ज्ञानसमन्वितः। श्रुतिः श्रवणं, स्मृतिः स्मरणं,ते विद्येते यस्यासौ श्रुतिस्मृतिमान् मानुषः पुरुषो भवति। यया शिवगुटिकया युक्तो योगं गतो योगी मुमुक्षुः शिवस्य समीपतां नैकट्यं व्रजति गच्छति। कस्तामेतां शिवगुटिकां मानुषो न करोति। अपि तु सर्व एव करोतीति॥ २७८॥

मन्दमति, मूर्ख तथा विद्वत्परिषद् में अप्रगल्भ पुरुष भी जिसके सेवन से ज्ञानयुक्त तथा श्रुति स्मृति सम्पन्न होता है और जिसके प्रयोग से योगी शिव की समीपता को प्राप्त करते हैं उस इस शिवगुटिका को कौन मनुष्य सेवन नहीं करना चाहता अर्थात् इस गुटिका का सेवन प्रत्येक मनुष्य को करना चाहिये॥ २७८॥

अधुनाऽपरमपि शिलाजतुप्रयोगमाह—

**फलत्रिकक्काथविशुद्धमादौ शुद्धं गुडूच्या दशमूलशुद्धम्।**
**स्थिरादिकाकोलियुगादिशुद्धं शिलाजतु स्यात्क्षयिषु प्रशस्तम्॥२७९॥**

आदौ प्रथमं फलत्रिकं त्रिफला, तस्याः क्काथेन पूर्ववत् परिभाषया विशुद्धं क्रियते। तदनन्तरं गुडूच्याः। ततो दशमूलेन। अनन्तरं स्थिरादिगणेन पूर्वोक्तेन स्थिरापृथक्पर्णीत्यादिना। ततोऽनु काकोलियुगादिगणेन। काकोलीद्वयमृद्धिवृद्धीत्यादिना शुद्धं शिलाजतु। प्रत्येकमेकैकेन सप्ताहं क्रियते। एवं शुद्धमेषामेव क्काथैर्यथादोषं पातव्यम्। यत्पीयमानं क्षयिषु क्षयरोगिषु प्रशस्तं स्यात्। तथा च सुश्रुतः—"तथैव योगं जतुनोऽश्मजस्येति"॥ २७९॥

इति शोषचिकित्सा समाप्ता।

त्रिफलाक्काथ, गिलोय के क्काथ, दशमूलक्काथ, स्थिरादिगण के क्काथ तथा काकोल्यादिगण के क्काथ से क्रमशः सात २ वार शोधित शिलाजीत क्षय के रोगियों के लिये अत्यन्त प्रशस्त है। मात्रा—४रत्ती॥ २७९॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*शोषचिकित्सा समाप्ता।*

——:o:——

## अथ कृमिचिकित्सा।

शोषचिकित्सानन्तरं यथोद्देशं कृमिचिकित्सितमाह—

**फञ्जीफणिज्झकफलत्रितयाखुकर्णी-**
**क्वाथः कृमिघ्नमगधाशिखिशिग्रुकल्कः।**
**पीतः कृमीनपहरेत् कृमिजा रुजश्च**
**जन्तोर्जयेदथ कणाकृमिजित्कषायः ॥ २८० ॥**

फञ्ज्यादिनां क्वाथः कृमिघ्नादिकल्कयुक्तः पीतः कृमीनपहरेत्। कृमिभ्यो जाताः कृमिजाः रुजो विकारास्तान्। कस्य ? जन्तोः प्राणिनः तांश्चापहरेत्। फञ्जी ब्राह्मणयष्टिका। फणिज्झकं प्रसिद्धम्। फलत्रिकं पूर्वोक्तम्। आखुकर्णी मूषिककर्णी। कृमिघ्नं विडङ्गम्। मगधा पिप्पली। शिखी चित्रकः। शिग्रुः शोभाञ्जनकः। अथ शब्देन द्वितीयं योगान्तरमाह। अथ कणाकृमिजित्कषायः पीतः जन्तोः कृमिजित् कृमिजा रुजश्च जयेत्। कणा पिप्पली। कृमिजिद् विडङ्गमिति ॥ २८० ॥

इति कृमिचिकित्सा समाप्ता।

भारंगी, तुलसीपत्र, त्रिफला, आखुकर्णी (चूहाकन्नी); मिलित २ तोले। क्वाथार्थ जल ३२ तोले, अवशिष्ट क्वाथ ८ तोले। इस क्वाथ में वायविडंग, पिप्पली, चित्रक, तथा सहिजन के बीजों का १ मासा परिमाण में प्रक्षेप देकर पीने से अथवा पिप्पली तथा वायविडंग; इनके क्वाथ को पीने से कृमि तथा कृमियों के कारण उत्पन्न होने वाले रोग नष्ट होते हैं ॥ २८० ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*कृमिचिकित्सा समाप्ता।*

——:o:——

अथ यथोद्देशमिदानीं स्वसन्तोषादुक्तानुक्तविषयमपरमिति कायचिकित्सितमाह—

**एरण्डतैलं वृषणप्रवृद्धौ सगोपयस्कं हितमेतदुक्तम्।**
**सराजवृक्षामृतवल्लिवासाक्वाथं हितं मारुतशोणितेषु ॥ २८१ ॥**

एरण्डस्य तैलं एरण्डतैलम्। गवां पयो गोदुग्धम्। सह गोपयसा वर्त्तत इति सगोपयस्कम्। वृषणप्रवृद्धौ हितमेतदुक्तं पूर्वाचार्यैः। राजवृक्षादिक्काथं एरण्डतैलं मारुतशोणितेषु वातरक्तेषु हितम्। राजवृक्षः आरोग्यशिम्बिः। अमृतवल्ली गुडूची। वासा आटरूषकमिति ॥ २८१ ॥

अण्डवृद्धि में गौ के दूध के साथ एरण्डतैल का प्रयोग अत्यन्त हितकर है। इसी प्रकार अमलतास, गिलोय तथा अडूसा; इनके उष्ण क्काथ में एरण्डतैल को डाल कर पीना वातरक्त से पीडित रोगी के लिये हितकर है। एरण्डतैल की मात्रा—आधे तोले से २॥ तोले तक ॥ २८१ ॥

अपरमप्येरण्डतैलस्य प्रयोगमाह—

मूत्रेण वा दुग्धसमन्वितं वा सर्वोदरेषु श्वयथौ च शस्तम्।
पक्काशयस्थे पवने प्रयोज्यमेरण्डतैलं हि विरेचनाय ॥ २८२ ॥

एरण्डतैलं गोमूत्रेण सह वा दुग्धसमन्वितं विरेचनाय प्रयोज्यम्। सर्वोदरेषु अष्टास्वपि उदररोगेषु शस्तम्। श्वयथौ च सर्वसरे शोफे शस्तम्। पक्काशयस्थे पवने वायौ प्रयोज्यमिति ॥ २८२ ॥

सम्पूर्ण उदररोग, शोफ तथा पक्काशयस्थित मलवात में विरेचनार्थ व्याधि के अनुसार गोमूत्र अथवा दूध के साथ एरण्डतैल का प्रयोग करना चाहिये ॥ २८२ ॥

इदानीं गुग्गुलुयोगमाह—

मूत्रेण वर्षाभुसुरेन्द्रदारुपथ्यामृतानां क्कथनेन वापि।
पीतो जयेद् गुग्गुलुरेक एव शोफं सपाण्डूदरमेदुरत्वम् ॥२८३॥

मूत्रेण वर्षाभ्वादिक्काथेन वा पीतो गुग्गुलुः एक एव शोफं सपाण्डूदरमेदुरत्वं जयेत्। वर्षाभूः पुनर्नवा। सुरेन्द्रदारु देवदारु। पथ्या हरीतकी। अमृता गुडूचीति ॥ २८३ ॥

गोमूत्र अथवा पुनर्नवा, देवदारु, हरड़, गिलोय; इनके क्काथ से केवल विशुद्ध गुग्गुलु के ही सेवन करने से पाण्डु युक्त शोफ तथा उदर की मेदुरता अर्थात् पेट में मेद (चर्बी) का बढना नष्ट होता है। गुग्गुल की मात्रा–२ रत्ती से ८ रत्ती तक ॥२८३॥

अपरमपि गुग्गुलुयोगमाह—

मूत्रेण वा शोफिषु गुग्गुलुः स्या-
द्रायत्रिसारक्कथनेन कुष्ठे।

मेदस्विनां चापि हितः कषाये
बिल्वादिजे वा शिखिमन्थजे वा ॥ २८४ ॥

गोमूत्रेण शोफिषु शोफविकारवत्सु गुग्गुलुर्हितः स्यात् भवेत् । कुष्ठेषु वा कुष्ठविकारेषु गायत्रिसारः खदिरसारः तस्य क्वाथेन गुग्गुलुर्हितः । मेदस्विनां मेदुराणां बिल्वादिके पृथुपञ्चमूलकषाये गुग्गुलुर्हितः । शिखिमन्थोऽग्निमन्थः तस्माज्जातः कषायः शिखिमन्थजः तेन वा गुग्गुलुर्हितो मेदस्विनामिति ॥ २८४ ॥

विशुद्ध गुग्गुलु को गोमूत्र के साथ शोफ में, खदिरकाष्ठ के क्वाथ से कुष्ठ में, महत्पञ्चमूल के क्वाथ से अथवा अरणीछाल के क्वाथ से मेदोरोग में सेवन करना अत्यन्त लाभकर है ॥ २८४ ॥

व्रणादिषु गुग्गुलुयोगमाह—

फलत्रिकक्वाथयुतो व्रणेषु कुष्ठेषु नाडीषु भगन्दरेषु ।
सकाञ्चनारत्रिफलोपकुल्यः सगण्डमालागलगण्डरोगे ॥ २८५ ॥

गुग्गुलुरिति अनुवर्त्तते । व्रणेषु द्विविधेषु शारीरेष्वागन्तुषु च कुष्ठनाडीभगन्दरेषु फलत्रिकस्य क्वाथः तेन क्वाथेन युतः संयुक्तो गुग्गुलुर्हितः । काञ्चनारश्च त्रिफला च उपकुल्या च काञ्चनारत्रिफलोपकुल्याः सह तैः वर्त्तत इति सकाञ्चनारत्रिफलोपकुल्यो गुग्गुलुः । काञ्चनारो भीमकणवीरः । त्रिफला प्रसिद्धा । उपकुल्या पिप्पली । गण्डमाला च गलगण्डरोगश्च गण्डमालागलगण्डरोगौ सह ताभ्यां वर्त्तत इति । सगण्डमालागलगण्डरोगः पुरुषः तस्मिन् हित इति ॥ २८५ ॥

व्रण, कुष्ठ, नाडीव्रण तथा भगन्दर रोग में त्रिफला क्वाथ के साथ तथा काञ्चनारत्वक् ( कचनार की छाल ) त्रिफला; पिप्पली इनके चूर्ण के साथ गुग्गुलु को गण्डमाला तया गलगण्ड रोगमें सेवन कराना हितकर है ॥ २८५ ॥

वातामये वातरक्ते च गुग्गुलुयोगमाह—

वातामये विश्वबलागुडूचीरास्नात्रिकण्टोरुबुकस्थिराभिः ।
छिन्नोद्भवाक्वाथयुतः समीरे सशोणिते गुग्गुलुरेक एव ॥ २८६ ॥

वातामये वातरोगे विश्वादिक्वाथयुतो गुग्गुलुर्हितः । विश्वादीनामितरेतरद्वन्द्वः । विश्वा शुण्ठी । त्रिकण्टको गोक्षुरकः । स्थिरा शालिपर्णी । समीरे वायौ शोणितसंयुक्ते । एतदुक्तं भवति—वातरक्ते, छिन्नोद्भवा गुडूची तस्याः क्वाथेन युतो गुग्गुलुरेक एव हित इति ॥ २८६ ॥

वातरोग में सोंठ; बला, गिलोय, रास्ना, गोखरू, एरण्डमूल, शालपर्णी, इनके क्वाथ से तथा वातरक्त नामक रोग में गिलोय के क्वाथ से केवल विशुद्ध गुग्गुलु को ही सेवन करने से अत्यन्त लाभ होता है।

अर्शस्सु मेहेषु कुष्ठिषु गुडाभयादियोगपञ्चकमाह—

गुडाभया मूत्रहरीतकी वा
हिता तथारुष्करवर्द्धमानम्।
अर्शःसु मेहेषु हिता हरिद्रा
धात्रीरसे कुष्ठिषु मूत्रयुक्ता॥ २८७॥

अर्शःसु अर्शोरोगेषु गुडाभया गुडेन सहिता अभया हरीतकी हिता। मूत्रहरीतकी वा हिता। गोमूत्रद्रोणे लेहवत् सिद्धं हरीतकी-शतं यथाबलं सक्षौद्रम्। तथारुष्करवर्द्धमानं हितम्। तथेति योगा-न्तरमाह—'अरुष्कराणि भल्लातकानि तेषां वर्द्धमानम्। कथं च तत् क्रियत इति तन्त्रान्तराद् व्याख्यायते—'ग्रीष्मकाले गृहीतान्यापूर्णरसा-न्यनामयीनि भल्लातकास्थीनि यवपल्ले माषपल्ले वा चतुर्मासाव-स्थितानि हेमन्ते प्रयोक्तुमारभेत। मधुरस्निग्धशीतोपसंस्कृतशरीरः प्रथमं दश भल्लातकानि संकुट्य अष्टगुणेन सलिलेन क्वाथं कृत्वा अष्टभा-गावशेषं सदुग्धं घृतेनान्तर्मुखमभ्यज्य पिबेत्। तान्येकैकभल्लातोत्क-र्षेण त्रिंशत्कृत्वा पुनरेकैकमपकर्षयेत् यावद्दशभल्लातकप्रयोगोऽतः परमु-त्कर्षः कर्त्तव्यः। एवं भल्लातकसहस्रमुपयुज्यते इति न घटते। यथात्र घटते तथाविच्छिन्नपारम्पर्योपदेशात् व्याख्यायते। त्रिंशत्प्राप्तौ सप्तरात्रं त्रिंश-त्प्रयोगः कर्त्तव्य इति। तत एकैकमपकर्षयेत् यावद्दश। पुनरन्यस्मिन्नपि दिने दशेति। एवं भल्लातकसहस्रमुपयुज्यत इति घटते। जीर्णे घृत-दुग्धाभ्यां शालिषष्टिकौदनं भुञ्जीत प्रयोगान्ते च द्विस्तावत्पयसैवोप-चारः। तस्य प्रयोगात् वर्षशतमजरं वपुः तिष्ठतीति। मेहेषु च प्रमेहेषु धात्री रसे आमलकीरसे हरिद्रा हिता। कुष्ठषु च कुष्ठरोगिषु मूत्रयुक्ता गोमूत्रेण हरिद्रा हितेति। "पीत्वा मासं वा पलांशां हरिद्रां मूत्रेणान्तं पापरोगस्य गच्छेदिति"॥ २८७॥

हरीतकी का गुड के साथ प्रयोग, अथवा मूत्रहरीतकी (२ द्रोण गोमूत्र में १०० हरडों के चूर्ण को अवलेहवत पाक करके मधु के साथ), अथवा भल्लातकवर्द्ध-

मान योग अर्शोरोग में हितकर है। इसी प्रकार हल्दी को प्रमेह में आंवले के रस के साथ एवं कुष्ठ में गोमूत्र के साथ सेवन कराना चाहिये ॥ २८७ ॥

त्वग्दोषिणां श्वित्रविकारिणां च योगानाह—

**अयस्कृतीर्वा खदिरस्य सारस्त्वग्दोषिणां श्वित्रविकारिणां च।**
**आवल्गुजं बीजमुदाहरन्ति विभीतकत्वङ्मलयूकषायैः ॥ २८८ ॥**

त्वग्दोषिणां कुष्ठिनां अयस्कृतिः पूर्वं व्याख्याता। खदिरस्य सारः स्नानपानावगाहलेपनादिषु प्रयोज्यः। तथा च सुश्रुतः— "दिदृक्षुरन्तं कुष्ठस्य खदिरं कुष्ठपीडितः। सर्वथैवोपयुञ्जीत स्नानपानाशनादिषु" ॥ इति ॥ श्वित्रविकारिणां आवल्गुजं बीजं बाकुचीबीजं विभीतकत्वङ्मलयूकषाये हितमुदाहरन्त्याचार्याः। मलयू काकोदुम्बरिका स्वल्पविटपा। ननु च पूर्वं श्वित्रचिकित्सिते विभीतकत्वङ्मलयूजटानामित्यादिको योगः प्रोक्तः किमर्थं पुनरुक्तिः? योगान्तरमिदम्। तत्र हि गुडेन सह प्रयोगोऽत्र तु गुडरहितस्य इति ॥ २८८ ॥

कुष्ठ के रोगियों को अयस्कृति, तथा स्नान, पान, अवगाहन, प्रलेप आदि में खदिरसार का प्रयोग करना चाहिये। श्वित्र के रोगियों को बहेड़ा तथा कठूमर के क्वाथ से बाकुचीबीज का सेवन कराना लाभकर है ॥ २८८ ॥

तथा गुल्मशूलादिषु योगत्रयमाह—

**गुल्मेषु शूलेषु च हिङ्गुयोगः सविश्वसौवर्चलपुष्कराह्वः।**
**गरातुरे हेम हितं वदन्ति रास्ना मरुद्व्याधिहरा प्रदिष्टा ॥ २८९ ॥**

गुल्मशूलरोगयोर्हिङ्गुयोगो विश्वादिसहितः कार्य्यः। विश्वा शुण्ठी। सौवर्चलं रुचकम्। पुष्कराह्वं पुष्करमूलम्। गरं कृत्रिमं विषं तेनातुरो रोगी तस्मिन् हेम सुवर्णं हितं वदन्ति। रास्ना मरुद्व्याधिहरा वातव्याधिहरा प्रदिष्टा उपदिष्टेति ॥ २८९ ॥

सोंठ, सौंचलनमक, पुष्करमूल तथा हींग; इनका चूर्ण २ रत्ती मात्रा में गुल्म तथा शूलरोग को नष्ट करता है। गर (संयोगज विष) से पीडित रोगी के लिये सुवर्ण अत्यन्त हितकर है। तथा रास्ना वातव्याधिनाशक है ॥ २८९ ॥

उन्माद्यादीनां पुंसां ब्राह्मीरसस्य योगमाह—

**उन्मादिनामुन्मदमानसानामपस्मृतौ भूतहतात्मनां हि।**
**ब्राह्मीरसः स्यात्सवचः सकुष्ठः सशंखपुष्पः ससुवर्णचूर्णः ॥ २९० ॥**

उन्मादिनां उन्मादरोगिणाम्। मन एव मानसम्। उन्मत्तं मनो मानसं येषां ते उन्मदमानसाः तेषाम्। अपस्मृतौ अपस्मारे। भूतैर्देव ग्रहादिभिर्हतोऽभिहत आत्मा मनो येषां ते भूतहतात्मानः तेषाम्। ब्राह्मीरसः सवचो वचासहितः सकुष्ठः कुष्ठेन सह। सशंखपुष्पः शङ्खपुष्प्या सह। ससुवर्णचूर्णः सुवर्णचूर्णेन सहितः स्यात् भवेत् इति॥ २९० ॥

उन्माद एवं अपस्मार से पीड़ित, जिनका मन विक्षिप्त होगया है एवं भूतावेश युक्त रोगियों के लिये वचा, कुष्ठ, शंखपुष्पी तथा सुवर्णभस्म, इनके चूर्ण को ब्राह्मीरस के साथ सेवन कराना प्रशस्त है ॥ २९० ॥

गुडूचीफलत्रिकयोः पृथग् योगद्वयमाह—

**वातासृजि श्लीपदिनां वमीषु हलीमके पाण्डुषु कामलायाम्।**
**मेदस्विनां चापि हिता गुडूची फलत्रयं नेत्रविकारिणाश्च ॥२९१॥**

वातासृजि वातरक्ते श्लीपदिनां श्लीपदरोगिणाम्। वमीषु छर्दिषु। हलीमके च कामलारोगभेदे। पाण्डुषु पाण्डुरोगिषु। कामलायां कामला-रोगे। मेदस्विनां स्थूलानां। एषां सर्वेषां गुडूची हिता। नेत्रविकारिणां अक्षिरोगिणां फलत्रयं हितमिति ॥ २९१ ॥

वातरक्त, श्लीपद, वमी ( कै ), हलीमक, पाण्डु, कामला एवं मेदोवृद्धि में गिलोय तथा नेत्ररोगों में त्रिफला हितकर है ॥ २९१ ॥

अतीसारे ज्वरे रक्तपित्ते च पृथग्योगत्रयमाह—

**हितोऽतिसारे कुटजो ज्वरेषु सपर्पटश्चापि किराततिक्तः।**
**सशर्करश्चापि समाक्षिकश्च वासाकषायः खलु रक्तपित्ते ॥२९२॥**

अतीसाररोगे कुटजक्वाथकल्कचूर्णलेहप्रयोगो हितः। ज्वरेषु सर्वेषु सपर्पटः किराततिक्तको हितः। रक्तपित्ते वासाकषायः शीतः शर्करामधुभ्यां सहितः हित इति ॥ २९३ ॥

अतीसार में कुटज तथा सम्पूर्ण ज्वरों में चिरायता एवं पित्तपापड़ा का प्रयोग हितकर है। रक्तपित्त में अडूसे के क्वाथ में खांड तथा मधु का प्रक्षेप देकर सेवन कराना लाभकर है ॥ २९२ ॥

तृष्णादिषु चतुर्षु रोगेषु पृथग्योगचतुष्टयमाह—

**तृष्णासु पञ्चाम्लकमुद्दिशन्ति प्लीहामये पिप्पलिवर्द्धमानम्।**
**रोहीतकश्चापि यकृद्विकारे स्याद्विद्रधीनां वरुणः प्रशस्तः ॥२९३॥**

तृष्णासु तृष्णारोगेषु पञ्चाम्लकं उद्दिशन्ति उपदिशन्ति। पञ्चानां बदरदाडिमवृक्षाम्लचुक्रीकाचुक्रिकाणामम्लानां समाहारः पञ्चाम्लकः तं उपदिशन्तीति। तथा च चरकः–"कोलदाडिमवृक्षाम्लचुक्रीकाचुक्रिकारसः। पञ्चाम्लको मुखालेपः सद्यस्तृष्णां नियच्छतीति॥" प्लीहामये प्लीहरोगे पिप्पलीवर्द्धमानं पूर्वं व्याख्यातमुद्दिशन्ति। यकृद्विकारे च यकृदुदरे रोहीतकः कषायचूर्णावलेहघृतादिषु प्रशस्तं स्यादिति। विद्रधीनां वरुणः कषायादिषु प्रशस्तो भवतीति॥ २९३॥

तृष्णा में पञ्चाम्ल (बेर, अनार, विषांबिल, इमली, चांगेरी), प्लीहारोग में पिप्पलीवर्द्धमान, यकृद्रोग में रोहीतक (रोहेड़ा), विद्रधि में वरुण (वरना) का प्रयोग प्रशस्त है॥ २९३॥

जठरामयादिषु गोमूत्रादियोगत्रयमाह—

गोमूत्रमेकं जठरामयेषु विषोपसृष्टेषु शिरीषकल्कम्।
कोशातकी मूषिकसंभवेषु विषेषु साङ्कोठजटाकषाया॥ २९४॥

जठरामयेषु उदररोगिषु गोमूत्रमेकं प्रधानमुद्दिशन्ति। विषोपसृष्टेषु विषैः स्थावरजङ्गमकृत्रिमैरुपसृष्टा विषोपसृष्टास्तेषु शिरीषकल्कं पानालेपनादिषु हितमुद्दिशन्ति। मूषिकसंभवेषु विषेषु कोशातकी साङ्कोठजटाकषाया शस्ता। अङ्कोठजटाकषायेण कोशातकीकल्कं पाययेदिति॥ २९४॥

उदररोग में गोमूत्र, विषपीडितों के लिये पान तथा प्रलेप में शिरीष (सिरस) का कल्क, मूषिकविष में अंकोठ (ढेरा) की जड के क्वाथ के साथ कोशातकी (कड़वी तुरई) के चूर्ण का प्रयोग हितकर है॥ २९४॥

अधुनोर्ध्वाधोमध्यविभागेन त्रिधा कृत्वा शरीरान्तर्गतरोगचिकित्सां विवक्षुराह—

मन्याहनुश्रवणलोचननासिकास्य-
भ्रूभागतालुगलशङ्खशिरोविकारान्।
कृष्णा निहन्ति दशमूलकषायपीता
क्वाथेन वा सह फलत्रितयोद्भवेन॥ २९५॥

मन्यादिषु शिरःपर्यन्तेषु ये विकारास्तान् दशमूलकषायपीता कृष्णा पिप्पली निहन्ति। फलत्रितयादुद्भवो यस्यासौ फलत्रितयोद्भवः

तेन वा सह पीता कृष्णा पूर्वोक्तानेव रोगान् निहन्ति । वा शब्देन द्वितीयं क्वाथं कथयतीति ॥ २९५ ॥

दशमूल के क्वाथ अथवा त्रिफलाक्वाथ के साथ पिप्पली चूर्ण को उपयुक्त मात्रा में सेवन करने से मन्या, हनु, श्रवण ( कान ), नेत्र, नासिका, मुख, भ्रू (भौंहें) तालु, गला, शंखप्रदेश एवं शिर के विकार अर्थात् जत्रुसन्धि से ऊपर स्थित रोग नष्ट होते हैं ॥ २१५ ॥

साम्प्रतं विश्वौषधस्य योगत्रयमाह—

रास्नाकषायपरिपीतमथ श्वदंष्ट्रा-
क्वाथेन वामृतलताक्वथनेन वापि ।
विश्वौषधं हरति पादकटीविभागा-
दासक्थिजानुजघनस्थलजा रुजश्च ॥ २९६ ॥

रास्नाकषायपरिपीतमित्येको योगः । अथ श्वदंष्ट्रा गोक्षुरकः तस्य क्वाथेन वा पीतमिति द्वितीयो योगः । अमृतलता गुडूची तस्याः क्वाथेन वा पीतमिति तृतीयो योगः । किं तत् पीतं ? विश्वौषधं शुण्ठी । रुजो निहन्ति । केषु केषु जाताः ? सक्थीनि च जानुनी च जघनस्थलं च सक्थिजानुजघनस्थलं तस्मिन् जाता रुजः । पादादारभ्य कटीं यावद्विभागः पादकटीविभागस्तस्मात् । आङ् मर्यादायाम् । या रुजस्तान् निहन्तीति ॥ २९६ ॥

रास्नाक्वाथ, गोखरूक्वाथ अथवा गिलोय के क्वाथ से उपयुक्त मात्रा में सोंठ के चूर्ण को सेवन करने से पांव से लेकर कमर तक अर्थात् सक्थि ( ऊरू ), जानु (गोडे), जघनस्थल आदि में उत्पन्न होने वाले रोग नष्ट होते हैं ॥ २९६ ॥

हृदादिरुक्षु हिङ्ग्वादियोगमाह—

पीतानि हिङ्गुसितजीरकतुम्बुरूणि
पथ्याग्निपुष्करजटालवणत्रयाणि ।
हृत्पृष्ठकोष्ठगुदगुह्यरुजो जयन्ति
संक्षिप्तमेतदिति कायचिकित्सितं हि ॥ २९७ ॥

हिङ्ग्वादीनि पीतानि हृदादिरुजो जयन्ति । हिङ्गु रामठम् । सितजीरकं श्वेतजीरकम् । तुम्बुरु प्रसिद्धम् । पथ्या हरीतकी । अग्निश्चि-

त्रकः। पुष्करजटा पुष्करमूलम्। लवणत्रयं सैन्धवबिडसौवर्चलानीति। कायचिकित्सितं संक्षिप्तं संक्षेपेणोक्तमेतन्मया॥ इति शब्दः परिसमाप्तौ कृतः। अथ कायचिकित्सितमिति कोऽर्थः? उच्यते—कायशब्देनाग्निरभिप्रेतः। तथा च वृद्धभोजेनोक्तम्—'तमिमं कायमेवाग्निं प्रवदन्ति मनीषिणः। योऽयं निर्दहति क्षिप्रमाहारं सर्वदेहिनाम्॥ अनादिमध्यनिधनः सर्वतन्त्रेषु पठ्यते। प्रभालक्ष्यसमायुक्तो जीवः स हि सनातनः॥ यस्तं चिकित्सेत्सीदन्तं विषमं मन्दमेव वा। आयुर्वेदनियोगेन स वै कायचिकित्सिकः। अथवा दोषधातुमलादिसंघातः कायः तस्य ज्वरादिभिर्व्यापन्नस्य चिकित्सा कायचिकित्सेति॥ २९७॥

इति तीसटसुतचन्द्रटाविरचितायां चिकित्साकलिकाटीकायां कायचिकित्सा समाप्ता॥

हींग, श्वेतजीरा, धनियां, हरड़, चित्रक, पुष्करमूल, सैन्धानमक, बिडनमक, कालानमक; इनके चूर्ण को ४ रत्ती मात्रा में यथादोष गर्मजल आदि अनुपान द्वारा पीने से हृदय, पीठ, कोष्ठ, गुदा तथा गुह्यस्थल के रोग नष्ट होते हैं। इस प्रकार हमने संक्षेपतः कायचिकित्सा का वर्णन किया है॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*कायचिकित्सा समाप्ता।*

## अथ शालाक्यतन्त्रम्।

कायचिकित्सानन्तरं यथोद्देशं शालाक्यतन्त्रमाह—शालाक्यतन्त्रमिति कोऽर्थः? उच्यते शलाकाशब्दो व्रणादौ गणे द्रष्टव्यः। शलाकया कर्म शालाक्यं तत्प्रधानं तन्त्रमभेदोपचाराच्छालाक्यतन्त्रम्। तच्चोर्द्ध्वजत्रूपगतानां रोगाणां नयनश्रवणवदनघ्राणादिसंश्रितानामुपशमनार्थमतो नयनादिरोगाणां सम्प्राप्तिपरिज्ञानायेदमाह—

ऊर्ध्वङ्गमाभिरुपगम्य शिरः सिराभि-
र्दोषाः स्वहेतुकुपिताः कफपित्तवाताः।
कण्ठोष्ठतालुरसनारदमूलकर्ण-
नासास्यलोचनशिरस्सु रुजः सृजन्ति ॥ २९८ ॥

दोषाः कण्ठादिषु रुजो विकारान् सृजन्ति कुर्वन्ति। कीदृशाः सन्तः? स्वहेतुकुपिताः। स्वकीया हेतवः स्वकारणानि तैः कुपिताः कोपं गताः। ते च स्वहेतवो रूक्षैस्तिक्तैरित्यादिना पूर्वमुक्ताः। के ते दोषाः? कफपित्तवाताः। ननु किमर्थं व्यतिक्रमेणोपन्यासः कृत इत्युच्यते वातपित्तजन्यस्यापि रोगस्य श्लेष्मणः चिकित्सा कार्येतिज्ञापनार्थं तत्स्थानवत्त्वात्। तथा चोक्तम्—"दोषस्थानगतं दोषं स्थानिवत्समुपाचरेदिति॥" किं कृत्वा दोषा रोगं कुर्वन्ति? शिरो मस्तकं सिराभिरुपगम्य गत्वा। कतराभिः सिराभिः? ऊर्ध्वंगमाभिः ऊर्ध्वमुपरिगमो गमनं यासां ता ऊर्ध्वङ्गमास्ताभिः। कण्ठादीनामितरेतरद्वन्द्वः। रसना जिह्वा। रदा दन्तास्तेषां मूलानि। आस्यं मुखं कण्ठादिसमवायं वा सर्वमुच्यते। लोचने नयने। शिरः कपालमिति ॥ २९८ ॥

अपने २ कारणों से कुपित हुए २ कफ, पित्त तथा वात; तीनों दोष ऊपर जानेवाली शिराओं द्वारा सिर में जाकर कण्ठ, ओष्ठ, तालु, जिह्वा, दन्तमूल, कान, नासिका, मुख, नेत्र तथा शिर में नानाप्रकार के रोगों को उत्पन्न करते हैं ॥ २९८ ॥

## अथ नेत्ररोगचिकित्सा।

चक्षुः प्रधानं सर्वेषामिन्द्रियाणामिति कृत्वा तद्गतविकारसंख्यामनूद्य चिकित्सां प्रोवाच—

षट्सप्ततिर्लोचनजा विकारास्तेषामभिष्यन्दसमुद्भवानाम्।
श्लेष्माश्रयत्वादिति लङ्घनं प्राक् प्रशस्यते मुद्गरसौदनश्च ॥२९९॥

लोचने अक्षिणी तयोर्जाता विकारा रोगास्ते च षट्सप्ततिर्विदेहादिभिर्व्याख्याताः । तत्र दोषद्वारेण वातपित्ताभ्यां प्रत्येकं दश दश । श्लेष्मणा त्रयोदश । रक्तेन षोडश । त्रिदोषजाः पञ्चविंशतिः । आगन्तुजौ च बाह्यौ द्वे । एवं च दोषद्वारेण षट्सप्ततिः । स्थानद्वारेण च—नव सन्धिषु । एकविंशतिर्वर्त्मगाः । एकादश शुक्लभागे । चत्वारः कृष्णभागे । द्वादश दृष्टिमण्डले । सर्वलोचनाश्रयाः सप्तदश । बाह्यजौ द्वाविति । तेषां सर्वेषां अभिष्यन्दात्सम्भवः । तथा च सुश्रुतः—"प्रायेण सर्वे नयनामयास्तु भवन्त्यभिष्यन्दनिमित्तमूला" इति । तेषां श्लेष्माश्रयत्वादिति श्लेष्मस्थानाश्रयत्वात् श्लेष्मप्रत्यनीकं चिकित्सितमाह । इति पूर्वोक्तकारेण लङ्घनं अनशनं प्राक् प्रथमं प्रशस्यते । मुद्गरसेन मुद्गयूषेण ओदनं भक्तं प्रशस्यत इति ॥ २९९ ॥

नेत्र में उत्पन्न होनेवाले रोग दोषानुसार तथा स्थानाश्रय के अनुसार ७६ हैं। यथा दोषानुसार—वातज १०, पित्तज १०, कफज १३, रक्तज १६, त्रिदोषज २५, आगन्तु २ । स्थानाश्रय द्वारा—नेत्रसन्धिओं में ९, वर्त्म में २१, शुक्ल (श्वेत) भाग में १७, कृष्ण (काले) भाग में ४, दृष्टिमण्डल में १२, सम्पूर्ण नेत्रगत १७, नेत्र से बाहिर २। सम्पूर्ण नेत्र विकारों के प्रायः अभिष्यन्द से ही उत्पन्न होने के कारण इनके कफाश्रित होने से प्रथम लंघन तदनन्तर मुद्गयूष से ओदन ( भात ) का सेवन करना प्रशस्त है ॥ २९९ ॥

अतः परं आश्च्योतनालेपनयोरवसरः—

**आश्च्योतने सत्रिफला सरोध्रा सचन्दना दारुनिशा प्रशस्ता ।**
**आलेपने गैरिकचन्दनं च सातार्क्ष्यशैलाभयमेतदिष्टम् ॥ ३०० ॥**

दारुनिशा दारुहरिद्रा । सत्रिफला त्रिफलया सह । सरोध्रा रोध्रेण सह । सचन्दना रक्तचन्दनेन सह । आश्च्योतनविषये प्रशस्ता प्रयोजिता । तस्य च प्रमाणं दोषविषयेण विदेहेन पठितम् । "प्रकुञ्चं श्लैष्मिके व्याधौ पाणिशुक्तिश्च वातिके । आश्च्योतने प्रमाणं स्यात् द्वे शुक्ती चास्रपैत्तिके" । गैरिकं चन्दनं च समाहारद्वन्द्वः । गैरिकं सुवर्णगैरिकम् । चन्दनं रक्तचन्दनम् । तार्क्ष्यशैलञ्च अभया च तार्क्ष्यशैलाभये । सह ताभ्यां वर्त्तत इति सतार्क्ष्यशैलाभयं गैरिकचन्दनम् । तार्क्ष्यशैलं रसाञ्जनम् । अभया हरीतकी । एतदालेपने प्रलेपन इष्टमभिप्रेतम् । पूर्वाचार्येणेति ॥ ३०० ॥

आश्च्योतन के लिये—नेत्रविकारों में दारुहल्दी, त्रिफला, लोध, लालचन्दन, इनका यथाविधि साधित क्वाथ तथा आलेपन के लिये—गेरू, लालचन्दन, रसौंत तथा हरीतकी ( एकत्र मिश्रित ) हितकर हैं ॥ ३०० ॥

अतः परं त्रिफलाकषायादियोगानाह—

**अतः परं च त्रिफलाकषायः पाने पटोलाद्यफलत्रिकाद्ये ।**
**घृते हिते कायविशोधनश्च सरक्तसंशोधनमञ्जनादि ॥ ३०१ ॥**

अतोऽस्मात्परं ऊर्ध्वं त्रिफलाकषायः पाने हितः । आदौ भवमाद्यं पटोलमाद्यं यस्य घृतस्य तत्पटोलाद्यम् । फलत्रिकमादौ यस्य घृतस्य तत्फलत्रिकाद्यम् । पटोलाद्यं च फलत्रिकाद्यं च पटोलाद्यफलत्रिकाद्ये घृते वक्ष्यमाणे हिते पानादिभिः । तदनन्तरं स्नेहसमनन्तरं कायस्य शरीरस्य विशोधनं विरेकादिभिः । तदनन्तरं रक्तसंशोधनम् । रक्तस्य संशोधनश्च सिराव्यधजलौकादिभिः कार्य्यम् । तदूर्ध्वं स्रुतरक्तस्याञ्जनादि कार्यम् । अञ्जनमादौ यस्य तदञ्जनादि । आदिग्रहणात्तर्पणपुटपाकसेकाश्च्योतनविरेकबस्तयो गृह्यन्ते ॥ ३०१ ॥

इसके बाद त्रिफलाक्वाथ, पटोलादिघृत तथा त्रिफलाघृत का पान हितकर है । तदनन्तर वमन, विरेचन आदि द्वारा कायशुद्धि, जोंक आदि लगाकर दुष्ट रक्त का निर्हरण तथा अञ्जन आदि हितकर हैं ॥ ३०१ ॥

प्रागुक्तं पटोलाद्यं घृतं हितमिति तदाह—

**अब्द्रोणे सपटोलनिम्बकटुकात्रायन्तिकाचन्दनै-**
**दार्वीयासवृषैः फलत्रयशतस्यार्द्धेन तुल्यैः श्रृतैः ।**
**कृष्णाकौटजचन्दनाब्दमधुकैर्भूनिम्बयुक्तैः श्रृतं**
**श्रोत्रघ्राणमुखाक्षिरुक्प्रशमनं सर्पिः पटोलादिकम् ॥३०२॥**

दार्वीयासवृषैः सपटोलादिभिः अब्द्रोणे तुल्यैः फलत्रयशतस्यार्द्धेन श्रृतैः । एतदुक्तं भवति-पटोलादीनां वृषान्तानां पञ्चाशत्पलानि त्रिफलायाश्च पञ्चाशत्पलानि । एवमेतत् शतं सलिलद्रोणे प्रक्वाथ्य चतुर्भागावशेषेण घृतप्रस्थं पचेत् । पटोलं पटोलपत्रम् । निम्बः पिचुमन्दः । कटुका कट्वी । त्रायन्तिका त्रायमाणम् । चन्दनं रक्तचन्दनम् । दार्वी दारुहरिद्रा । यासो दुरालभा । वृषं वासकम् ।

कृष्णादिभिश्च त्रिकार्षिकैः कल्कैः सर्पिः शृतं पक्वं पटोलाद्यं श्रोत्रादिरुक्प्रशमनं भवतीति ॥ ३०२ ॥

पटोलाद्यघृत–गव्यघृत–२ प्रस्थ। क्वाथार्थ—पटोलपत्र, नीमकी छाल, कटुकी, त्रायमाण, लालचन्दन, दारहल्दी, दुरालभा, अडूसे की जड मिलित ५० पल त्रिफला (मिलित) ५० पल, जल २ द्रोण अवशिष्ट क्वाथ २ आढक (८ प्रस्थ)। कल्कार्थ—पिप्पली, इन्द्रजौ, लालचन्दन, मोथा, मुलहठी, चिरायता, प्रत्येक १ पल (टीकाकार के अनुसार प्रत्येक ३ कर्ष); यथाविधि घृतपाक करें। यह घृत, कान, नाक, मुख तथा नेत्र के रोगों को शान्त करता है। मात्रा—आधा तोला ॥ ३०२ ॥

पटोलाद्यघृतानन्तरं महात्रैफलं घृतमाह—

पथ्याक्षामलकीजले पयसि च च्छागे सवासारसे
भृङ्गस्यापि रसे विपाचितमिति प्रोक्तैश्च कल्कौषधैः।
काकोलीत्रिफलामृतोत्पलकणाद्राक्षासितायष्टिका-
व्याघ्रीभिः सह नेत्ररुक्प्रशमनं सर्पिर्महात्रैफलम् ॥ ३०३ ॥

पथ्याक्षामलकीजल इति। पथ्या हरीतकी, अक्षं विभीतकम्, आमलकी आमलकफलं; एषां जले क्वाथे। क्वाथकल्पनाच पथ्यादीनि द्वात्रिंशत्पलानि सलिलाढके निःक्वाथ्य चतुर्भागावशेषः प्रस्थो भवति। अस्मिन् छागे पयसि छागदुग्धप्रस्थे सवासारसे वासारसप्रस्थसहिते भृङ्गस्यापि रसे भृङ्गराजरसप्रस्थे घृतप्रस्थं काकोल्यादिभिरर्द्धपलिकैः कल्कौषधैः प्रोक्तैः सह पाचितम्। काकोली प्रसिद्धा। त्रिफला फलत्रयम्। अमृता गुडूची। उत्पलं नीलोत्पलम्। कणा पिप्पली। द्राक्षा मृद्वीका। सिता शर्करा। यष्टिका यष्टीमधु व्याघ्री कण्टकारिका। नेत्ररुजोऽक्षिरोगास्तेषां प्रशमनं सर्पिर्घृतं महात्रैफलमिति ॥ ३०३ ॥

महात्रैफलघृत—गव्यघृत २ प्रस्थ। क्वाथार्थ–त्रिफला (मिलित) ३२ पल, जल–२ आढक (८ प्रस्थ), अवशिष्ट क्वाथ २ प्रस्थ। बकरी का दूध २ प्रस्थ। अडूसे के पत्तों का रस २ प्रस्थ। भांगरे का रस २ प्रस्थ। कल्कार्थ—काकोली, त्रिफला, गिलोय, नीलोत्पल, पिप्पली, द्राक्षा, खांड, मुलहठी, छोटी कटेरी, प्रत्येक १ पल। यथाविधि घृतपाक करें। यह घृत नेत्ररोगों को नष्ट करता है। मात्रा—आधा तोला। चक्रदत्तोक्त महात्रिफलाद्य घृत में शतावर का रस, गिलोय का रस तथा आंवलों का रस पृथक् पृथक् १ प्रस्थ अधिक हैं। एवं कल्कद्रव्यों में काकोली की जगह क्षीरकाकोली का पाठ है। वाग्भट में केवल कल्क द्रव्यों में ही कुछ भेद है। उसके अनुसार त्रिफला

के प्रक्षेप की जगह क्षीरकाकोली का प्रक्षेप देना चाहिये। शेष योग पूर्ववत् है। इस योग में यद्यपि टीकाकार ने आधा पल प्रक्षेप देने को कहा है परन्तु वाग्भट के अनुसार प्रत्येक द्रव्य का १ पल प्रक्षेप देना चाहिये । अतएव हमने भी उसी के अनुसार लिखा है ॥ ३०३ ॥

अधुना त्रिफलाघृतमाह—

क्काथेन कल्कविधिना च फलत्रिकस्य
पक्कं घृतं जयति नेत्ररुजः समस्ताः ।
कुष्ठप्रमेहमुखकर्णकपालनासा-
रोगान् भगन्दरगतिव्रणगण्डमालाः ॥ ३०४ ॥

फलत्रिकस्य त्रिफलायाः क्काथेन, त्रिफलापलशतं गृहीत्वा सलिल-द्रोणे प्रक्काथ्य चतुर्भागावशेषेण कल्कविधिना च, त्रिफलापलचतुष्टयं कल्कं कृत्वा घृतप्रस्थं पक्कं नेत्ररुजो नेत्ररोगान् समस्तान् निःशेषान् जयति कुष्ठादीन् गण्डमालान्तांश्च जयति ॥ ३०४ ॥

त्रिफला के क्काथ तथा कल्क से यथाविधि घृतपाक कर सेवन कराने से सम्पूर्ण नेत्ररोग, कुष्ठ, प्रमेह, मुखरोग, कर्णरोग, शिरोरोग, नासारोग, भगन्दर, नाडीव्रण तथा गण्डमाला, प्रभृति रोग नष्ट होते हैं ॥३०४॥

इदानीं नेत्रातुरस्य क्रियाक्रममाह—

स्निग्धं पटोलादिघृतेन पूर्वं फलत्रिकाद्येन घृतेन वापि ।
नेत्रातुरं शुद्धविरिक्तरक्तमुपाचरेदञ्जनतर्पणाद्यैः ॥ ३०५ ॥

पूर्वं प्रथमं पटोलादिघृतेन फलत्रिकाद्येन वा नेत्रातुरं स्निग्धं ततः शुद्धं च विरिक्तरक्तं च । शुद्धं विरेकादिना । विरिक्तरक्तं स्रुतरक्तं कृत्वा अञ्जनतर्पणाद्यैरुपक्रमैरुपाचरेदिति ॥ ३०५ ॥

वैद्य पटोलादिघृत अथवा त्रिफलाद्यघृत से रोगी का स्नेहन एवं वमन, विरेचन आदि द्वारा कायशुद्धि तथा जोंक आदि द्वारा रक्तनिर्हरण करके अञ्जन, तर्पण आदि उपक्रम द्वारा चिकित्सा करे ॥ ३०५ ॥

अधुना त्रयाणामपि वातादिजतिमिराणां त्रिफलाज्यस्य प्रत्यनी-कत्वमाह—

तैलेन गव्यहविषा त्वथ माक्षिकेण
संयुक्तया त्रिफलया तिमिरामयेषु ।

वातादिजेषु भिषजः समुदाहरन्ति
संक्षेपतस्तिमिरभेषजमेतदेव ॥ ३०६ ॥

वातादिजेषु वातपित्तश्लेष्मजेषु तिमिरेषु यथासंख्यं तिलतैल-गव्यघृतमाक्षिकैः संयुक्ता त्रिफला तिमिरभेषजमेतदेव भिषजः वैद्याः समुदाहरन्ति संक्षेपेण संक्षेपतः । किं बहुनेति ॥ ३०६ ॥

वातज, पित्तज तथा कफज तिमिररोग में त्रिफला को यथाक्रम तिल तैल, गव्य-घृत तथा मधु के साथ सेवन कराना हितकर है। संक्षेपतः तिमिररोग की यही औषध है ॥ ३०६ ॥

इदानीं सुदर्शनां वर्त्तिमाह—

मरिचमागधिकालमनःशिलाजलधिफेनककुङ्कुमशङ्खकैः ।
इति सनागरचन्दनपद्मकैः पिचुमितैः सरसाञ्जनशुक्तिभिः ॥ ३०७ ॥

तिमिरवर्त्मरुगश्रुसमन्वितं
जयति कण्ड्वजकाकुलतारकम् ।
मधुसमन्वितया निरुजं भवे-
त्तदनयाक्षि सुदर्शनयाञ्जितम् ॥ ३०८ ॥

मरिचादीनामितरेतरद्वन्द्वः । मागधिका पिप्पली । आलं हरितालम् । जलधिफेनं समुद्रफेनम् । नागरं शुण्ठी । चन्दनं रक्तचन्दनम् । शेषाणि प्रसिद्धानि । एभिः मरिचादिभिः पिचुमितैः कर्षप्रमाणैः प्रत्येकं सरसाञ्जनशुक्तिभिः रसाञ्जनार्द्धपलसंयुक्ताभिः सुदर्शना वर्त्तिः । तदनया मधुसमन्वितया अक्षि अञ्जितं निरुजं निर्गतरोगं भवेत् यदि तिमिरादि समन्वितम् । कण्डूश्च अजका च कण्ड्वजके ताभ्यामाकुलं तारकं यस्मिन् तत्तथा । तदप्यनयाञ्जितं निरुजं भवेदिति ॥ ३०७-३०८ ॥

सुदर्शना वर्त्ति—कालीमिर्च, पिप्पली, हरिताल, मनःशिला, समुद्रफेन, केसर, शंखनाभि, सोंठ, लालचन्दन, पद्माख, प्रत्येक २ तोले, रसौंत ४ तोले, इन्हें एकत्र मिश्रित कर वर्त्ति बनावें । इस सुदर्शना वर्त्ति को मधु के साथ आंख में आंजने से तिमिर, वर्त्मरोग, अश्रुस्राव तथा कण्डू एवं अजका प्रभृति नेत्र रोग नष्ट होते हैं ॥ ३०७—३०८ ॥

इदानीं सौवीराञ्जनस्यातिशयेन तिमिरप्रत्यनीकतामाह—

भृङ्गोद्भवस्वरसभावितमाजदुग्धे
मूत्रे गवां पयसि च त्रिफलाकषाये ।

**द्राक्षारसेन परिशुद्धमिति क्रमेण**
**सौवीरकाञ्जनमिदं तिमिरामयघ्नम् ॥ ३०९ ॥**

भृङ्गो मार्कवस्तदुद्भवो यस्यासौ भृङ्गोद्भवः। स चासौ स्वरसश्च भृङ्गोद्भवस्वरसः तेन भावितं च तत्। "द्रवेण यावता द्रव्यमेकीभूयार्द्रतां व्रजेत्। द्रवप्रमाणं निर्दिष्टं भिषग्भिर्भावनाविधौ"। आजं छागदुग्धं तस्मिन् भावितम्। गवां मूत्रे, पयसि दुग्धे च गवामिति, त्रिफलाकषाये, द्राक्षारसेन स्वरसेन क्वाथेन वा इत्यनेन क्रमेण एकैकेन च त्रीन् वारान् कदाचित् सप्त सप्त। किं तत्? सौवीरकाञ्जनम्। इदं परिशुद्धं तिमिरामयान् हन्ति इति ॥ ३०९ ॥

विशोधित सौवीराञ्जन को अत्यन्त श्लक्ष्ण पीसकर भांगरे का रस, बकरी का दूध, गोमूत्र, गोदुग्ध, त्रिफलाक्काथ तथा द्राक्षारस से क्रमशः पृथक् २ तीन वार अथवा सातवार भावना देकर पुनः श्लक्ष्ण पीस लें। इसको आंख में आंजने से तिमिररोग नष्ट होता है ॥ ३०९ ॥

अधुना दिनान्ध्यनक्तान्ध्यहरीं वर्त्तिमाह—

**आजं यकृद्गैरिकसंप्रयुक्तं किञ्जल्कमब्जादपि चोत्पलाच्च।**
**दिनान्ध्यनक्तान्ध्यहरी प्रदिष्टा चतुर्भिरङ्गैरिति वर्तिरेषा ॥३१०॥**

दिनान्ध्यं दिवसान्धत्वं नक्तान्ध्यं रात्र्यन्धत्वं ते हरतीति दिनान्ध्यनक्तान्ध्यहरी वर्त्तिरेषा प्रदिष्टा कथिता इति चतुर्भिरङ्गैः। कैः? आजं छागं यकृत् हृदयदक्षिणपार्श्वाश्रितं मासं गैरिकसम्प्रयुक्तं संयोजितम्। अब्जात् पद्मात् किञ्जल्कं पुष्पमध्यम्। उत्पलान्नीलोत्पलात् किञ्जल्कमिति ॥ ३१० ॥

बकरे का यकृत् ( जिगर ), उत्तम गेरू तथा श्वेतकमल एवं नीलकमल के केसर, इन चार द्रव्यों को एकत्र मिश्रित कर जल से घोटकर, वर्त्ति बनावें। यह वर्त्ति दिनान्ध्य तथा नक्तान्ध्य ( रतौंधा ) को नष्ट करती है ॥ ३१० ॥

इदानीं रात्र्यन्धस्य प्रत्यनीकां वर्त्तिमाह—

**हरेणुकासैन्धवसंप्रयुक्तां स्रोतोजयुक्तामुपकुल्यया च।**
**पिष्ट्वाजमूत्रेण कृता च वर्त्तिर्नक्तान्ध्यविध्वंसकरी नराणाम् ॥३११॥**

हरेणुका रेणुका तां सैन्धवसम्प्रयुक्तां योजितां स्रोतोजं स्रोतोञ्जनं तेन युक्तां। उपकुल्या पिप्पली तया च युक्ताम्। आजः छागः

तस्य मूत्रेण पिष्ट्वा वर्त्तिः कृता नक्तान्ध्यं रात्र्यन्धत्वं तस्य विध्वंसकरी नराणां प्राणिनामिति ॥ ३११ ॥

रेणुका, सैन्धानमक, स्रोतोज ( काला सुरमा ), पिप्पली, इन्हें एकत्र मिश्रित कर बकरी के मूत्र से पीस कर वर्त्ति बनावें । यह वर्त्ति नक्तान्ध्य (रात्र्यान्ध्य, रतौंधा) को नष्ट करती है ॥ ३११ ॥

इदानीं पिल्लशुक्रयोरञ्जनमुवाच—

सतार्क्ष्यशैलं त्रिकटु प्रदिष्टं पिल्लापहं पिल्लगदातुराणाम् ।
समाक्षिकं चापि विभीतकस्य बीजं जयेच्छुक्रमथापि ताप्यम् ॥३१२॥

पिल्लगदः पिच्चटस्तेन आतुरास्तेषां त्रिकटु सतार्क्ष्यशैलं सरसाञ्जनं मधुयुतमञ्जनं पिल्लापहं प्रदिष्टं कथितमिति । विभीतकस्य अक्षस्य बीजं मज्जा समाक्षिकमञ्जनं शुक्रं जयेत् । अथवा ताप्यमपि धातुमाक्षिकं समाक्षिकं शुक्रं जयेदिति ॥ ३१२ ॥

रसौंत तथा त्रिकटु, इन्हें एकत्र मिश्रित कर मधु के साथ आंजने से पिल्लरोग नष्ट होता है । बहेड़े के बीज की मींगी के चूर्ण को मधु के साथ अथवा केवल गन्धक योग से भस्म की हुई स्वर्णमाक्षिक को मधु के साथ आंजने से शुक्र ( फूला ) नष्ट होता है ॥ ३१२ ॥

अधुना शुक्रादीनां लेख्याञ्जनमाह—

चन्दनसिन्धुसमुद्भवपथ्याकिंशुकरक्तमिति क्रमवृद्धम् ।
क्षौद्रसमन्वितमञ्जनमक्ष्णोः शुक्ररुगर्मगदादि विलेखि ॥ ३१३ ॥

चन्दनादिचतुष्टयं क्रमवृद्धं (चूर्णं कृत्वा) क्षौद्रसमन्वितमक्ष्णोरञ्जनं शुक्रादिविलेखि । क्रमवृद्धिरत्र च रक्तचन्दनस्यैकोभागः । सिन्धुसमुद्भवं सैन्धवं तस्य द्वौ भागौ । पथ्या हरीतकी तस्यास्त्रयो भागाः । किंशुकः पलाशस्तस्य रक्तं निर्यासस्तस्य चत्वारो भागाः । अञ्जनञ्च त्रिविधं गुटिकारसचूर्णभेदेन । तत्र बलवतां रोगाणां पिष्टं यत् क्रियते पिण्डवर्त्तिगुटिकाभेदेन तद्गुटिकाञ्जनम् । मध्यबलानां रोगाणां घनो रसो रसक्रियाञ्जनम् । हीनबलानां रोगाणां शुष्कचूर्णं चूर्णाञ्जनम् । पुनश्च त्रिविधं लेखनरोपणप्रसादनभेदेन । तत्र लेखनमम्ललवणकटुतिक्तकषायभेदभिन्नं पञ्चविधं पूर्वाह्णे प्रयोक्तव्यं दृष्टिगतरोगनिवृत्त्यर्थम् । रोपणं कषायातिक्तं स्नेहनयुक्तमपराह्णे प्रयोक्तव्यं वातजरोगावजयार्थम् । प्रसादनं मधुरं स्नेहसंयुक्तं रात्रौ प्रयोक्तव्यं पित्तरोगशान्त्यर्थमिति ।

रसक्रियाञ्जनं लेखनमेतत् चन्दनाद्यमिति। सर्वेषामेवाञ्जनानां स्पष्टलिङ्गेषु रोगेषु वमनादिशुद्धदेहस्य नेत्रस्थे रोगेऽवचारणं कर्त्तव्यमिति। तथा च सुश्रुतः—"व्यक्तरूपेषु रोगेषु शुद्धकायस्य केवले। नेत्र एव स्थिते दोषे प्राप्तमञ्जनमाचरेत्।" शुक्ररुगर्मगदादिविलेखीति। शुक्ररुक् च अर्मगदाश्च शुक्ररुगर्मगदाः ते आदौ येषां ते तथा तान् विलिखितुं शीलं यस्य तत् तथा। अर्म इति पञ्चविधं—प्रस्तार्यर्मशुक्लार्मरक्तार्माधिमांसार्मस्नाय्वर्म—संगृह्यते। आदिशब्देन उत्सङ्गिनीबहलवर्त्मकर्दमवर्त्मश्यामवर्त्मबद्धवर्त्मक्लिष्टवर्त्मपोथकीकुम्भीकिनीशर्करावर्त्मनां सर्वेषां विलेखीति॥ ३१३॥

इति नेत्ररोगचिकित्सा समाप्ता।

लालचन्दन १ भाग सैन्धानमक २ भाग, हरड़ ३ भाग, ढाक की गोंद ४ भाग; इनके अत्यन्त श्लक्ष्ण चूर्णों को एकत्र मिला मधु के साथ आंख में आंजने से शुक्र (फूला) तथा अर्म (Pterigium.) प्रभृति का लेखन होता है। सलाई के अग्र प्रान्त को मध्वाक्त कर चूर्ण में फिरावें। जब चूर्ण लगजाय तब अञ्जन करें॥ ३१३॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*नेत्ररोगचिकित्सा समाप्ता।*

——:o:——

## अथ नासारोगचिकित्सा।

नेत्ररोगचिकित्सानन्तरं यथोद्देशं नासागतरोगचिकित्सामाह—

हिंगुव्योषविडङ्गकट्फलवचारुक्तीक्ष्णगन्धायुतै-
र्लाक्षाश्वेतपुनर्नवाकुटजजैः पुष्पोद्भवैः सौरसैः।
इत्येभिः कटुतैलमेतदनले मन्दे समूत्रं भृतं
पीतं नासिकया यथाविधि भवेन्नासामयिभ्यो हितम्॥३१४॥

---

१—यद्यप्यन्यत्र "चन्दनं सैन्धवं पथ्या पलाशतरुशोणितम्। क्रमवृद्धमिदं चूर्णं शुक्रार्मादिविलेखनम्" इति पाठादिदं चूर्णाञ्जनमित्यभ्युपगम्यते। चूर्णाञ्जनं च मध्वाक्तशलाकया चक्षुषि दीयते। परं रसक्रियाञ्जनमिति वदता चन्द्रटस्यायमभिप्रायः—यदेषां चतुष्टयानां चूर्णं कृत्वा सर्वं चूर्णं प्रचुरतरमधुना समालोड्य वंशनलिकायां काचकूप्यां वा स्थाप्यमिति। एतदेव रसक्रियाविधानमत्र॥

हिङ्ग्वादीनामितरेतरद्वन्द्वः । रुक् कुष्ठम् । तीक्ष्णगन्धा शोभाञ्जनकः । श्वेतपुनर्नवा वर्षाभूः सिरणडी । कुटजजा इन्द्रयवाः । पुष्पोद्भवैर्बीजैः । कतरैः ? सौरसैः सुरसबीजैः । शेषाणि प्रसिद्धानि । इत्येभिः पूर्वोक्तैर्द्रव्यैर्मूत्रेण सह कटुतैलं शृतं अनले अग्नौ मन्दे । तच्च नासिकया पीतं नस्येन यथाविधि, स्वेदितोत्तमाङ्गस्य ईषदवलम्बितशिरस इत्यादि यथाविधिशब्देन आक्षिप्तम् । नासायामामया रोगा येषां ते नासामयिनस्तेभ्यो हितं भवेदिति ॥ ३१४ ॥

इति नासारोगचिकित्सा समाप्ता ।

कटुतैल ८ पल । गोमूत्र ३२ पल । कल्कार्थ—हींग, त्रिकटु, वायविडंग, कट्फल वच, कुष्ठ, तीक्ष्णगन्धा ( शोभांजन, सहिजन ) के बीज, लाक्षा, श्वेत पुनर्नवा, इन्द्रजौ, तुलसीबीज, मिलित १ पल । यथाविधि मन्द २ आंच पर तैल पाक करें। नासारोगियों के लिये इस तैल का नस्य लेना अत्यन्त लाभकर है ॥ ३१४ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*नासारोगचिकित्सा समाप्ता ।*

——:o:——

## अथ कर्णरोगचिकित्सा ।

नासारोगचिकित्सानन्तरं यथोद्देशं कर्णरोगचिकित्सितमाह—

तैलं काञ्जिकबीजपूरकरसक्षौद्रैः सशुक्तैः शृतं
स्यात् क्षौद्रार्द्रकशिग्रुमूलकदलीकन्दद्रवैर्वा समैः ।
शुण्ठीतुम्बुरुहिङ्गुभिः शृतमथ स्यात् कर्णशूलापहं
सिद्धं बिल्वगिरेण साजपयसा[1] मूत्रेण बाधिर्यजित् ॥३१५॥

---

१—यद्यपि मूलश्लोके साजपयसा इति पाठोऽस्ति परं टीकाकृता तत्स्थले वारिपयसा इति कृत्वा व्याख्यातं तत्पोषणाय च प्रमाणान्तरमप्युपन्यस्तम् । परमजापयसापि योगोऽस्तीति चक्रदत्तोपन्यस्तयोगाद्विज्ञायते । तथा च "फलं बिल्वस्य मूत्रेण पिष्ट्वा तैलं विपाचयेत् । साजाक्षीरं तद्धि हरेद्बाधिर्यं कर्णपूरणे" । तन्त्रान्तरेप्युक्तम्–"बिल्वगर्भे पचे तैलं गोमूत्राजपयोन्वितम् । बाधिर्ये पूरयेत्तेन कर्णौ सकफवातजौ" । तथा च टीकाकृता यत् पयसश्चातुर्गुण्यमुक्तं तदसाम्प्रतं द्रवान्तरभावात् । उक्तं हि—"द्रवान्तरेण योगे हि क्षीरं स्नेहसमं भवेत्" । अतएव शिवदासोऽपि तत्वचन्द्रिकायां अत्राजाक्षीरं तैलसमं गोमूत्रं त्रिगुणं चतुर्गुणं वेत्याहुरित्याह ।

तैलं काञ्जिकादिशृतं कर्णशूलापहम्। काञ्जिकं च बीजपूरकरसश्च क्षौद्रं च तानि तथा तैः सशुक्तैः शुक्तयुक्तैः। चतुर्भिः समैस्तिलतैलं पक्वं कर्णशूलापहं भवतीति। क्षौद्रादिभिः शृतं कर्णशूलापहं स्यात्। क्षौद्रं च आर्द्रकश्च शिग्रुः शोभाञ्जनकस्तस्य मूलं च कदलीकन्दश्च तेषां द्रवाः स्वरसास्तैस्तैलसमैर्वा। अथेति पूर्वं तैलानन्तरं शुण्ठ्यादिशृतं सलिलचतुर्गुणं तैल कर्ण शूलापहं स्यात्। तैलं बिल्वगिरेण सिद्धम्। वारि पयसा, वारि पयश्च वारिपयः। सर्वो द्वन्द्वो विभाषया एकवद्भवतीति। तेन मूत्रेण च गोमूत्रेण स्नेहपाकसामान्यकल्पनया वारिगोदुग्धमूत्राणि त्रीण्यपि प्रत्येकं तैलचतुर्गुणानि कार्य्याणि। तथा च तन्त्रान्तरम्—"पञ्चप्रभृति यत्रस्युर्द्रवाणि स्नेहसंविधौ। पृथक्स्नेहसमान्याहुरर्वाक् स्याच्च चतुर्गुणम्॥ तथा च विदेहः—पलानि चैव बिल्वस्य गवां मूत्रेण पेषयेत्। पक्त्वा क्षीरोदके तैलं कर्णयोरेव सेचनमिति॥ ३१५॥

कांजी, बिजौरे का रस, मधु तथा शुक्त (प्रत्येक तैल के समान), इनसे यथा विधि साधित तैल अथवा मधु, अदरख का रस, सहिजन की जड का क्काथ, केले की जड का रस (चारों पृथक् २ तैल के समान), इनसे यथाविधि साधित तैल अथवा सोंठ, धनियां तथा हींग के कल्क से चतुर्गुण जल द्वारा साधित तैल कर्णशूल को नष्ट करता है। एवं तैल २ प्रस्थ। बकरी का दूध २ प्रस्थ। गोमूत्र ८ प्रस्थ। वीर्याधानार्थ जल ८ प्रस्थ। कल्कार्थ बेलगिरी ८ पल। यथाविधि सिद्ध कर कान में डालने से बधिरता नष्ट होती है॥ ३१५॥

इदानीं कर्णरोगेषु क्षारतैलमाह—

हिङ्ग्वब्ददारुमिशिमूलकभस्मभूर्ज-
रुक्क्षारसिन्धुरुचकोद्भिदशिग्रुविश्वैः।
सस्वर्जिकाबिडवचाञ्जनमातुलुङ्ग-
रम्भारसैः समधुशुक्तमिदं विपक्वम्॥ ३१६॥

---

१—मधुप्रधानं शुक्तन्तु मधुशुक्तन्तथापरम्। जम्बीरस्य फलरसं पिप्पलीमूलसंयुतम्। मधुभाण्डे विनिक्षिप्य धान्यराशौ निधापयेत्। मासेन तज्जातरसं मधुशुक्तमुदाहृतम्। इति स्वसंग्रहे चक्रः। अत्र वृद्धवैद्योपदेशात् जम्बीरफलरसस्य द्वात्रिंशत्पलानि, पिप्पलीमूलस्य चत्वारि, मधुनोऽष्टौ पलानीति मानक्रमः। अत्र केचित् मधु च शुक्तं च मधुशुक्ते ताभ्यां सह वर्त्तते यत्तैलं तत्समधुशुक्तमित्येवं विश्लिष्य मधुनः शुक्तस्य च पृथक् चातुर्गुण्यमिच्छन्ति परं तेषां मतं जतूकर्णे मधुनोऽपाठान्नोपपद्यते।

तैलं प्रसिद्धमिति तच्छ्रवणाश्रुतिघ्नं
कर्णप्रणादबधिरत्वहरं नराणाम् ।
भ्रूमस्तकश्रवणशुष्कुलिकान्तराल-
शूलापहं चरकशास्त्रचिकित्सितोक्तम् ॥ ३१७ ॥

हिङ्ग्वादिभिः कार्षिकैः कल्कीकृतैस्तैलप्रस्थं मातुलुङ्गरसादिभिः पचेत्। मातुलुङ्गं बीजपूरकम्। तच्च रम्भा च ( कदली रम्भा ) मातुलङ्ग-रम्भे तयोः रसः। मधुनः शुक्तम्। अथवा मधूकपुष्पाणां शुक्तम् चुक्रम्। बीजपूरकरसकदलीरसमधुचुक्राणि प्रत्येकं चतुर्गुणानि दत्त्वा विपक्वमिद-मेतत्तैलं प्रसिद्धम्। हिङ्ग्वादीनामितरेतरद्वन्द्वः। हिङ्गु रामठम्। अब्दं मुस्तम्। दारु देवदारु। मिशिः शतपुष्पा। मूलकभस्म शुष्कमूलकाणां क्षारः। भूर्जः तद्ग्रन्थिः। रुक् कुष्ठम्। क्षारो यवक्षारः। सिन्धु सैन्धवम्। रुचकं सौवर्चलम्। औद्भिदं पांसुलवणम्। शिग्रुः शोभाञ्जनकम्। विश्वं शुण्ठी। स्वर्जिका स्वर्जिकाक्षारः। बिडं बिडलवणम्। वचा उग्र-गन्धा। अञ्जनं रसाञ्जनम्। इत्येभिर्विपक्वं श्रवणाश्रुतिघ्नम्। श्रवणौ कर्णौ तयोरश्रुतिरश्रवणं तां हन्तीति श्रवणाश्रुतिघ्नम्। कर्णप्रणादब-धिरत्वे हरतीति कर्णप्रणादबाधिरत्वहरम्। नराणां प्राणिनाम्। भ्रूमस्त-कादिशूलापहम्। चरकशास्त्रचिकित्सिते उक्तं क्षारतैलं प्रसिद्ध-मिति ॥ ३१६—३१७ ॥

इति कर्णरोगचिकित्सा समाप्ता।

क्षारतैल—तैल २ प्रस्थ। बिजौरे का रस ८ प्रस्थ। केले की जड का रस ८ प्रस्थ। मधुशुक्त ( मधुप्रधान शुक्त अथवा महुए के फूलों से तय्यार किया हुआ शुक्त ), ८ प्रस्थ। कल्कार्थ—हींग, मोथा, देवदारु, सोये, मूलकक्षार ( मूली का क्षार ) भूर्जग्रन्थि, कुठ, यवक्षार, सैन्धानमक, कालानमक, उद्भिदनमक ( रेह का नमक ), सहिजन के बीज, सोंठ, सर्जिक्षार, बिडनमक, वच, रसौंत, प्रत्येक १ कर्ष। यथा विधि पाक करें। इस चरकोक्त तैल की दो तीन बूंद कान में डालने से बधिरता, कर्णनाद तथा भ्रू, मस्तक एवं कान की दर्द नष्ट होती है ॥ ३१६—३१७ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*कर्णरोगचिकित्सा समाप्ता।*

# अथ मुखरोगचिकित्सा ।

कर्णरोगचिकित्सानन्तरं यथोद्देशं मुखरोगचिकित्सामाह—

साब्द्रोणादरिमेदवल्कलशतात्क्वाथे चतुर्थांशके
गोदुग्धे सजतुद्रवे च विपचेदेभिश्च कल्कीकृतैः ।
पत्तङ्गागुरुगैरिकैः सखदिरैः कङ्कोलजातीफलै-
र्न्यग्रोधैः सलवङ्गपुष्पजतुभिः कर्पूररोध्रान्वितैः ॥ ३१८ ॥
मञ्जिष्ठामधुकाब्दपद्मकतृटित्वक्धातकीकेसरै-
स्तैलं कट्फलसंयुतैरिति भवेद्वक्त्रेण धार्यं नृभिः ।
शीतादादिषु दन्तजेषु मुखजेष्वन्येषु रोगेषु च
प्रोक्तं यज्जनकात्मजेन तदिदं गुञ्जाप्रभं प्राणिनाम् ॥३१९॥

तैलं पचेदरिमेदवल्कलशतात् क्वाथे चतुर्थांशके। क्वाथकल्पना च अरिमेदस्य वल्कलशतमब्द्रोणे विपाच्य चतुर्थांशावशेषे क्वाथाढके । गोदुग्धे गोदुग्धाढके । सजतुद्रवे च जतु लाक्षा तस्याः पलशतं सलिलद्रोणे विपक्वं चतुर्थांशकमाढकम् सह तेन वर्त्तत इति सजतुद्रवम् । तस्मिन्पत्तङ्गादिभिः कार्षिकैः कल्कैस्तैः सह तैलप्रस्थं विपचेत् । न्यग्रोधो वटस्तस्य प्ररोहः । अब्दं मुस्तम् । तृटिरेला । धातकीकेसराणिधात कुसुमानि। शेषाणि प्रसिद्धानि एतैर्विपक्वं नृभिर्मनुष्यैर्वक्त्रेण मुखेन गण्डूकवलाभ्यां धार्यम् । शीतादादिषु रोगेषु दन्तजेषु मुखजेष्वन्येष्वोष्ठप्रकोपादिषु प्राणिनां यज्जनकात्मजेन जनकसुतेन विदेहेनोक्तम् तदिदं गुञ्जाप्रभं नाम तैलं भवेदिति ॥ ३१८—३१९ ॥

गुञ्जाप्रभतैल—तिलतैल २ प्रस्थ । क्वाथार्थ—अरिमेद ( विट्खदिर, दुर्गन्ध वाला खैर ) १०० पल ( १० सेर ), जल २ द्रोण, अवशिष्ट क्वाथ आधा द्रोण ( ८ प्रस्थ ) । लाक्षारस ८ प्रस्थ ( योगरत्नाकरोक्त विधि से प्रस्तुत ) अथवा लाक्षा १०० पल, जल २ द्रोण, अवशिष्ट क्वाथ ८ प्रस्थ । कल्कार्थ—पत्तंग ( रक्तचन्दनभेद ) अगर, उत्तमगेरू, खदिर ( कत्था ), कंकोल ( शीतल चीनी ), जायफल, वटांकुर, लौंग, लाक्षा, कपूर, लोध, मंजिष्ठा, मुलहठी, मोथा, पद्माख, छोटी इलायची, दारचीनी, धाय के फूल, नागकेसर, कट्फल, प्रत्येक १ कर्ष । यथाविधि तैल पाक करें । शीतादादि दन्तरोगों में तथा अन्य मुखरोगों में इस विदेहोक्त तैल का कवल धारण करना

चाहिये। यही तैल चक्रदत्त में इरिमेदाद्य तैल के नाम से कहा गया है। भेद केवल इतना ही है कि वह आधा आढक ( दुगुना करने से १ आढक अर्थात् ४ प्रस्थ ) तैल को सिद्ध करने का विधान करता है और यहां टीकाकार १ प्रस्थ ( दुगुना करने से २ प्रस्थ ) तैलसाधन करने की व्यवस्था देता है जो कि—स्नेहपाक में क्वाथ से चतुर्थांश स्नेह लेना चाहिये—इस नियम के अनुसार ठीक है। चक्रदत्त में गोदुग्ध तथा लाक्षारस का पाठ नहीं और इसमें कल्क द्रव्यों में अरिमेद का पाठ नहीं है॥ ॥ ३१८—३१९॥

साम्प्रतं मुखरोगेषु क्वाथद्वयमाह—

रोगेषु वक्त्रगलतालुसमुत्थितेषु
क्वाथः कटुत्रिकफलत्रिककट्फलानाम्।
स्याद्वा सपर्पटककट्फलविश्वभार्गी-
भूतीकधान्यघनदारुवचाभयानाम्॥ ३२०॥

वक्त्रादिसमुत्थितेषु रोगेषु कटुत्रिकादीनां क्वाथः स्यात् भवेत्। हित इति वाक्यशेषः। पर्पटादीनां वा क्वाथो हितो भवेदिति योगान्तरम्। विश्वं शुण्ठी। भार्गी पद्मा। भूतीकं कट्तृणम्। घनं मुस्तम्। दारु देवदारु। अभया हरीतकीति॥ ३२०॥

इति मुखरोगचिकित्सा समाप्ता॥

मुखरोग, गलरोग एवं तालुरोगों में त्रिकटु, त्रिफला तथा कट्फल; इनका क्वाथ अथवा पित्तपापड़ा, कट्फल, सोंठ, भारंगी, भूतीक ( गन्धतृण ), धनियां, मोथा, देवदारु, वचा तथा हरड़; इनका क्वाथ हितकर है॥ ३२०॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*मुखरोगचिकित्सा समाप्ता।*

——:o:——

# अथ शिरोरोगचिकित्सा।

मुखरोगचिकित्सानन्तरं यथोद्देशं शिरोरोगचिकित्सामाह—

द्रोणे जलस्य विपचेत्समयूरमांसं
वाट्यालकं सदशमूलमधूकरास्नम्[1]।

---

१—अत्र वाट्यालकदशमूलमधुकरास्नाः पृथक् त्रिपलप्रमिताः ग्राह्याः। यदुक्तं वृद्धवाग्भटे—"दशमूलबलारास्नामधुकैस्त्रिपलैर्युतम्"। कल्कार्थं च मधुरगणभेषजानि

क्काथेन तेन पयसा मधुरौषधैश्च
सिद्धं शिरोरुजि हितं शिखिसर्पिरेतत् ॥ ३२१ ॥

वाट्यालकं सदशमूलमधूकरास्नं समयूरमांसं च जलस्य द्रोणे विपचेत्। वाट्यालकं बला। दशमूलं युक्पञ्चमूलम्। मधूकं यष्टीमधु। रास्ना रसना। क्काथकल्पना च मयूरं पादान्त्रपक्षशकृत्पित्तमुखवर्जितं, दशमूलबलारास्नायष्टीमधूनि प्रत्येकं त्रिपलिकानि गृहीत्वा सलिलद्रोणे विपाच्य चतुर्भागावशेषं क्काथं कृत्वा तेन क्काथेन पयसा च दुग्धेन मधुरौषधैश्च काकोल्यादिभिः कार्षिकैः कल्कैर्घृतप्रस्थं सिद्धं शिरोरुजि शिरोरोगे हितम्। एतत् शिखिसर्पिर्मायूरघृतमिति ॥ ३२१ ॥

मायूरघृत—गव्यघृत-२ प्रस्थ। क्काथार्थ—पंख, चोंच, आन्त्र, पित्त आदि से रहित एक मोर का मांस, तथा बला, दशमूल, मुलहठी, रास्ना; प्रत्येक ३ पल; जल २ द्रोण, अवशिष्ट क्काथ आधा द्रोण (८ प्रस्थ)। दूध २ प्रस्थ। कल्कार्थ—काकोल्यादिगण की प्रत्येक औषध २ तोले। यथाविधि पाक करें। यह घृत शिरोरोग में अत्यन्त हितकर है ॥ ३२१ ॥

इदानीं षड्बिन्दुतैलमाह—

मिशिमधुकविडङ्गैरण्डजीवन्तिरास्ना-
तगरलवणशुण्ठीत्वग्भिरेभिः सदुग्धैः।
दशभिरिति समांशैर्भृङ्गनिर्यासपक्वं
नयनदशनमूर्द्धव्याधिविध्वंसि तैलम् ॥ ३२२ ॥

मिश्यादीनामितरेतरद्वन्द्वः। एभिर्दशभिरर्द्धपलिकैस्तैलप्रस्थं, दुग्धं भृङ्गस्वरसः प्रत्येकं चतुर्गुणं, पक्वं नयनदशनमूर्धव्याधिविध्वंसि। मिशिः शतपुष्पा। लवणं प्रधानकल्पनया सैन्धवम्। शेषाणि प्रसिद्धानि ॥ ३२२ ॥

---

काकोल्यादीनि कार्षिकाणि ग्राह्याणि। चक्रदत्तेऽप्युक्तं—"मधुरैः कार्षिकैः कल्कैः"। अत्र केचित् वाट्यालकादीनां द्रव्याणां समं मयूरमांसमिच्छन्ति कथयन्ति च दशमूलस्य प्रत्येकं पलत्रयम्, एवं बलादीनां त्रयाणामपि; तेन मिलित्वा ऊनचत्वारिंशत्पलानि भवन्ति तथा मयूरमांसमपि पक्षपादादिरहितं ऊनचत्वारिंशत्पलं ग्राह्यम्। अतएव चक्रोऽपि—"दशमूलादिना तुल्यो मयूर इह गृह्यते" इत्यनेन स्वमतमुपन्यस्तवान्। परं व्यवहारस्तु आकृतिमानेनैव गृहीतेन मयूरेण भवतीति शिवदासः ॥

१—तत्त्वचन्द्रिकाख्यायां चक्रदत्तव्याख्यायां अजाक्षीरं तैलसममिति दृश्यते।

षड्विन्दुतैल—तिलतैल २ प्रस्थ। भांगरे का रस ८ प्रस्थ। दूध ८ प्रस्थ। कल्कार्थ—सोये, मुलहठी, वायविडंग, एरण्डमूल, जीवन्ती, रास्ना, तगर, सैन्धानमक, सोंठ, दारचीनी, प्रत्येक १ पल। यथाविधि साधित करें। यह तैल नेत्र, दांत, शिर; प्रभृति के रोगों को नष्ट करता है। इस तैल की ६ बूंदें नस्य द्वारा प्रयुक्त की जाती हैं ॥ ३२२ ॥

अधुना पलितघ्नं तैलमवोचत्—

**असनसारकषायविपाचितं त्रिफलया मधुकेन च संयुतम्।**
**भवति नावनतैलमनुत्तमं पलितनेत्रविकाररुजापहम् ॥ ३२३ ॥**

पलितं च नेत्रं च पलितनेत्रे तयोः पलितनेत्रयोर्विकाररुजः। पलितनेत्रविकाररुजः पलितं अकालजरा। नेत्रविकारा नेत्ररोगास्तस्य रुक् पीडा तामपहन्तीति पलितनेत्रविकाररुजापहं भवतीत्यर्थः। असनसारकषायेण बीजसारकषायेण त्रिफलया मधुकेन च संयुतम्। त्रिफला पूर्वोक्ता। मधुकं यष्टीमधु तेन युतं संयुक्तं नावनतैलं नस्यतैलं भवतीति ॥ ३२३ ॥

पलितघ्नतैल—तिलतैल २ प्रस्थ। असन (पीतशाल, बिजैसार) काष्ठ का क्काथ ८ प्रस्थ। कल्कार्थ—त्रिफला, मुलहठी; प्रत्येक २ पल। यथाविधि सिद्ध कर नस्य लेने से पलित (केशों का श्वेत होजाना) तथा नेत्ररोग नष्ट होते हैं ॥ ३२३ ॥

अधुना द्वितीयं पलितघ्नं तैलमाह—

**दुग्धेन मार्कवरसेन चतुर्गुणेन**
**तैलं भृतं त्रिफलया मधुकेन वापि।**
**नस्यप्रदानविधिना पलितानि हन्या-**
**दभ्यङ्गतः शिरसि बस्तिविधारणैश्च[१] ॥ ३२४ ॥**

दुग्धेन चतुर्गुणेन मार्कवो भृङ्गस्तस्य रसेन चतुर्गुणेन त्रिफलया मधुकेन च प्रत्येकं पलप्रमाणेन कल्कीकृतेन तैलप्रस्थं भृतं पक्वं पलितानि हन्यात्। केनोपायेन? नस्यप्रदानविधिना। अभ्यङ्गतः

---

१—आशिरो व्यायतं चर्म कृत्वाष्टाङ्गुलमुच्छ्रितम्। तेनावेष्ट्य शिरोऽधस्तन्माषकल्केन लेपयेत्। निश्चलस्योपविष्टस्य तैलैरुष्णैः प्रपूरयेत् धारयेदारुजः शान्तेर्यामं यामार्द्धमेव वा। शिरोवस्तिर्जयत्येषा शिरोरोगं मरुद्भवम् ॥ हनुमन्याक्षिकर्णार्त्तिमर्दितं मस्तकम्पनम्। तैलेनापूर्य मूर्द्धानं पञ्चमात्राशतानि च। तिष्ठेच्छ्लेष्मणि पित्तेऽष्टौ दश वाते शिरोगदी ॥

अभ्यङ्गात् शिरसि बस्तिविधारणैः शिरोबस्तिभिश्च। इति शिरोरोग-चिकित्सा समाप्ता ॥ ३२४ ॥

इति तीसटसुतचन्द्रटविरचितायां चिकित्साकलिकाटीकायां
शालाक्यतन्त्रं द्वितीयं समाप्तम् ॥

तिलतैल २ प्रस्थ। भांगरे का रस ८ प्रस्थ। कल्कार्थ—त्रिफला तथा मुलहठी; प्रत्येक एक २ पल। यथाविधि पाक कर नस्य, अभ्यंग तथा शिरोबस्ति द्वारा प्रयोग करने से पलित नष्ट होता है ॥ ३२४ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*शालाक्यतन्त्रं समाप्तम्।*

——:o:——

# अथ शल्यतन्त्रम्।

शालाक्यतन्त्रानन्तरं यथोद्देशं शल्यतन्त्रारम्भः–शल्यहरणप्रधानत्वात् तन्त्रं शल्यतन्त्रम्। शाकपार्थिवादित्वान्मध्यमपदलोपी समासः। तच्च शल्यं विविधतृणकाष्ठपाषाणपांसुलोहलोष्ठास्थिवालनखपूयास्रावान्तर्गतशल्योद्धरणार्थं यन्त्रशस्त्रक्षाराग्निप्रणिधानव्रणविनिश्चयार्थं च। तानि च क्षाराग्निशस्त्राणिकेषु रोगेषु विधीयन्ते। इत्याह—

वल्मीकिनां जतुमणौ मशकेष्वपच्या-
मर्शोविकारिषु भगन्दरिणां व्रणेषु।
ग्रन्थ्यर्बुदश्वयथुरुक्तिलकालकेषु
क्षाराग्निशस्त्रपतनानि वदन्ति वैद्याः ॥ ३२५ ॥

वल्मीकादिषु रोगेषु वैद्याः क्षाराग्निशस्त्रपतनानि वदन्ति। क्षारश्च अग्निश्च शस्त्रं च क्षाराग्निशस्त्राणि तेषां पतनान्यवचारणानि। वल्मीकादयो रोगाः प्रसिद्धाः। तेषां स्वे स्वे विकारे विस्तरतः क्षाराग्निशस्त्रपतनानि सुश्रुतादिभिरुक्तानि जानीयात्। तानि न ग्रन्थविस्तरभयादत्र लिख्यन्त इति ॥ ३२५ ॥

वल्मीक, जतुमणि, मशक ( मस्से ), अपची, अर्श, भगन्दर, ग्रन्थि, अर्बुद, शोथ, तिलकालक; प्रभृति रोगों की क्षार, अग्नि तथा शस्त्र द्वारा सुश्रुत आदि के अनुसार यथाविधान चिकित्सा की जाती है ॥ ३२५ ॥

इदानीं शोणितमोक्षाद्याः केषु च रोगेषु कैरुपायैः क्रियत इति तदाह—

दद्रूषु विद्रधिषु गुल्मिषु च व्रणेषु
मक्कल्लपिल्लगलगण्डकिलासवत्सु।
पायुप्रमेहपिटकासु विसर्पवत्सु
वर्त्मामयेषु च कपालविकारवत्सु॥ ३२६॥
सश्लीपदे वृद्‌ध्युपदंशशोफे
शूकप्रदोषरुजि तालुगलामयेषु।
क्षुद्रामयेषु च कियत्स्वपि शोणितस्य
मोक्षः शिराभिरथ तुम्बविषाणकैर्वा॥ ३२७॥

दद्रूविद्रध्यादिषु शोणितस्य मोक्षः कर्त्तव्य इति वाक्यशेषः। कैरुपायैः? सिरादिभिः सिरामोक्षैः। अथेति कंचिदुपायान्तरं दर्शयति तुम्बेरलाबुभिः श्लेष्मदुष्टरक्ते। विषाणैः शृङ्गैर्वातदुष्टरक्ते। मकल्लं प्रजातायाः स्त्रियाः अशोधितरक्तायाः कोष्ठे भवति। पिल्लं पिच्चटरोगः। तच्च द्विविधम्। प्रक्लिन्नवर्त्म अपरिक्लिन्नवर्त्म च। ननु च सुश्रुताचार्येण द्वयोरपि शस्त्रपातनं निषिद्धम्। तथा सुश्रुतः—'अक्लिन्नवर्त्महुतभुक्ध्वजदर्शिशुक्तिप्रक्लिन्नवर्त्मसु तथैव बलाससंज्ञे। आगन्तुनामययुगेन च दूषितायां दृष्टौ न शस्त्रपतनं प्रवदन्ति वैद्या इति। तत् कथं रक्तमोक्षः क्रियते-इत्याह वृद्धपरम्परया तावद्रक्तमोक्षः चक्षुष्येणाभिप्रायात्तीसटाचार्येणोक्तः। तथा च चक्षुष्येणः—"पिल्लौ द्वौ तु विनिर्दिष्टौ क्लिन्नाक्लिन्नौ तु वर्त्मजौ। अक्लिन्नवर्त्म कफजः क्लिन्नवर्त्म त्रिदोषजः। तयोः सामान्यतश्चैव पृथक्त्वेन तु भेषजम्। प्रत्यवस्थं प्रतीकारं कीर्त्यमानं निबोधत। कायस्य शिरसश्चैव विरेको रक्तमोक्षणम्। विशदान्यन्नपानानि यवान्नविकृतीस्तथा।" इत्यादि। किलासं श्वित्रम्। पायुर्गुदं तस्मिन् पिटिका भगन्दराख्याः। स च प्रमेहपिडकाश्च सराविकाद्याः तास्तथा तासु। उत्सङ्गिन्याद्यो वर्त्मामयाः। कुचौ स्तनौ। कपालं शिरः। कुचकपालं तस्मिन्विकारा विद्यन्ते येषां ते कुचकपालविकार-

वन्तस्तेषु। शोफोऽवयवसमुत्थः। शूकदोषरुजि सर्षपिकापिटिकाष्ठीलिकादौ लिङ्गरोगे। तात्वामयाः तालुशुण्डिकादयः। गलामयाः कण्ठरोगा रोहिण्यादयः। क्षुद्रामयेषु चुद्ररोगेषु कियत्स्वपि पाददारीन्द्रलुप्तदारुणकन्यच्छनीलिकाव्यङ्गयौवनपिडकासु सिरामोक्षणं शोणितमोक्षः सुश्रुतादिभिरुक्तः। सर्वथा दद्रुविद्रध्यादिषु दृष्ट्वा शोणितजेषु सिरादिभिरुपायैः शोणितमोक्षः कर्त्तव्यः। तथा च सुश्रुतः—"सिराविषाणतुम्बैर्वा जलोकोभिः पदैस्तथा। अवगाढं यथासन्नं निर्हरेद् दुष्टशोणितम्। त्वग्दोषा ग्रन्थयः शोफा रोगाः शोणितजाश्च ये। रक्तमोक्षणशीलानां न भवन्ति कदाचन॥ इति॥ ३२६—३२७॥

दद्रु, विद्रधि, गुल्म, व्रण, मक्कल, पिल्ल (प्रक्लिन्नवर्त्म, अपरिक्लिन्नवर्त्म,), गलगण्ड, किलास (श्वित्र), भगन्दर, प्रमेहपिटिका, विसर्प, नेत्रवर्त्मरोग, शिरोरोग, श्लीपद, वृद्धिरोग, उपदंश, शोफ, शूकदोष, तालुरोग, गलरोग तथा व्यंग आदि कुछ क्षुद्ररोगों में शिरावेध (फ़स्त खोलना) द्वारा अथवा तुम्बी एवं सींग द्वारा रक्तमोक्षण करना चाहिये। इनके द्वारा रक्तनिर्हरण करने की विधि विस्तरशः सुश्रुत आदि ग्रन्थों में उपदिष्ट है॥ ३२६—३२७॥

साम्प्रतं कथं शोणितमोक्षः कर्त्तव्य इत्याह—

दोषं प्रदेशं च बलं च वीक्ष्य
क्वचिज्जलौकोभिरसृग्विमोक्षः।
स्वल्पेऽसृजि स्यात्परिपाचनं च
द्रव्यैरमीभिर्भिषजा विधेयम्॥ ३२८॥

दोषं वातादिकं वीक्ष्य प्रदेशं मर्मस्थानं स्नाय्वादिविमुक्तम्। बलं शारीरमोजःसंज्ञञ्च। क्वचिद् क्षुद्ररोगेऽरूंषिकाऽजगल्लिकाविदारिकादौ। तथा च शूकदोषजेऽष्ठीलिकालजीसंमूढपिडकापुष्करिकादौ जलौकाभिरसृग्विमोक्षः कार्य्यः। अथवा अन्यथा त्वत्तमः क्वचित् पित्तजे नृपबालभीरुवनितावृद्धसुकुमारादौ जलौकाभिरसृग्विमोक्षः रक्तमोक्षणं कार्य्यम्। असृजि रक्ते स्वल्पीकृते परिपाचनं द्रव्यैरमीभिर्वक्ष्यमाणैर्भिषजा विधेयं कर्त्तव्यं स्याद् भवेदिति॥ ३२८॥

दोष, प्रदेश तथा बल आदि की विवेचना करके उपर्युक्त क्रमों से अथवा जोंक आदि द्वारा रक्तमोक्षण कराना चाहिये। यदि रक्तनिर्हरण से रक्त के कम

होजाने पर भी व्रणशोथ आदि शान्त न हो तो वैद्य को चाहिये कि निम्नोक्त द्रव्यों द्वारा उसका पाचन करे ( पकावे ) ॥ ३२८ ॥

पूर्वमुक्तममीभिर्द्रव्यैः पाचनं विधेयम् । तानि द्रव्याण्याह—

**शिग्रुमूलकफलैः शणबीजैः सक्तुभिश्च तिलसर्षपयुक्तैः ।**

**सातसीभिरिति पाचनपिण्डस्तक्रकाञ्जिकयुतः श्वयथौ च ॥३२९॥**

शिग्रुः शोभाञ्जनकं तच्च मूलकश्च शिग्रुमूलके तयोः फलानि तैः । शणबीजैश्च सक्तुभिश्च तिलसर्षपाभ्यां युक्तैः । सह अतस्या वर्त्तत इति सातसीति तैः इत्येभिर्द्रव्यैः पाचनपिण्डो विधेयः । श्वयथौ गण्ड-पिडकादावेकदेशजे । तक्रकाञ्जिकयुतः, तक्रं मथितं तच्च काञ्जिकं च तक्रकाञ्जिके ताभ्यां युतो मिश्रित इति ॥ ३२९ ॥

सहिजन के बीज, मूली के बीज, सन के बीज, सत्तू, सरसों के बीज, अलसी; इन्हें एकत्र छाछ अथवा कांजी के साथ पकाकर पाचनपिण्ड ( पुल्टिस ) बनावे । इस पाचनपिण्ड द्वारा शोथ को पकावे ॥ ३२९ ॥

इदानीं पक्वे पाचनपिण्डेन श्वयथौ किं विधेयम् ? इत्यवोचत्—

**शोफं प्रपक्वं प्रविदार्य शस्त्रैर्विशोध्य संशुद्धिकरैः कषायैः[1] ।**

**तिलप्रगाढैः पिचुमन्दपत्रैर्विशुद्धपूयस्य ततः प्ररोहः ॥ ३३० ॥**

शोफं प्रपक्वं शस्त्रैर्मण्डलाग्रादिभिः प्रविदार्य प्रकर्षेण विशोध्य शोधनं कृत्वा संशुद्धिकरैर्जातीयवातिक्तकांकोठाकरवीरसुवर्चलारग्व-धादिकषायैः । पिचुमन्दो निम्बस्तस्य कषायैस्तिलप्रगाढैस्तिलाधि-कैर्विशुद्धपूयस्य निवृत्तक्लेदस्य सतः सद्योव्रणस्य ततः प्ररोहः कार्य्यः । तथा च सुश्रुतः—"तस्मादन्तर्बहिश्चैव विशुद्धं रोपयेद् व्रणम्" । शुद्ध-लक्षणञ्च—"त्रिभिर्दोषैरनाक्रान्तः श्यावौष्ठः पिडकासमः । अवेदनो निरास्रावो व्रणः शुद्ध इहोच्यते" इति ॥ ३३० ॥

जब शोथ पक जाय तब वृद्धिपत्र आदि शस्त्रों द्वारा विदीर्ण करें । और त्रिफला आदि के संशोधन कषायों द्वारा व्रण को धोकर शोधन करें । अथवा तिल और नीम के पत्तों को एकत्र पीस कर व्रण पर लेप दें, इस से भी व्रण का शोधन

---

१—शंखिन्यंकोलसुमनःकरवीरसुवर्चलाः । त्रिफला खदिरो दार्वी कोलपत्रं पलंकषा । प्रक्षालने कषायाणि वर्गश्चारग्वधादिकः ॥

होता है। इस प्रकार शोधन करने से जब पूय बनना बन्द होजाय तब व्रण का रोहण करना चाहिये ॥ ३३० ॥

पूर्वमुक्तं शुद्धस्य सतः प्ररोहः स कैर्द्रव्यैरित्याह—

निम्बस्य पत्रैर्मधुना घृतेन मिश्रीकृतैरस्य ततः प्ररोहः ।
सर्पिर्विमिश्रैर्यवसक्तुभिर्वा प्ररोहणं वाप्यथ पञ्चवल्कैः ॥ ३३१ ॥

ततोऽस्य शुद्धस्य प्ररोहः कार्य्यः । कैः ? निम्बस्य पत्रैर्मधुना घृतेन च मिश्रीकृतैरेकीकृतैः । कदाचित् यवसक्तुभिर्वा सर्पिर्विमिश्रैः संयुक्तैः प्ररोहणं कार्य्यम् । अथवेति योगान्तरमाह—पञ्चवल्कैः पञ्चशल्कैः पूर्वोक्तैः वटादिभिः सर्पिर्विमिश्रैः प्ररोहणं कार्य्यमिति ॥३३१ ॥

शोधन करने के पश्चात् व्रणरोहणार्थ नीम के पत्तों को पीसकर मधु एवं घी में मिश्रित कर प्रलेप देना चाहिये अथवा जौ के सत्तूओं को या वट आदि पञ्चवल्कल की छाल के चूर्णों को घृत में मिला लेप देने से शीघ्र रोहण होता है॥ ३३१ ॥

इदानीं व्रणरोहणं गुग्गुलुतिक्तकं घृतमाह—

क्षुद्रामृताह्ववृषनिम्बपटोलपत्र-
क्काथेन सत्रिकटुकत्रिफलापुरेण ।
सिद्धं घृतं व्रणभगन्दरगण्डमाला-
नाडीषु शस्तमिति गुग्गुलुतिक्तकाख्यम् ॥ ३३२॥

क्षुद्रादिक्काथेन त्रिकटुकादिकल्केन च । घृतं सिद्धं व्रणादिषु शस्तम् । क्षुद्रा कण्टकारिका । अमृताह्वा गुडूची । वृषं वासकम् । निम्बपटोलयोः पत्राणि । पुरो गुग्गुलुः । क्षुद्रादीनि प्रत्येकं दशपलिकानि सलिलद्रोणे निःक्काथ्य चतुर्भागावशेषे क्काथे । त्रिकटुकात्रिफलाकल्केन प्रत्येकं त्रिकार्षिकप्रमाणेन गुग्गुलुपञ्चपलैर्घृतप्रस्थं सिद्धं लघुगुग्गुलुतिक्तकमिति ॥ ३३२ ॥

गुग्गुलुतिक्तकघृत—गव्यघृत २ प्रस्थ। क्काथार्थ–छोटी कटेरी, गिलोय, अडूसा, नीम की छाल, पटोलपत्र; प्रत्येक १० पल, जल २ द्रोण, अवशिष्ट क्काथ आधा द्रोण। कल्कार्थ—कालीमिर्च, पिप्पली, सोंठ, हरड़, बहेड़ा, आंवला; प्रत्येक ३ कर्ष (६ तोले) विशुद्ध गुग्गुलु ५ पल। यथाविधि घृतपाक करें। इसके अन्तः प्रयोग से व्रणों का शोधन एवं रोहण होता है। यह घृत व्रण, भगन्दर, गण्डमाला तथा नाडीव्रण में अत्यन्त हितकर है॥ मात्रा—आधा तोला ॥ ३३२ ॥

# अथ वातरोगचिकित्सा।

अधुना वातरोगचिकित्सामाह—

त्वङ्मांसशोणितगते पवने प्रशस्ता
शृङ्गैरसृक्स्रुतिरथामसमन्विते तु।
रास्नामृतात्रिकटकोरुबुकैः सविश्वैः
सर्वाङ्गगे क्वथितमम्बु हितं समीरे ॥ ३३३ ॥

त्वक् च मांसं च शोणितं च तानि तथा। तेषु गते पवने वाते शृङ्गैरसृक्स्रुतिः प्रशस्ता हिता। आमसमन्विते शरीरे वाते सर्वाङ्गगे रास्नादिभिः क्वथितमम्बु हितम्। रास्ना सुरभी। अमृता गुडूची। त्रिकटको गोक्षुरुकः। उरुबुक एरण्डः। विश्वं शुण्ठी इति ॥ ३३३ ॥

त्वचा, मांस, रक्त प्रभृति धातुगत वात में शृंग द्वारा रक्तनिर्हरण करना चाहिये। सम्पूर्ण शरीरगत आमयुक्त वात अर्थात् आमवात में रास्ना, गिलोय, गोखरू, एरण्डमूल, सोंठ; इनका यथाविधि साधित क्वाथ अत्यन्त हितकर है ॥ ३३३ ॥

साम्प्रतं पक्वाशयगतस्य वायोश्चिकित्सामाह—

पक्वाशयस्थस्य समीरणस्य बलादिनान्वासनकर्म शस्तम्।
रास्नादिबस्तिप्रणिधानमत्र शतावरीतैलमथ प्रयोज्यम् ॥ ३३४ ॥

समीरणस्य वायोः पक्वाशयस्थस्य पक्वाशयगतस्य बलातैलेनान्वासनं कर्म शस्तम् ॥ रास्नादिबस्ती रास्नादिनिरूहस्तस्य प्रणिधानं दानमत्र पक्वाशयस्थस्य वायोः शस्तम्। अथानन्तरं शतावरीतैलं प्रयोज्यं प्रयोजनीयम्। तस्य पानपरिषेकाभ्यङ्गादिष्विति ॥ ३३४ ॥

पक्वाशयगत वात में बलादितैल द्वारा अनुवासन ( स्नेहवस्ति ) तथा रास्नादिवस्ति ( निरूहवस्ति ) देनी चाहिये। एवं पान, अभ्यंग तथा परिषेक आदि के लिये शतावरी तैल का प्रयोग प्रशस्त है ॥ ३३४ ॥

---

१—सर्वथापि वातरोगचिकित्सायाः कायचिकित्सायामेवान्तर्भावात् शल्यतन्त्रेऽस्याः पठनं प्रामादिकम्। केचित्त्वेवं समादधति—यद् यतः वातरोगेषु बस्तियन्त्रमुपयुज्यते, बस्तेः वाताचिकित्सायां प्रधानतमत्वात्। यथोक्तं चरके "आस्थापनानुवासनं तु खलु सर्वोपक्रमेभ्यो वाते प्रधानतमं मन्यते भिषजः।" तस्माद् वातरोगेषु प्रधानतया बस्तियन्त्रस्य प्रयुज्यमानत्वात् यन्त्रप्रणिधानस्य च शल्यतन्त्रेऽन्तर्भावाद्वातरोगाणां शल्यतन्त्रे पठनं युक्तमिति।

पूर्वं बलातैलेनान्वासनमुक्तं ततस्तद्बलातैलमाह—

तैलं वातहरं बलाजलपयः पक्वं वरीकुण्डली-
रास्नानागबलाबलामिशिपृथक्पर्णीस्थिरारेणुभिः।
मञ्जिष्ठाष्टकवर्गचन्दननतैरेलाश्वगन्धागुरु-
त्वग्यष्टीमधुपत्रकैः सनलदैः शैलेयरुग्दारुभिः॥ ३३५॥

वरीकुण्डल्यादिकल्केन बलाजलपयोभ्यां पक्वं तैलं वातहरं भवति। वरी शतावरी। कुण्डली गुडूची। मिशिः शतपुष्पा। पृथक्पर्णी पृश्निपर्णी। स्थिरा शालिपर्णी। मञ्जिष्ठा योजनवल्ली। अष्टकवर्गः काकोल्यादिः पूर्वोक्तः। चन्दनं रक्तचन्दनम्। नतं तगरम्। नलदं मांसी। रुक् कुष्ठम्। दारु देवदारु। शेषाणि प्रसिद्धानि। अत्र प्रमाणानिर्देशान्महासन्देहः—बलायाः जलं क्वाथः क्रियते। कियत्प्रमाणा बला कियत्प्रमाणे जले? कियत्प्रमाणः क्वाथः शेषो गृह्यते? पयः क्षीरं च कियत्प्रमाणम्? कियत्प्रमाणं तैलस्य? कियत्प्रमाणेन कल्केन तैलं साध्यते? इति सन्देहः। अत्रोच्यते बलापलशतं चतुर्गुणे जलद्रोणे प्रक्वाथ्य चतुर्भागावशेषः क्वाथो गृह्यते। तस्मिन् तैलप्रस्थं क्षीरचतुर्गुणं कल्कपादं विपचेदित्येष कर्ममार्गः पारम्पर्यागतः। तथा च चक्षुष्येणः—"चतुर्गुणास्वप्सु पचेत्कषायं पादावशेषं क्वथितं तु वैद्यः। स्नेहाद्भवेत्पादसमं तु कल्कं स्नेहात्कषायोऽपि चतुर्गुणः स्यात्। यत्र प्रमाणं तु न कीर्त्तितं स्यात्तत्र प्रमाणस्य विधानमेतत्। खरनादेनाप्युक्तम्—'चतुर्गुणं जलं द्रव्यैः पक्त्वा पादावशेषिते। क्वाथपादसमं स्नेहं कल्कपादं विपाचयेत्। अनिर्दिष्टप्रमाणानां प्रमाणमिदमीरितम्। येषां निर्दिष्टमिष्टं तु द्रवेऽनुक्ते जलं मतम्।" कापिलबलेनाप्युक्तम्—"पादौषधं जलं क्वाथ्यं ग्राहयेत्पादशेषितम्। चतुर्गुणेन तेनापि पादकल्कं घृतं पचेत्।" सुश्रुतेनाप्युक्तम्—"अत्रोदकद्रोणे त्वक्पत्रमूलादीनां तुलामावाप्य चतुर्भागावशेषं निःक्वाथ्यापहरेदित्येष कषायपाककल्पः। स्नेहकुडवे भेषजपलं कल्कमिष्टम्। चतुर्गुणं द्रवमावाप्य विपचेदित्येषकषायपाककल्पः। स्नेहकुडवं चतुःपलं ग्राह्यमष्टपलं द्विगुणपरिभाषया। कुडवादूर्ध्वमप्यावाप्यते। तथा च तन्त्रान्तरे—"रक्तिकादिषु मानेषु यावन्न कुडवो भवेत्। तुल्यमेव

भवेन्मानं शुष्काणां कुडवस्य च। प्रमाणं शाणकर्षकुडवादिपरिज्ञानार्थं बह्वाचार्यमतमत्र लिख्यते—'शाणं पाणितलं मुष्टिं कुडवं प्रस्थमाढकम्। द्रोणं वहं च क्रमशो विजानीयाच्चतुर्गुणम्। द्विगुणं योजयेदार्द्रं कुडवादि तथा द्रवम्। पेषणालोडने वारि स्नेहपाके च निर्द्रवे।" तन्त्रान्तरे क्वचित् द्रवार्द्रयोर्द्विगुणत्वं निषिद्धम्। तथा च तन्त्रान्तरम्—"वासाकुटजकूष्माण्डशतपुष्पाशतावरी। नित्यमार्द्रा प्रयोक्तव्या न तावद् द्विगुणा भवेत्। कल्पयेत्सदृशान् भागान् प्रमाणं यत्र नोदितम्। द्वौ शाणौ वटकः कोलं बदरं द्रङ्क्षणश्च तौ। अक्षं पिचुः पाणितलं सुवर्णं कवलग्रहम्। कर्षं बिडालपदकं तिन्दुकं पाणिमानिका। शब्दान्यत्वमभिन्नेऽर्थे शुक्तिरष्टमिकापि च। पलं प्रकुञ्चो बिल्वं च मुष्टिराम्रं चतुर्थिका। द्वे पले प्रसृतिस्तौ द्वावञ्जलिस्तौ तु मानिका। आढकं भाजनं कंसो द्रोणः कुम्भो घटोऽर्मणः। तुला पलशतं तानि विंशतिर्भार उच्यते। नाङ्गुलिग्राहिता कल्के न स्नेहेऽग्नौ सशब्दता। वर्णादिसम्पच्च यदा तदैनं शीघ्रमाहरेत्। घृतस्य फेनोपशमस्तैलस्य च तदुद्भवः। लेहस्य तन्तुमत्ताप्सु मज्जनं सरणं न च। पाकस्तु त्रिविधो मन्दश्चिक्कणः खरचिक्कणः। मन्दः कल्कसमे किट्टे चिक्कणो मदनोपमे। किञ्चित्सीदति कृष्णे च वर्त्तमाने खरः स्मृतः दग्धोऽत ऊर्ध्वं निःकार्य्यः स्यादामस्त्वग्निमान्द्यकृत्। मृदुर्नस्ये खरोऽभ्यङ्गे पाने वस्तौ च मध्यमः।" इत्येतत्पाकलक्षणं सर्वस्नेहानामवगन्तव्यम् अनिर्दिष्टक्वाथकल्कप्रमाणेषु घृततैलादिष्वनेन मानेन सर्वत्र व्यवहारः। निर्दिष्टमाने च यथोक्तमेवेति ॥३३५॥

बलातैल—तिल तैल २ प्रस्थ। क्वाथार्थ—बलामूल (खरैंटी की जड़) १०० पल जल २ द्रोण, अवशिष्ट क्वाथ आधा द्रोण (८ प्रस्थ)। कल्कार्थ—शतावर, गिलोय, रास्ना, नागबला (गंगेरन), बला, सोये, पृष्टपर्णी, शालपर्णी, रेणुका, मञ्जिष्ठा, अष्टवर्ग, लालचन्दन, तगर, छोटी इलायची, असगन्ध, अगर, दारचीनी, मुलहठी, तेजपत्र, जटामांसी, शैलेय (छैलछरीला), कुष्ठ, देवदारु; मिलित ८ पल। यथाविधि पाक करें। पक्वाशयगत वात में इस तैल की स्नेहबस्ति देनी चाहिये ॥३३५॥

रास्नादिबस्तिप्रणिधानं पश्चादुक्तं तत्प्रतिपादनार्थं रास्नादिबस्तिमाह—

**रास्नायुक्पञ्चमूलीमदनफलबलामांसपथ्याक्षधात्री-**
**क्वाथः सोग्राब्दकृष्णामिशिफलफलिनीकुष्ठसिन्धूत्थकल्कः।**

**बस्तिः सक्षीरमूत्रः सतुषजलघृतक्षौद्रतैलः समस्तु**
**गुल्फस्फिक्जानुजङ्घाजघनभुजकटीपृष्ठकोष्ठानिलघ्नः ॥ ३३६ ॥**

रास्नादीनि पलिकानि गृहीत्वा मांसपलानि षोडश जलाढकद्वये निःक्वाथ्याष्टभागावशेषः क्वाथो ग्राह्यः उग्रादिभिश्च पलिकैः कल्कः। उग्रा वचा। अब्दं मुस्तम्। कृष्णा पिप्पली। मिशिः शतपुष्पा। फलं मदनफलम्। फलिनी प्रियङ्गुः। कुष्ठं रुक्। सिन्धूत्थं सैन्धवम्। क्षीरादिसंयुक्तो बस्तिर्गुल्फाद्यनिलघ्नः। बस्तिकल्पना च पूर्वं व्याख्याता ॥३३६॥

रास्नादिबस्ति—क्वाथार्थ—रास्ना, दशमूल, मैनफल, बला, हरड़, बहेड़ा, आंवला; प्रत्येक १ पल, बकरे का मांस १६ पल; जल ४ आढक, अवशिष्ट क्वाथ आधा आढक ( ३२ पल )। कल्क—वचा, मोथा, पिप्पली, सोये, मैनफल, प्रियंगु, कुठ; प्रत्येक लगभग १ पल ( अथवा मिलित ६ पल )। सैन्धानमक २ तोले। मधु १२ पल। घी और तिलतैल मिलित १२ पल। आवापार्थ—दूध, गोमूत्र, कांजी, मस्तु; प्रत्येक ३ पल। प्रथम सैन्धानमक को मधु में अच्छी प्रकार घोटकर मिलावें। तदनन्तर घी और तैल डालकर मन्थन करें। जब ये एक समान सर्वत्र मिश्रित होजांय तब अत्यन्त श्लक्ष्ण चूर्णित कल्कद्रव्य डालें। इसे भी अच्छी प्रकार मिलाकर क्वाथ और तदनन्तर आवाप दें। इसे यथानियम प्रयुक्त करने से गुल्फ ( टखना ), स्फिक्, जानु ( गोडे ), जंघा, जघनस्थल, बाहू, कमर, पीठ तथा कोष्ठगत वात नष्ट होती है। उपर्युक्त मान तीन वार बस्तिकर्म करने के लिये हैं। एक बस्ति में तृतीयांश दिया जाता है ॥ ३३६ ॥

**पूर्वं शतावरीतैलं प्रयोज्यमित्युक्तं तत्प्रतिपादनायाह—**

**माञ्जिष्ठासुरकाष्ठकुष्ठकुटिलैरेलालवङ्गागुरु-**
**त्वक्पत्रैर्नखनागपुष्पफलिनीकौन्तीवचाचन्दनैः।**
**मांसीसर्जरसाम्बुभिः ससरलैः सोशीरशैलेयकै-**
**रित्येभिः सवरीरसेन पयसा तैलं शृतं वातजित्॥ ३३७ ॥**

इत्येभिर्मञ्जिष्ठादिभिः कल्कैः पयसा दुग्धेन। वरी शतावरी तस्याः स्वरसेन तैलं शृतं वातजित् भवतीति। सुरकाष्ठं देवदारु। कुटिलं तगरम्। कौंती रेणुका। सर्जरसो राला। अम्बु वालकम्। शेषाणि प्रसिद्धानि। इति ॥ ३३७ ॥

शतावरीतैल—तिलतैल २ प्रस्थ। शतावर का रस ८ प्रस्थ। दूध २ प्रस्थ। कल्कार्थ—मंजिष्ठा देवदारु, कुष्ठ, तगर, छोटी इलायची, लौंग, अगर दारचीनी,

तेजपत्र, नखी, नागकेसर प्रियंगु, रेणुका, वच, लालचन्दन, जटामांसी, राल, गन्धबाला, सरलकाष्ठ, खस, शैलेयक (शैलज); मिलित ८ पल। यथाविधि तैल पाक करें। यह तैल वातनाशक है॥ ३३७॥

अधुना पृथुशतावरीतैलमाह—

रुग्दारुद्रविडीप्रियङ्गुतगरं त्वक्पत्रकौन्तीनखै-
र्मांसीसर्जरसाम्बुचन्दनवचाशैलेयलामज्जकैः।
मञ्जिष्ठासरलागुरुद्विपबलारास्नाश्वगन्धावरी-
वर्षाभूमिशिसिन्धुभिः समधुरैर्द्रव्यैश्च कल्कीकृतैः॥३३८॥
एभिः क्षीरशतावरीरससमं तैलं च पक्वं मृदु
स्याद्वातघ्नमिदं नृणामिति वरीतैलं भिषक्पूजितम्।
तद्वद् दुग्धसमन्वितानि सरणीशैरेयरास्नामृता-
वाट्यालक्कथनैः शृतानि च पृथक् तैलानि कुष्ठादिभिः॥३३९॥

एभिः रुग्दार्वादिभिः समधुरद्रव्यैः कल्कीकृतैः क्षीरशतावरीरससमं तैलं मृदु विपक्वं वातघ्नं स्यात् भवेत्। क्षीरं च शतावरीरसश्च ताभ्यां समं तुल्यं तैलम्। मृदु इति क्रियाविशेषणमिति। मृद्वग्नौ विपक्वं नृणां प्राणिनां वरीतैलं भिषग्भिः पूजितमिति। रुक् कुष्ठम्। दारु देवदारु द्रविडी एला। कौन्ती रेणुका। अम्बु बालकम्। द्विपबला नागबला। वर्षाभूः पुनर्नवा। मिशिः शतपुष्पा। सिन्धु सैन्धवम्। मधुरद्रव्याणि काकोल्यादीनि पूर्वोक्तानि। शेषाणि प्रसिद्धानि। तद्वदिति पूर्वोक्तैः कुष्ठादिभिः कल्कैः सरणी प्रसारणीक्वाथदुग्धाभ्यां शृतं प्रसारणीतैलं भवतीति। एवं शैरेयकादिभिस्तैलानि भवन्ति। शैरेयं सहचरम्। रास्ना रसना। अमृता गुडूची। वाट्यालं बलेति॥ ३३८—३३९॥

पृथु शतावरीतैल—तिल तैल २ प्रस्थ। दूध २ प्रस्थ। शतावर का रस २ प्रस्थ। वीर्याधानार्थ जल ८ प्रस्थ। कल्कार्थ—कुठ, देवदारु, छोटी इलायची, प्रियंगु तगर, दारचीनी, तेजपत्र, रेणुका, नखी, जटामांसी, राल, गन्धबाला, लालचन्दन, वच, शैलेय (शैलज), लामज्जक (उशीरभेद, खवी), मञ्जिष्ठा, सरलकाष्ठ, अगर, नागबला, रास्ना, असगन्ध, शतावर, पुनर्नवा, सोये, सैन्धानमक तथा मधुरगण (काकोल्यादिगण), मिलित ८ पल। यथाविधि तैल पाक करें। यह तैल वातनाशक है। इसी प्रकार प्रसारणी, सहचर (झिण्टी, कटसरैया), रास्ना, गिलोय और बला;

इनके क्वाथों से तथा कुष्ठ आदि पूर्व तैलोक्त कल्कद्रव्य से पृथक् तैल सिद्ध किया जाता है। ये सब तैल भी वातनाशक हैं ॥ ३३८—३३९ ॥

इदानीं मध्यमं शतावरीतैलं दशाङ्गनारायणाख्यसंज्ञाभ्यामाह—

एलाबलानलदचन्दनदारुसौम्या-
शैलेयकुष्ठकुटिलैः सशताह्वयैश्च ।
तैलं सदुग्धमिति सिद्धमभीरुजन
कन्दद्रवेण च समेन समीरणघ्नम् ॥ ३४० ॥

एलादिभिः कार्षिकैः कल्कैः तैलप्रस्थं सदुग्धं दुग्धसमं साधयेत्। अभीरुः शतावरी तस्माज्जातोऽभीरुजः तेन कन्दद्रवेण रसेन समेन तुल्येन सिद्धं समीरणं वातं हन्तीति समीरणघ्नम्। नलदं मांसी। सौम्या शालिपर्णी। शैलेयं सहचरम्। कुटिलं तगरम्। शताह्वा शतपुष्पा। शेषाणि प्रसिद्धानि ॥ ३४० ॥

मध्यमशतावरीतैल—तिलतैल २ प्रस्थ। शतावर का रस २ प्रस्थ। दूध २ प्रस्थ। कल्कार्थ—छोटी इलायची, बला, जटामांसी, देवदारु, शालिपर्णी, कटसरैया की जड़, कुठ, तगर, सोये, प्रत्येक; २ तोले। यथाविधि सिद्ध करें। यह तैल वातनाशक है ॥ ३४० ॥

साम्प्रतं गुडूचीप्रसारणीरास्नासहचरबलातैलानि पञ्चाह—

छिन्नोद्भवापलशतं सरणीशतं वा
रास्नाशतं सहचरादथवा बलायाः ।
द्रोणेऽम्भसः शृतमतोऽन्यतमे कषाये
पादस्थिते पयसि चापि चतुर्गुणेऽस्मिन् ॥ ३४१ ॥
लामज्जसर्जरसचोरकचन्दनैला-
शैलेयबालकवचाफलिनीमुराभिः ।
त्वक्पत्रनागकुसुमागुरुदारुमांसी
मञ्जिष्ठिकाकुटिलकुष्ठहरेणुकाभिः ॥ ३४२ ॥
वाप्यालकद्विपबलामिशिवाजिगन्धा
गन्धर्वहस्तकपिकच्छुपुनर्नवाभिः ।

राम्नावरीसरलसैन्धवसारिवाभिः
युक्पर्णिनीमधुरभेषजसंयुताभिः ॥ ३४३ ॥

एताभिरर्धपलभागविभाजिताभि-
स्तैलाढकं सयवकोलकुलत्थतोयम् ।
पक्वं पृथक् सदशमूलजलं जनाना-
मेतद्भिषग्भिरुदितं पवनामयघ्नम् ॥ ३४४ ॥

यान्यत्र पञ्च कथितानि मया मृदूनि
तैलान्यमूनि पवनामयनाशनानि ।
सेव्यानि दुर्बलवपुर्बलवर्द्धनानि
योषिद्गमाय भुवि भूमिभुजां भवन्ति ॥ ३४५ ॥

स्त्रीणां सुखप्रसवनाय च गर्भिणीना-
मुद्गाढगात्रगुरुगर्भभरालसानाम् ।
त्वङ्मार्द्दवाय वपुषि प्रमदाजनानां
दन्तोद्गमेषु च शिशोर्दशनोद्गमाय ॥ ३४६ ॥

छिन्नोद्भवा गुडूची तस्याः पलशतम् । सरणी प्रसारणी तस्याश्च शतं पलशतम् । राम्नाशतं राम्ना रसना तस्याः शतम् पलशतम् । सहाचरादथवा बलायाः शतं पलशतमिति सम्बन्धः । अम्भसः सलिलस्य द्रोणे श्रृतं क्वथितम् । अतोऽस्मात् गुडूच्यादीनामन्यतमे कषाये पादस्थिते चतुर्भागावशेषे पयसि च दुग्धे चतुर्गुणे तैलादस्मिन् लामज्जकादिभिरर्द्धपालिकैः कल्कैः तैलाढकं पक्वं सयवकोलकुलत्थतोयमिति तैलाढकविशेषणम् । कोलानि बदराणि । यवकोलकुलत्थानां त्रयाणां पलशतं सलिलद्रोणे प्रक्वाथ्य चतुर्भागावशेषं तोयं ग्राह्यम् । सदशमूलजलमिति । एतदपि तैलाढकविशेषणम् । तेन दशमूलस्य पलशतमुदकद्रोणे क्वथितं चतुर्भागावशेषं दशमूलजलं क्वाथं पृथग्गुडूच्यादिभिः पक्वं जनानां प्राणिनामेतत् पवनामयघ्नं वातविकारघ्नं भिषग्भिरुदितं कथितम् । इत्याभिरर्द्धपलभागविभाजिताभिर्लामज्जादिभिः

कल्कीकृताभिः । लामज्जमुशीरभेदः । सर्जरसो राला । फलिनी प्रियङ्गुः । नागकुसुमं नागकेसरम् । कुटिलं तगरं । वाट्यालकं बला । द्विपबला नागबला । मिशिः शतपुष्पा । वाजिगन्धा अश्वगन्धा । गन्धर्वहस्तः एरण्डः । वरी शतावरी । सारिवा उत्पलसारिवा । युक्पर्णिनी शालिपर्णी, पृश्निपर्णी । मधुरभेषजानि काकोल्यादीनि पूर्वोक्तानि । शेषाणि प्रसिद्धानि । अमूनि पञ्चतैलानि यानि मृदूनि सुकुमाराणि मया अत्र कथितानि तानि पवनामयनाशनानि भवन्ति । तानि भूमिभुजां राज्ञां सेव्यानि भवन्ति । किमर्थं ? दुर्बलवपुर्बलवर्द्धनाय योषिद्गमाय च स्त्रीरत्यर्थम् । भुवि पृथिव्यां । स्त्रीणां च गर्भिणीनां उद्गाढगात्रगुरुगर्भभरालसानामिति सुखप्रसवनाय सेव्यानि भवन्तीति । प्रमदाजनानां च वपुषि मार्दवाय च मृदुकरणार्थं सेव्यानि भवन्ति । शिशोश्च दन्तोद्गमेषु सत्सु दशनोद्गमाय दन्तोद्गमनार्थं सेव्यानि भवन्तीति ॥ ३४१-३४६ ॥

गुडूचीतैल—तिलतैल २ आढक । क्वाथार्थ—गिलोय १०० पल; जल २ द्रोण, अवशिष्ट क्वाथ आधा द्रोण । जौ, बेर तथा कुलथी; मिलित १०० पल, जल २ द्रोण, अवशिष्ट क्वाथ आधा द्रोण । दशमूल ( मिलित ) १०० पल, जल २ द्रोण, अवशिष्ट क्वाथ आधा द्रोण । दूध ८ आढक ( ३२ प्रस्थ ) । कल्कार्थ—लामज्ज ( उशीर भेद, खवी ), राल, चोरक, लालचन्दन, छोटी इलायची, शैलेय ( सहचर, कटसरैया ), गन्धबाला, वच, प्रियंगु, मुरामांसी, दारचीनी, तेजपत्र, नागकेसर, अगर, देवदारु, जटामांसी, मञ्जिष्ठा, तगर, कुष्ठ, रेणुका, बला, नागबला, सोये, असगन्ध, एरण्डमूल, कौंछ की जड़, पुनर्नवा, रास्ना, शतावर, सरलकाष्ठ, सैन्धानमक, अनन्तमूल, शालिपर्णी, पृश्निपर्णी तथा काकोल्यादिगण; प्रत्येक आधापल (४ तोले) । यह तैल वातघ्न है । यदि उपर्युक्त तैल में गुडूची क्वाथ की जगह १०० पल प्रसारणी के क्वाथ से पाक किया जाय तो प्रसारणी तैल, यदि १०० पल रास्ना के क्वाथ से पाक किया जाय तो रास्ना तैल, यदि १०० पल सहचर ( कटसरैया ) के क्वाथ से पाक किया जाय तो सहचर तैल, एवं यदि १०० पल बलामूल के क्वाथ से पाक किया जाय तो बलातैल कहलाता है । ये पांचों तैल मृदु तथा वातरोगनाशक हैं । इनके मर्दन से दुर्बल शरीर बलयुक्त होता है, रतिशक्ति बढ़ती है । गर्भिणी स्त्रियों को प्रसूति काल में प्रसव सुखपूर्वक होता है । स्त्रियों को त्वचा की मृदुता के लिये इस तैल का शरीर पर मर्दन करना चाहिये । शिशुओं को दन्तोद्गम काल में अर्थात् दांत निकलने के समय इसका प्रयोग कराना चाहिये । इसके प्रयोग से दांत शीघ्र निकल आते हैं ॥ ३४१—३४६ ॥

अधुना दशाङ्गतैलमाह—

सहाचरबलात्रयत्रिकटवाजिगन्धावरी-
सरण्युरुबुकुण्डलीर्दशपला जलस्यार्मणे ।
विपाच्य चरणस्थिते पयसि भेषजानां जले
दधीक्षुरसमस्तुभिर्जतुरसेन शुक्तेन च ॥ ३४७ ॥
नलदफलिनीरुक्मञ्जिष्ठातुरुष्कसुरद्रुमै-
रगुरुतगरत्वक्पत्रैलालवङ्गहरेणुभिः ।
सनखसरलोशीरोदीच्यैः सचन्दनचोरकैः
सकरिकुसुमैः पक्वं तैलं दशाङ्गमिति स्मृतम् ॥३४८॥
दशाङ्गोक्तक्राथैर्दशभिरपि तैलानि विधिवत्
सकल्कैः सक्षीरैः पृथगथ दशैतानि विपचेत् ।
मरुद्व्याधिघ्नानि स्थविरनृपतिस्त्रीशिशुकृश-
क्षतक्षीणोरस्कैर्नृभिरपि च सेव्यानि सुखिभिः ॥ ३४९ ॥

सहाचरः कटशाल्लियाकः। बलात्रयं बला अतिबला नागबला च। त्रिकटको गोक्षुरकः। वाजिगन्धा अश्वगन्धा। वरी शतावरी। सरणी प्रसारणी। उरुबुक एरण्डः। कुण्डली गुडूची। सहाचरादीनि पृथक् दशपलिकानि जलस्योदकस्यार्मणे द्रोणे विपाच्यन्ते। ततो भेषजानां सहचरादीनां जले क्वाथे चरणस्थिते पादस्थिते पयसि च क्षीरे तैलसमे दधीक्षुरसमस्तुभिश्च पृथक्तैलसमैः। जतु लाक्षा तस्याश्च रसेन क्वाथेन, शुक्तेन चुक्रेण तैलसमेन नलदादिभिश्च कल्कैः पक्वं तैलं दशाङ्गमिति स्मृतं कथितं पूर्वाचार्यैः। नलदं मांसी। फलिनी प्रियङ्गुः। रुक् कुष्ठम्। मञ्जिष्ठा रक्ता। तुरुष्कं सिह्लकम्। सुरद्रुमो देवदारु। उदीच्यं बालकम्। अम्भोदो मुस्ता। चन्दनं रक्तचन्दनम्। चोरकं ग्रन्थिपर्णानुकारि। करिकुसुमं नागकेसरम्। शेषाणि प्रसिद्धानि। एभिरेव दशाङ्गोक्तक्वाथैर्दशभिरपि पृथगेकैकेन नलदादिभिश्च कल्कैः क्षीरेण विधिवत् पाकविधिना विपाचयेत्। तानि च दश तैलानि भवन्ति। मरुद्वातस्तेन व्याधयोऽपतानकादयः, तान् घ्नन्तीति मरुद्व्याधिघ्नानि। स्थवि-

रादिभिः नृभिः प्राणिभिः सेव्यानि। स्थविरो वृद्धः। सुखिभिः सुखार्थिभिरिति ॥ ३४७—३४९ ॥

दशांगतैल—तिलतैल २ प्रस्थ। क्वाथार्थ—सहाचर ( कटसरैया ), बला ( खरैंटी ), अतिबला ( कंघी ), नागबला ( गंगेरन ), गोखरू, असगन्ध, शतावर, प्रसारणी, एरण्डमूल, गिलोय; प्रत्येक १० पल ( १ सेर ), जल २ द्रोण, अवशिष्ट क्वाथ आधा द्रोण ( ८ प्रस्थ )। दूध २ प्रस्थ। दही २ प्रस्थ। गन्ने का रस २ प्रस्थ। मस्तु ( दही का पानी ) २ प्रस्थ। लाक्षारस २ प्रस्थ। शुक्त ( आयुर्वेदोक्त विधि से प्रस्तुत सिरका ) २ प्रस्थ। कल्कार्थ—जटामांसी, प्रियंगु, कुठ, मंजिष्ठा, तुरुष्क ( शिह्लक, शिलारस ), देवदारू, अगर, तगर, दारचीनी, तेजपत्र, छोटी इलायची, लौंग, रेणुका, नखी, सरलकाष्ठ, खस, गन्धबाला, लालचन्दन, चोरक, नागकेसर; मिलित ८ पल। यथाविधि पाक करें। इस साधित तैल को दशांगतैल कहते है। इस दशांगतैल में क्वाथार्थ कहे हुए दस द्रव्यों के पृथक् २ चौगुने क्वाथों से, दूध से तथा जटामांसी आदि के कल्क से यथाविधि पृथक् २ दस तैल साधित कर सकते हैं। इन दस तैलों के कल्कद्रव्य एक ही हैं। ये सब तैल वातव्याधियों को नष्ट करते हैं। वृद्ध, राजा, स्त्री, शिशु, दुर्बल, क्षतोरस्क ( उरःक्षत से पीडित ) तथा क्षीणोरस्क पुरुषों को स्वास्थ्य की इच्छा करते हुए इस तैल का प्रयोग करना चाहिये ॥ ३४७—३४९ ॥

अधुना मध्यमं प्रसारणीतैलमाह—

प्रसारणीशतमुदकार्मणे पचेत् बलाशतार्द्धमपि सहाश्वगन्धया।
वरीशटीशिखिदशमूलकुण्डलीपुनर्नवामिसिमदनैः पलोनकैः॥३५०॥

नतनखशिखिरास्नारुक्प्रियङ्गुग्रगन्धा-
लवणबिडगुडूचीपिप्पलीरेणुकाभिः।
समिशिमधुकमांसीक्षारविश्वौषधीभिः
कुटजफलयुताभिर्मुष्टिमात्राभिराभिः॥ ३५१ ॥

सृतमिह सरणीजले सदुग्धं
सतुषजलं बलकारि तैलमेतत्।
नृपतिवरविलासिनीजनान्तः
पुरसुखकामिषु सौकुमार्य्यकारी ॥ ३५२ ॥

इदमतिमृदुकुब्जखञ्जपङ्गुप्रभृतिषु चाप्यपतानकार्दितेषु।
प्रतिदिनमुपयुज्यते कृशाङ्गैर्वपुषि समीरणसङ्कुचाङ्घ्रिरङ्गैः॥ ३५३ ॥

**इदं यतः पवनबलेन संकुचत्प्रसारयत्यतिकृशमङ्गमङ्गिनः।**
**अतः सदा चरकपरादिभिः प्रसारणीश्रृतमिति तैलमर्चितम्॥३५४॥**

अधुना मध्यमं प्रसारिणीतैलमाह—प्रसारिणीशत इति। अतः प्रसारणीशतं बला शतार्द्धमपि। अश्वगन्धादिभिः पलीनकैः। सह उदकार्मणेऽपां द्रोणे विपचेत् तावत् यावत् चतुर्भागशेषस्थितमाढकं भवति। अश्वगन्धा वाजिगन्धा। वरी शतावरी। शटी कर्चूरः। शिखिः चित्रकः। दशमूलं प्रसिद्धम्। कुण्डली गुडूची। पुनर्नवा वर्षाभूः। मिशिः शतपुष्पा। मदनं राठफलम्। इह सरणी जले क्वाथे तैलाढकं सदुग्धं दुग्धाढकसमेतं सतुषजलं सह तुषजलेन, काञ्जिकाढकेन नतादिभिः कल्कैर्मुष्टिमात्राभिः द्विपलप्रमाणाभिः श्रृतं पक्वं तैलमेतद्बलकारि भवति। नतं तगरम्। नखं व्याघ्रनखम्। शिखिः चित्रकः। रास्ना श्रेयसी। रुक् कुष्ठम्। प्रियङ्गुः फलिनी। उग्रगन्धा बचा। लवणं सैन्धवम्। बिडं कृतकम्। गुडूची छिन्ना। पिप्पली कृष्णा। रेणुका प्रसिद्धा। मिशिः शतपुष्पा। मधुकं यष्टीमधु। मांसी जटिला। क्षारो यवक्षारः। विश्वौषधं शुण्ठी। कुटजफलं इन्द्रयवाः। नृपत्यादिषु सौकुमार्यकारि। इदं तैलमतिमृदु कुब्जादिभिः प्रतिदिनमुपयुज्यते पानादिभिः। कृशाङ्गैर्वपुषि समीरणो वायुः तेन संकुचद्भिरङ्गैर्वपुषि शरीरे उपयुज्यते इति सम्बन्धः। इदं तैलं यतो यस्मादङ्गिनः शरीरिणः अङ्गं पवनबलेन संकुचत् प्रसारयति अतिकृशमतिदुर्बलमपि। अतोऽस्मात्कारणात् सदा सर्वकालं चरकपराशरादिभिराचार्यैः प्रसारणीश्रृतं तैलमर्चितं पूजितं भवति॥ ३५०—३५४॥

मध्यमप्रसारणीतैल—तिलतैल २ आढक। क्वाथार्थ—प्रसारणी १०० पल, पाकार्थ जल २ द्रोण, अवशिष्ट क्वाथ आधा द्रोण (२ आढक)। बलामूल ५० पल, असगन्ध, शतावर, कचूर, चित्रक, दशमूल (पृथक्), गिलोय, पुनर्नवा, सोये, मदनफल; प्रत्येक १ पल, जल २ द्रोण, अवशिष्ट क्वाथ आधा द्रोण (२ आढक)। दूध २ आढक (८ प्रस्थ)। कांजी २ आढक। कल्कार्थ—तगर, नखी, चित्रक, रास्ना, कुठ, प्रियंगु, वच, सैन्धानमक, बिडनमक, गिलोय, पिप्पली, रेणुका, सोये, मुलहठी, जटामांसी, यवक्षार, सोंठ, इन्द्रजौ; प्रत्येक १ पल। यथाविधि साधित करें। इस तैल के मर्दन से बलवृद्धि होती है। यह सुकुमारता को बढ़ाता है। यह तैल अत्यन्त मृदु है। कुब्ज (कुबड़ा), खञ्ज (लूला), तथा पंगु (लंगड़ा)

कृश एवं वात के कारण संकुचित अंगों वाले रोगियों को इस तैल का प्रतिदिन उपयोग करना चाहिये। यह तैल यतः प्राणी के वात के कारण संकुचित होते हुए एवं अत्यन्त कृश अंग को भी प्रसृत करता है अतएव चरक, पराशर आदि मुनियों ने इसे श्रेष्ठ कहा है ॥ ३५०—३५४ ॥

इदानीं महत्प्रसारिणीतैलमाह—

साब्द्रोणद्वितयैर्बलासहचरच्छिन्नाश्वगन्धावरी-
गन्धर्वैः कपिकच्छुवारणकणायुक्पञ्चमूलीयुतैः।
इत्येभिः सरणीशतेन सहितैः छागार्धमांसेन तु-
क्वाथेऽस्मिन् दधिमस्तुकाञ्जिकयुतैस्तैलं सशुक्तं शृतम्॥३५५॥
मञ्जिष्ठाष्टकवर्गचन्दनवचामुस्ताशताह्वाकणा-
शुण्ठीसैन्धवपद्मकामयशटीलामज्जकेन्द्रद्रुमैः।
रास्नाव्याघ्रनखानलैः समधुकैः कल्कैस्त्रिकर्षान्वितै-
रेतत् सर्वमरुद्विकारशमनं प्रोक्तं विदेहादिभिः॥ ३५६ ॥

इत्येभिर्बलादिभिः प्रत्येकं द्विपलिकैः सरणी प्रसारणी तस्याः शतेन छागार्द्धमांसेन च पञ्चाशत्प्रमाणेन सहितैः साब्द्रोणद्वितयैरित्युदकद्रोणद्वितयेन क्वथितैः। पादावशेषे तस्मिन्क्वाथे तैलाढकं दधिमस्तुकाञ्जिकचुक्राणां प्रत्येकस्याढकेन युतम्। मञ्जिष्ठादिभिः कल्कैः त्रिकर्षोन्मितैः शृतमेतत्तैलं सर्वमरुद्विकारशमनाय अशीतिवातविकारशमनार्थमुक्तम्। विदेहादिभिर्विदेहचक्षुष्येणादिभिर्मुनिभिरिति। बला वाट्यालकम्। सहचरं कुरण्टकः। छिन्ना गुडूची। अश्वगन्धा बल्या। वरी शतावरी। गन्धर्व एरण्डः। कपिकच्छुः आत्मगुप्ता। वारणकणा हस्तिपिप्पली। युक्पञ्चमूली दशमूली। सरणी प्रसारणी। मञ्जिष्ठा योजनवल्ली। अष्टकवर्गः पूर्वोक्तः। चन्दनं रक्तचन्दनम्। वचा लोमशा। मुस्ता गांगेयी। शताह्वा शतपुष्पा। कणा मगधा। शुण्ठी विश्वम्। सैन्धवं लवणोत्तमम्। पद्मकं शीतवीर्यम्। आमयः कुष्ठम्। शटी पलाशा। लामज्जकं उशीरभेदः। इन्द्रद्रुमैः कुटजैः। रास्ना सुरभी। व्याघ्रनखं व्याघ्रायुधम्। अनलं चित्रकम्। मधुकं यष्टीमधुकमिति॥ ३५५—३५६ ॥

महाप्रसारणीतैल—तिलतैल २ आढक। क्वाथार्थ—बलामूल, सहचर, गिलोय, असगन्ध, शतावर, एरण्डमूल, कौंछ की जड़, गजपिप्पली, दशमूल; प्रत्येक २ पल

प्रसारणी १०० पल, जल २ द्रोण, अवशिष्ट क्वाथ आधा द्रोण (२ आढक)। बकरे का मांस ५० पल, जल २ द्रोण, अवशिष्ट क्वाथ आधा द्रोण। दधिमस्तु २ आढक। कांजी २ आढक। शुक्त २ आढक। कल्कार्थ—मञ्जिष्ठा, अष्टवर्ग (काकोली, क्षीरकाकोली, मेदा, महामेदा, जीवक, ऋषभक, ऋद्धि, वृद्धि), चन्दन, वच, मोथा, सोये, पिप्पली, सोंठ, सैन्धानमक, पद्माख; कुठ, कचूर, लामज्जक, इन्द्रजौ, रास्ना, नखी, चित्रक, मुलहठी; प्रत्येक ३ कर्ष। यथाविधि तैल पाक करें। यह तैल सम्पूर्ण वातरोगों को नष्ट करता है ऐसा विदेह आदि आचार्यों ने कहा है॥ ३५५—३५६॥

साम्प्रतं लघुप्रसारणीतैलमाह—

तैलं शृतं ससरणीदशमूलमांस-
क्वाथं सशुक्तदधिकाञ्जिकमीरणघ्नम्।
सक्षारगोक्षुरुकणाशिखिविश्वरास्ना-
रुग्दारुरेणुकुटिलाष्टकवर्गगर्भम्॥ ३५७॥

सरणी च दशमूलं च सरणीदशमूले। सह सरणीदशमूलाभ्यां वर्तत्त इति ससरणीदशमूलं तच्च तन्मासं च स सरणीदशमूलमांसम्। तस्य क्वाथे। एतदुक्तं भवतीति—प्रसारणीदशमूलमांसानां शतमुदकद्रोणे निःक्वाथ्य चतुर्भागावशेषे क्वाथे। सशुक्तदधिकाञ्जिकं शुक्तदधिकाञ्जिकानां प्रत्येकमाढकं तेन समेतम् क्षारादिभिश्च पलिकैर्गर्भे कल्कं कृत्वा तैलाढकं शृतं पक्वं समीरणघ्नं भवति। क्षारो यवक्षारः। गोक्षुरुः त्रिकण्टकः। कणा पिप्पली। शिखी चित्रकः। विश्वं शुण्ठी। रास्ना सुरभी। रुक् कुष्ठम्। दारु देवदारु। रेणुः रेणुका। कुटिलं तगरम्। अष्टकवर्गः प्रोक्तः॥ ३५७॥

लघुप्रसारिणीतैल—तिलतैल २ आढक। क्वाथार्थ—प्रसारणी, दशमूल तथा बकरे का मांस; मिलित १०० पल, जल २ द्रोण; अवशिष्ट क्वाथ आधा द्रोण (२ आढक)। शुक्त २ आढक। दही २ आढक। कांजी २ आढक। कल्कार्थ—यवक्षार, गोखरू, पिप्पली, चित्रक, सोंठ, रास्ना, कुष्ठ, देवदारू, रेणुका, तगर, अष्टवर्ग; प्रत्येक १ पल। यथाविधि पाक करें। यह तैल वातनाशक है॥ ३५७॥

अधुना गुडूचीतैलमाह—

त्रुटिकुटिललवङ्गत्वक्प्रियंगूग्रगन्धा
सरलदलशताह्वारुक्तुरुष्काहिपुष्पैः।

सनखनलदकौन्तीकुण्डलीक्काथदुग्धैः
भृतमनिलगदघ्नं तैलमश्विप्रणीतम् ॥ ३५८ ॥

त्रुट्यादिभिः कौन्तीपर्यन्तैः पलिकैः कल्कैः। कुण्डली गुडूची। तत् क्काथदुग्धाभ्यां प्रत्येकाढकसमेतं तैलाढकमनिलगदघ्नं भवति। अनिलो वायुस्तेन गदा अपतानकादयः तान् हन्तीति। एतच्च गुडूचीतैलं अश्विप्रणीतम् अश्विनीकुमाराभ्यां प्रणीतमिति। त्रुटिरेला। कुटिलं तगरम्। लवङ्गं देवपुष्पम्। त्वक् वराङ्गम्। प्रियङ्गुः फलिनी। उग्रगन्धा वचा। सरलं देवदारुविशेषः। दलं तमालपत्रम्। शताह्वा शतपुष्पा। रुक् कुष्ठम्। तुरुष्कं सिह्लकम्। अहिपुष्पं नागकेसरम्। नखं व्याघ्रनखम्। नलदं मांसी। कौन्ती रेणुका। एतच्च गुडूचीतैलं अश्विनीकुमाराभ्यां प्रणीतमिति ॥ ३५८ ॥

गुडूचीतैल—तिलतैल २ आढक। गिलोय का क्काथ २ आढक। दूध २ आढक। कल्कार्थ—छोटीइलायची, तगर लौंग, दारचीनी, प्रियंगु, वचा, सरलकाष्ठ; तेजपत्र, सोये, कुष्ठ, शिह्लक, नागकेसर, नखी, जटामांसी, रेणुका; प्रत्येक १ पल। यथाविधि साधित करें। अश्विनीकुमारों द्वारा निर्मित यह तैल वातनाशक है॥३५८॥

इदानीमतिसुगन्धगर्भं च बलातैलमाह—

तगरागुरुकुङ्कुमकुन्दुरुभिः सलवङ्गवराङ्गकुरङ्गमदैः।
सरलामरदारुदलद्रविडीनखकेसररुक्फलिनीनलदैः ॥ ३५९ ॥
सतुरुष्कहरेणुबलाक्कथनैरिति तैलमिदं पयसा विपचेत्।
नृपतिप्रमदाशिशुभिः स्थविरैरुपयोज्यमिदं पवनापहरम् ॥३६०॥

इत्येभिस्तगरादिभिर्हरेणुपर्यन्तैः पलिकैः कल्कैः बलाक्काथेन चतुर्गुणेन, दुग्धेन पयसा च चतुर्गुणेन तैलाढकं विपचेत्। तगरं कुटिलम्। अगुरु लोहम्। कुङ्कुमं रुधिरम्। कुन्दुरुः सल्लकी गोपुरः। लवङ्गं देवकुसुमम्। वराङ्गं त्वक्। कुरङ्गमदः कस्तूरिका। सरलं मारीचपत्रकम्। अमरदारु देवदारु। दलं पत्रकम्। द्रविडी एला। नखं व्यालायुधम्। केसरं अहिकुसुमम्। रुक् कुष्ठम्। फलिनी पर्णभेदिनी। नलदं मांसी। तुरुष्कं सिह्लकम्। हरेणुः रेणुका। इदं च तैलं नृपत्यादिभिरुपयोज्यम्। उपयुक्तं तत्पवनापहं वातविकारापहं भवतीति ॥

सुगन्धित बलातैल—तिलतैल २ आढक । बलामूल का क्वाथ ८ आढक । दूध ८ आढक । कल्कार्थ—तगर, अगर, केसर, कुन्दुरु ( शल्लकीनिर्यास ), लौंग, दारचीनी, कस्तूरी, सरलकाष्ठ, देवदारु, तेजपत्र, छोटी इलायची, नखी, नागकेसर, कुष्ठ, प्रियंगु, जटामांसी, सिह्लक, रेणुका; प्रत्येक १ पल । यथाविधि पाक करें । इस वातनाशक तैल का; राजा, स्त्री शिशु तथा वृद्ध; प्रत्येक को प्रयोग करना चाहिये ॥ ३५९-३६० ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*वातरोगचिकित्सा समाप्ता ।*

——:o:——

पूर्वमुक्तं वल्मीकादिनां क्षारादिपतनं वैद्या वदन्ति स च क्षारः कथं साध्यत इत्याह—

द्रोणं पलाशकदलीखरमञ्जरीणां
क्षारस्य षड्भिरहिमैरुदकार्मणैस्तु ।
तावत् पचेत् भवति भस्मजलं हि यावत्
तत्पिच्छमच्छमरुणं परिगृह्य यत्नात् ॥ ३६१ ॥
क्षौमेण कम्बलिकया पटशाटकैर्वा
मूत्रावलोडितमथ स्रुतमम्बरेण ।
तप्तस्य शङ्खशकलस्य पलान्यथाष्टौ
क्षिप्त्वात्र भस्म पयसि प्रतिपिष्टकल्कैः ॥ ३६२ ॥
दन्तीद्रवन्त्यतिविषाविडतालमूली-
वच्याकरञ्जदलरामठकाञ्चनीभिः ।
सस्वर्जिकाज्वलनलाङ्गलिकाह्वमूलै-
र्द्रम्मार्द्धतौल्यकमितैरिति सार्द्धमेभिः ॥ ३६३ ॥
संसाध्यते तु भिषजा स तथा विपक्वः
क्षारो यथा भवति नैव तनुर्न सान्द्रः ।

तेनैव साध्यविधिना न पुनर्भवन्ति
दग्धा रुजो नृषु नगा इव वज्रदग्धाः ॥ ३६४ ॥

पलाशकदलीखरमञ्जरीणाम् ( खरमञ्जरी अपामार्गः ) क्षारस्य द्रोणमुदकार्मणैः सलिलद्रोणैः षड्भिः आहिमैरुष्णैरालोड्य तावत्पचेत् यावद्भस्मजलं पिच्छिलं विज्जलं अच्छं स्वच्छं अरुणं लोहितं भवति। ततो यत्नात्परिगृह्य क्षौमेण क्षौमिकया कम्बलिकया वा पटाशाटकास्तैर्वा स्रुतमेकविंशतिवारान् । अथवा गोमूत्रावलोडितक्षारमम्बरेण वस्त्रेण स्रुतमेकविंशतिवारान् एवं क्रियते । शंखशकलस्य शंखनाभेः खण्डस्य तप्तस्याग्निवर्णस्य पलान्यष्टौ क्षिप्त्वा अत्र भस्मपयसि अस्मिन्क्षारोदके प्रस्थप्रमाणे । कथमेतदवसीयते—इति चेत् तन्त्रान्तरप्रत्ययात् । तथा च विश्वामित्रः—"क्षारोदकचतुर्भागं कल्कमेषां प्रदापयेत् । द्रव्याणां श्लक्ष्णपिष्टानां मुष्टिमात्रं निधापयेत् । एषां इति शङ्खादीनां द्रव्याणां परामर्शः। दन्त्यादीनामिति शुक्तिमानमिति । दन्त्यादिभिर्द्रम्मार्द्धतौल्यकमितैः प्रतिपिष्टकल्कैरेभिः सार्द्धं सह । द्रम्मार्द्धमात्रं शुक्तिरर्द्धपलं वेति भवति । दन्ती निकुम्भः। द्रवन्ती तद्भेदः चीरितपत्रा। अतिविषा प्रसिद्धा। बिडं बिडलवणम् । तालमूली मूसली। वच्या वचा । करञ्जदलं करञ्जदलानि । रामठं हिङ्गु । काञ्चनी स्वर्णक्षीरी। स्वर्जिका स्वर्जिकाक्षारः । ज्वलनश्चित्रकः। लाङ्गलिकाह्वा लाङ्गलिकेति लोके विख्याता । भिषजा वैद्येन तथा संसाध्यते यथा विपक्वः क्षारो नैव तनुर्द्रवो नातिसान्द्रो भवति। अनेन क्षारेण पूर्वोक्तेन प्रकारेण साध्यविधिर्यस्यासौ साध्यविधिस्तेन दग्धा रुजो वल्मीकादयो नृषु प्राणिषु पुनर्न भवन्ति। क इव? नगा इव। यथा नगा वृक्षाः वज्रदग्धा न पुनः प्ररोहन्ति। तद्वदेता अपि रुजो न भवन्तीति ॥ ३६१—३६४ ॥

इति तीसटसुत चन्द्रटविरचितायां चिकित्साकलिकाटीकायां
तृतीयं शल्यतन्त्रं समाप्तम् ।

पलाश ( ढाक ), कदलीकाण्ड ( केला ), अपामार्ग, इनमें से किसी एक की १ द्रोण भस्म में १२ द्रोण जल डालकर पकावें। पकाते २ जब भस्मजल पिच्छिल, स्वच्छ तथा रक्तवर्ण का होजाय तब क्षौम, कम्बल, आदि से छान लें और वस्त्र में अवशिष्ट द्रव्य को फैंक दें। अथवा जल की जगह गोमूत्र में भी अवलोडित कर

सकते हैं। पश्चात् ४ द्रोण परिस्रुत भस्म जल में आठपल शंख के टुकडों को गरम कर तब तक बुझावें जबतक सूक्ष्मचूर्ण न होजाय। तदनन्तर दन्ती, द्रवन्ती (बडी दन्ती), अतीस, बिडनमक, मूसली, वच, वृक्षकरञ्ज के पत्ते, हींग, काञ्चनी ( सत्यानासी ) सर्जिक्षार, चित्रकमूल, लांगली ( कलिहारी ); प्रत्येक के आधा पल चूर्ण का आवाप करें। इस क्षारोदक को इस प्रकार सिद्ध करना चाहिये जिससे वह विपक्व होकर न पतला रहे और न गाढा होजाय। इस प्रकार सिद्ध हुए क्षार द्वारा दग्ध अर्श प्रभृति पुनः उत्पन्न नहीं होते जैसे वज्र से दग्ध हुए वृक्ष पुनः पैदा नहीं होते। यह तीक्ष्ण क्षार है। यदि केवल शंख का प्रतिवाप हो और उसके पश्चात् दन्ती आदि को न डालकर पका लिया जाय तो मध्यम क्षार होता है और यदि शंख को भी न डालें, केवल क्षारजल को पकालें तो मृदुक्षार बनता है। रोगी की व्याधि, बल, देश, आयु तथा काल आदि का विचार करके यथाविधान क्षार का प्रयोग करना चाहिये ॥ ३६१-३६४ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*
*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*
*शल्यतन्त्रं समाप्तम्।*

——:o:——

# अथ भूतविद्या।

शल्यतन्त्रानन्तरं यथोद्देशं भूतविद्यारम्भः। भूतविद्येति कोऽर्थः? उच्यते—भूतावेशनिराकरणार्थं विद्या भूतविद्या। भूतानि देवग्रहादयः। तथा च सुश्रुतः—भूतविद्या नाम देवासुरगन्धर्वयक्षरक्षःपितृपिशाचनागग्रहाद्युपसृष्टचेतसां शान्तिकर्मबलिग्रहणादिग्रहोपशमनार्थमिति। तेषां च देवग्रहादीनां सिद्धार्थककल्याणकघृतादीनि प्रत्यनीकानीति कृत्वा सिद्धार्थकघृतमाह—

**सिद्धार्थत्रिकटुक्षपायुगवचामञ्जिष्ठिकारामठ-**
**श्वेताह्वात्रिफलाकरञ्जकटभीश्यामाशिरीषामरैः।**
**इत्यष्टादशभिः श्रृतं घृतमिदं गोमूत्रयुक्तं नृणा-**
**मुन्मादघ्नमपस्मृतिघ्नमगदं स्याद्बस्तमूत्रेण वा ॥ ३६५ ॥**

इत्यष्टादशभिः सिद्धार्थकादिभिर्द्रव्यैः कार्षिकैर्घृतप्रस्थं श्रृतं पक्वं गोमूत्रयुक्तं चतुर्गुणगोमूत्रसहितं नृणां प्राणिनां उन्मादघ्नं अपस्मृतिर-

पस्मारः तं हन्तीति अपस्मृतिघ्नं स्यात् भवेत्। सिद्धार्थकाः सर्षपाः । त्रिकटु व्योषम् । क्षपा हरिद्रा तस्या युगं हरिद्राद्वयम्। एतेन हरिद्रा-दारुहरिद्रे। वचा उग्रा। माञ्जिष्ठिका रक्ता। रामठं हिंगु। श्वेताह्वं श्वेतस्यन्दा। त्रिफला पूर्वोक्ता । करञ्जं वृक्षकरञ्जबीजानि। कटभी शालिपर्णी । श्यामा प्रियंगुः। शिरीषः सरसः। अमरं देवदारु। वा शब्दो योगान्तरं कथयति। बस्तमूत्रेण वा पिष्ट्वा पीतोऽगदः उन्मादघ्नमपस्मृतिघ्नमिति । बस्तः छागः। नास्मिन् गदो विद्यत इत्यगद इति ॥ ३६५ ॥

सिद्धार्थक घृत—गव्यघृत २ प्रस्थ। गोमूत्र ८ प्रस्थ । कल्कार्थ—श्वेतसरसों, त्रिकटु, हल्दी, दारहल्दी, वच, मञ्जिष्ठा, हींग, श्वेत अपराजिता, त्रिफला, वृक्ष करञ्ज के बीज, शालिपर्णी, प्रियङ्गु, सिरस के बीज, देवदारु; प्रत्येक १ कर्ष (२ तोले)। यथाविधि पाक करें। यह घृत पान तथा नस्य द्वारा उन्माद तथा अपस्मार को नष्ट करता है। वृद्ध वाग्भट में कल्क द्रव्यों में निम्बपत्र का पाठ अधिक है। इन्हीं कल्कोक्त द्रव्यों के चूर्ण को बकरी के मूत्र में पीसकर पान, नस्य, अञ्जन, लेप, स्नान तथा घर्षण द्वारा प्रयोग कराने से उन्माद; अपस्मार आदि रोग तथा अन्य भूतावेश जनित उपद्रव नष्ट होते हैं॥ ३६५॥

सिद्धार्थकघृतानन्तरं कल्याणकघृतमाह—

तालीसत्रिफलैलवालुफलिनीसौम्यापृथक्पर्णिनी-
दन्तीदाडिमदारुचन्दननिशादार्वीविशालोत्पलैः ।
जातीपुष्पहरेणुपद्मकयुतैर्जन्तुघ्नमाञ्जिष्ठिका-
रुक्सिंहीत्रुटिसारिवाद्वयनतैर्नागेन्द्रपुष्पान्वितैः ॥ ३६६ ॥
अष्टाविंशतिभिश्चतुर्गुणजलं कल्याणमेभिः शृतं
हन्त्येतत्त्रिचतुर्थकं ज्वरमुरःकम्पं सवन्ध्यामयम् ।
सापस्मारगरोदराः सपवनोन्मादाः सजीर्णज्वराः
जायन्ते न पुनः कृतेन हविषा कल्याणकेनामुना ॥३६७॥

एभिरष्टाविंशतिभिः कार्षिकैस्तालीसादिभिर्घृतप्रस्थं चतुर्गुणजलं शृतं एतत् त्रिचतुर्थकादीन् हन्ति । तालीसं तालीसपत्रम् । त्रिफला पूर्वोक्ता। एलवालुकं प्रसिद्धम् । फलिनी प्रियंगुः । सौम्या शालिपर्णी। पृथक्पर्णिनी पृश्निपर्णी। दन्ती निकुम्भः। दाडिमं दाडिमसारः। दारु देवदारु। चन्दनं रक्तचन्दनम्। निशा हरिद्रा। दार्वी दारु-

हरिद्रा । विशाला इन्द्रवारुणी । उत्पलं नीलोत्पलम् । जातीपुष्पं मालतीकुसुमम्। हरेणुः रेणुका। पद्मकं शीतवीर्यम् । जन्तुघ्नं विडङ्गम्। मञ्जिष्ठिका रक्ता। रुक् कुष्ठम्। सिंही बृहती। त्रुटिः एला। सारिवाद्वयं सारिवोत्पलसारिवे। नतं तगरम्। नागेन्द्रपुष्पं नागकेसरम् । अमुना कल्याणकेन हविषा घृतेन कृतेनोपयुक्तेन गदा अपस्मारादयो न जायन्त इति ॥ ३६६—३६७ ॥

कल्याणकघृत—घृत २ प्रस्थ । कल्कार्थ—तालीसपत्र, त्रिफला, एलवालुक, प्रियङ्गु, शालपर्णी, पृश्निपर्णी, दन्तीमूल, अनारदाना, देवदारु, लालचन्दन, हल्दी, दारहल्दी, इन्द्रायण, नीलोत्पल, चमेली के फूल, रेणुका, पद्माख, वायविडंग, मञ्जिष्ठा कुठ, बड़ी कटेरी, छोटी इलायची, अनन्तमूल, श्यामालता, तगर, नागकेसर, ये अट्ठाईस द्रव्य, प्रत्येक १ कर्ष। जल ८ प्रस्थ। यथाविधि पाक करें। इस घृत के सेवन से तृतीयकज्वर (तिजारी), चतुर्थकज्वर, उरःकम्प वन्ध्यारोग, अपस्मार, गर (कृत्रिम विष), उदररोग, वातोन्माद तथा जीर्णज्वर नष्ट होता है । मात्रा—आधा तोला ॥ ३६६—३६७ ॥

अधुना महाकल्याणकं घृतमुवाच—

कौन्तीदारुमृगादिनीविरहितैः कल्याणकोक्तौषधै-
रित्येभिस्त्रिफलैलवालुवियुतैः क्वाथीकृतैरत्र च ।
निःक्वाथे मधुरौषधैश्च विपचेत् सर्पिः सदुग्धं पृथु
स्यात्कल्याणकमेतदेव हि रुजः कल्याणकोक्ता जयेत् ॥३६८॥

इत्येभिः कल्याणकोक्तोषधैः । कौन्तीदारुमृगादनीविरहितैः कौन्त्यादिभिर्विना त्रिफलैलवालुवियुतैस्त्रिफलादिभिश्च विना। कौन्ती रेणुका। दारु देवदारु। मृगादिनी इन्द्रवारुणी। त्रिफला फलत्रिकम्। एलवालुकं प्रसिद्धम् । एभिरेतत् क्वाथं कृत्वा, अत्र च क्वाथे सर्पिः विपचेत् मधुरौषधैः कल्कीकृतैः मधुरौषधानि काकोल्यादीनि। सदुग्धं चतुर्गुणंदुग्धसंयुक्तम् । पृथु कल्याणकं महाकल्याणकं स्यात्। एतदेव हि कल्याणोक्ता रुजो विकारान् जयेदिति ॥ ३६८ ॥

महाकल्याणकघृत—गव्यघृत २ प्रस्थ । दूध ८ प्रस्थ । रेणुका, देवदारु, इन्द्रायण, त्रिफला तथा एलवालुक; इन सात द्रव्यों से रहित कल्याणकोक्त अवशिष्ट २१ द्रव्यों का क्वाथ ८ प्रस्थ। कल्कार्थ—मधुरौषध अर्थात् काकोल्यादिगण; मिलित ८ पल। यथाविधि घृतपाक करें। यह घृत कल्याणकोक्त सम्पूर्ण रोगों को नष्ट करता

है। मात्रा—आधा तोला। वृद्धवाग्भट के अनुसार गृष्टि (एकवार सूई हुई गौ) का दूध लेना चाहिये ॥ २६८ ॥

इदानीं फलघृतमाह—

काकोलीद्वयजीवकैः सवृषभैर्मेदाश्वगन्धासिता-
तिक्तारुक्सुरदारुहिङ्गुतगरैरेलावचाचन्दनैः।
जीवन्तीत्रिफलाजमोदरजनीदार्वीविदारीवरी-
मञ्जिष्ठाघनपद्मकैः समधुकैर्मृद्वीकया संयुतैः ॥ ३६९ ॥
एभिः क्षीरचतुर्गुणं शृतमिदं सर्पिः सदा शस्यते
बालस्य ग्रहपीडितस्य पुरुषस्याल्पस्रवद्रेतसः।
एतन्मारुतरोगिणामपि हितं पुत्रार्थिभिः स्त्रीजनै-
रुर्ध्वाधः कृतशुद्धिभिः फलघृतं संसेव्यते सर्वदा ॥ ३७० ॥

एभिः काकोल्यादिभिः कार्षिकैः घृतं प्रस्थप्रमाणं क्षीरचतुर्गुणं शृतं पक्वमिदं ग्रहपीडितस्य बालस्य, वा अल्पस्रवद्रेतसः अल्पं स्रवद्रेतो यस्य स तथा तस्य पुरुषस्य सदा शस्यते। एतच्च फलघृतं मारुतरोगिणां वातरोगिणां हितम्। स्त्रीजनैः पुत्रार्थिभिः पुत्रकामैः सर्वदा सेव्यते पानादिभिः। ऊर्ध्वाधःकृत शुद्धिभिः। ऊर्ध्वं वमनेन अधो विरेचनेन कृता शुद्धिर्यैः स्त्रीजनैः। काकोलीद्वयं काकोलीक्षीरकाकोल्यौ। जीवकवृषभकमेदाः स्वनाम्ना प्रसिद्धाः। अश्वगन्धा वाजिगन्धा। सिता शर्करा। तिक्ता कटुका। रुक् कुष्ठम्। सुरदारु देवदारु। हिङ्गु रामठम्। तगरं कुटिलम्। एला त्रुटिः। वचा उग्रगन्धा। चन्दनं रक्तचन्दनम्। जीवन्ती सुवर्णजीवन्ती। त्रिफला पूर्वोक्ता। अजमोदा स्वनाम्ना प्रसिद्धा। रजनी हरिद्रा। दार्वी दारुहरिद्रा। विदारी क्षीरविदारिका। वरी शतावरी। मञ्जिष्ठा रक्ता। घनं मुस्तम्। पद्मकं स्वनाम्ना प्रसिद्धम्। मधुकं यष्टीमधु। मृद्वीका द्राक्षा इति ॥ ३६९—३७० ॥

फलघृतः—गव्यघृत २ प्रस्थ। दूध ८ प्रस्थ। कल्कार्थ—कालोली, क्षीरकाकोली, जीवक, ऋषभक, मेदा, असगन्ध, खांड, कुटकी, कुठ, देवदारु, हींग, तगर, छोटी इलायची, वच, लाल चन्दन, जीवन्ती, त्रिफला, अजमोदा,

हल्दी, हारहल्दी, विदारीकन्द, शतावर, मञ्जिष्ठा, मोथा, पद्माख, मुलहठी, किशमिश; प्रत्येक १ कर्ष। वीर्याधानार्थ जल ८ प्रस्थ। यथाविधि पाक करें। यह घृत ग्रहपीडित बालकों, क्षीणवीर्य पुरुषों तथा वातरोगियों के लिये अत्यन्त हितकर है। वमन एवं विरेचन आदि द्वारा कायशुद्धि करने के पश्चात् पुत्रार्थिनी स्त्रियों को सदा सेवन करना चाहिये ॥ ३६९—३७० ॥

अधुना महत्पञ्चगव्यमाह—

भार्गीफल्गुफलत्रिकद्विपकणाशम्याकशक्रद्रुम-
त्वङ्मूर्वादशमूलमोरटजटा सप्तच्छदत्वक्तुला ।
निःक्वाथ्या सलिलार्मणेन शुचिना क्वाथे च पादस्थिते
गोमूत्रेण सगोशकृद्रसदधिःक्षीरेण सर्पिः पचेत् ॥ ३७१॥
सव्योषैः सवचाविडङ्गहुतभुक्भूनिम्बतिक्तात्रिवृत्
पाठापुष्करसारिवाद्वयनिशायुग्यष्टिकायासकैः ।
पूतीकच्छदनीलिनीफलयुतैः स्यात्पञ्चगव्यं पृथु
श्वासापस्मृतिरुक्प्रमेहपिटकाजीर्णज्वरोन्मादनुत् ॥ ३७२ ॥

भार्ग्यादीनां तुलां निःक्वाथ्य सलिलार्मणेनोदकद्रोणेन । भार्गी ब्राह्मणयष्टिका। फल्गुः गोष्ठोदुम्बरिका। फलत्रिकं त्रिफला। द्विपकणा हस्तिपिप्पली । शम्याकः किरिमालकः । शक्रद्रुमः कुटजद्रुमस्तस्य त्वक् । मूर्वा चौरस्नायुः। दशमूलं पूर्वोक्तम्। मोरटजटा अपामार्गमूलम्। सप्तच्छदः सप्तपर्णः तस्य त्वक् । एषां तुला क्वाथ्या। अथानन्तरं क्वाथे पादस्थिते चतुर्थांशे सर्पिःप्रस्थं गोमयरसदधिक्षीरेण च प्रस्थं युतं। व्योषादिभिः कार्षिकैः कल्कैः पचेत्। व्योषं त्रिकटुकम्। वचा उग्रा। विडङ्गं क्रमिजित्। हुतभुक् चित्रकम्। भूनिम्बः किराततिक्तम्। तिक्ता कटुका। त्रिवृत् त्रिवृता। पाठा वृकी। पुष्करं पुष्करमूलम्। सारिवाद्वयं सारिवोत्पलसारिवे । निशायुग्मं हरिद्राद्वयम् । यष्टिका यष्टीमधु । यासको दुरालभा । पूतीकश्चिरबिल्वस्तस्यच्छदाः पत्राणि । नीलिनी नीलाञ्जनिका शारदा फलम्। पृथु पञ्चगव्यं स्यात् भवेत्। श्वासादींश्च नुदति ॥ ३७१—३७२ ॥

महत्पञ्चगव्यघृत—गव्यघृत २ प्रस्थ । क्वाथार्थ—भारंगी, कठूमरफल, त्रिफला, गजपिप्पली, अमलतास, कुटजत्वक् ( कुड़े की छाल ), मिलित १ तुला

( १० सेर ), जल २ द्रोण। अवशिष्ट क्वाथ आधा द्रोण । गोमयरस २ प्रस्थ। दही २ प्रस्थ। दूध २ प्रस्थ । कल्कार्थ—त्रिकटु, वच, वायविडंग, चित्रक, चिरायता, कुटकी, निसोत, पाढ़, पुष्करमूल, अनन्तमूल, श्यामालता, हल्दी, दारहल्दी, मुलहठी, दुरालभा, करञ्ज के पत्ते, नीली के बीज; प्रत्येक १ कर्ष। यथाविधि पाक करें। यह घृत श्वास; अपस्मार, प्रमेहपिडका, अजीर्ण, ज्वर तथा उन्माद को नष्ट करता है ॥ ३७१—३७२ ॥

साम्प्रतं मण्डूकपर्णीघृतमाह—

**सभेकपर्णीस्वरसं सरुक्वचं सशंखपुष्पीकमिदं हविः श्रृतम् ।**
**तदेतदुन्मादवताममेधसामपस्मृतौ दर्दुरपर्णिकाघृतम् ॥ ३७३ ॥**

इदं हविः श्रृतं पक्वं प्रस्थप्रमाणम्। भेकपर्णी मण्डूकपर्णी। तस्याः स्वरसेन सह रुक् कुष्ठम्। वचा उग्रा। शङ्खपुष्पी शङ्खाह्वा। कल्कपादश्रृतम्। पक्वं उन्मादवतां अमेधसां च मेधारहितानां अपस्मृतौ अपस्मारे च एतद्दर्दुरपर्णिकाघृतं विहितमिति। दर्दुरपर्णिका मण्डूकपर्णिका तया संस्कृत घृतं विहितमिति ॥ ३७३ ॥

मण्डूकपर्णीघृत—गव्यघृत २ प्रस्थ । मण्डूकपर्णी का स्वरस ८ प्रस्थ। कल्कार्थ—कुष्ठ, वचा, शंखपुष्पी ( संखाहुली ); मिलित ८ पल। यह घृत उन्माद एवं अपस्मार रोग में तथा मेधारहित पुरुष के लिये अत्यन्त श्रेष्ठ है। मात्रा ३ मासे से ६ मासे तक ॥ ३७३ ॥

इदानीं सारस्वतं घृतमाह—

**पाठावचामरिचमागधिकाभयाभिः**
**सिन्धूत्थविश्वमधुशिग्रुसमन्विताभिः ।**
**सारस्वतं घृतमजापयसा विपक्वं**
**पथ्यं भवेदवचसां जडगद्गदानाम् ॥ ३७४ ॥**

घृतप्रस्थमिति. अजाक्षीरचतुर्गुणं पाठादिभिरर्द्धपलिकैः कल्कैर्विपक्वम्। अवचसां मूकानां जडादीनां मेधारहितानां गद्गदानां स्खलितवचसां सारस्वतं घृतं पथ्यं भवेत्। पाठा वृकी। वचा उग्रा। मरिचं प्रसिद्धम्। मागधिका पिप्पली। अभया हरीतकी। सिन्धूत्थं सैन्धवम्। विश्वं शुण्ठी। मधुशिग्रुः शोभाञ्जनः ॥ ३७४ ॥

सारस्वतघृत—गव्यघृत २ प्रस्थ। बकरी का दूध ८ प्रस्थ। कल्कार्थ—पाठा, वच, काली मिर्च, पिप्पली, हरड़, सैन्धानमक, सोंठ, मधुशिग्रु, ( लाल सहिजना )

के बीज; प्रत्येक आधा पल। यथा विधि सिद्ध करें। यह घृत मूक, जड (मूर्ख, मेधारहित) तथा गद्गद पुरुषों के लिये पथ्य है। मात्रा—आधा तोला॥ ३७४॥

अधुना दशाङ्गधूपमाह—

रुक्शल्लकीगुग्गुलुचोरकोग्राप्रियङ्गुदेवद्रुमकुन्दुरूणि।
मुराह्वयं धूपवरो दशाङ्गः सौभाग्यकारी भृगुजोपदिष्टः॥३७५॥

दश अङ्गानि यस्य स दशाङ्गः। अंगान्यस्य दश द्रव्याणि रुगादीनि रुक् कुष्ठम्। शल्लकी सिलारसस्य खलः। गुग्गुलुर्महिषाख्यः। चोरकस्तस्करो ग्रन्थिपर्णानुकारी। उग्रा वचा। प्रियङ्गुः फलिनी। देवद्रुमो देवदारुः। कुन्दुरुः शल्लकीनिर्यासः। मुराह्वयं मुरामांसी। धूपवरः धूपेषु मध्ये यः वरः श्रेष्ठः। सौभाग्यं करोतीति सौभाग्यकारी। भृगुजः शुक्रस्तेनोपदिष्टः कथित इति॥ ३७५॥

दशांगधूप—कुठ, शल्लकी, गुग्गुलु, चोरक, वच, प्रियंगु; देवदारु, कुन्दुरु, मुरामांसी, धूपवर (श्रीवेष्टक, गन्दाबिरोजा), इन दस द्रव्यों का धूप सौभाग्यकर है। इस धूप का शुक्राचार्य ने उपदेश किया है॥ ३७५॥

दशाङ्गधूपानन्तरं विजयधूपमाह—

शैलेयगुग्गुदलैः समुराप्रचण्डा-
द्रव्यापहृत्सुरसकुन्दुरुभिः सकुष्ठैः।
सध्यामकैरिति सगन्धरसैश्च धूपः
सौभाग्यकृद्विजयकृच्च मतो विवादे॥ ३७६॥
देवासुरोरगपिशाचपितृग्रहेषु
गन्धर्वयक्षपिशिताशशिशुग्रहेषु।
जीर्णज्वरेषु विहितः सविषातुरेषु-
धूपोऽयमाजिविजयार्थिषु पार्थिवेषु॥ ३७७॥

एभिः शैलेयकादिभिर्विजयो नाम धूपः। सौभाग्यं करोतीति सौभाग्यकृद्भवति। विजयकृच्च विवादे झगटके विजयं करोतीति। अयं च धूपो। विदेहादिभिर्ग्रहेषु च विहितः। उरगाः सर्पाः पिशिताशा राक्षसाः। शिशुग्रहाः स्कन्दादयो बालग्रहाः। पार्थिवेषु च नृपेषु। आजौ संग्रामे विजयार्थिषु विहितः। शैलेयं शैलजम्। गुग्गुलुर्महिषाक्षः।

दलं पत्रकम्। मुरा गन्धवती। प्रचण्डा तस्करीअजमोदानुकारी। द्रव्यापहश्चोरकः। सुरसः तुलसी। कुन्दुरुः शल्लकीनिर्यासः। कुष्ठं रुक्। ध्यामकं कत्तृणमिति ॥ ३७६—३७७ ॥

इति तीसटसुत—चन्द्रटविरचितायां चिकित्साकलिकाटीकायां भूतविद्यातन्त्रं समाप्तम्।

विजयधूप—शैलेय ( छैलछरीला ), भैंसा गूगल, तेजपत्र, मुरामांसी, चण्डा, चोरक, तुलसी, कुन्दुरु, कुष्ठ, ध्यामक ( गन्धतृण ), गन्धरस ( बोल )। इनका धूप सौभाग्यकारी तथा वादविवाद में विजय का देने वाला है। यह देव, असुर, उरग ( सर्प ), पिशाच, पितृग्रह, गन्धर्व, यक्ष, पिशिताश ( राक्षस ) तथा स्कन्द आदि बालग्रहों को निवृत्त करता है यह धूप जीर्णज्वर तथा विषपीड़ितों के लिये प्रशस्त है। संग्राम में विजय चाहने वाले राजाओं को इसका धूपन करना चाहिये ॥ ३७६—३७७ ॥

## अथ कौमारतन्त्रम्।

भूतविद्यानन्तरं यथोद्देशं कौमारतन्त्रारम्भः—

कौमारभृत्यमितिकोऽर्थः ? उच्यते। कुमाराणां भृतिः कुमारभृतिः एतत्प्रधानं कौमारभृत्यम्। तथा च सुश्रुतः—'कौमारभृत्यं कौमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यसमुत्थानां च व्याधीनामुपशमार्थमिति॥ दुष्टस्तन्यरोगोपशमार्थमित्युक्तं ते च रोगा अतीसाराक्षिरोगच्छर्द्यादयः। अतस्तेषामुपशमार्थमिदमाह—

**रोध्रवारणाकणे सबालके धातकीकुसुमबिल्वसंयुते।**
**क्काथलेहविधिनाऽतिसारक बालके हिततमे समाक्षिके ॥ ३७८ ॥**

रोध्रं च वारणकणा हस्तिपिप्पली सा च रोध्रवारणकणे। सहबालकेनवर्त्तेते इति सबालके। धातकीकुसुमं च बिल्वं च धातकीकुसुमबिल्वे। ताभ्यां संयुते संयुक्ते रोध्रवारणकणे अतिसारके बालकेऽतिसारिणि शिशौ अतीसारातुरे हिततमे अतिशयेन हिते हिततमे। केन ? क्काथलेहविधिना समाक्षिके मधुसंयुक्ते। एतदुक्तं भवति एषां पञ्चानां द्रव्याणां पलं षोडशभिः सलिलपलैः क्काथं कृत्वा चतुर्थांशं शीतं मधुकर्षयुतं धात्रीकुमाराभ्यां पातव्यमिति। अयं क्काथविधिः लेहविधिश्च सर्वेषां चूर्णकर्षं मधुनावलेहयेत् द्वाभ्यामिति ॥ ३७८ ॥

अतिसार में बालकों को लोध, गजपिप्पली, गन्धबाला, धाय के फूल, बेलगिरी; इनके क्काथ में मधु का प्रक्षेप देकर पिलाना अथवा इनके चूर्ण को मधु के साथ चटाना अत्यन्त हितकर है। एक वर्ष के बच्चे के लिये चूर्ण की मात्रा—एक अथवा दो रत्ती ॥ ३७८ ॥

अधुना बालकस्य मुखपाकगुदपाकयोः प्रशमार्थमाह—

जातीप्रवालकुसुमानि समाक्षिकाणि-
योज्यानि बालकजनस्य मुखप्रपाके ।
पाके गुदस्य च रसाञ्जनमम्बुपिष्ट-
मिष्टं भिषग्भिरुपदिष्टमिदं जनानाम् ॥ ३७९ ॥

बालकस्य मुखपाके सति जातीप्रवालकुसुमानि प्रवालाः पल्लवाः कुसुमानि पुष्पाणि तानि समाक्षिकाणि योज्यानि योजनीयानि। गुदस्य च पाके सति रसाञ्जनमम्बुपिष्टं लेपे इष्टमभिप्रेतम्। भिषग्भिर्वैद्यैर्जनानां प्राणिनाम्। योगद्वयमिष्टमुपदिष्टमिति ॥ ३७९ ॥

बालकों के मुखपाक में चमेली के पत्ते तथा फूलों को पीस कर मधु मिला जिह्वा आदि पर लगाना चाहिये। तथा गुदपाक में रसौंत को जल में पीस कर लेप देना चाहिये। वैद्यों ने इन दो प्रशस्त योगों का मनुष्यों को उपदेश किया है ॥३७९॥

इदानीं छर्दिकासज्वराणां चिकित्सितमुवाच—

सातिविषा सकुलीरविषाणा मागधिका मधुना समवेता ।
छर्दिहरी कथिता त्वथ कृष्णा कासहरी ज्वरजिच्च शिशूनाम् ॥३८०॥

शिशूनां बालानां मागधिका पिप्पली सातिविषा अतिविषया सह। कुलीरविषाणा कर्कटशृङ्गी तया सह। मधुना समवेता मधुसंयुक्ता। बाले हिक्काछर्दिहरी कथिता। अथ कृष्णा पिप्पली मधुना समवेता मधुयुक्ता बाले हिक्काकासहरी ज्वरजित् च कथितेति ॥ ३८० ॥

इति तीसटसुतचन्द्रटविरचितायां चिकित्साकलिकाटीकायां कुमारभृत्यं समाप्तम् ॥

अतीस, काकड़ासिंगी, पिप्पली; उनके चूर्ण को मधु के चटाने से बालकों का छर्दिरोग ( कै ), कास ( खांसी ) तथा ज्वर नष्ट होता है। मात्रा—चौथाई रत्ती तक। इसी प्रकार पिप्पली चूर्ण कास तथा ज्वर को नष्ट करता है ॥ ३८० ॥

——:o:——

# अथ विषतन्त्रम्।

अथ कौमारभृत्यानन्तरं यथोद्देशं स्थावरजङ्गमकृत्रिमविषादीनुद्दिश्य विषतन्त्रारम्भः—

तच्च विषं स्थावरजङ्गमकृत्रिमभेदेन त्रिविधम् तस्योपशमार्थमाह—

**गोमूत्रपीता रजनीशिरीषत्वगादिभिर्वा क्कथिता प्रपीता।**
**सजङ्गमस्थावरमाशु हन्यात् विषं विषोपप्लुतमानसानाम् ॥३८१॥**

रजनी हरिद्रा। गोमूत्रेण पीता गोमूत्रपीता। स्थावरविषं हन्यात्। सजङ्गमं वा शब्दो योगान्तरकथनार्थम्। शिरीषत्वगादिभिस्त्वक्पत्रपुष्पमूलफलैः क्वथितैः क्वाथकल्पनया प्रपीता हरिद्रा सजङ्गमं स्थावरं विषं हन्यादिति। केषां? विषोपप्लुतमानसानाम्। विषेण उपप्लुतमनवस्थितं मानसं येषां ते तथा। तेषामपि ॥ ३८१ ॥

हल्दी के चूर्ण को गोमूत्र अथवा शिरीष ( सिरस ) के पञ्चांग अर्थात् छाल, पत्ते, फूल, जड़ तथा बीज, इनके क्वाथ के साथ पीने से विषके कारण विभ्रान्त चित्त वाले रोगियों का स्थावर तथा जंगम विष शीघ्र ही दूर होता है ॥ ३८१ ॥

अधुना सर्पदष्टचिकित्सितमाह—

**कपित्थकाश्मर्यशिरीषधात्रीपुष्पाणि पिष्ट्वा सलिलैरनुष्णैः।**
**पीतानि सर्पस्य विषं निहन्युर्विषं महन्मण्डलिनां च कष्टम् ॥३८२॥**

कपित्थादीनां पुष्पाणि सलिलैरनुष्णैः शृतशीतैः। पिष्ट्वा पीतानि सर्पस्य फणिनो विषं निहन्युः। मण्डलिनां च सर्पाणां विषं महत् कष्टं निहन्युरिति ॥ ३८२ ॥

कैथ, गाम्भारी; शिरीष ( सिरस ), आंवला, इन सबके फूलों को पीसकर शीतल जल के साथ पिलाने से सांप का विष यहां तक कि मण्डली सर्प का घोर विष भी नष्ट होता है ॥ ३८२ ॥

इदानीं प्राचेतसं चूर्णमाह—

**त्वक्सप्तपर्णात् कुटजात्सनिम्बादब्दामयोशीरनतानि ताप्यम्।**
**रोध्रं विदध्यान्नवमं नवाङ्गं प्राचेतसं चूर्णमुदाहरन्ति ॥ ३८३ ॥**
**लौहेऽथ हैमे त्वथ राजते वा पात्रे स्थितं सद्मनि भूपतीनाम्।**
**क्षौद्रेण लीढं सचराचराणि विषाणि हन्याद्भुवि मानुषाणाम् ॥३८४॥**

सप्तपर्णनिम्बकुटजानां त्वक् । अब्दामयोशीरनतानि । अब्दं मुस्तम्। आमयः कुष्ठम्। उशीरं वीरणमूलम् । नतं तगरम्। ताप्यं माक्षीकधातुः। रोध्रं नवमं विदध्यात्। प्राचेतसं चूर्णमिति । नवाङ्गं नवभिर्द्रव्यैः प्राचेतसं उदाहरन्ति। प्रचेता वरुणस्तेन प्रोक्तं कथितं प्राचेतसम् । भूपतीनां राज्ञां सद्मनि गृहे सदा स्थितम्। लोहपात्रे अथ हैमे सौवर्णे अथवा राजते रौप्ये। क्षौद्रेण मधुना लीढं अवलेहितम् । मानुषाणां मनुष्याणाम्। भुवि पृथिव्यां सचराचराणि जङ्गमस्थावर-विषाणि हन्यादिति ॥ ३८३—३८४ ॥

प्राचेतसचूर्ण—सतौने की छाल, कुड़े की छाल, नीम की छाल, मोथा, कुठ, खस, तगर, ताप्य ( स्वर्णमाक्षिकभस्म ), लोध इन नौ द्रव्यों के चूर्ण को समभाग में मिश्रित करें। यह प्राचेतस चूर्ण कहलाता है। इस चूर्ण को लोहपात्र में अथवा राजाओं अथवा धनिकों के घर में सुवर्णनिर्मितपात्र अथवा रजत—( चांदी ) निर्मित पात्र में रखना चाहिये। इस चूर्ण को मधु के साथ चाटने से मनुष्यों के सम्पूर्ण स्थावर एवं जंगम विष नष्ट होते हैं ॥ ३८३—३८४ ॥

साम्प्रतं सर्पमूषिकयोरुच्चाटनमाह—

**कपोतविण्मर्त्यशिरोरुहाणि सगोविषाणं शिखिपिच्छकाग्रम् ।**
**यवस्य धान्यस्य तुषाश्च वीजं कार्पासजं वा व्युषिता च माला॥३८५॥**
**इत्यौषधीभिः परिकल्पितोऽयं धूपोऽगदः स्याद्भुजगैरमुक्ते ।**
**गृहे विधेयः कुशलैरनेन नश्यन्ति सर्पाश्च तथाखवश्च ॥ ३८६ ॥**

इत्यौषधीभिः परिकल्पितः कपोतविडादिभिरयंधूपोऽगदः परिकल्पितः स्यात्। भुजगैः सर्पैरमुक्ते गृहे विधेयः। कुशलैर्वैद्यैः । अनेन धूपेन सर्पाः नश्यन्ति तथा आखवः मूषिकाश्च नश्यन्ति । कपोतविट् कपोतविष्ठा । मर्त्यशिरोरुहाणि मानुषबाला । सगोविषाणं सगोश्रृङ्गं किञ्च तत्? शिखिपिच्छकाग्रं शिखी मयूरस्तस्य पिच्छकाग्रं च यवधान्ययोस्तुषाः । बीजं कार्पासजं कर्पासास्थि च कुथिता च। माला शिवस्य निर्माल्यमिति ॥ ३८५—३८६ ॥

कपोतविट् ( कबूतर की विष्ठा ), मनुष्यों के बाल, गौ का सींग, मोरपंख का अग्रभाग, जौ के तुष, धान्यतुष, कपास के बिनौले, व्युषित शिवनिर्माल्य इन औषधियों को एकत्र मिश्रितकर सर्पयुक्त मकान में धूपन करें। इस अगद से सांप तथा चूहे नष्ट होते हैं ॥ ३८५—३८६ ॥

इदानीं आस्तीकनामागदमाह—

श्लेष्मान्तकत्वक् क्षवकं गुडूची-
नृपद्रुमत्वक्बृहतीद्वयं च ।
एषोऽगदः सर्वविषापहः स्याद्-
आस्तीकनाम्ना मुनिना प्रणीतः ॥ ३८७ ॥

श्लेष्मान्तको बहुवारकस्तस्य त्वक् । क्षवकं राजकाकारं पारियात्रे प्रसिद्धम् । गुडूची अमृता । नृपद्रुमः किरमालकस्तस्य त्वक् । बृहतीद्वयं स्थूलफला चणकबृहती च । एष पूर्वोक्तैर्द्रव्यैरगदः सर्वविषापहः स्यात् भवेत् । सर्वाणि स्थावरजङ्गमकृत्रिमाख्यानि विषाणि अपहन्तीति । आस्तीको नाम मुनिस्तेन प्रणीतं कथितमिति ॥३८७॥

आस्तीकागदः—लसूड़े की छाल, क्षवक ( हांचिया ), गिलोय, अमलतासवृक्ष की छाल, छोटी कटेरी, बड़ी कटेरी, इनके चूर्णों को एकत्र समपरिमाण में मिश्रित करें। इसके प्रयोग से सर्पविष नष्ट होता है । आस्तीकमुनि ने इस अगद का निर्माण किया था ॥ ३८७ ॥

इदानीं मूषिकाविषचिकित्सितमाह—

कुष्ठं वचा मदनकोशवतीफले च
संयोजितं तदिति चूर्णमिदं चतुर्णाम् ।
गोमूत्रपीतमखिलाखुविषं निहन्ति
कोशातकीक्वथनमापिबतोऽथवापि ॥ ३८८ ॥

इदं कुष्ठादीनां चतुर्णां चूर्णं गोमूत्रेण पीतं आखवो मूषिका अखिलाश्च ते आखवश्च अखिलाखवः । तेषां अष्टादशानां मूषिकाणां विषं निहन्यादिति । कुष्ठं रुक् । वचा उग्रगन्धा । मदनं राठफलम् । कोशवतीफलम् देवदालिः । अथवेति योगान्तरमाह–अथवा कोशातकीक्वथनमापिबतोऽखिलाखुविषं निहन्यात् । कोशातकी देवदाली । तस्याः क्वथनं क्वाथं आसमन्तात् पिबतोऽखिलमूषिकविषं निहन्यादिति ॥ ३८८ ॥

कुठ, वच, मैनफल, कोशवती ( देवदाली, घग्घरवेल ) इन चारों ओषधियो के चूर्णों को समपरिमाण में मिला गोमूत्र के साथ पीने से अथवा केवल कोशातकी ( कड़वी तुरई ) के क्वाथ को पीने से सम्पूर्ण मूषिक विष नष्ट होते हैं ॥ ३८८ ॥

अधुना अलर्कविषचिकित्सतमवोचत्—

तैलार्कदुग्धपललैः सगुडैरमीभि-
योगः समैरिति चतुर्भिरलर्कदष्टे ।
स्यात्सारमेयविषहा शरपुङ्खजो वा
धत्तूरबीजयुतपिष्टकपूपली वा ॥ ३८९ ॥

अलर्कः कुक्कुरस्तेन दष्टस्तस्मिन् तैलादिभिश्चतुर्भिः समैरमीभिर्योगः स्यात् तैलं तिलतैलं, अर्कदुग्धमर्कक्षीरम् । पललं तिलानां चूर्णं सगुडैर्गुडसहितैः । शरपुंखायाः धत्तूरबीजैश्च तन्दुलपिष्टकपूपली वा । सारमेयविषहा स्यात् । सारमेयः कुक्कुरस्तस्य विषं तद्धन्तीति ।

इति तीसटसुतचन्द्रटविरचितायां चिकित्साकलिकाटीकायां
विषतन्त्रं समाप्तम् ॥

तिलतैल, मदार का दूध, पलल ( तिलपिष्टक ), गुड; इन चारों को समपरिमाण में मिलाकर अलर्कदष्ट ( जिस को कुत्ते ने काटा है ) पुरुष को सेवन कराना चाहिये । अथवा शरपुंखा (सरफोंका) की जड़ का चूर्ण या धत्तूरबीजमिश्रित चांवलों के आटे से बनाई हुई पूपली के सेवन से कुत्ते का विष नष्ट होता है ॥ ३८९ ॥

## अथ रसायनतन्त्रम् ।

इदानीं विषतन्त्रानन्तरं यथोद्देशं रसायनाधिकारः—

अथ किमिदं रसायनं नाम ? उच्यते । रसादीनां शुक्रान्तानां धातूनामयनमाप्यायनं रसायनम् । तदर्थं तन्त्रं रसायनतन्त्रम् । तत्तु द्विविधम् । कुटीप्रावेशिकं वातातपिकं च । पुनश्च त्रिविधम् काम्यं नैमित्तिकमाजस्रकं च । तच्च पूर्वे वयसि मध्ये वा स्निग्धशुद्धशरीरस्य कर्त्तव्यं सुश्रुतात्—"पूर्वे वयसि मध्ये वा मनुष्यस्य रसायनम् । प्रयुञ्जीत भिषक् प्राज्ञः स्निग्धशुद्धतनोः सदा" इति । तत्तु महाप्रभावानामौषधीनां भल्लातकशिलाजतुपिप्पलीगुग्गुलुरसोनसुवर्णामलकादीनामुपयोगात् भवतीत्याह—

सततमरुष्करपिप्पलिवृद्धिर्वपुषि निरामयतां विदधाति ।
कनकशिलाजतुगुग्गुलुधात्रीफललशुनत्रिफलाविधयश्च ॥ ३९० ॥

अरुष्करं च पिप्पली च अरुष्करपिप्पल्यौ तयोर्वृद्धिर्वपुषि शरीरे निरामयतामारोग्यं विदधाति करोति । सततमनवरतमरुष्करं भल्लातकम् । पिप्पली मागधिका । तयोर्वृद्धिः पूर्वोक्ता । कनकादीनां विधयश्चरकसुश्रुताचार्य्यप्रभृतिभिर्विस्तरेणोक्ताः । इह बहुग्रन्थभयान्नोक्ताः । कनकं सुवर्णम् । धात्रीफलं आमलकम् । कनकादीनामपि विधयो वपुषि निरामयतां विदधतीति ॥ ३९० ॥

भल्लातकवर्धमान, पिप्पलीवर्धमान, सुवर्ण, विशुद्ध शिलाजीत, विशुद्ध गुग्गुलु, आंवले, लशुन ( लहसन ), त्रिफला; इनका चरक, सुश्रुत एवं वृद्धवाग्भट आदि में कहे विधान के अनुसार प्रयोग करने से शरीर रोगरहित होजाता है ॥ ३९० ॥

इदानीं हस्तिकर्णप्रयोगमाह—

घृतमधुदुग्धपयोदधिमण्डै-
रुषसि कृतः करिकर्णपलाशः ।
स्थगयति हि स्थिरतां स्थविराणा-
मपि विदधाति वपुर्बलवत्ताम् ॥ ३९१ ॥

करिकर्णपलाशो हस्तिकर्णः । स घृतादिभिः कृतः उषसि प्रभाते स्थविराणां वृद्धानां स्थगयति । काम् ? स्थिरतां स्थविरताम् । बलवत्तां च विदधाति । बलवतो भावो बलवत्ता । वपुषि बलवत्ता । तामपि विदधाति करोतीति ॥ ३९१ ॥

हस्तिकर्णपलाश की जड़ की छाल के चूर्ण को प्रभातकाल में घी, मधु, दूध, जल, दही, मण्ड; इनमें से किसी एक अनुपान के साथ सेवन कराने से वृद्धों का वार्धक्य नष्ट होता है और शरीर में बल उत्पन्न होता है ॥ ३९१ ॥

अधुना एरण्डतैलादीनां प्रयोगमवोचत्—

एरण्डतैलमथ निम्बफलास्थितैल-
मेद्रसायनमनामयकायकारि ।
ज्योतिष्मतीफलपलाशफलोद्भवं च
तैलं वलीपलितहारि भिषक् प्रदिष्टम् ॥ ३९२ ॥

एरण्डतैलं निम्बफलास्थितैलञ्चोपयुक्तं नस्यपानादिभिरनामयकायकारि निर्विकारशरीरकारि रसायनम् । ज्योतिष्मती कंगुणिका ।

तस्याश्च फलतैलं पलाशफलोद्भवं तैलं वलीपलितहारि भिषग्भिः प्रदिष्टं नस्यपानादिविधिनेति ॥ ३९२ ॥

एरण्डतैल एवं नीम के बीजों का तैल, नस्य; पान आदि के द्वारा रसायन तथा आरोग्यकारक है। ज्योतिष्मतीफलतैल (मालकंगनी के बीजों का तैल) एवं ढाक के बीजों का तैल नस्य तथा पान आदि द्वारा वलीपलित को नष्ट करता है॥ ३९२ ॥

साम्प्रतमामलकप्रयोगमाचक्षते—

धात्रीफलानि पयसासनवारिणा च
स्विन्नानि यः शिशिरकालसमुद्भवानि।
निष्केवलान्यथ तिलैरसितैः समानि
खादेदनामयवपुः स पुमान् शतायुः ॥ ३९३ ॥

धात्रीफलान्यामलकानि । शिशिरकालसमुद्भवानि पयसा दुग्धेन। असनो बीजकस्तस्य वारि जलं तेन स्विन्नानि। केवलान्यथवा तिलैरसितैः समानि तुल्यानि खादेत्। स पुमान् पुरुषः शतायुरनामयमारोग्यम्। वपुः शरीरं यस्य स तथा भवति ॥ ३९३ ॥

जो पुरुष शिशिर काल में उत्पन्न हुए २ तथा बिजैसार के क्वाथ से स्विन्न केवल आंवलों को ही दूध के साथ खाता है अथवा तिल तथा आंवलों को सम परिमाण में मिलाकर सेवन करता है वह नीरोग शरीर युक्त तथा शतायु होता है॥३९३॥

इदानीं सुवर्णप्रयोगमाह—

ससितया वचयामलकैरथ
त्रिफलयाथ घृतव्यतिमिश्रया।
कनकजातरजः सततं कृतं
परमिदं हि रसायनमुच्यते ॥ ३९४ ॥

कनकं सुवर्णम्। तस्य रजश्चूर्णम्। सितया खण्डेन वचया श्वेतया वचया सहकृतमुपयुक्तम्। अथवामलकैः सहकृतम्। अथवा त्रिफलया सह घृतव्यतिमिश्रया कृतम्। कनकरजः सततं नित्यं परमुत्कृष्टमिदं-रसायनमुच्यते पूर्वाचार्यैरिति शेषः ॥ ३९४ ॥

इति तीसटसुतचन्द्रटविरचितायां चिकित्साकलिकाटीकायां
रसायनतन्त्रं समाप्तम्।

सुवर्ण भस्म को खांड तथा वचा चूर्ण के साथ अथवा आंवलों के चूर्ण के साथ अथवा त्रिफला तथा घृत के साथ निरन्तर सेवन करना रसायन है। स्वर्ण भस्म की मात्रा अष्टमांश रत्ती से चतुर्थांश रत्ती तक ॥ ३९४ ॥

*इति आयुर्वेदाचार्य श्रीजयदेव विद्यालंकार विरचितायां*

*परिमलाख्यायां चिकित्साकलिकाव्याख्यायां*

*रसायनतन्त्रं समाप्तम् ।*

——:o:——

## अथ वाजीकरणतन्त्रम् ।

रसायनतन्त्रमभिधायेदानीं यथोद्देशं वाजीकरणतन्त्रं प्रारभ्यते—

वाजशब्देन शुक्रमुच्यते । अवाजिनो वाजिनः क्रियन्त इति वाजीकरणम् । तदर्थं तन्त्रं वाजीकरणतन्त्रम् । तच्च मधुरस्निग्धबृंहणीयानि बलवतो हर्षकारिणीभिः शतावरीनागबलाविदारिकादिभिरुपयुक्तानि भवन्तीत्याह—

शतावरीनागबलाविदारिका-
त्रिकण्टकैरामलकीफलान्वितैः ।
विचूर्णितैः पञ्चभिरेकशः पृथक्
प्रकल्पितैर्वा घृतमाक्षिकप्लुतैः ॥ ३९५ ॥

इति प्रयोगाः षडिमे भिषग्वरैरुदीरिता शर्करया समायुताः ।
नृणामनेकप्रमदाः प्रसर्पताम्प्रधानधातोरतिरेककारिणः[1] ॥ ३९६ ॥

शतवार्यादिभिः पञ्चभिः विचूर्णितैः घृतमाक्षिकप्लुतैः पृथक् कल्पितैरिमे पञ्चयोगा भवन्ति । पञ्चभिस्त्वेकशः एकीकृतैः प्रयोगः इति षट् प्रयोगाः । शर्करया समायुताः भिषजां वराः श्रेष्ठा भिषग्वराः तैरुदीरिताः कथिताः । केषां ? नृणां प्राणिनां अनेकप्रमदाः स्त्रियः प्रसर्पतां गच्छतां प्रधानधातोरतिरेककारिणः । शतावरी बहुपुत्रिका । नागबला गोपालसकारिका । विदारीक्षुविदारिका प्रसिद्धा । त्रिकण्टको गोक्षुरक इति ॥ ३९५—३९६ ॥

---

१—रविरेककारिण इति पाठान्तरम् ।

शतावर, नागबला, विदारीकन्द, गोखरू, आंवला; इन पांच औषधियों के चूर्ण को पृथक् २ खांड के साथ मिश्रित कर अथवा पांचों के चूर्णों को एकत्र मिश्रित कर खांड मिला घी और मधु के साथ सेवन करना चाहिये। ये छहों योग अनेक स्त्री गमन करने वाले पुरुषों के वीर्यवृद्धि को बढ़ाने वाले हैं ॥ ३९५-३९६ ॥

इदानीं चतुरो वाजीकरणयोगानाह—

सघृतमधु बलात्रयस्य चूर्णं समधुसितायुतमुच्चटोद्भवञ्च ।
समधुकमथ मुद्गमाषपर्ण्योरमृतलतामलकत्रिकण्टकोत्थम् ॥ ३९७॥
इति कथितमिदं हि पुष्पिताग्रा-
चरणचतुष्टयवेष्टनेन शिष्टैः ।
अभिमतमसकृद्व्यवायभाजा-
मिह खलु योगचतुष्कमाविकल्प्य ॥ ३९८ ॥

बलातिबलानागबला बलात्रयम् तस्य चूर्णं सह घृतमधुभ्यां सघृतमध्वित्येको योगः। उच्चटाया उद्भवो यस्य चूर्णस्य तदुच्चटोद्भवं चूर्णं कृतं मधुसिताभिः सहेति द्वितीयो योगः। मुद्गपर्णी च माषपर्णी च मुद्गमाषपर्ण्यौ तयोश्च मधुना सह समधुकमिति तृतीयो योगः। अमृतलता गुडूची। गुडूच्या मलकत्रिकण्टकेभ्यः उत्थितं चूर्णं समधुकं मधुसंयुक्तमिति चतुर्थोऽयं योगः। इदमित्यनेन प्रकारेण प्रकल्प्य योगचतुष्कं कथितं शिष्टैः पण्डितैः विप्रैः। पुष्पिताग्रा छन्दोविशेषः तस्याश्चरणचतुष्टयं तेन वेष्टनं तेन बन्धनम् तेन। असकृद् वारं वारं व्यवायं मैथुनं भजन्ति ये। तेऽसकृद् व्यवायभाजः तेषां योगचतुष्कमिहाभिमतमिति ॥३९७-३९८॥

१—बला, अतिबला, नागबला; इन तीनों के चूर्ण को घृत और मधु के साथ। २—उच्चटा ( गुञ्जामूल, घुंघची की जड़ ) के चूर्ण को खांड और शहद के साथ। ३—मुद्गपर्णी तथा माषपर्णी के चूर्ण को मधुक ( मुलहठी अथवा मधु ) के साथ। ४—गिलोय, आंवला, गोखरू; इनके चूर्ण को शहद के साथ सेवन करना चाहिये। ये पुष्पिताग्रा छन्द के चारों पादों में कहे हुए चारों योग बहुमैथुन सेवी पुरुषों को सेवन करने चाहिये ॥ ३९७—३९८ ॥

इदानीं कृतशरीरशुद्धिः वाजीकरणेऽधिक्रियते इत्याह—

पिबति यः पयसा कृतशोधन-
स्त्रिकटकं मधुकं बहुपुत्रिकाम् ।

अतिबलामथ नागबलां बला-
मिह हि नागबलः स पुमान् भवेत् ॥ ३९९ ॥

एषा चिकित्साकलिका सदर्थ-
गन्धा भिषक्षट्पदवृन्दसेव्या ।
निरूपिता वृत्तशतैश्चतुर्भि-
र्योगैः स्रगब्जैरिव तीसटेन ॥ ४०० ॥

जातैर्विशाला बहुसुश्रुतादि-
शास्त्रोदधौ योगविशेषरत्नैः ।
आस्तां चिरं सद्गुणकण्ठिकेव
कण्ठस्थिता वैद्यमहीपतीनाम् ॥ ४०१ ॥

इति तीसट विरचिता चिकित्साकलिका समाप्ता ।

यः पुमान् कृतसंशोधनः कृतशरीरशुद्धिर्वमनविरेकादिभिः । त्रिकण्टकं गोक्षुरकम् । मधुकं यष्टीमधु । बहुपुत्रिका शतावरी । अतिबलां अथ नागबलां बलां च पयसा क्षीरेण पिबति यः स नागबलः कुञ्जरबलो बाह्येन शरीरोपचयादिना आभ्यन्तरेण प्राणोदितबलेन द्विविधेनापि संयुतो भवेदिह लोके ॥ ३९९—४०१ ॥

चिकित्साकलिकाटीकां योगरत्नसमुच्चयम् ।
सुश्रुते पाठशुद्धिश्च तृतीयां चन्द्रटो व्यधात् ॥ १ ॥
पुण्यं यदाप्तवान् लोके चन्द्रटो भिषजां मतः ।
आरोग्यं तेन गच्छन्तु सन्तः सन्मार्गिगामिनः ॥ २ ॥

इति तीसटसुतचन्द्रटविरचितायां चिकित्साकलिकाटीकायां
वाजीकरणतन्त्रं समाप्तम् ॥

जो मनुष्य वमन आदि द्वारा शरीर की शुद्धि करके गोखरू, मुलहठी, शतावर, अतिबला, नागबला, बला; इनके चूर्ण को आधा तोला परिमाण में दूध के साथ पीता है वह निश्चय से हाथी के समान बलयुक्त होता है ॥ ३९९ ॥

लसत्परिमलोपेता चिकित्साकलिकात्वियम् ।
स्वल्पश्रुतानां भिषजां करमालायतां सदा ॥

*इति आयुर्वेदाचार्य्येण जयदेव विद्यालंकारेण*
*प्रणीतायां परिलाख्यायां व्याख्यायां*
*वाजीकरणतन्त्रं समाप्तम् ।*

यावता शेषनागेन ध्रियते शिरसा रसा ।
वाच्यमानं बुधैस्तावज्जीयात्पुस्तकमुत्तमम् ॥

॥ इति शम् ॥

हिन्दी प्रेस रेलवेरोड लाहौर में छपी ।

# शुद्धिपत्रम् ।

| अशुद्धपाठाः | पृष्ठांकाः | पंक्त्यंकाः | शुद्धपाठाः |
|---|---|---|---|
| स | ७ | ६ | से |
| अतिशुद्ध | १३ | १ | अविशुद्ध |
| व्यपायश्रं | २९ | १७ | व्यपाश्रयं |
| स्थिता | ३१ | ७ | स्थितौ |
| स्वलक्षणीमति | ३२ | २९ | स्वलक्षणमिति |
| कीर्तितोस्तास्तु | ३३ | ११ | कीर्तितास्तास्तु |
| दक्षिणयो | ४८ | १५ | दक्षिणयोः |
| चान्तरेग्न | ४८ | २२ | चान्तरग्ने |
| भद | ४८ | २६ | भेद |
| सर्वेत्रस्मि | ५२ | १४ | सर्वत्रास्मि |
| वायु | ५३ | १२ | वायुः |
| त्रुटि | ५६ | १६ | तृटि |
| त्रुटिः | ५६ | २४ | तृटिः |
| तावकफौ | ६१ | २८ | वातकफौ |
| नतरं | ६७ | २० | नन्तरं |
| वास | ७२ | १ | वासक |
| त्रो स्ति | ७७ | १९ | त्रो वस्ति |
| विल्बं | ७८ | २३ | बिल्वं |
| सितरक्त | ८४ | १७ | सितषष्टिकरक्त |
| ञ्चम् | ८६ | ७ | ञ्च |
| श्थ | ८६ | ९ | थ्य |
| दिति | १०२ | १८ | दति |
| सकलिंगकैः | १०७ | १५ | कलिंगकैः |
| गुरुणोः | ११९ | २५ | गुरुणः |
| इत्याभिः | १२० | २८ | इत्येभिः |
| तास्त्रि | १२१ | २७ | ता त्रि |
| व्याख्यायां | १२२ | १७ | व्याख्याया- |
| दुबर्ल | १२४ | २३ | दुर्बल |
| विप्पलीमूल | १२५ | ८ | पिप्पलीमूल |
| एतत् | १४१ | १७ | एते |
| पीत | १४२ | ७ | पीतं |

| अशुद्धपाठाः | पृष्ठांकाः | पंक्त्यंकाः | शुद्धपाठाः |
|---|---|---|---|
| मत्यः | १४६ | २७ | मर्त्यः |
| स्यविरदारुकं | १५० | १५ | स्थविरदारुकं |
| प्रमाणाम | १५० | २८ | प्रमाणमि |
| प्रयोजितं | १५६ | १६ | प्रयोजितः |
| प्रेमह | १५८ | २ | प्रमेह |
| द्वासप्तत्याधकानि | १५८ | १६ | द्वासप्तत्यधिकानि |
| डाल बहेड़े | १६० | ८ | डाल मुख बन्द कर बहेड़े |
| नागकसेराम् | १६३ | ७ | नागकेसराणाम् |
| ष्याघ्री | १६५ | ६ | व्याघ्री |
| डलाजा | १६९ | २४ | लाजा |
| सपरिमाण | १७१ | ६ | समपरिमाण |
| योगद्वम० | १७१ | १७ | योगद्वयम |
| तिन्तडीक | १७४ | २ | तिन्तिडीक |
| प्रतिहता | १७५ | २१ | प्रतिहतो |
| मुन्मदिनां | १८२ | १९ | मुन्मादिनां |
| गुटिकाकाह | १८३ | २७ | गुटिकामाह |
| अमलकी | १८७ | १८ | आमलकी |
| वातसृक् | १८९ | १७ | वातासृक् |
| श्मजश्मेति | १९१ | २१ | श्मजत्येति |
| कुष्ठषु | १९५ | २५ | कुष्ठिषु |
| द्वे | २०२ | ४ | द्वौ |
| कारेण | २०२ | १० | कारणेन |
| पित्ताश्लेष्म | २०६ | ३ | पित्तश्लेष्म |
| पचे तैल | २१० | २६ | पचेत्तैलं |
| तैल | २११ | ६ | तैलं |
| गण्डूक० | २१३ | १७ | गण्डूषक० |
| तुम्बे | २१८ | १३ | तुम्बै |
| बस्ती | २२२ | १८ | बस्तिः |
| मन्यते | २२२ | २७ | मन्यन्ते |
| स्वग्निमान्द | २२४ | १८ | स्वग्निमान्द्य |
| भीरुजन | २२७ | ६ | भीरुजेन |
| परादिभिः | २३२ | १ | पराशरादिभिः |
| तन्मासं | २३४ | १४ | तन्मांसं |

| अशुद्धपाठाः | पृष्ठांकाः | पंक्त्यंकाः | शुद्धपाठाः |
|---|---|---|---|
| द्रम्माद्ध | २३७ | १४ | द्रम्मार्द्ध |
| गुंणं | २४० | २५ | गुंण |
| रुर्ध्वाधः | २४१ | ११ | रूर्ध्वाधः |
| कुष्टम् | २४३ | ११ | कुष्ठम् |
| गुग्गुदलैः | २४४ | १६ | गुग्गुलुदलैः |
| शर्मार्थमिति | २४५ | १८ | शमार्थमिति |
| वारणाकणे | २४५ | २० | वारणकणे |
| तिसारक | २४५ | २१ | तिसारके |
| मधुके | २४६ | २६ | मधु के साथ |
| वीजं | २४८ | १७ | बीजं |
| मेदद्र | २५१ | २४ | मेतद्र |
| यानि | २५३ | ११ | याभिः |
| विदारिकादिभिरु | २५३ | ११ | विदारिकादिभिरोषधीभिरु |
| युक्तानि | २५३ | १२ | युक्ताभिः |
| भवन्तीत्याह | २५३ | १२ | भवतीत्याह |
| योगागाह | २५४ | ५ | योगानाह |
| कृत | २५४ | १४ | कृतं |
| स्रगब्जै | २५५ | ६ | स्रगब्जै |
| सन्मार्गि | २५५ | २० | सन्मार्ग |
| परिला | २५६ | ४ | परिमला |

——:०:——

## कृतज्ञता प्रकाशनम्

अस्य ग्रन्थस्य मुद्रापणाय यैर्महोदयैः पुस्तकानि प्रहितानि, तेषां नामानि कृतज्ञताप्रकाशनार्थं लिख्यन्ते ।

(१) वैद्यवर्य यादवजी त्रिविक्रम जी आचार्य, बम्बई ।

(२) वेदान्त कोविद त्रिवेदी मणिशंकर मगनलाल अयोची ।
पाटण, उत्तर गुजरात ।

(३) स्वर्गीय श्रीयुक्त मणिलाल बकोरभाई, गोधरा, गुजरात ।

(४) पण्डित शिवदास शर्मा, लाहौर ।

# रसतरङ्गिणी

अयि आयुर्वेदीयनवनवाविष्कारप्रणयिनो भिषङ्मणयः! नैतन्न विदिततरं तत्र भवतां भवतां यत्सूत्ररूपेण समाम्नातानां प्राचीनानामार्षतन्त्राणां कियद्दुरधिगमत्वम्। किञ्च अनारतप्रबलप्रयासेन विदितानामपि तत्तद्विशिष्टगुणप्रयोगादिनिरूपणविरहेण कियत्प्रयोजनसाफल्यमिदानीन्तनानामायुर्वेदीयविद्यार्थिनां चिकित्सकानां च। इमामेव न्यूनतामवलोकयद्भिः श्रीमद्भिः सदानन्द शर्मभिः प्राणाचार्यैः प्रणीतः सरलया सुरभारत्या सुललितैश्च पद्यैः क्वचिच्छ्रुतिमधुराभिश्च गीतिकाभिरुपनिबद्धः, लवपुरीय मित्रौषधालयाध्यक्षवर्यैः कविराज नरेन्द्रनाथ मित्रमहोदयैः प्रकाशितोऽयं ग्रन्थः। येन सुकुमारधियोऽपि आयुर्वेदाध्येतारः प्राचीनानां रसतन्त्राणां नवनवाविष्काराणां च रहस्यमनायासेनैवाधिगन्तुं पारयेयुः। अस्मिंश्च ग्रन्थे रसोपरसधातूपधातुरत्नोपरत्नविषोपविषाणां मृगशृंगशंखादिकानां जान्तवपदार्थानां, टंकणादिकानां क्षारविशेषाणां स्वानुभूता नवाविष्कृताश्च शोधनमारणविधयः, गुणाः, मात्राः, आमयिकप्रयोगाश्च सविस्तरं निर्दिष्टाः। तथा चास्मिन् प्राचीनरसतन्त्रानिर्दिष्टा नवाविष्कृताः सुवर्णलवण-सोरकाम्लीयरजत-आरनालीयकसीसकद्रव-टंकणाम्लादयोऽप्युपयोगिनो योगा अपि सविस्तरं प्रदर्शिताः।

मनोहरावरणपट्टबद्धस्यास्य पुस्तकस्य मूल्यम् ५) पञ्चरूप्यकाणि प्रेषणव्ययवर्जम्।

## "रसतरङ्गिण्या आयुर्वेदीयसंसारे समादरः"

१–"हरिद्वारनिटकटवर्त्ति-कांगड़ीप्रदेशस्थ-गुरुकुलविश्वविद्यालयाचार्यवर्यैः स्वकीयायामायुर्वेदालंकारोपाधिपरीक्षायां रससुधां पाययितुमियं पाठ्यपुस्तकत्वेन समादृता" इत्येतावतैवास्याः सौष्ठवमध्यवसेयम्। २–तर्कतीर्थविरुदभाजां कविराज श्रीमाधवचन्द्र भट्टाचार्य महोदयानां कलिकाता निवासिनां सम्मतिः—"शास्त्रि श्रीमत्सदानन्दशर्म्मणा विरचितां श्रीमन्नरेन्द्रनाथमित्र महोदयेन च प्रकाशितां रसतरंगिणीमवगाह्य नितरां प्रीताः स्मः। ग्रन्थोऽयं नवीनोऽपि रचनापाटवेन प्राचीनायते। अहोभाग्यं यदद्याप्येवं गुणोपेतः पण्डितो भारतभूमिमलंकरोति, आर्यशास्त्रकलेवरं च पुष्णाति। ग्रन्थोऽयं शैलीसौष्ठवेन रसतन्त्राध्येतॄणामत्युपयोगीति सानन्दमकपटं विज्ञापयाम इत्यादिः।

३–जर्मनीदेशान्तर्गतवुर्ज़्वर्गनगरवास्तव्यानां वुर्ज़्वर्गविश्वविद्यालयसंस्कृताध्यापकानां डा. जे. जौली पी. एच. डी. महोदयानामभिप्रायः–"रसतरंगिणीनामकं मनोहारि पुस्तकं यथासमयमधिगम्य सुतरां प्रसन्नो विशदीकरोमि धन्यवादाननेकान्। आयुर्वेदानुशीलनं यत्राहं महान्तं स्वरसं दधे अद्यापि प्रवर्तते एवंविधानुत्कृष्टान् प्रबन्धान् प्रसूते चेति महन्मे प्रमोदस्थानम्। आशासे भवन्तोऽस्मिन् विशिष्टक्षेत्रे निरन्तरमध्यवसायशीला भविष्यन्ति।" (आंग्लभाषातोऽनूदितः)

पुस्तकप्राप्तिस्थानम्—

कविराज नरेन्द्रनाथ मित्र,

मित्र औषधालय, लाहौर।